माध्यन्दिनसंहितायाः पञ्चदशाध्यायेषु (१-१५) प्रयुक्तानां विशिष्टपदानां समालोचनात्मकमनुशीलनम्

(A STUDY OF THE IMPORTANT VEDIC TERMS USED IN THE FIFTEEN ADHYĀYAS (1-15) OF THE MĀDHYANDINA—SAṀHITĀ)

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य
विद्यावारिधि-(*DOCTOR OF PHILOSOPHY*)-शोधोपाधये
प्रस्तुतः शोधप्रबन्धः

निर्देशकः
प्रो० युगलकिशोरमिश्रः
आचार्यः, एम० ए०, पीएच० डी०,
आचार्योऽध्यक्षश्च-वेदविभागस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः
वाराणसी

प्रस्तुतकर्ता
मणिलाल[illegible]र्मोपाध्यायः
वेदाचार्यः, ज्योतिषाचार्यः
सहप्राध्यापकः
श्रीनन्दलालबाजोरियासंस्कृतमहाविद्यालयः
वाराणसी
पञ्जीकरणसंख्या—६७०।२१७१

जनवरी १९८७

EXTERNAL

T.R/55

माध्यन्दिनसंहितायाः पञ्चदशाध्यायेषु (१-१५) प्रयुक्तानां विशिष्टपदानां समालोचनात्मकमनुशीलनम्

(*A STUDY OF THE IMPORTANT VEDIC TERMS USED IN THE FIFTEEN ADHYĀYAS (1-15) OF THE MĀDHYANDINA—SAṀHITĀ*)

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य
विद्यावारिधि-(*DOCTOR OF PHILOSOPHY*)-शोधोपाधये
प्रस्तुतः शोधप्रबन्धः

निर्देशकः
प्रो० युगलकिशोरमिश्रः
आचार्यः, एम० ए०, पीएच० डी०,
आचार्योऽध्यक्षश्च-वेदविभागस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः
वाराणसी

प्रस्तुतकर्त्ता
मणिलालशर्मोपाध्यायः
वेदाचार्यः, ज्योतिषाचार्यः
सहप्राध्यापकः
श्रीनन्दलालबाजोरियासंस्कृतमहाविद्यालयः
वाराणसी
पञ्जीकरणसंख्या—६७०।२१७१

जनवरी १९८७

मंगलम्

इदं मे ब्रह्म च क्षत्रं चोभे श्रियमश्नुताम् ।
मयि देवा दधतु श्रियमुत्तमां तस्यै ते स्वाहा ।।

— शुक्लयजुर्वेदे माध्यन्दिनसंहितायाम् 32/16.

हे देवाः, मदीयमिदं ज्ञानप्रकाशकं लोकसंरक्षणपरं च कृत्यमस्ति । तदेतेन द्वे अपि श्रियमुपजीवताम् । भवन्तो मयि उत्तमां श्रियं स्थापयन्तु ।

हे परमेश्वर, इदं तुभ्यं, तव परशक्त्यै च तस्यै समर्प्यते ।

प्रतिज्ञप्तिः

"माध्यन्दिनसंहितायाः पञ्चदशाध्यायेषु (1-15) प्रयुक्तानां विशिष्टपदानां समालोचनात्मकमनुशीलनम्" इत्याख्यः शोधप्रबन्धोऽयं मया सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य वेदविभागेऽध्यक्षाणाम् आचार्य-श्रीयुगल-किशोरमिश्रमहोदयानां निर्देशने यथानियमं शोधकार्यं कृत्वा विरचितः । अस्य विरचयिताऽहं प्रतिजाने यदिदं मदीयं शोधकार्यं मौलिकमस्ति, शोधकार्यरूपेण चास्य प्रस्तुतिरितः पूर्वं कुत्रापि पूर्णतोंऽशतो वा न कृतेति च ।

मणिलालशर्मोपाध्यायः

(मणिलालशर्मोपाध्यायः)
अनुसन्धाता

अग्रसारणा

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये श्रीमणिलालशर्मोपाध्याय-महोदयोऽनुसन्धाता पञ्जीकरणमवाप्य "माध्यन्दिनसंहितायाः पञ्चदशाध्यायेषु (1-15) प्रयुक्तानां विशिष्टपदानां समालोचनात्मकमनुशीलनम्" इति विषय-मधिकृत्य शोधप्रबन्धमिमंमन्निर्देशने समारचितवान् । शुक्लयजुर्वेदस्य माध्यन्दिन-संहितायाः निर्धारितभागस्थ विशिष्टपदानां भाष्यकोशादिदृष्ट्यार्थसमालोचनेन भाषाशैल्योस्सन्तोषार्हतया च विद्यावारिध्युपाधये प्रस्तुत्यर्हं शोधप्रबन्धमिमं मन्वानोऽग्रेसारयति ।

युगलकिशोरमिश्रः
29/1/87

(डा० युगलकिशोरमिश्रः)
आचार्योऽध्यक्षश्च, वेदविभागस्य,
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालय
वाराणसी।

विषयानुक्रमः

{संक्षिप्तः}

प्रागुक्तिः

अस्य लोकस्य सर्वा अपि प्रवृत्तिः परस्परं सहयोगभावनयैव प्रसरति । सति सहस्रभानोः प्रकाशे प्रवर्तन्ते चक्षूंषि रूपदर्शने, जनाः स्वस्वव्यापारेषु । एवमेव सद्गुरूणां मित्राणाञ्च सति सहयोगे प्रवर्त्तन्ते मनुष्याणां महनीयानि कार्याणि । अज्ञानतिमिरान्धानां ज्ञानाञ्जनशलाकया चक्षुरुन्मीलनं सद्गुरुभिरेव विधीयते । ते हि गुरवो ज्ञानदीपेन शिष्यमानसान्धकारं परिहरन्ति, तान् सत्कार्येषु प्रेरयन्ति, आपतितेष्वन्तरायसमूहेषु तानुद्धृत्य जीवयन्ति, तेषां जीवनं च सार्थकं कुर्वन्ति ।

इदमस्ति मदीयं जीवने नुभवसारम् । नेपालदेशे लब्धजनिरहं प्राक्तनपुण्योदयाद्विद्याधिपतेः काशीसनाथस्य विश्वनाथस्य पुण्यनगर्यां प्राप्य क्रमेण तेषां तेषां सद्गुरूणां चरणकमलाश्रयेणाधिगतवेदाचार्योपाधिः सम्प्रति विद्यावारिधिमपि समुत्तितीर्षुरस्मि । तत्राहं पूज्यान् मम वेदगुरून् श्रीदौलतरामगौड-वेणीरामगौड-वंशीधरमिश्रप्रभृतीन्, ततो विशेषतश्च वाराणसेय-संस्कृत-विश्वविद्यालयस्य वेदविभागाध्यक्षपदमलङ्कुर्वतः गुरुवर्यान् वेदविद्वरिष्ठान् विद्वन्मूर्धन्यान् श्रीगोपालचन्द्रमिश्रमहोदयान् सादरं स्मरामि, यैरहं सस्नेहं शुक्लयजुर्वेदस्य सस्वरपाठे पाठने, कर्मकाण्डे च लब्धनैपुण्यो ऽस्मि सम्पादितः । अनन्तरं तावतैव तुष्टस्य मम "आरभेतैव कर्माणि श्रान्तः श्रान्तः पुनः पुनरिति "नीति" स्मारयता सम्प्रति सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य वेदविभागाध्यक्षेण पूज्यपादेन श्रीमता युगलकिशोरमिश्रमहाभागेनाहं विद्यावारिधिप्रवेशव्याजेन वेदविद्यारहस्यपीयूषास्वादने प्रलोभितः कृतार्थश्च विहितः साधु निर्देशनेन चास्मिन्ननुसन्धानस्य दुष्करकार्ये इति तान् प्रति सबहुमानं स्वां कृतज्ञतां ज्ञापयितुमिच्छामि । अनुसन्धानकर्मणि प्रवृत्ते च वैषयिकविवेचन-सज्जीकरणादिविषयक मयि समागतानां समस्यानां समाधाने काशी-हिन्दू-विश्वविद्यालयस्य वेदाध्यापकेन श्रीमता श्रीकिशोरमिश्रमहाभागेनाहं बहूपकृतो ऽस्मि । वाराणसेय-नन्दलालबाजोरिया-

संस्कृत-महाविद्यालयस्य सहायकवेदविभागाध्यक्षपदे अध्यापनकार्ये प्रवृत्तो ऽहं मदुत्कर्षं कामयमानैः सहृदयैर्महाविद्यालयस्य प्रबन्धकमहोदयैः, प्रधानाचार्यैः श्रीमद्भिः श्यामाचरणत्रिवेदिमहोदयैश्च समोदं विद्यावारिध्युपाधिनिमित्तमनुसन्धानकार्ये ऽनुमतिप्रदानेन चानुगृहीतो ऽस्मि । एवमेव अनुसन्धानकार्यप्रसङ्गे विविधग्रन्थालोचनार्थं प्रयतमाने मयि मीरघट्टस्थ-विश्वनाथपुस्तकालयस्य, नन्दलालबाजोरिया-संस्कृत-महाविद्यालयस्य, वाराणसेय-संस्कृत-विश्वविद्यालयस्य, च पुस्तकाध्यक्षैस्तत्तौ विध्यव्यवस्थया ऽनुकम्पितो ऽस्मि । अनेन क्रमेण विद्यावारिध्युपाधये मम पञ्जीकरणादारभ्यास्य अनुसन्धानप्रबन्धस्य लेखनसमाप्तिं यावत् सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्यानुसन्धानसमित्या पञ्जीकरणव्यवस्थयानेकैर्विद्वद्वरैः स्वसम्मतिप्रदानेन, मित्रवर्यैश्च प्रोत्साहनकर्मणा ममोपकारो विहितः । श्रीवल्लभदासशाहभागेन च सम्यगनुसन्धानप्रबन्धस्य टङ्कणकर्मणोपकृतो ऽस्मि, श्रीकाशिराजशर्मसुवेदिमहाशयेन च मित्रवर्येण शास्त्रपर्यालोचने समुपकृतो ऽस्मि । तानेतान् सर्वानपि महानुभावान् प्रति स्वकीयां हार्दिकीं कृतज्ञतां सविनयं प्रकाशयामि तेषां सततं कल्याणं च कामयामि ।

निवेदकः

मणिलालशर्मोपाध्यायः

(मणिलालशर्मोपाध्यायः)

मूलग्रन्थविषयानुक्रमः

॥ विस्तृतः ॥

सवतुश्रीः 307, विश्वेदेवाः 308, असुः 308, रुद्रः 308, वातः 308, गन्धर्वः 309, केतपूः 309, आपिः 310, स्वापिः 310, अपिजः 310, कृतुः 310, वैनंशिनः 311, विनंशिनः 311, सोमः 311, सविता 312, सरस्वती 312, पूषा 312, बृहस्पतिः 312, इन्द्रः 312, घोषः 313, श्लोकः 313, अंशः 313, भगः 314, अर्यमा 314, अपस्यः 314, अपां शिशुः 315, तवस्तरम् 315, सर्पश्रीः 316, आशुशुक्षणिः 216, अदब्धव्रत-प्रमतिः 316, मातरिश्वा 317, शुशुक्वनिः 317, सिनीवाली 317, सुकुरीरा 318, स्वौपशा 318, वैश्वानरः 318, चर्षणीधृत् 319, दब्रन्नः 319, सर्पिरासुतिः 319, रोहिदश्वः 320, इदंमदः 320, बृहदुक्थम् 320, सुरेताः 321, सुपर्णः 321, गरुत्मान् 321, अभ्यावर्तिन् 322, शुक्रज्योतिः 322, सोम-गोपाः 322, वसुः 323, विश्वस्य केतुः 322, भुवनस्य गर्भः 323, उशिक् 324, पावकः 324, अरतिः 324, सुमेधाः 325, मद्रशोचिः 325, अर्णवः 325, नृचक्षाः 326, आरोचने 326, समुद्र-व्यचतम् 326, निर्ऋतिः 327, आयुः 327, निवेशनः 327, सङ्गमनः 328, सत्यधर्मा 328, शुनासीरा 328, गोभाजः 329, चन्द्राः 329, सत्यधर्मा 330, शुक्रम् 330, चन्द्रम् 330, ऋतस्य योनिम् 331, महिषः 331, विभावसुः 331, उक्थ्यम् 331, बृहद्भानुः 332, पावकवर्चाः 332, शुक्रवर्चाः 332, अनूनवर्चाः 332, ऊर्जोनपात् 333,

जातवेदा: 333, ऋतावानम् 333, श्रुत्कर्णम् 333, सप्रथस्तमम् 334, मदिन्तमः 334, अङ्गिरस्तम् 334, हिरण्यगर्भः 335, भ्रमासः 335, पतङ्गाः 335, नियुतः 336, स्वर्षाम् 336, सुपर्णः 336, अग्निः 337, सम्राट् 337, स्वराट् 337, रुक्मः 338, हरः 338, इन्दुः 338, भुरण्युः 339, पूर्वचित्तिः 339, असुरः 339, माया 340, शोकः 340, हेडः 340, सहस्राक्षः 341, विश्वकर्मा 341, विश्वव्यचाः 341, स्वः 342, मतिः 342, विधा 343, वयोनाधाः 343, मूर्धावयः 343, प्रजापतिः 344, क्षत्रं वयः 344, विष्टम्भः 344, अधिपतिः 345, विश्वकर्मा 345, परमेष्ठी 345, ऋभुः 345, ब्रह्मणस्पतिः 346, मनश्छन्दः 346, व्यचश्छन्दः 346, पुरोभ्रजश्छन्दः 346, दूरोहणं छन्दः 347, विधर्ता 347, अधिपतिः 347, वसवः 347, रुद्राः 348, इन्द्रः 348, आदित्याः 348, वरुणः 348, मरुतः 348, सोमः 348, विश्वेदेवाः 349, बृहस्पतिः 349, सेनानीः 349, विश्वकर्मा 349, रथस्वनः 349, रथेचित्रः 350, मेनका 350, विश्वव्यचाः 350, रथप्रोतः 351, असमरथः 351, संयद्वसुः 351, तार्क्ष्यः 352, अरिष्टनेमिः 352, अर्वाग्वसुः 352, सेनजित् 353, सुषेणः 353, वृषभः 353, वृषा 353, गविष्ठिरः 353, जागृविः 354, घृतप्रतीकः 354, दिविस्पृक् 354, अङ्गिरसः 354, गुहाहितः 355, क्षितीनां वसिष्ठः 355, ऊर्जोनपाता 355, वृषा 356, अर्यः 356, चित्रश्रवस्तमः 356.

भूमिका

भूमिका

गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ।
गुरुः साक्षात् परब्रह्म तस्मै श्रीगुरवे नमः ।।

लोकेऽस्मिन् आब्रह्मपिपीलिकान्तानां जीवानां परमभीष्टं वस्तु सुखमस्ति । तच्च सुखं नित्यमनित्यं च । जगति दरीदृश्यमाणानां पदार्थानां स्वानुकूलतया संयोगे समुत्पद्यमानं वियोगे चार्तिजनकं सुखमनित्यम् । जगतः ईश्वरात्मकत्वेन दृढप्रतीतौ सत्यां सर्वं ब्रह्ममयं जगत् पश्यतः शीतोष्णादि-द्वन्द्वसहिष्णोः समलोष्टाश्मकाञ्चनस्याविनाशि सुखं नित्यम् । तच्च नित्य-सुखं धर्मेण प्राप्यते । धर्मश्च वेदमूलः । "वेदोऽखिलो धर्ममूल"मिति मानवाः ।

विश्ववाङ्मये प्राचीनतमा वेदा अस्माकं भारतीयानां सुरगवी-समुपासकानां प्राणा इव रक्षणीयाः सन्ति । ते च वेदा ज्ञानरूपत्वादीश्वरीय-निःश्वासरूपा ईश्वरवन्नित्याः । वेदवाङ्मयः ऋग्वेद-यजुर्वेद-सामवेदाथर्ववेद-रूपेण चतुर्धाऽस्ति विभक्तः । वेदाः अस्याः सृष्टेः प्राचीनतम साहित्यग्रन्थाः, भारतस्य, विश्वस्यापि च प्राचीनतमसंस्कृति ग्रन्था वा सन्ति । अत एव "सा प्रथमा संस्कृतिर्विश्ववारा" इति घोषणं वैदिकसंस्कृतिं विश्वस्यापि सर्वासां प्राचीनानामर्वाचीनानां वा संस्कृतीनामाधारभूतत्वात् सर्वतः प्रथमां द्योतयति ।

वेदानामध्ययनं ब्राह्मणानामनिवार्यं कार्यमस्ति । वेदानामध्ययनं हितपो वर्तते । तपसा पापापनोदः, ततः स्वर्गमोक्षाधिगमश्च भवति । तदुक्तं मनुना –

"वेदाभ्यासो हि विप्रस्य परमं तप उच्यते ।"

"आहैव स नखाग्रेभ्यः परमं तप्यते तपः ।
यः स्रग्व्यपि द्विजोऽधीते स्वाध्यायं शक्तितोऽन्वहम् ।" इति

वेदानामनध्ययनं सर्वथा हितकरं भवति ब्राह्मणानाम् । तदुक्तम् -

"अनाभ्यासेन वेदानामाचारस्य च वर्जनात् ।
आलस्यादन्नदोषाच्च मृत्युर्विप्रान् जिघांसति ।।"

"यो नधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम् ।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः ।।" {मनु०}
इति ।

चत्वारो पि वेदा ऋग्यजुःसामाथर्वाख्याः ज्ञानकर्मोपासनाविषयकत्वात् वचनायान्च पद्यात्मक-गद्यात्मक-गीतात्मकत्वात् त्रिविधत्वेनापि प्रथिताः। अत एव चतुर्भ्यो पि वेदेभ्यो स्ति प्रयुक्तस्त्रयीशब्दः । उक्तन्च मनुना -

"अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम् ।
दुदोह यज्ञसिद्ध्यर्थ ऋग्यजुःसामलक्षणम् ।।" इति

अत एव तुरीयो थर्ववेदो पि त्रयीत्वे एव समायाति । वेदेष्वस्ति द्वितीयो यजुर्वेदः । स च शुक्लकृष्णभेदेन द्विधा विभक्तः । तत्र ब्रह्मसम्प्रदायान्तर्गतः कृष्णयजुर्वेदः, आदित्यसम्प्रदायान्तर्गतः शुक्लयजुर्वेदो स्ति । सम्प्रति शुक्लयजुर्वेदस्य द्वे शाखे उपलभ्येते - एका माध्यन्दिनीयशाखा, वाजसनेयीनाम्नी अपरा काण्वशाखा च । तत्र शुक्लयजुर्वेदस्य माध्यन्दिनीयशाखा आसेतु हिमाचलं प्रसृता बहुजनसमादृता, स्वकीयवाङ्0मयवैभवेन विपुला च । स्वयमधीतायास्तस्या माध्यन्दिनीयसंहितायाः अर्थामृतरसास्वादलिप्सुना मया पन्चदशाध्यायेषु प्रयुक्तानां पदानामनुसन्धानायोपक्रमो विहितः ।

"वेदा हि यज्ञार्थमभिप्रवृत्ताः" इत्यादीनां वचनानामाधारेण प्राचीनाचार्यैर्वेदानां यज्ञार्थत्वमेवोपपादितम् । तत्राप्याध्वर्यवप्रतिपादकत्वाद् यजुर्वेदो स्ति समस्ताया यज्ञपरम्परायाः स्वरूपोपकल्पकः । तदिदं तथ्यं "यज्ञस्य मात्रां विमिमीत उत्वः" इत्यादिना श्रुत्याप्युद्घोष्यते । बहुजनसमादृतत्वात् कलौ प्राधान्याच्च शुक्लयजुर्वेदस्य माध्यन्दिनीयशाखा श्रौतस्मार्तयज्ञेषु पूर्वमिदानीन्चाचार्यैर्बहुशः प्रचारिता प्रचार्यते च गुरुमुखोच्चानूच्चारणात्मकेनाध्यापनेन

विकृत्यादीनामभ्यासेन कर्मकलापसम्पादनेन । परं न केवलं यज्ञप्रक्रियामुखेनैव वेदानां यजुर्वेदस्य वा ध्ययनं युक्तमिति प्राच्याः पाश्चात्याश्च मनीषिणो वदन्ति । तेषां मतेन तु संस्कृतिमाधृत्य वेदानां प्रवृत्तिः । वेदाश्चास्य सृष्टेः संविधानरूपाः विज्ञापकाश्च मानविद्याः सन्ति । ततश्च ते परे मनीषिणः वेदेषु हिंसादीनामाचारविरुद्धविशिष्टानां कर्मणां लेशं न सहन्ते । तेष्वाचार्येषु यास्कः वैदिको भाषावैज्ञानिकः प्रथम इति वयं मन्यामहे । स च वैदिकानां पदानां वृत्तित्रयेणार्थावबोधनं साधयति । ताभिश्च प्रत्यक्षवृत्तिः, परोक्षवृत्तिः, अतिपरोक्षवृत्तिः इति तिसृभिर्वृत्तिभिस्त्रिधा पदमप्येकमर्थापयितुं शक्यमिति नूतना एव दृष्टिरुद्धाटिता । तदर्थम्च निरुक्तग्रन्थे उदाहरणादीन्यप्युद्धृतानि तत्रैव द्रष्टव्यानि । अन्ये च मनीषिणः आधुनिकाः आधिदैविकाधिभौतिकाध्यात्मिकादिरूपेण वैदिकानां पदानामर्थानवबोधयन्ति, उपदिशन्ति च वैदिकमन्त्रेषु संस्कृतेराचारस्य शिक्षणपद्धतेः, सभ्यतायाः, विज्ञानस्य, कलायाश्च मूलमिति । इदमत्रावधेयं यत् वैदिकपदानामाध्यात्मिकाद्या अर्था अर्वाचीनैरेव न कल्पिताः किन्तु पूर्वमप्यासन् । तदिदं ब्राह्मणग्रन्थानाम्, निरुक्तस्य, पुराणानाम्, उव्वटादिकृतव्याख्यानानामध्ययनेन च स्पष्टमवगम्यते । परं लोके तस्य प्रयोगस्य क्रमशो जायमाने ह्रासे लुप्तप्रायता पश्चाज्जातेति शक्यते नुमातुं सुधीभिः ।

एवमर्थोपदेशपरम्पराप्राचुर्येण वैदिकानां पदानामर्थो बहुधा विभक्तः । विशेषतश्च एकेनैवार्थेनोपयोक्तुं शक्यानां पारिभाषिकपदानामर्थो वृत्तिवैभिन्यातङ्काक्रान्तः सन् पङ्किलो जातः । स च मूल एवार्थो स्माभिः प्राधान्येन रक्षणीयो ज्ञापनीयश्च पारिभाषिकपदानामिति मया शोधकामेनाकाङ्क्षितम् । नाद्यावधि पारिभाषिकाणां विशिष्टपदानां प्रवृत्तिनिमित्तं किमस्तीति दिशा वैदिकपदानां पर्यालोचनं जातम् । अतो यं विषयो विभिन्नानामाचार्याणां मतोल्लेखनपुरस्सरं पारिभाषिकपदानां मूलार्थान्वेषणपरो नूनमनुसन्धानमर्हतीति मनसि निधाय मया विहितो नुसन्धानश्रमः ।

<u>अनुसन्धानयोजना</u>

अत्र हि अनुसन्धेयविषयरूपेण माध्यन्दिनसंहिताया दीर्घत्वादा-

द्यानां पञ्चदशाध्यायानामेव पदानामालोचनं चिकीर्षितमासीत् । तदनुसारं विशिष्टपदानि सङ्कलय्य तेषां यज्ञप्रक्रियासम्बन्धिपदानि, देवतातत्त्वसम्बन्धि-पदानि, आध्यात्मिकपदानि भौतिकपदार्थादिप्रकीर्णविषयसम्बद्धपदानीति चतुर्धा विभागः कृतः । अनन्तरञ्च पूर्वोक्त तत्तत्पदानां विवेचनं मन्त्रक्रमेण चतुर्ष्वध्यायेषु क्रमशः समुपस्थापितमस्ति । पदानां भावविवेचनप्रसङ्गे माध्य-न्दिनसंहितायाः प्राचीनौ भाष्यकृतावुव्वटमहीधरौ काण्वसंहिताया भाष्यकृत् सायणः, माध्यन्दिनीयसंहिताया भाष्यकृद्दयानन्दर्षिरित्येते आचार्या एव गृहीताः । सङ्कलितेषु पदेषु यथालाभं तेषां भाष्यवचनान्युद्धृतानि, तद्गता विशेषाः त्रुटयश्च सूचिताः । अनया रीत्या सर्वेषां पदानां तुलनात्मकमर्थानु-सन्धानं यथाशक्ति स्पष्टं, सन्देहहीनञ्च विधातुं कृतो स्माभिः श्रमः ।

पदानां यज्ञप्रक्रियादिसम्बद्धत्वविषये किञ्चिदुच्यते – वेदानां यज्ञार्थत्वं सर्वेषां सुविदितमस्ति । यज्ञो हि श्रेष्ठतमं कर्म । नरः कायवाङ्मनो-भिर्यदपि कार्यं न्याय्यमन्याय्यं करोति तत्र पञ्च हेतवो भवन्ति – अधिष्ठानम्, कर्ता, पृथग्विधां करणम्, विविधाः चेष्टाः, दैवं च । तथा सति यज्ञे पि यज्ञ-स्थानम्, यज्ञद्रव्यम्, यज्ञोपकरणम्, यज्ञकर्तारः, यज्ञबाधकाः, यज्ञफलम्, इत्येते विभागा भवितुमर्हन्ति । यत्र यज्ञो विधीयते तद् यज्ञस्थानम् । यज्ञस्थानसूचकानि पदानि यथा – वेदिः, परिधिः इत्यादयः । यज्ञे विधीयमाने येषां द्रव्याणां प्रयोगो होमे दानादौ च भवति तद् यज्ञद्रव्यम् । यज्ञद्रव्येषु घृतम्, दर्भाः, यवाः, समिध इत्यादयो गृहीताः । येषां उपकरणानां साहाय्येन यज्ञो विधीयते तानि यज्ञोपकरणानि भवन्ति – स्रुक्-स्रुव-ध्रुवोपभृद्ग्रहादीनि । ये कमपि प्रयोजनं फलमु-द्दिश्य वा कर्तव्यतया वा यज्ञमनुतिष्ठन्ति ते यजमान-तत्पत्नी-ऋत्विग्होत्रादयः यज्ञकर्तृषु स्वीकृताः । येषां सत्त्वानामुपस्थितिर्यज्ञस्थानदूषणाय, यज्ञफलविनाशाय वा कल्पत इति सम्भावनया मन्त्रैः तेषां निरासः इष्यते ते स्तेन-रक्षो-यातुधाना-दयो यज्ञबाधका इत्यङ्गीकृताः । यज्ञकर्ता यज्ञाद्यादृशं फलमभिलषति तद्यज्ञफलमु-च्यते स्वर्गादिकम् गोभूहिरण्यादिकं वा । एतेषां पदार्थानां बोधकानि यानि पदानि संहितायां दृष्टानि तानि प्रथमे ध्याये यज्ञप्रक्रियासम्बद्धपदानीति विभाज्या लोचितानि ।

यज्ञो ह्युपासनारूपं कर्म । उपासनायाम् उपास्यः, उपासकश्चेति मुख्यौ विभागः । यज्ञकर्ता उपासकः । स यमुपास्ते कमपि फलमुद्दिश्य, स्तौति वा स विष्ण्वादिरूप उपास्यश्चैतन्यादिविशिष्टशक्तिमान् देवः । देवताविषये उव्वटादयानाम् इमानि वाक्यानि विशेषतो वधार्याणि –

"देवता मन्त्रवाक्याभिधेयाः । यथा – अग्निर्मूर्धा दिवः ककुदित्यत्राग्निः । इषेत्वेति शाखा । ननु अग्निर्मूर्धेत्यत्राग्नेर्महाभाष्यत्वाद्देवतात्वमुपपद्यते शाखादीनां तु स्थावरत्वाद्देवतात्वं दुर्लभमिति यश्चोदयेत्तं प्रति ब्रूमः । यस्य हि यत्र हविर्भाक्त्वं स्तुतिभाक्त्वं वा विद्यते सा तत्र देवता न तु रूढ्या । एवं च सति शाखादीनां देवतात्वमुपपद्यत एव । यदुक्तं स्थावरत्वादित्यादि । अत्र ब्रूमः । अधिष्ठात्र्यो त्र देवता विद्यन्ते । प्रतिमाभूतास्तु शाखादयस्ताः फलं साधयन्तीत्यदोषः । मन्त्रस्य वाच्यं देवतेति श्रुतिर्दर्शयति "आशुः शिशानो वृषभो न भीमः" इत्युपक्रम्य "ऐन्द्रयो विस्पाः" इतीन्द्रस्य देवतात्वं दर्शयति ।"

{शु० य०, उ० भा० 1/1}

"यद्यप्यचेतना शाखा तथापि तदभिमानिनीं देवतामुद्दिश्यैवमुक्तम्। यथा शास्त्रज्ञा अचेतने पि शालग्रामे शास्त्रबुद्ध्या विष्णुसन्निधिमभिप्रेत्य विष्णुं सम्बोध्य षोडशोपचारान् विदधत इत्युक्तं प्राक् ।" {शु० य०, म० भा०, 1/1}

एतदनुसारं मन्त्रेषु पठितानां देवतासम्बन्धिपदानां विवेचनं द्वितीये ध्याये विहितम् ।

महर्षिणा यास्केण निरुक्तग्रन्थे अध्यात्मस्य वाचः पुष्पफलाद्यात्मकत्वमुक्तम् –

"अर्थं वाचः पुष्पफलमाह । याज्ञदैवते पुष्पफले, दैवताध्यात्मे वा ।"

{नि० अ० 1, पृ० 55}

इति । तेन तृतीयाध्याये ईश्वरनाम्नां व्याख्याने पञ्चदशाध्याये चाध्यात्मपरकाणां मन्त्रपदानामर्था दर्शिताः । तत्र आत्मन इन्द्रियादीनां च पदार्थतयोल्लेखो वर्तते । तद्यथा –

"अथाध्यात्मम् । यत्र सुपर्णाः सुपतनानीन्द्रियाणि । अमृतस्य भागं ज्ञानस्य । अनिमिषन्तो वेदनेनाभिस्वरन्तीति वा । अभिप्रयन्तीति वा । ईश्वरः सर्वेषामिन्द्रियाणां गोपायितात्मा" इति [नि०, अ० 3, पा० 2]

"आपरोवर्ति भुवनेष्वन्तरित्यर्थेषा महानात्मा सत्त्वलक्षणस्तत्परं तद् ब्रह्म तत् सत्यं तत् सलिलं तदव्यक्तं तदस्पर्शं तदरूपं तदरसं तदगन्धं तदमृतं तच्छुक्लं तन्निष्ठो भूतात्मा सैषा भूतप्रकृतिरित्येके ।" इत्यादिकम् [नि० अ० 14, पा० 1]

निरुक्तस्य चतुर्दशाध्याये यास्केन अध्यात्मचर्चाप्रसङ्गे आत्म-नभः-शब्द-स्पर्श-वायु-ज्योति-रूप-जल-रस-पृथिवी-गन्ध-मनो-विद्या-महदात्म-प्रतिभा-प्रकृतिपर्यन्ताः पदार्थाः सन्ति निर्दिष्टाः । तमनुसृत्यात्र चास्य प्रबन्धस्य अध्यात्मसम्बन्धिपदानां तृतीये ध्याये विवेचनं प्रस्तुतमस्ति ।

तैत्तिरीयोपनिषद्यधिभूतनिरूपणप्रसङ्गे पृथिव्यादिलोकानां दिगादीनां च पदार्थानामुद्देशो दृश्यते -

"पृथिव्यन्तरिक्षम् द्यौर्दिशो वान्तरदिशाः । अग्निर्वायुरादित्यश्चन्द्रमा नक्षत्राणि । आप ओषधयो वनस्पतय आकाश आत्मा । इत्यधिभूतम् ।"
[तै० उ०, 1 वल्ली, 7 अ०]

भगवद्गीतायामुपनिषदि "अधिभूतं क्षरो भावः" इति भगवता श्रीकृष्णेनोक्तम् । तद्भाष्ये शङ्कराचार्येण विनाशिवस्तुजातमधिभूतपदवाच्यं प्रतिपादितम् । तद्यथा -

"अधिभूतं प्राणिजातम् अधिकृत्य भवति इति । कः असौ क्षरः क्षरति इति क्षरो विनाशी भावो यत्किंचिद् जनिमद् वस्तु इत्यर्थः ।" [गीता०, शां० भा० । अ० 7 अनु०]

एतदनुसारमत्र पूर्वोक्तपक्षादिसम्बद्धपदेभ्यो भिन्नानां दिक्कालादिवाचकपदानामस्यामधिभौतिकपदार्थसम्बद्धत्वं प्रकल्प्य तेषां विवेचनं चतुर्थे ध्याये प्रस्तुतमस्ति । अन्ते च स्वानुसन्धानस्य परिणामतया धिगतस्तथ्यराशिरुपसंहारे विन्यस्तः ।

:: :: ::

विहितानुसन्धानस्वरूपम्

अनादितो वसानं यावत् षट्पन्चाशदधिकानि द्वादशशतपदानि सन्त्यालोचितानि । एषां चयने अनेकार्थबोधकत्वम्, अप्रसिद्धार्थबोधकत्वम्, लौकिकसंस्कृतपदापेक्षया भिन्नत्वमित्येते हेतवः सन्ति । प्रत्यध्यायं पदानां विवेचितानां सङ्ख्या विवरणमीदृगस्ति – प्रथमाध्याये 64, द्वितीयाध्याये 100, तृतीयाध्याये 120, चतुर्थाध्याये 80, पन्चमाध्याये 137, षष्ठाध्याये 21, सप्तमाध्याये 48, अष्टमाध्याये 95, नवमाध्याये 28, दशमाध्याये 54, एकादशाध्याये 32, द्वादशाध्याये 119, त्रयोदशाध्याये 105, चतुर्दशाध्याये 64, पन्चदशाध्याये 188 = 1,256 योग इति ।

प्रथमे ध्याये यज्ञप्रक्रियासम्बद्धपदानां विचारः कृत इत्यस्य यज्ञप्रक्रियासम्बद्धपदविमर्श इति नाम्ना निर्देशो स्ति । "वेदा हि यज्ञार्थमभिप्रवृत्ताः" इत्युक्तेर्यजुर्वेदस्य च यज्ञे प्रधानतया यज्ञप्रक्रियासम्बद्धपदविमर्शः प्रथममुपस्थापितः । द्वितीये ध्याये देवानां स्वरूपाद्यभिधायकानि सन्ति पदान्यालोचितानीति तस्य देवतासम्बद्धपदविमर्श इति निर्देशः कृतः । प्रवर्तमानस्य यज्ञस्य देवतोपासनात्मकत्वादस्य यज्ञसम्बद्धपदानन्तरं स्थापनं न्याय्यमिति तथा विहितम् । तृतीये – ध्याये ध्यात्मविषयकपदानां विवेचनं विहितमित्यस्य निर्देशः "आध्यात्मिकपदविमर्श" इति विहितः । वेदोक्तकर्मणां यज्ञादीनां सम्यगनुष्ठानानन्तरं मोक्षार्थमात्मज्ञानमनिवार्यमिति धिया यजुर्वेदान्तिमाध्यायस्य च विशेषाध्यात्मपरत्वदर्शनाल्लोके आत्मज्ञानविषयस्य वेदान्त इति प्रसिद्धेश्चास्य तृतीये स्थाने सन्निवेशः । एवं मुख्यविषयाणामवसिते विवेचने यान्यवशिष्टानि पदानि तेषामन्तो चतुर्थाध्याये सन्निवेशः प्रकीर्णपदविमर्श इति नामनिर्देशश्च कृतः । अत्र पदानां यज्ञप्रक्रियादिसम्बद्धत्वनिर्णयः सायणमहीधराभ्यां निर्दिष्टपदार्थाधारेण विहितः ।

प्रबन्धे स्मिन् विवेचितानि पदानि कस्याध्यायस्य कस्मिन् मन्त्रे कस्मिन् पूर्वे परे वा भागे सन्तीति संभाव्यमानस्य कौतूहलस्य शान्त्यर्थं, सुधिय-

नात्मनश्च सौविध्यार्थं प्रतिपदं पदात्पूर्वम् अध्यायस्य, मन्त्रस्य, पदक्रमस्य च त्रिभिः क्रमशः संख्याभिर्निर्दिशो ऽस्ति । तत्र प्रथमो ऽङ्कः अध्यायसङ्ख्यां सूचयति, द्वितीयो मन्त्रसङ्ख्यां, तृतीयश्च पदस्यात्र विवेचितपदापेक्षया पौर्वापर्यनिर्णायिकां सङ्ख्यां सूचयति । यथा प्रथमाध्याये "इषे" इति पदात् पूर्वं ।.।.। इत्यङ्कविन्यासो ऽस्ति । तत्र प्रथमः । अङ्कः प्रथमाध्यायसूचकः, द्वितीयः । अङ्कः प्रथममन्त्रस्य, अन्तिमः । अङ्को मन्त्रे प्रथमस्य तस्य पदस्य स्थानं सूचयति । इत्थमङ्कविन्यासानन्तरं पदस्य, ततश्च तद्वाच्यार्थस्य मुख्यस्यास्ति विन्यासः ।

अत्र यानि विशेषेण यजुर्वेदभाष्यादिभ्य उद्धरणानि प्रतिपदम् उद्धृतानि तेषु संकेतार्थं (सा०) (उ०) (म०) (द०) (य० भा०) इत्युल्लेखो विहितः । तेषु (सा०) इति सङ्केतः काण्वसंहितायाः सायणकृतं भाष्यं सूचयति । तत्रत्या संख्या च क्रमेणाध्यायस्य, अनुवाकस्य, मन्त्रस्य च क्रमसङ्ख्यां निर्दिशति । (उ०) इति सङ्केतः उव्वटाचार्यकृतं यजुर्वेदसंहिताया मन्त्रभाष्यम्, (म०) इति सङ्केतो महीधराचार्यकृतं वेददीपभाष्यम्, (द०) (य० भा०) इत्युभौ दयानन्दकृतं शुक्लयजुर्वेदभाष्यं सूचयतः इति ज्ञेयम् ।

अत्र पदानां व्याख्यानप्रसङ्गे सम्प्रति यानि भाष्याणि प्राप्याणि तान्येव सन्ति सन्निविष्टानि । रावण-गौरधरप्रभृतिभिः कृतानि व्याख्यानानि साम्प्रतं श्रूयन्त एव न प्राप्यन्त इति तेषां सन्निवेशो ऽस्माभिर्न कर्तुं पारितः । अस्य शोधप्रबन्धस्य टङ्कणे यास्त्रुटयो मम दृष्टिपथं प्राप्तास्तेषां संशोधनं मया विहितम्, तथाप्यवशिष्टा ये दोषास्ते सुधीभिः क्षम्या इति प्रार्थयामि ।

इत्थं भगवत्कृपया गुरूणामनुग्रहाच्च सम्पूर्णो ऽयं वैदिकपदविमर्शात्मको ऽनुसन्धानप्रबन्धो ऽयं सुधियां मनोमोदमलं विधास्यत इत्याशासे ।

प्रथमाध्यायः

यज्ञप्रक्रियासम्बद्धपदविमर्शः

यज्ञप्रक्रियासम्बद्धपदविमर्शः

1.1.1. इषे [अन्नम्]

अस्य पदस्य उव्वटभाष्ये महीधरभाष्ये चार्थद्वयं दृश्यते । उव्वटेनास्य अन्नमिति वृष्टिरिति चोभयमपि तात्पर्यं दर्शितमस्ति । महीधरेण तु वृष्ट्यै इत्येवार्थः प्रकीर्तितः ।

[1] "शाखा उच्यते । इषे अन्नाय त्वा त्वां छिनद्मीति । - - - -इषे इत्यभिधानम् । अभिधेया वृष्टिः ।" [उ०]

[2] "इषे वृष्ट्यै त्वा त्वां छिनद्मि । इष्यते । काङ्क्ष्यते सर्वैः व्रीह्यादिधान्यनिष्पत्तये सा इट् । श्रुत्या वृष्टिर्व्याख्याता ।" [म०]

महीधरेण स्वाभिप्रायपोषणार्थं पदव्युत्पत्तिरपि दर्शितेति विशेषः । दयानन्देनास्य अन्नविज्ञानयोः प्राप्तये इत्यर्थः प्रदर्शितः । तत्र अन्नमित्यर्थो निघण्टुप्रमाणेन पोषितः । विज्ञानार्थस्तु न पोषितः ।

"इषु इच्छायां धातुः । इष्यत इति व्युत्पत्त्या क्विबन्तेन षकारान्तेनेषुशब्देन वृष्टिरभिधीयते । व्रीहियवादिधान्यनिष्पत्तिहेतुत्वेन सर्वे प्राणिनो वृष्टिमिच्छन्ति ।" [काण्वसंहिताभाष्ये सायणः]

1.1.2. ऊर्जे [रसः]

अस्य पदस्य व्युत्पत्तिसंकेत एवोव्वटेन कृतः । महीधरेण तु व्युत्पत्तिप्रदर्शनपुरस्सरं स्पष्टं तस्य जलात्मको रस इत्यर्थो दर्शितः ।

[1] "ऊर्ज बलप्राणनयोः क्विप् । तादर्थ्ये चतुर्थी । व्रीह्यादेर्धान्यस्य क्षीरादेश्च सेचनस्य उत्पत्त्यर्थं त्वां संनमयामि ।"

दयानन्देनास्य "अनन्तपराक्रमानन्दरसद्यनम्" इत्यर्थः स्वभाष्ये निर्दिष्टः । तत्प्रमाणतया "उर्ग्रसः" इति शतपथवाक्यमप्युपन्यस्तम् ।

§2§ "ऊर्ज बलप्राणनयोरिति धातुः । वृष्टिगतो बलात्मको रसः सर्वान् मनुष्यपश्वादीन् बलयति पानादिना दृढशरीरान् करोति । यद्वा प्राणयति प्रकर्षेण चेष्टयतीति व्युत्पत्तिद्वयेन रस ऊर्जशब्देनाभिधीयते ।" §सायणः§

1.1.3. वायवः §वायुः§

उव्वटेन वायुशब्दस्यास्य वत्समभिलक्ष्यप्रयोगो दर्शितः । महीधरेण तस्य बहुधा व्युत्पत्तिरप्यस्ति निरूपिता । तेन व्युत्पत्तिबलात् वायुपदस्य गन्ता, वायुसादृश्यवान्, वायुवेगवत्त्वमित्येते र्थाः सन्ति कल्पिताः ।

§1§ "वायव स्थ । वत्सं शाखयोपस्पृशति । यथा वायुर्वृष्टि-द्वारेण गवामाप्यायकः एवं यूयमपि प्रस्नुतिद्वारेणाप्यायका भवथेत्यर्थः । एक-स्यापि वत्सस्योपस्पर्शने सर्वेषां संस्कारो बहुवचनोपदेशात् । पूजार्थं वा बहुवचनम् ।" §उ०§

§2§ "वा गतिगन्धनयोः।वान्ति गच्छन्तीति वायवो गन्तारः । हे वत्साः, यूयं वायवः स्थ मातृभ्यः सकाशादन्यत्र गन्तारो भवत । मातृभिः सह गमने सति सायं दोहो न लभ्यत इत्यभिप्रायः । यद्वा वायुसादृश्याद वत्सानां वायुत्वम् । यथा वायुः पादप्रक्षालननिष्ठीवनादिभिरुपहतां भूमिं शोषयित्वा पुनाति, एवं वत्सा अप्युपलेपनहेतुभूतगोमयादिदानेन भूमिं पुनन्ति तस्माद् वायुसादृश्यम् । अथवा नृणां यथा स्वनिवासाय गृहनिर्माणसामर्थ्यमस्ति एवं पशूनां तदभावान्निरावरणे न्तरिक्षे संचरणादन्तरिक्षमेव पशूनां देवता । तस्या-न्तरिक्षस्य वायुरधिपतिः । स च वायुः स्वावयवानिव पशून्पालनयतीति पशूनां वायुरूपत्त्वम् । तथा पालनाय पशून् वायवे समर्पयितुं वायुरूपत्त्वमापाद्य वायवः स्थेति मन्त्रः प्रवर्तते । तदुक्तं तित्तिरिणा "वायवः स्थेत्याह वायुर्वा अन्तरिक्ष-स्या ध्यक्षो न्तरिक्षदेवत्याः खलु पशवो वायव एवैतान् परिददाति" इति । यद्वा तृणभक्षणायाहनि तत्र तत्रारण्ये चरित्वा सायंकाले वायुवेगेन यजमानगृहे समागमनाय पशून् प्रवर्तयितुं वायुरूपत्त्वमुच्यते ।"

दयानन्दस्तु - "वायवः सर्वक्रियाप्राप्तिहेतवः स्पर्शगुणा भौतिकाः प्राणादयः । वायुरिति पदनामसु पठितम् । अनेन प्राप्तिसाधका वायवो गृह्यन्ते ।" इत्याह ।

1.1.6. श्रेष्ठतमं कर्म §यज्ञः§

पदमिदं मन्त्रे गोः प्रायणोद्देश्यस्थाने प्रयुक्तमस्ति । उव्वटेनास्य यज्ञ इत्यर्थः सङ्केततो निर्दिष्टः । महीधरेण च तत्परिपुष्टये कर्मणश्चातुर्विध्यं सोदाहरणं सम्यग् दर्शितम् ।

§1§ "श्रेष्ठतमाय कर्मणे । "यज्ञो वै श्रेष्ठतमं कर्म"इति श्रुतिः । प्रशस्यतमाय कर्मणे । तादर्थ्ये चतुर्थी । यज्ञार्थमित्यर्थः ।" §उ०§

§2§ "श्रेष्ठतमाय कर्मणे । चतुर्विधं कर्म । अप्रशस्तं, प्रशस्तं, श्रेष्ठम्, श्रेष्ठतमं चेति । लोकसिद्धं वधबन्धचौर्यादिकम् प्रशस्तम् । लोकैः श्लाघनीयं बन्धुवर्गपोषणादिकं प्रशस्तम् । स्मृत्युक्तं वापीकूपतडागादिकं श्रेष्ठतम् । वेदोक्तं यज्ञरूपं श्रेष्ठतममिति तल्लक्षणम् ।" §म०§

1.1.7. अघ्न्याः §गावः§

अत्र अघ्न्याः आप्यायध्वमिति सम्बन्धः । अस्य पदस्य उव्वटेन महीधरेण च गौरित्यर्थो निर्दिष्टः । महीधरेण एतत्पदप्रयोगबीजं गवां वधस्योपपातकत्वमिति निर्दिष्टमेष विशेषः ।

§1§ "हे अघ्न्याः अनुपहिंस्या गावः ।" §उ०§

§2§ "हे अघ्न्याः गावः, गोवधस्योपपातकरूपत्वाद् हन्तुम-योग्या अघ्न्या उच्यन्ते ।।" §म०§

§3§ "अघ्न्याः वर्धयितुमर्हा हन्तुमनर्हा गाव इन्द्रियाणि पृथिव्यादयः पशवश्च । अघ्न्या इति गोनामसु पठितम् ।" §दयानन्दः§

दयानन्देन गोभिः सह पृथिव्याः इन्द्रियाणां च निर्देशो र्थत्तेन विहितः ।

1.1.8. अघशंसः §यज्ञबाधकः§

अत्र पदमिदं "गाः हन्तुं पीडयितुं वा कश्चन मा समर्थो भवेदिति वाक्येन सम्बध्यते । अस्य उव्वटेन वृकश्चाण्डालो वेत्यर्थः सूचितः सव्युत्पत्तिकः। महीधरेणापि स एवाभिप्रायो व्युत्पत्तिविशेषप्रदर्शनपूर्वकमुपपादितः ।

§1§ "मा अघशंसः अघं पापं यः शंसति भक्षणार्थं वृको वा चाण्डालो वा स च मा ईशत ।" §उ0§

§2§ "अघशंसः अघेन तीव्रपापेन भक्षणादिना शंसो घातको व्याघ्रादिरपि ।" §म0§

दयानन्देन यो घं पापं शंसति स इत्यर्थो निर्दिष्टः ।

1.1.9. अनमीवाः §गावः§

अत्र पदमिदं अघ्न्या इति पदस्य विशेषणमस्ति । अस्य उव्वटेन व्याधिविशेषरहिता इत्यर्थः सामान्यतया निर्दिष्टः । महीधरेण त्वस्य स्वल्प-रोगसूचकत्वं निर्दिश्य परेण अयक्ष्मा इति मन्त्रगतेन विशेषणपदेन सह सामन्जस्यं साधुसंपादितमिति विशेषः ।

§1§ "अम रोगे । अमीवा व्याधिविशेषः । न विद्यते अमीवा यासां तास्तथोक्ताः ।" §उ0§

§2§ "अनमीवाः अमीवा व्याधिः स नास्ति यासां ता अनमीवाः कृमिदष्टत्वादिस्वल्परोगरहिताः ।" §म0§

"अनमीवाः, अम् रोग इति धातुः, क्रिमिदष्टत्वादिस्वल्परोग-रहिताः ।" §सायणः§

1.2.1. वसुः (पयः)

अत्र वसुशब्दस्य षष्ठ्यन्तस्य पवित्रमिति पदेनास्ति सम्बन्धः – वसोः पवित्रम् असि ।" इति । अस्य उव्वटेन यज्ञसाधनभूतं पय इत्यर्थो दर्शितः । स एवार्थो महीधरेण व्युत्पत्तिप्रदर्शनपूर्वकं श्रुतिसन्दर्भेण सम्पोष्य प्रकाशितो ऽस्ति ।

(1) "वसोः पवित्रमसि । वसोर्वासयितुर्यज्ञस्य । यज्ञसाधनभूते पयसि अत्र यज्ञशब्दः ।

दयानन्देनापि वसुशब्दस्य यज्ञरूपो ऽर्थः सूचितः । परं मन्त्रे – अस्मिन् तस्य पदस्य तेन विशेष्यतया निर्देशः कृत इति विशेषः ।

(2) "वसोरिन्द्रदेवताया निवासहेतोः पयसः" सायणः ।

1.2.2. द्यौः (स्थाली)

अस्य पदस्य स्तुत्यर्थे प्रयोगो ऽत्र विहितः । स्तुतेरुद्देश्यमुखा इत्युव्वटः । महीधरेण स्थाली इति सप्रमाणं निर्दिष्टम् । स्थाल्यां द्यौरिति द्युलोकवाचकपदस्य बीजं द्वाभ्यामपि निर्दिष्टम् । किन्तु तयोरभिधाने भेदो ऽपि स्पष्ट एव ।

(1) "उखामादत्ते द्यौरसि पृथिव्यसि" उपस्तौत्येवैनामेतत्" इति श्रुतिः । सा यद्दिवो ऽवयवभूतेनोदकेन क्रियते तेन द्यौरित्युच्यते ।" (उ०)

(2) "द्यौरसीति स्थाल्यादानम्" । इति । यस्यां स्थाल्यां क्षीरं प्रक्षेप्तव्यं तद्ग्रहणार्थो ऽयं मन्त्रः । हे स्थालि, मृज्जलाभ्यां निष्पन्ना त्वं द्यौरसि जलहेतुवृष्टिप्रदद्युलोकरूपासि । द्युसम्बन्धात् तद्रूपत्वमस्यामुपचयति ।" (म०)

महीधरीये स्थाल्याः द्युसम्बन्धः कीदृश इति स्पष्टं नास्ति । उव्वटभाष्ये तु स्पष्ट इति भेदः ।

दयानन्दस्तस्य विज्ञानप्रकाशहेतुरित्यर्थं वर्णयति । "द्यौः विज्ञानप्रकाशहेतुः ।" ॥दयानन्दः॥

निरुक्ते "द्यौः" इति पदमहनार्मिसु दृश्यते । तस्य व्युत्पत्ति- र्देवराजयज्वना "द्युत दीप्तौ" इति, द्यु अभिगमने" इति धातोश्च प्रति- पादितः । तदर्थप्रकारश्च द्विधा निर्दिष्टः – "द्योतते किरणसम्बन्धात्" इति "अभिगच्छन्त्यस्मिन् स्वं स्वमभिमतप्रदेशं प्राणिन" इति च । ॥1/9/44-45॥

1.2.3. पृथिवी ॥स्थाली॥

अत्र पदमिदं उखायाः ॥स्थाल्याः॥ स्तुत्यर्थे प्रयुक्तमस्ति । एतत्पदप्रयोगेन च स्थाल्याः निर्माणे विशेषः तज्जनितं दार्ढ्यं च सूच्यत इति भाष्यकृतां व्याख्यानादवगम्यते । आशास्यते च तत्र पयसः स्थिरतया वस्थानम्।

॥1॥ "यत् पृथिव्यवयवभूतया मृदा क्रियते तेन पृथिव्युच्यते ।" ॥उ०॥

॥2॥ "पृथिव्याः सकाशादुद्धृतयामृदा निष्पन्नत्वात्पृथिवी- रूपत्वम् ।" ॥म०॥

दयानन्दस्तु विस्तृतवाचकत्वमस्य पदस्य दर्शयति ।

निघण्टौ पदस्यास्य अन्तरिक्षम्, भूस्थानदेवता, मध्यस्थानदेवता, द्युस्थानदेवता इति चत्वारो र्थाः निर्दिष्टाः सन्ति । ॥द्र०- । अ० 3 ख०/ 5 अ० 3 ख०/5 अ० 5 ख०/ 5 अ० 6 ख०॥

1.2.4. मातरिश्वनो घर्मः ॥स्थाली॥

एतत्पदमपि उखाम् ॥स्थालिम्॥ उद्दिश्य स्तवार्थे प्रयुज्यत इति भाष्यकृद्भिर्निर्दिष्टम् । एतेन स्थाल्या गुणविशेषो भिव्यज्यते । अत्र अव्वटस्य महीधरस्य च व्याख्यानशैली भिन्नां रीतिमाश्रयते ।

॥1॥ "उखोच्यते । मातरिश्वनो घर्मो सि । मातरिश्वा वायुः।

मातर्यन्तरिक्षे श्वसितीति वायोः सम्बन्धी त्वं घर्मो सि । त्रयो घर्मा अग्नि-वायुसूर्यदेवत्याः । तत्र मध्यमो घर्मः साधवे त्वेति "अयं वै साधुर्यो यं पवते" इति वायुदेवत्यः स त्वमसीत्यर्थः ।" [उ०]

[2] "हे उरवे, त्वं मातरिश्वनः वायोः घर्मः दीपकः अन्तरिक्षलोको सि । मातर्यन्तरिक्षे श्वसिति निश्वासवच्चेष्टां करोतीति मातरिश्वा वायुः । घर्मः । "घृ क्षरणदीप्त्योः ।" घर्मः दीपकः संचारस्थान-प्रदानेन वायोर्दीपको भिव्यन्जको न्तरिक्षलोकः । हे स्थालि । तवोदरे प्यन्त-रिक्षरूपस्यावकाशस्य वास्युसन्चारस्य सद्भावात् त्त्वमपि वायोर्घर्मरूपासि द्यौरसि पृथिव्यसीति मन्त्रे लोकद्वयरूपत्वमुखायाः उक्तम् । अत्र मातरिश्वनो घर्मो सीत्यन्तरिक्षलोकरूपत्वमुच्यते ।" [म०]

दयानन्दस्तु मातरिश्वन् पदस्य वायुरित्यर्थं दर्शयित्वा घर्मपदेन शोधकत्वरूपं पदार्थं सूचयति ।

[3] "मातरिश्वनः मातरि अन्तरिक्षे श्वसिति आश्वनिति वा तस्य वायोः । - - - - - घर्मः अग्नितापयुक्तः शोधकः । घर्म इति यज्ञ-नामसु पठितम् ।" [दयानन्दः]

अत्रावधेयमिदमस्ति यत् उव्वटेन अग्नेः वायोः सूर्यस्य च शक्ति-विशेषरूपो घर्मः प्रतिपादितः, दयानन्देन च वायोः शोधकत्वं यज्ञे दर्शितम् । तेन यज्ञे अग्निगताः शोधनसामर्थ्यरूपा शक्तिरिति भावोऽप्युन्नेतुं शक्यते ।

1.3.1 सुप्वा [पवित्रम्]

स्थाल्यां स्थापितस्य पयसः शुद्ध्यर्थं यत्पवित्रं निक्षिप्तं भवति तमुद्दिश्य पदमिदं मन्त्रे प्रयुक्तमस्ति । अस्य विशेषणं "शतधारेण" इति सन्निहितं पदम् अस्ति ।

[1] "सुप्वा शोभनं पुनातीति सुपूः तेन सुप्वा । साधुपवनेन पवित्रेण ।" [उ०]

§2§ "सुप्वेति पवित्रविशेषणम् । सुष्ठु पुनातीति सुपूः तेन सुप्वा ।" §म0§

1.4.1. विश्वायुः §गौः§

पदमिदं मन्त्रे गामुद्दिश्य प्रयुक्तमस्ति । एतत्प्रयोजनं गवां स्तुतिरस्ति यासां पयसा यज्ञं वितन्यते । अस्यार्थश्चायुर्दात्री इत्यस्ति । एतेन गवां गुणविशेषो भिव्यज्यते ।

§1§ "सा गौर्विश्वस्य जगतः आयुषो दात्री ।" §उ0§

§2§ "या गौस्त्वया दुग्धा मया च पृष्टा सा विश्वायुः शब्देनाभिधेया । विश्वमायुर्यस्याः सा विश्वायुः । यजमानस्य सम्पूर्ण आयुः प्रयच्छतीत्यर्थः ।" §म0§

अत्रार्थसाम्ये सत्यपि द्वयोर्भाष्ययोः पदविग्रहो भिन्न एव दृश्यत इति विशेषः ।

दयानन्दस्तु वाचो विशेषणतया पदमिदं व्याख्याति । तन्मते वाचस्त्रिविधायाः आयुष्प्रदरूप एको वस्थाभेदो नेनपदेन सूच्यते ।

§3§ "विश्वायुः पूर्णमायुः यस्यां सा ग्रहीतव्या"
"त्रिविधा वाग् भवति । या ब्रह्मचर्याश्रमे पूर्णविद्यापठनाय पूर्णायुःकरणाय च सेव्यते सा प्रथमा ।" §दयानन्दः§

1.4.2. विश्वकर्मा §गौः§

उव्वटोक्तरीत्या गामुद्दिश्य स्तुत्यर्थे प्रयुज्यमानं पदमिदं गवां क्रियाविशेषं व्यन्जयति । अनेन गवां यज्ञार्थकर्मसु बहुविधः प्रयोगो वगम्यते ।

§1§ "सा गौर्विश्वस्य जगतः कर्मा कर्त्री ।" §उ0§

दयानन्दस्त्वस्य वाग्विशेषणतया शिल्पविद्यासम्पादकरूपमर्थं निरूपयति –

9 (2) "विश्वकर्मा विश्वं सम्पूर्णं क्रियाकाण्डं सिध्यति यया सा।"

"या गृहाश्रमे नेकक्रिययोद्योगसुखप्रापकफला विस्तीर्यते सा द्वितीया ।" (दयानन्दः)

(3) "क्षीरदधिनवनीताज्यैः साध्यानि विश्वानि सर्वाणि कर्माणि यस्या गोः सन्ति सा विश्वकर्मा ।" (सायणः)

1.4.3. विश्वधायाः (गौः)

गवां स्तुत्यर्थे प्रयुक्तमिदं पदं तासां विश्वधारणात्मकं क्रियाविशेषं सूचयतीति भाष्यकृतामाशयो वर्तते ।

(1) "सा गौर्विश्वस्य जगतः धायाः । धयतेर्णिजन्तस्यासुनि रूपम् । पाययित्री । यज्ञादेव सर्वाः प्रजा उत्पद्यन्ते आयुर्भोजनसहिताः स गवामुपचयति ।" (उ0)

महीधरेण पदस्यास्य व्युत्पत्तिर्द्विधा दर्शिता -

(2) "डुधान् धारणपोषणयोः । विश्वान् सर्वान् देवान् दधाति क्षीरहस्वयादिहविदानैन पुष्णातीति विश्वधायाः । - - - - यद्वा । "धेट् पाने" । विश्वानिन्द्रादिदेवान् क्षीरादिहव्यं धापयति पाययतीति विश्वधायाः।" (म0)

"धेट् पाने" इति धातोर्निष्पन्नो धायाः शब्द इति भावो द्वयोरपि भाष्ययोः संगच्छत इति विशेषः ।

(3) "विश्वधायाः या विश्वं सर्व जगद्विद्यागुणैः सह दधाति सा ।"

या च सर्वमनुष्यैः सर्वमनुष्येभ्यः शरीरात्मसुखवधनाय ईश्वरादिपदार्थविज्ञानप्रकाशिका वानप्रस्थसंन्याससाश्रमे खलूपदिश्यते सा तृतीया ।" (दयानन्दः

§4§ "डुधान् धारणपोषणयोरिति धातुः । क्षीरदध्यादिहविर्भुज इन्द्रादिदेवान् विश्वान् सर्वान् दधाति पुष्णातीति विश्वधायाः ।" यद्वा धेट् पान इति धातुः । विश्वान् सर्वान् इन्द्रादीन् हव्यं क्षीररूपं धापयति पाययतीति विश्वधास्याः ।" §सायणः§

1.4.4. सोमेन §दधि§

"आतञ्चनक्रियायाः करणत्वेन प्रयुक्तं पदमिदं दधि सूचयतीति भाष्यकृतामाशयः । तत्रोव्वटेन अर्थः केवलं दर्शितो न तत्प्रयोगमूलमन्विष्टम्, महीधरेण तु पदस्यास्य प्रयोगबीजं वैशिष्ट्यं च दर्शितमिति विशेषः ।

§1§ "सोमेन दध्ना ।" §उ0§

§2§ "सोमेन सोमवल्लीरसेन आतनच्मि दध्यर्थं कठिनीकरोमि । तन्चतिः कठिनीकरणार्थः । यद्यप्यत्रातञ्चनहेतुर्दधिशेषस्तथापि भावनया तस्यैव सोमत्वं संपाद्यते । यथा कश्चित् पुमान् बन्धुत्वेन भावितो बन्धुर्भवति प्रातिकूल्येन भावितः शत्रुश्च । - - - - तथात्र दधिशेषस्य भावनया सोमत्वम् ।" §म0§

अत्र महीधरकृता सोमदधिशेषयोः साम्यकल्पना विचित्रा प्रतीयते । दयानन्दस्तु सोमशब्दस्यान्यमेवार्थं निरूपयति -

"सोमेन शिल्पविद्यया सम्पादितेन रसेनानन्देन वा ।"§दयानन्दः§

1.7.1. रक्षः §यज्ञबाधकः§

यज्ञबाधकानां विनाशाय निवारणाय च क्रियमाणे अग्निहोत्रहवणीशूर्पयोः प्रतपने प्रयुज्यमानस्य मन्त्रस्यान्तर्गतं पदमिदं यज्ञबाधकं सत्त्वविशेषं सूचयति। तत्स्वरूपविषये उव्वटेन किमपि नोक्तम् । महीधरेण च "रक्षो राक्षसजाति"रित्येव निर्दिष्टम् ।

§1§ मन्त्रः - "प्रत्युष्टं रक्षः प्रत्युष्टा अरातय" इत्यादिः ।

(2) "रक्षः राक्षसजातिः ।" (म०)

दयानन्देनास्य रक्षःस्वभावो दुष्टो मनुष्य इत्यर्थः कृतः ।

1.7.2. अरातयः (यज्ञबाधकः)

"प्रत्युष्टा अरातय" इति मन्त्रांशस्थं पदमिदं यज्ञबाधकं सत्त्वविशेषं सूचयति । अस्य व्युत्पत्तिरुव्वटेन महीधरेण समानैव दर्शिता ।

(1) "न विद्यते रातिर्दानं येषां ते अरातयः ।" (उ०)

(2) "हविषो दक्षिणाया वा दानं रातिः । इतिः प्रतिबन्धका अरातयः ।" (म०)

महीधरेण देयवस्तुषु हविषो दक्षिणायाश्च निर्देशं विधाय विशेषः प्रदर्शित इति भेदः । अनेन देवेभ्यो दीयमानं हविर्दक्षिणादिकं ये केचन बलाद् हरन्ति ते अरातय इत्यर्थः स्मृतिपथमनुसरति ।

दयानन्देन मन्त्रे द्विरावृत्तस्यास्य पदस्य प्रथमं "अविद्यमाना रातिर्दानं येषु ते शत्रवः" इति अनन्तरं च "कपटेन विद्यादानग्रहणरहिताः" इत्यर्थौ निरूपितः ।

1.9.1. रक्षः (यज्ञबाधकः)

"अपहतं रक्षः" इति मन्त्रांशे रक्षसां निरास उद्देश्यतया प्रतीयते । तस्य उव्वटेन कश्चनार्थो न निर्दिष्टः । महीधरेण तस्य यज्ञबाधको वस्तुविशेष इत्यर्थः सूचितः ।

(1) 6रक्षः यज्ञविघातकम् । अपहतं निराकृतं तृणादिकमेव रक्ष उच्यते ।" (म०)

दयानन्देनास्य "दुर्गन्धादिदुःखजालम्" इत्यर्थो निरूपितः ।

§2§ "यज्ञावघातिनो रक्षसस्तृणादिरूपगूढत्वेनावस्थिति-सम्भवात् तृणादिकमेव रक्ष इत्युच्यते ।" §सायणः§

1.11.1. स्वः §यज्ञः§

"स्वरभिविख्येषं" इत्यत्र मन्त्रांशे स्वरिति पदं प्रसङ्गाद्यज्ञ-वाचकं वर्तत इति भाष्यकृतोरभिमतमास्ते । तस्य पदस्य अन्ये अप्यर्थास्ताभ्यां दर्शिताः -

§1§ "स्वशब्देन यज्ञो ऽभिधीयते । स हि शोभनं प्राङ्गीरितो भवति । यज्ञाहर्देवाः सूर्यः यज्ञो ऽपि स्वः शब्देनोच्यते ।" §उ0§

§2§ "अहं स्वः अभिचिख्येषं यज्ञं पश्येयम् । "यज्ञो वै स्वरह-र्देवाः सूर्यः" इति श्रुतेः । यज्ञदिवसदेवसूर्याः स्वः शब्देनोच्यन्ते । स्वर्गहेतुत्वा-दपि स्वः शब्देन यज्ञः ।" §म0§

दयानन्देनात्र अस्य पदस्य सुखरूपो ऽर्थो निरुक्तप्रामाण्येन निर्दिष्टः - "स्वः सुखमुदकं वा । स्वरिति सुखनामसु पठितम् ।"

1.14.1. शर्म §अजिनम्§

पदमिदं कृष्णाजिनं बोधयतीति भाष्यकृतामाशयः ।

§1§ "कृष्णाजिनमादत्ते । शर्मासि । चर्मासीति प्राप्ते चकारस्य शकारः । शर्मदेवता" इति श्रुतिः ।" §उ0§

§2§ "हे कृष्णाजिन, त्वमुलूखलस्य धारणार्थं शर्म सुखहेतुरसि । अजिनस्य चर्मेति मानुषं नाम शर्मेति दैवं नाम ।" §म0§

§3§ "शर्म सुखकारकं गृहम् । शर्म इति गृहनामसु पठितम् ।" §दयानन्दः§

1.14.2. अद्रिः [उलूखलम्]

उलूखलमुद्दिश्य तद्विशेषणत्वेन प्रयुक्तं पदमिदं तस्य दृढत्वं सूचयतीति भाष्यकृतोराशयोऽस्ति । उव्वटेनास्य व्युत्पत्तिरपि दर्शिता ।

[1] "आदृणाति विदारयति आदृणात्यनेन वा ब्रीह्यादिकमित्यद्रिः ।" [उ0]

[2] "हे उलूखल त्वं यद्यपि वानस्पत्यः दारुमयस्तथापि दृढत्वात् अद्रिरसि ।" [म0]

[3] "अद्रिः मेघः अद्रिरिति मेघनामसु पठितम् ।" [दया0]

दयानन्देन अद्रिशब्दस्य मेघ इत्यर्थो दर्शित इति विशेषः ।

1.15.1. अग्नेस्तनूः [हविः]

पदमिदं हविरुद्दिश्य मन्त्रेऽस्मिन् प्रयुक्तमस्ति । अस्यार्थद्वयमुव्वटेन प्रदर्शितं परं महीधरेणैकमेव निर्दिष्टम् ।

[1] "हविरावपति । अग्नेस्तनूरसि । आहवनीयोऽत्राग्निरुच्यते । तत्र हि हविः प्रक्षिप्तमग्निर्भवति । अत एवमुच्यते अग्नेस्तनुः शरीरमसि । अथवा अग्निशब्देन यस्यै देवतायै हविर्गृह्यते सा लक्ष्यते । तस्या अपि हविस्तनूर्भवति"। [उ0]

[2] "हे हविः, त्वं अग्नेः आहवनीयस्य तनूः शरीरमसि । यतस्तत्र क्षिप्तं हविरग्नीभवति, अतो हविः अग्नेस्तनूः ।" [म0]

[3] "अग्नेः भौतिकस्य, तनूः शरीरवत्तस्य संयोगेन विस्तृतो यज्ञः ।" [दया0]

अत्र दयानन्देन यज्ञार्थे पदस्य प्रयोगो दृश्यते ।

1.15.2. वाचो विसर्जनम् [हविः]

इदं पदं हविरुद्दिश्य प्रयुज्यते ।

§1§ "वाचो विसर्जनम् । वाक् यस्मिन् हविषि प्रक्षिप्ते विसृज्यते ध्वर्युणा तदिदं वाचो विसर्जनम् ।" §उ0§

§2§ "वाचो विसर्जनम् । अपां प्रणयनकाले नियमितायाः यजमानवाचो हविरावपनकाले विसर्गो भवति ।" §म0§

§3§ "वाचः वेदवाण्याः । विसर्जनम् यजमानेन होतृभिश्च हविषस्त्यागो मौनं वा ।" §दयानन्दः§

1.15.3. हविष्कृत् §पत्नी§, देवता §वाक्§

अस्य पदस्य उव्वटेन वाक् पत्नी चेति अर्थद्वयं निर्दिष्टम् । महीधरेण त्रयो र्था विकल्पेन दर्शिताः ।

§1§ "हविः करोतीति हविष्कृत् । एहि आगच्छ । अधिदैवं वागुच्यते । अधियज्ञं पत्नी ।" §उ0§

§2§ "हविष्कृदेहीति त्रिराह्वयति§का0 2/4/13§ इति यजमान् पत्नी वा न्यो वा यो व्रीहीनवहन्ति स संबोध्याहूयते । हे हविष्कृत्, हविः करोतीति हविष्कृत्" । §म0§

§3§ "हविष्कृत्, हविः करोति अनया वेदवाण्या सा हविस्कृद्वाणी ।" §दयानन्दः§

अत्रोव्वटदयानन्दाभ्यां अधिदैवो वागित्यर्थश्च दर्शितः, महीधरेण तत् परित्यज्य यज्ञार्थ एवास्य पदस्य प्रयोगो निर्दिष्ट इति विशेषः ।

1.16.1. कुक्कुटः §शम्या§

मन्त्रस्यादौ पठितं पदमिदं कं पदार्थमुद्दिश्य प्रयुक्तमिति उव्वटकृतव्याख्यानान्नावगम्यते । तेन केवलं कुक्कुटशब्दस्य व्युत्पत्तिरेव द्विधा निर्दिष्टा । महीधरेण एतत्पदोद्देश्यतया शम्यारूपो यज्ञायुधविशेषो दर्शितः व्युत्पत्तित्रयं च निगदितम् ।

[1] "आहन्ति अन्यो दृषद्वुपले । कुक्कुटो सि । अत्र मनोर्ह वा ऋषभ आस इत्यादीतिहास उत्प्रेक्षितव्यः । कुत्सितं शब्दमसुरघ्नमसुराणां तनोतीति कुक्कुटः । अथवा असुरघ्नीं वाचमुपादाय क्व क्व असुरा एवं यो टति असौ कुक्कुटः ।" [उ0]

[2] "हे शम्याख्य यज्ञायुधविशेष, त्वं कुक्कुटो सि असुराणाम् । - - - - -असुराः क्व क्वेति तान् हन्तुमिच्छन् यो टति सर्वत्र संचरति स कुक्कुटः । यद्वा कुकं कुत्सितशब्दं कुटति तनोतीति कुक्कुटः । यद्वा कुक्कुटाख्यपक्षिवद् ध्वनिविशेषमसुरभीत्यर्थं तनोतीति कुक्कुट इत्युपचर्यते ।" [म0]

दयानन्दस्तु पदस्यास्य चौराणां शत्रूणां वा नाशक इत्यर्थं निश्चयति - "कुक्कुटः कुकं परद्रव्यादातारं चोरं शत्रुं वा कुटति येन स यज्ञः ।" [दया0]

<u>1.17.1. धृष्टिः [उपवेषः]</u>

अत्र मन्त्रादौ पठितं पदमिदम् उपवेषनामकं यज्ञपात्रमुद्दिश्य प्रयुज्यते । अस्य व्युत्पत्तिपूर्वकमर्थ उव्वटेन दर्शितः । महीधरेणास्य स्वरूपं प्रयोगबीजं च सूचितम् ।

[1] "धृष्टिरसि । "ञिधृषा प्रागल्भ्ये" । अनेनाग्निर्धृष्टमुपचरतीति धृष्टिः । उपवेष उच्यते ।" [उ0]

[2] "पलाशशाखाया मूलदेशे छिन्नः काष्ठभाग उपवेषस्तमादत्ते। हे उपवेश, त्वं धृष्टिरसि प्रगल्भो सि । "ञिधृषा प्रागल्भ्ये" । तीव्राङ्गाराणामितस्ततश्चालने प्रगुत्वादस्य प्रागल्भ्यम् ।" [म0]

[3] "धृष्टिः प्रगल्भ इव यजमानः ।" [दयानन्दः]

अत्र महीधरदयानन्दयोः पदार्थविवेचने साम्यमस्ति परमुद्देश्यं न तथा प्रतीयते ।

1.17.5. ब्रह्मवनि [कपाल:]

यागयोग्यस्य देवयजो ऽग्नेश्छादनाय प्रयुक्तं कपालमुद्दिश्य पदमिदं प्रयुज्यते । अस्य उव्वटेन महीधरेण च सम एवार्थो व्युत्पत्तिपुरस्सरं दर्शितो ऽस्ति।

[1] "ब्रह्म एव यद् वनोति संभजते तत् कपालं ब्रह्मवनि ।" [उ०]

[2] "वन षण संभक्तौ" ब्रह्मणा ब्राह्मणेन वन्यते पुरोडाश-निष्पत्त्यर्थं स्वीक्रियते इति ब्रह्मवनि ।" [म०]

[3] "ब्राह्मणं विद्वांसं वनति तम् ।" [दया०]

1.17.6. सजातवनि [कपाल:]

इदमपि कपालमुद्दिश्य प्रयुक्तं पदमस्ति । अस्यार्थः ज्ञातिभिः प्रयुज्यमान इति भाष्यकृद्भ्यां दर्शित आस्ते ।

[1] "सजातवनि समानंजाताः सजाता भ्रातृप्रभृतय उच्यन्ते ।" [उ०]

[2] "सजातयः समानकुले जाताः यजमानस्य ज्ञातयस्तैर्वन्यते इति ।" [म०]

[3] "सजातवनि जातं जातं वनति स जातवनिः समानश्चासौ जातवनिस्तम् ।

पदमिदं दयानन्देन परमेश्वरं भौतिकाग्निं वोद्दिश्य प्रवर्तत इति भाष्ये निरूपितमिति विशेषः ।

1.19.1. धिषणा [दृषत्]

हविः पेषणाय प्रयुज्यमानां दृषदमुद्दिश्य पदमिदं अत्र प्रयुक्तमस्ति।

[1] "कृष्णाजिने दृषदं निदधाति । धिषणासि । धीः कर्म

बुद्धिर्वा तदुभयं सीदति सनोति वा कर्माङ्0गत्त्वाद् दृषत् धिषणोच्यते ।" ‖उ0‖

‖2‖ "हे शिले, पेषणाधारभूते, त्वं पर्वती पर्वतात्मिका तदुत्पन्ना त्वं धिषणा सि धियं बुद्धिं कर्म वा सिनोति व्याप्नोति ददाति वा धिषणा ।" ‖म0‖

‖3‖ "धिषणा वाक् वेदवाणी ग्राह्या । धिषणेति वाङ्0नामसु पठितम् । - - - - - -धृष्णोति सर्वा विद्या यया सा ।" "धिषणा धारणावती द्यौः । धिषणेति द्यावापृथिव्योर्नामसु पठितम् ।" ‖दया0‖

दयानन्देन मन्त्रे स्मिन् प्रथमस्य धिषणा पदस्य वेदवाणी, द्वितीयस्य च द्यौरित्यर्थों निर्दिष्ट इति विशेषः ।

<u>1.19.2. दिवः स्कम्भनी ‖शम्या‖</u>

शम्याख्यं यज्ञपात्रमुद्दिश्य प्रयुक्तं पदमिदं तस्याः धारणात्मकं कार्यविशेषं सूचयति ।

‖1‖ "कृष्णाजिने शम्यामुपदधाति । दिवस्कम्भनीरसि । दृषदुपलयोः पृथिवीद्युभ्यामुपलक्षितत्त्वात् शम्याया अन्तरिक्षभवितत्त्व उपपद्यते । दिवः द्यावापृथिव्योः स्कम्भनीः । स्कम्नोतिः स्तम्भनकर्मा । त्वं स्तम्भनीभवसि ।" ‖उ0‖

‖2‖ "दिवः प्रकाशवतः सूर्यादिलोकस्य । स्कम्भनीः स्कम्भं प्रतिबद्धं नयतीति सा ।" ‖दया0‖

दयानन्देन अस्य पदस्य सूर्यादिलोक प्रतिबन्धकत्वरूपो र्थो दर्शितः, परमुद्देश्यवस्तुनो निर्देशः स्पष्टतया न विहितः ।

‖3‖ "दिवो द्युलोकस्य स्कम्भन्यसि । अधःपतनवारणाय स्तम्भनकारिणी भवसि । शम्यायां द्युलोकस्तम्भनहेतुत्वं तित्तिरिर्दर्शयति । द्यावापृथिवी सहास्तां ते शम्यामात्रमेकमहर्वैताढं संज्ञामात्रमेकमहरिति । अयमर्थः

पुरा प्रजापतिना सृष्टे द्यावापृथिव्यौ जतुकाष्ठवत् परस्परं संश्लिष्टे अभूताम् । ते पश्चादेकस्मिन् दिने शम्याप्रमाणेन परस्परवियुक्ते अभूताम् । प्रतिदिनं तथेति विवक्षया वीप्सोक्ता । तयोः पुनः संश्लेषे यागस्यावकाशो न स्यात् । ततो विश्लेषाय दिवस्कम्भन्यसीति मन्त्र इति ।" [सायणः]

1.20.4. प्रसितिः [कृष्णाजिनम्]

अस्य पदस्य महीधरेण कर्मसन्ततिः कृष्णाजिनं वेति अर्थद्वयं सव्युत्पत्तिकं निर्दिष्टम् । उव्वटेन कृष्णाजिनमित्येवार्थो युक्तिपूर्वं दर्शितः ।

[1] "षह बन्धने । प्रसितिः प्रसहनात्तन्तुर्वा जालं वा । इह तु प्रसितिशब्देन कृष्णाजिनमभिधीयते । तदपि हि पिष्टानि गृह्णाति ।" [उ०]

[2] "प्रसयनं प्रसितिः । "षिञ् बन्धने" । प्रबन्धः कर्मसन्ततिः। दीर्घामविच्छिन्नां प्रसितिमनु कर्मसन्ततिमनुलक्ष्य ।- - - - -पदद्वयमर्थः । पूर्वमन्त्रैर्हविषः प्राणादिदानेन सजीवत्वं कृतम् । अनेन पुनरायुर्दीयते हविषः । हे हविः, दीर्घां प्रसितिं कृष्णाजिनाख्यामनु त्वां धां धारयामि । कृष्णाजिने प्रक्षिपामीत्यर्थः ।" [म०]

[3] "प्रसितिं प्रकृष्टं सिनोति बध्नात्यनया ताम् ।" [दया०]

[4] "षिञ् बन्धने इति धातुः । प्रसितिः प्रबन्धः कर्मसन्ततिः ।" [सायणः]

1.20.5. महीनां पयः [घृतम्]

अस्य पदस्य लक्षणया घृताभिधायकत्वं उव्वटेन दर्शितम् । लक्षणाया बीजं क्षीरोत्पन्नत्वं तु महीधरेण सूचितमिति ज्ञेयम् ।

[1] "महीति गोनाम । महीनां गवां पयो भवति । पयः शब्देन लक्षणया घृतमभिधीयते ।" [उ०]

{2} "हे आज्य, त्वं महीनां गवां पयो सि क्षीरमसि क्षीरोत्पन्नत्वाद् घृतं पयः शब्देनोच्यते । महीति गोनाम ।" {म०}

{3} "महीनां महतीनां वाचां पृथिवीनां वा । महीति वाङ्नामसु पठितम् । पृथिवीनामसु च । पयः अन्नं जलं च येन भुक्तम् । पय इत्युदकनामसु पठितम् ।" {दया०}

1.22.1. घर्मः {प्रवर्ग्यः}

पदमिदं पुरोडाशमुद्दिश्य प्रयुज्यते । अनेन श्रप्यमाणस्य पुरोडाशस्योष्णतया दीप्यमानता सूच्यते ।

{1} "पुरोडाशमधिश्रयति । घर्मो सि प्रवर्ग्यस्त्वमसि ।" {उ०}

{2} "हे पुरोडाश, त्वं घर्मो सि । "घृ क्षरणदीप्त्योः ।" घर्मशब्देन दीप्यमान प्रवर्ग्य उच्यते ।" श्रप्यमाणतया दीप्यमानत्वात् प्रवर्ग्यो सि ।
{म०}

{3} "घर्मः यज्ञः । घर्म इति यज्ञनामसु पठितम् ।" {दया०}

1.24.1. इन्द्रस्य दक्षिणबाहुः {स्फ्यः}

स्फ्यनामकं यज्ञपात्रमुद्दिश्य तस्यातिशयोपयोगितया वीर्यवत्त्वं सूचयितुमिन्द्रस्य बाहुरिति पदं निर्दिष्टम् ।

{1} "इन्द्रस्य बाहुरसि । एष वै वीर्यवत्तमो य इन्द्रस्य बाहुर्दक्षिणः ।" {उ०}

{2} "हे स्फ्य, त्वमिन्द्रस्य दक्षिणो बाहुरसि । तेन बाहुना धृतत्वात् तत्समानवीर्योपेतत्वाद् वा स्फ्यस्य बाहुत्वत्वोपचारः ।" {म०}

{3} "इन्द्रस्य सूर्यस्य । बाहुः वीर्यवत्तमकिरणसमूहस्थो यज्ञः ।"
{दया०}

1.24.2. सहस्रभृष्टिः [स्फ्य]

स्फ्यस्य विशेषणत्वेन प्रयुक्तं पदमिदं तस्य शत्रुनाशकत्वसूचकमिति महीधरेण निर्दिष्टम् । उव्वटेन त्वस्य बहुधार इत्यर्थो दर्शितः ।

[1] "सहस्रभृष्टिः बहुधारः ।" [उ०]

[2] "किं भूतः स्फ्यः । सहस्रभृष्टिः भृष्टिर्भर्जनं पाकः । मारणमिति यावत् । सहस्रसंख्याकानां शत्रूणां भृष्टिर्यस्य स सहस्रभृष्टिः ।" [म०]

[3] "सहस्रभृष्टिः सहस्राणि बहूनि भृष्टयः पाकाः यस्मात्सः सूर्यस्य प्रकाशः । सहस्रमिति बहुनामसु पठितम् ।" [दया०]

दयानन्देन पुनरस्य पदस्य बहुविधपाकसम्पादक इत्यर्थः सूचितः ।

[4] "कथम्भूतः स्फ्यः । सहस्रभृष्टिः । भर्जनं पाको मारणमित्यर्थः । सहस्रसंख्यानां शत्रूणां भृष्टिर्यस्यासौ सहस्रभृष्टिः । यथा वज्रो - सुराणां मारकस्तथा स्फ्यो पि पाप्मनां विनाशकः ।" [सायणः]

1.24.3. तिग्मतेजाः [स्फ्यः]

"तिग्मं तेजः । तेजतेरुत्साहकर्मणः । उत्साह एव तेजो यस्य स तथोक्तः ।" [उ०]

"तिग्मतेजाः तीक्ष्णतेजाः । यथा वायुर्वह्निं प्रदीप्य तीव्रां ज्वालामुत्पादयँस्तीव्रतेजा भवति एवं स्फ्यो पि स्तम्बच्छेदरूपं कर्म कुर्वन्तीव्रतेजा उच्यते ।" [म०]

"तिग्मतेजाः तिग्मानि तीक्ष्णानि तेजांसि भवन्ति यस्मात्सः ।" [दयानन्दः]

अत्रोव्वटेन उत्साहरूपतेजः सम्पन्नत्वं पदार्थे दर्शितम् । मही-

धरीये व्याख्याने वायोः तिग्मतेजस्त्वमुदाहरणतया निर्दिष्टम्, पदोद्देश्यं तु स्थले निवेशितमिति विशेषः ।

1.28.3. स्वधा (वेदाः)

देवैः पृथिव्या सह वेदस्य संरक्षणार्थं कृतां प्रवृत्तिं सूचयत्ययं मन्त्रः । तथा चात्र स्वधाशब्देन वेदानामभिधानमस्तीत्यवगम्यते ।

(1) "स्वधाशब्दो ऽन्नवचनः । इह त्वन्नहेतुभूतास्तिस्त्रो विद्या गृह्यन्ते । यां चन्द्रमसि ब्राह्मणा दधुः" इति श्रुतेः ।" (उ०)

(2) "स्वधाशब्दो यद्यप्यन्नवाची तथाप्यत्रान्नहेतुभूता वेदत्रयी कथ्यते ।" (म०)

(3) "स्वधाभिः । यद्यपि स्वधाशब्दो ऽन्ननामसु पठितः तथा ऽपि तेन शब्देन तत्साधनभूता वेदत्रयगता मन्त्रविद्या उच्यन्ते । पृथिव्याः सारांशस्य वेदत्रयरूपेण साधनेन यत् स्थापनं तत् कण्वेनैव व्याख्यातम् ।" (सायणः)

1.28.4. प्रोक्षणीः (जलम्)

पदमिदं जलमुद्दिश्यात्र प्रयुक्तमस्ति ।

(1) "प्रोक्ष्यते आभिरिति प्रोक्षण्यः ।" (उ०)

(2) "प्रोक्ष्यन्त आभिरिति प्रोक्षण्य आपः ।" (म०)

उव्वटेन जलात्मको ऽर्थो न दर्शितः, स तु महीधरेणैव दर्शित इति विशेषः ।

(3) "प्रोक्षणीः प्रकृष्टतया सिञ्चन्ति याभिः क्रियाभिः पात्रैर्वा ताः ।" (दयानन्दः)

2.1.1. कृष्णः (इष्टमूलकः)

मन्त्रे ऽस्मिन् कृष्णशब्दो मृगवाचक इष्टमूलकमुद्दिश्य तस्य कृष्णमृगस्य-

भावनार्थं प्रयुक्त इति उव्वटेन महीधरेण च निर्दिष्टमस्ति ।

﴾1﴿ "इध्मं प्रीणाति । कृष्णो स्याखरेष्ठः । अस्ति कृष्णशब्दो वर्णवचनो न्तोदात्तः । अस्ति कृष्णशब्दो मृगवचनो आद्युदात्तः । तदिहाद्युदात्तत्वात्कृष्णमृगरूपो गृह्यते । तथाहि श्रुतिः "यज्ञो ह देवेभ्यो पचक्राम स कृष्णो भूत्वा चचार" इति । इध्मपूलक उच्यते । कृष्णमृगो यज्ञस्त्वमसि ।" ﴾उ0﴿

﴾2﴿ "हे इध्म, त्वं कृष्णो सि कृष्णमृगरूपो यज्ञो सि । इध्मपूलकस्य यज्ञसाधनत्वाद् यज्ञत्वोपचारः ।" ﴾म0﴿

﴾3﴿ "अयं कृष्णशब्द आद्युदात्तत्वान्मृगवाची । तस्मादत्र कृष्णमृगो सीत्यर्थः । यज्ञात्मको देवः कदाचिदपि केनापि निमित्तेन स्वशरीरगोपनाय कृष्णमृगस्य रूपं कृत्वा देवेभ्यो पसृत्य निगूढो भवद् । ततो वने गत्वा वनस्पतीन् यज्ञयोग्यान् प्राविशत् ।" ﴾सायणः﴿

﴾4﴿ "कृष्णः अग्निना छिन्नो वायुना कर्षितो यज्ञः ।"

﴾दयानन्दः﴿

2.1.2. आखरेष्ठः ﴾इध्मपूलकः﴿

कृष्णपदस्य मृगवाचकस्य विशेषणत्वेन प्रयुक्तं पदमिदं तद्वदेव इध्मपूलकमुद्दिश्यात्र प्रयुक्तमस्ति । एतस्य व्युत्पत्तिविषये उव्वटापेक्षया महीधरेण नकिन नवीनः पन्था च दर्शितः ।

﴾1﴿ "आहवनीयाख्ये खरे खं स्वर्गं राति ददाति तत्र अधि उपरि तिष्ठतीत्याखरेष्ठः । एतदुक्तं भवति आहवनीयाख्ये खरे स्थितस्त्वं कृष्णमृगो भवसि ।" ﴾उ0﴿

﴾2﴿ "आसमन्तात् खरे कठिने वृधे तिष्ठतीति आखरेष्ठः । यद्वा खं स्वर्गं राति ददातीति खर आहवनीयस्तत्रासमन्तात्तिष्ठतीत्याखरेष्ठः।"

﴾म0﴿

§3§ "आवरेष्ठः समन्तात् खनति यं तस्मिन् तिष्ठतीति सः ।"

§दयानन्दः§

वेदिनिर्माणकाले यत्र खननं विधीयते तत्र स्थितस्याग्नेः बोधकमेतत्पदमिति च दयानन्दस्याशयः ।

2.2.1. विष्णोःस्तुपः §दर्भमुष्टिः§

अस्य पदस्य "प्रस्तरग्रहणे विनियोग उव्वटेन निर्दिष्टः । महीधरेण व्युत्पत्तिप्रदर्शनेनास्य दर्भमुष्टिमुद्दिश्य प्रस्तरभावनया प्रयोगः साधु दर्शित इति विशेषः ।

§1§ "प्रस्तरं गृह्णाति । विष्णोः स्तुपोऽसि विष्णोर्यज्ञस्य स्तुपः । स्त्यै स्त्यै शब्दसंघातयोः । स्त्यायतेः संघातः शिखा असि ।" §उ0§

§2§ "हे प्रस्तर दर्भमुष्टिरूप, त्वं विष्णोर्यज्ञस्य स्तुपो सि । "स्त्यै स्त्यै शब्दसंघातयोः" । औणादिको डुप्प्रत्ययः । दर्भसङ्घातरूपत्वात् केशसङ्घातरूपा शिखेव भवसि ।" §म0§

§3§ "विष्णोः यज्ञस्य । स्तुपः शिखा । यज्ञो वै विष्णुस्तस्येयमेव शिखा स्तुपः ।" §सदयानन्दः§

2.6.1. घृताची

जुहूनाम्नो यज्ञपात्रस्य विशेषणत्वेन पदमिदं मन्त्रे स्मिन् प्रयुक्तमस्ति। अस्य व्युत्पत्तिरुव्वटेन द्विधा दर्शितः, महीधरेणैक एव ।

§1§ "घृतमन्चितं प्राप्तं यस्यां स्रुचि, घृतं वा अच्यते यया स्रुचा सा घृताची ।" §उ0§

§2§ "घृतमन्चति प्राप्नोतीति घृताची घृतपूर्णा भवसि ।" §म0§

§3§ "घृताची घृतमाज्यमन्चति प्राप्नोत्यादान क्रियया सा ।"

घृताची या होमक्रिया घृतकमुदकमन्चति प्रापयति सा ।" "घृताची घृतमायु-र्निमित्तमन्चति प्राप्नोत्यनया सुनियमाचरणक्रियया सा ।" (दयानन्दः)

2.6.2. उपभृत् (

इदमपि जुहूभेदस्य यज्ञपात्रस्य वाचकं पदमस्ति । अस्य व्युत्पत्तिः महीधरेण सम्यग्दर्शिता ।

(1) "उपाभरणादुपभृत् ।" (उ0)

(2) "उपसमीपे स्थित्वा बिभर्त्ति आज्यं धारयतीत्युपभृत् ।" (म0)

(3) "उप जुह्वाः समीपे स्थित्वा बिभर्त्याज्यं धारयतीत्युपभृत् ।" (सायणः)

(4) "योपगतं बिभर्त्यनया हस्तक्रियया सा ।" (दया0)

2.6.3. प्रियं धाम (घृतम्)

अस्मिन् मन्त्रे "प्रियेण धाम्ना" इत्यत्र पदस्यास्य प्रयोगो वर्तते । अस्य चार्थो भाष्यकृद्भ्यां घृतमिति निर्दिष्टः ।

(1) "प्रियेण धाम्ना सहिता । एतद्वै देवानां प्रियं धाम-यदाज्यम्" इति श्रुतिः । आज्यसहितेत्यर्थः ।" (उ0)

(2) "प्रियेण धाम्ना देववल्लभेनाज्येन ।" (म0)

2.6.4. ध्रुवा (यज्ञपात्रम्)

मन्त्रे पदमेतत् यज्ञपात्रविशेषं सूचयतीति भाष्यव्याख्यानादवगम्यते । तत्र महीधरस्य व्याख्यानं स्पष्टमस्ति ।

(1) "ध्रुवां सादयति । घृताच्यसि ध्रुवा नाम्ना । ध्रुवा स्थिरा।" (उ0)

§2§ "ध्रुव स्थैर्ये । यथा होमार्थं जुहूपभृतोश्चलनं तद्वदस्या-श्चलनाभावेन स्थिरत्वादन्नाम्ना ध्रुवा ।" §म0§

§3§ "ध्रुवन्ति प्राप्नुवन्ति स्थिराणि सुखान्यनया विद्यया सा ।" §दयानन्दः§

अत्र ध्रुवाशब्दस्य निष्पत्तिप्रसङ्गे महीधरेण "ध्रुव स्थैर्ये" इति दयानन्देन "ध्रु गतिस्थैर्ययोः" इति निर्दिष्टम् ।

2.6.5. ऋतस्य योनिः §यज्ञः§

§1§ "ऋतस्य योनौ यज्ञस्योत्सङ्गेः ।" §उव्वटः§

§2§ "ऋतस्यावश्यंभाविफलोपेतत्त्वेन सत्यस्य यज्ञस्य योनौ स्थाने।" §म0§

§3§ "ऋतस्य शुद्धस्य सत्यस्य।योनौ यज्ञे ।" §दया0§

2.6.6. यज्ञपतिः §यजमानः§

§1§ "यज्ञपतिः यजमानः ।" §उ0§

§2§ "यज्ञपतिं यज्ञस्य पालकं यजमानम् ।" §दया0§

2.6.7. यज्ञन्यः §अध्वर्युः§

§1§ "यज्ञन्यं यज्ञं नयतीति यज्ञनीः । गोपाय मां यज्ञस्य नेतारमित्यर्थः ।" §उ0§

§2§ "यज्ञं नयतीति यज्ञनीः तं यज्ञन्यमध्वर्युं पाहि ।" §म0§

2.7.3. स्वधा §अन्नम्§

§1§ "स्वधाशब्दो निपातः पितृनुद्दिश्य देयद्रव्यस्य दाने वर्तते ।" §म0§

§2§ "स्वधा अमृतात्मकमन्नकन्नम् । स्वधेत्यन्ननामसु पठितम् ।"
§दया०§

2.8.1. विष्णोः स्थानम् §यज्ञस्थानम्§

§1§ "विष्णोर्यज्ञस्थानं भवसि । यज्ञस्य ह्येतत् स्थानं यत्र स्थितैर्यागः क्रियते यत् जुहोति ।" §उ०§

§2§ "विष्णोः यज्ञस्य स्थानमसि । अत्र स्थित्वा यागः कर्तुं शक्यत इत्यर्थः । आहवनीयसमीपवर्तित्वादस्या भूमेर्यज्ञस्थानत्वम् ।" §म०§

2.9.1. होत्रम् §होतृकर्म§

§1§ "होत्रं वेः होतुः कर्म विधि§ ।" §म०§

§2§ "होत्रम् जुह्वति यस्मिन् तद्यज्ञकर्म ।" §दया०§

2.9.2. दूत्यम् §दूतकर्म§

§1§ "दूत्यं दूतस्य कर्म ।" §उ०§

2.9.5. ज्योतिः §आज्यम्§

§1§ "ज्योतिषा आज्येन ।" §उ०§

§2§ "ज्योतिषा ध्रुवास्थिताज्यरूपज्योतिषा सह ज्योतिर्जुह्वासिच्यमानरूपं ज्योतिः संगच्छताम् ।" §म०§

§3§ "ज्योतिषा तेजस्विना लोकसमूहेन सह ।" "ज्योतिः प्रकाशवान् ।" §दया०§

2.10.3. आग्नीध्रः §कर्मविशेषः§

§1§ "अग्नीध इदं कर्माग्नीध्रम् ।" §म०§

§2§ "आग्नीध्रादेतन्नामकादार्त्विज्यात् कर्मणो हेतोः ।"

(3) "आग्नीध्रात् अग्निरिध्यते प्रदीप्यते यस्मिन् तस्येदं शरणमाश्रयणं तस्मात् ।(दयानन्दः)

महीधरेण सायणेन च आग्नीध्रमिति कर्मणो निर्देशः कृतः, दयानन्देन स्थानविशेषः सूचितः इति वैषम्यम् ।

2.15.2. वाजः (पुरोडाशादिः)

(1) "वाजस्य अस्य पुरोडाशादेः ।" (उ0)

(2) "वाजस्यान्नस्य पुरोडाशादेः ।" (म0)

(3) "वाजस्य यानवेगादियुक्तस्य सैन्यस्य ।" (दयानन्दः)

दयानन्देनास्य सैन्यसूचकत्वं दर्शितमिति वैषम्यम् ।

2.16.2. वयः (छन्दांसि)

(1) "व्यन्तु वय इति । छन्दांस्यभिधीयन्ते गायत्र्यादीनि ।" (उ0)

(2) "वयः पक्षिणः व्यन्तु । - - - - - पक्षिरूपापन्नानि गायत्र्यादीनि छन्दांसि ।" (म0)

(3) "वयः पक्षिण इव गायत्र्यादीनि छन्दांसि ।" (दयानन्दः)

2.17.1. पणिः (यज्ञबाधकः, असुरः)

(1) "पणिभिरसुरैः प्रतिपक्षभूतैः ।" (उ0)

(2) "पणिभिः प्राणिभिश्चेतनात्मकैरसुरैर्गुह्यमानः ।" (ला0 2/4/4)

(3) "देवपणिभिः देवानां दिव्यगुणवतामग्निपृथिव्यादीनां विदुषां वा पणयो व्यवहाराः स्तुतयश्च ताभिः ।" (दयानन्दः)

अत्र दयानन्देन पणिशब्दस्य व्यवहाराः स्तुतयश्च इत्यर्थनिर्देशा-
द्वैषम्यम् ।

2.17.2. परिधिः ‖स्थानविशेषः‖

‖1‖ "परितः सर्वतो धीयते यस्मिंस्तम् ।" ‖दयानन्दः‖

2.20.5. पितुः ‖अन्नम्. भौ0‖

‖1‖ "पितुरित्यन्ननाम ।

2.20.6. योनिः ‖गृहम्‖

‖1‖ "योनिरिति गृहनाम ।" ‖उ0‖

‖2‖ "योमनो युवन्ति यस्यां सा योनिर्गृहं जन्मान्तरं वा तस्याम् । योनिरिति गृहनामसु पठितम् ।" ‖दयानन्दः‖

अत्र दयानन्देन विकल्पतो जन्मान्तररूपो र्थश्च दर्शित इति विशेषः ।

2.21.1. वेदः ‖उपगृहः‖

‖1‖ "विद ज्ञाने" । वेदिता त्वमसि । यो ह्युपगृहः स सन्निकर्षाद्यज्ञं जानाति ।" ‖उ0‖

‖2‖ "हे कुशमुष्टिनिर्मितपदार्थ, त्वं वेदोऽसि । ऋगाद्यात्मको-सि । यद्वा वेत्तीति वेदः ज्ञातासि ।" ‖म0‖

‖3‖ "वेदः वेत्ति चराचरं जगत् स जगदीश्वरः । विदन्ति येन स ऋग्वेदादिर्वा ।" ‖दयानन्दः‖

2.21.3. गातुः ‖यज्ञः‖

‖1‖ "गातुमित । ततो वर्षकालं यज्ञमित आगच्छत।" ‖उ0‖

(2) "गातुमित । यज्ञं प्रत्यागच्छत । यद्वा गातुर्गन्तव्यो मार्गः ।" (म०)

अत्र महीधरेण नवीनो गन्तव्यमार्ग" इत्यर्थो निर्दिष्टः । तत्र बीजं मन्त्रस्यास्य देवविसर्जने प्रयोगः कल्प्यते ।

(3) "गातुं गीयते ज्ञायते येन् तगातुर्वेदः तम् । गातुरिति पदनामसु पठितम् ।" अनेन ज्ञानार्थो गृह्यते । (दयानन्दः)

2.25.1. जागतं छन्दः (यज्ञः)

(1) "जागतेन छन्दसा जगतीछन्दोरूपेण स्वकीयपदेन"। (म०)

(2) "जागतेन जगत्येव जागतं सर्वलोकसुखकारकं तेन । छन्दसा आह्लादकारकेण ।" (दयानन्दः)

2.29.3. असुराः (वेदिषदः, रक्षांसि)

(1) "असुरा रक्षांसि च वेदिषदः वेद्यां सीदन्तीति वेदिषदः ।" (उ०)

(2) "असुरत्वं रक्षस्त्वं चेति जातिविशेषौ देवविरोधिनौ ।" (म०)

(3) (असुरा धर्माच्छादकाः ।" (दयानन्दः)

2.30.1. स्वधा (अन्नम्)

(1) "स्वधया पित्र्येणान्नेन ।" (उ०)

(2) "स्वधया पैतृकान्नेन निमित्तेन ।" (म०)

(3) "स्वधया पृथिव्या सह । स्वधे इति द्यावापृथिव्योर्नामसु पठितम् ।" (दयानन्दः)

2.34.3. कीलालम् [जलम्]

[1] "कीलालम् अन्नरसम् । कीले अलं पर्याप्तः समर्थो न्न-मिष्टं कर्तुं रस इति कीलालः । कीलं बन्धनम् । अलमत्यन्तमन्नस्येति वा कीलालम् ।" [उ0]

[2] "कील बन्धने । कीलनं कीलो बन्धः तमलति वारयतीति कीलालम् । अलं वारणपर्याप्त्योः" इति धातुः । सर्वबन्धनिवर्तकम् ।" [म0]

3.34.4. परिस्रुतम् [जलम्]

[1] "परिस्रुतं सुराम् ।" [उ0]

[2] "परिस्रुतं वहन्तीः । पुष्पेभ्यो निःसृतं सारं वहन्त्यः ।" तच्च सारं त्रिविधम् ऊर्जशब्देन घृतशब्देन पयःशब्देन चाभिधेयम् ।" [म0]

2.34.1. ऊर्जम् [अन्नम्]

[1] "ऊर्जमन्नम् ।" [उ0]

[2] "ऊर्जशब्दो न्नगतं स्वादुत्वमभिधत्ते ।" [म0]

2.34.2. अमृतम् [जलम्]

[1] "अमृतं सर्वरोगविनाशकं मृत्युनाशकं च । नास्ति मृतं यस्मात् तत् ।" [म0]

3.13. [क] इन्द्राग्नी [आहवनीयगार्हपत्यौ]

"इन्द्रशब्देनात्राहवनीयः । तस्य यज्ञसाधकत्वरूपैश्वर्ययुक्तत्वात् । अग्निशब्देन गार्हपत्यः । अग्रे नीयत इत्यग्निरिति यास्कव्युत्पत्तेः । स हि प्रथममाधीयते । [म0]

"इन्द्रो वायुर्विद्युदादिरूपो ग्निश्च तौ ।" [य0 भा0]

<u>3.14.(क) योनिः (गार्हपत्याग्निः)</u>

"हे अग्ने आहवनीय. अयं गार्हपत्यो ऽग्निः ते तव योनिः उत्पत्तिस्थानम् ।" (उ0)

"सायं प्रातःकाले उत्पादनयोग्यो योनिः ।" (म0)

"योनिः निमित्तकारणम् ।" (य0 भा0)

<u>3.14.(ख) ऋत्वियः (कालविशेषसम्बधी)</u>

"ऋत्वियः ऋतावृतौ प्राप्तः काले काले भवति ।" (उ0)

"ऋत्वियः उत्पादनयोग्यः कालः ऋतुरित्युच्यते । ऋतुः प्राप्तो ऽस्येति ऋत्वियः ।" (म0)

"ऋतः प्राप्तो ऽस्य सः ।" (य0 भा0)

<u>3.15.(क) अप्नवानः (ऋषयः)</u>

"यमप्नवानः यमग्निमाधाय पूर्वे ऽपि ऋषयः अप्नवानप्रभृतयः ।" (उ0)

"अप्नशब्दो ऽपत्यनामसु पठितः । (निघ0 2/2/7) अप्नवानः पुत्रवन्तो भृगुवंशोत्पन्ना मुनयः । यद्वा अप्नवान् ऋषिः अप्नवानः तत्प्रभृतयो भृगवश्च मुनयः ।" (म0)

"ये ऽप्नान्विद्यासन्तानान् कुर्वन्ति ते अप्न इत्यस्मात् तत् करोति तदाचष्टे"अनेन करोत्यर्थे णिच् । ततो ऽन्येभ्यो ऽपि दृश्यन्ते" इति वनिप् । अप्न इत्यपत्यनामसु पठितम् ।" (निघ0 2/2) (य0 भा0)

<u>3.15.(ख) विशे विशे (मनुष्याः)</u>

"विशे मनुष्याय । विश् इति मनुष्यनाम ।" (उ0)

"विडिति मनुष्यनाम । (निघ0 2/3/5) यजमानरूपाय तस्मै

तस्मै मनुष्याय तदुपकाराय ।" {म०}

{विशे विशे} प्रतिप्रजाम् ।" {य० भा०}

<u>3.15.{ग} चित्रम् {आश्चर्यकारी}</u>

"चित्रम् चयनीयम् ।" {उ०}

"चित्रं विविधकर्मोपयोगित्वेन आश्चर्यकारिणम् ।" {म०}

"चित्र अद्भुतगुणम् ।" {य० भा०}

<u>3.16.{क} ऋषिम् {यज्ञसाधनम्}</u>

"अर्षति दोहनस्थाने गच्छतीति ऋषिर्गौः । तां होमार्थं दुग्धवन्तः ।" {म०}

"ऋषिं द्रष्टारम् । गवि वर्तमानं द्रष्टृत्वं पयस्युपचर्यति ।" {म०}

"ऋषिं कार्यसिद्धिप्राप्तिहेतुम् ।" {य० भा०}

<u>3.16.{ख} अह्रयः {दोग्धारः}</u>

"अह्रयः गावः ।"ह्री लज्जायाम्" अविद्यमानह्रियः अलज्जिता उज्ज्वलाः प्रशस्या इत्यर्थः ।" {उ०}

"सायं दोहनकाले ग्निप्रकाशाभावे दुह्यमानं पयो भूमौ पतिष्यतीति दोग्धृणां लज्जा भवति । तत्यामग्निदीप्तौ स्कन्नशङ्कानुदयाल्लज्जाभावादह्रयो दोग्धारः ।" {म०}

"अह्रयः गावः नास्ति ह्रीर्लज्जा यासां ता अह्रयः अलज्जाः उज्ज्वलाः प्रशस्या इत्यर्थः । मलिनो हि लज्जते । {म०}

"अह्रुवन्ति व्याप्नुवन्ति सर्वा विद्या ये ते विद्वांसः । अत्रा-

हव्याप्ताविव्यस्या द्राहुलक्षोणादिकः क्रि प्रत्ययः । महीधरेणायं ह्री लज्जाया-मित्यस्य प्रयोगो शुद्ध एव व्याख्यातः ।" ‖य० भा०‖

3.16.‖ग‖ सहस्रसाम् ‖गौः‖

"सहस्रसां सहस्रसंख्यानां चातुर्मास्यपशुसोमानां सनितारं संभक्तारम्।"

‖उ०‖

"षो न्तकर्मणि"। सहस्रसंख्याकानि कर्माणि स्यति समापयति क्षीरदध्याज्यहविःप्रदानेनेति सहस्रसातम् ।" ‖म०‖

"सहस्रं सनोति सहस्रसास्तम् ।" ‖म०‖

"या सहस्राण्यसंख्यातानि कार्याणि साध्नोति ताम् ।" ‖य०भा०‖

3.17.‖ख‖ वर्चः ‖तेजो विशेषः‖

"यतो दर्शनादेव महानयं ब्राह्मणो विद्वान् तपसा ग्निरिव ज्वलतीति प्रतिपत्तिस्तद्वर्चं इत्युच्यते ।" ‖उ०‖

"वैदिकानुष्ठानप्रयुक्तं तेजो वर्चः । यद्दर्शनादेव महानयं ब्राह्मणो विद्वांस्तपसा ग्निरिव ज्वलतीति बुद्धिर्नृणां भवति"। ‖म०‖

"वर्चः विद्याप्राप्तिं दीप्तिं वा ।" ‖य० भा०‖

3.18.‖क‖ वयस्वन्तः ‖यजमानः‖

"वय इत्यन्नाम । अन्नवन्तः ।" ‖उ०‖

"प्रशस्तं पूर्णमायुर्येषां ते । अत्र प्रशंसार्थे मतुप् ।" ‖य० भा०‖

3.18.‖ख‖ सहस्वन्तः ‖यजमानः‖

"सह इति बलनाम । बलवन्तः ।" ‖उ०‖

"सहनं सहो विद्यते येषां ते । अत्र भूम्न्यर्थे मतुप् ।" ‖य० भा०‖

3.18.(ग) इन्धानाः (ऋत्विजः)

इदं ऋत्विजां विशेषणं प्रतीयते ।

"इन्धी दीप्तौ । आदीपयन्तः प्रकाशयन्तस्त्वाम् ।" (उ०)

"इन्धानाः त्वदनुग्रहेण दीप्यमानाः ।" (म०)

अत्र महीधरोक्तो र्थ एव समीचीनः प्रतिभाति ।

3.18.(ङ०) स्वस्ति (क्षेम. यज्ञफलम्)

"स्वस्तीत्यविनाशिनाम । अस्तिरभिपूजितः सु अस्तीति स्वस्त्या ।" (उ०)

"स्वस्ति क्षेमं यथा तथा ।" (म०)

"स्वस्ति प्राप्तव्यं सुखम् । स्वस्तीति पदनामसु पठितम् ।"
नि० 5/5 (द० भा०)

3.19.(क) रायस्पोषेण (यज्ञफलम्. सुवर्णम्)

"राय इति धननाम । धनस्य पोषेण पुष्ट्या ।" (उ०)

"रायो धनानां भोगपुष्ट्या ।" (द० भा०)

3.20.(क) अन्धस्थ (गावः)

"अन्धस्थ अन्ध इत्यन्ननाम । श्रुत्या तु लक्षणया वीर्यमित्युक्तम् ।"
(उ०)

"हे गावः, यूयमन्धस्थ अन्नरूपाः स्थ । क्षीराज्यादिरूपस्यान्नस्य जनकत्वादन्नत्वोपचारः ।" (म०)

3.20.(ख) महस्थ (गावः)

"महश्शब्देन तस्यै श्रुतं तस्यै शिर इत्यादीनि दश वीर्याणि

उच्यन्ते ।" {उ0}

"महस्थ पूज्यरूपाः स्थ । x x x x x गौर्न पदा स्प्रष्टव्ये-त्यादिस्मृतेर्गवां पूज्यत्वप्रसिद्धिः । यद्वा महः शब्देन दश वीर्याण्युच्यन्ते । तानि यथा `गौवैं प्रतिधुक् तस्यै शृतं तस्यै शरस्तस्यै दधि तस्यै मस्तु तस्या आतञ्चनं तस्यै नवनीतं तस्यै घृतं तस्या आमिक्षा तस्यै वाजिनम्` इति श्रुत्युक्तानि । प्रतिधुक् तत्कालदुग्धम् । शृतमुष्णं तत् । शरो दुग्धमण्डः । मस्तु दधिरसः । आतञ्चनं दधिपिण्डः । आमिक्षा स्फुटितं दुग्धम् । वाजिनमामिक्षा-जलमिति श्रुत्यर्थः । एतद्दशवीर्यरूपा यूयं स्थ ।" {म0}

विशेष - उव्वटेन दश वीर्याणां संकेत एव कृतः, महीधरेण तेषां स्पष्टं निरूपणं कृतमिति महीधरस्य वैशिष्ट्यमत्र स्पष्टम् । महीधरेण पूज्यत्वरूपोऽन्यो र्थश्चात्र दर्शित इत्यन्यत् ।

<u>3.20. {ग} ऊर्जस्थ {गावः}</u>

"ऊर्जस्थ ऊर्जशब्दो रसवचनः । यतो यूयमूर्जस्थ अत ऊर्जं वो भक्षीय ।" {उ0}

"यूयमूर्जस्थ बलरूपाः स्थ । गोक्षीरादेर्बलहेतुत्वात् बलरूपत्वोपचारः।" {म0}

अत्रोव्वटेन ऊर्जशब्दस्य रस इति महीधरेण बलमित्यर्थो दर्शित इति भेदः ।

"ऊर्जः पराक्रमः ।" {य0 भा0}

<u>3.20. {घ} रायस्पोषस्थ {गावः}</u>

"रायस्पोषस्थ धनपुष्टिरूपाः स्थ । वैश्या हि क्षीराज्यादिक्रयेण धनं पुष्णन्ति अतो धनपुष्टित्वोपचारः ।" {म0}

"या बहुगुणभोगेन पुष्टयः ।" {य0 भा0}

3.21.{क} रेवती {गावः}

"हे रेवत्यो धनवत्यः गावः ।" {उ0}

"रेवत्यः धनवत्यो गावः, धनहेतुत्वेन धनवत्त्वं गवाम् । रयि-र्विद्यते यासां ता रेवत्यः । रयिशब्दात् मतुप् ।" {म0}

"विद्याधनसहिताः प्रशस्ता नीतयो गाव इन्द्रियाणि पशवः पृथिवीराज्यादियुक्ता यासु ताः ।" {द0 भा0}

3.21.{ख} योनौ {यज्ञस्थानम्}

"अस्मिन् योनौ । अस्यां गोयूथसम्बन्धिन्यां प्रजनन्याम् ।" {उ0}

"अस्मिन् योनौ । दृश्यमाने ऽग्निहोत्रहविर्दोहनस्थाने ।" {म0}

"योनौ जन्मनि स्थले वा ।" {द0 भा0}

3.21.{ग} गोष्ठे {यज्ञस्थानम्}

"गोष्ठे गोवाटे" {उ0}

"गोष्ठे यजमानसम्बन्धि गोवाटे रमध्वम् । गोष्ठशब्देन गृहाद्-बहिर्विश्रम्भेण संचारप्रदेशः । "म0}

"गावः पशव इन्द्रियाणि यस्मिंस्तिष्ठन्ति तस्मिन् ।" {द0भा0}

3.22.{क} संहिता {गौः}

"संहितासि संलग्नासि यज्ञहोमसम्बन्धेन । अथवा संदधाति क्षीणान् प्राणिनः स्वपयोभिरिति संहिता ।" {उ0}

"संहिता सि क्षीराज्यस्पहविर्दानाय संयुक्ता सि ।" {म0}

"संहिता सर्वपदार्थैः सह वर्तमाना विद्युत् । सर्वव्यापक ईश्वरो वा ।" {य० भा०}

3.22.{ख} विश्वरूपी {गौः}

"विश्वरूपी । शुक्लकृष्णादिभेदैः पशूनां वैश्वरूप्यम् ।" {उ०}
"विश्वं रूपं यस्याः सा । शुक्लकृष्णादिबहुरूपैर्युक्ता ।" {म०}
"विश्वं सर्वं रूपं यस्याः सा ।" {य० भा०}

3.27.{ख} सुम्नाय {यज्ञफलम्, सुखम्}

"सुम्नाय । द्वितीयार्थे चतुर्थी । सुम्नम् ।" {उ०}
"सुम्नं सुखम् ।" {म०}
"सुम्नाय सुखाय । सुम्नमिति सुखनामसु पठितम् ।" {य० भा०}

3.26.{ख} अघायतः {यज्ञबाधकः, शत्रुः}

"अघं पापं य इच्छति स अघायत् तस्मादद्घायतः शत्रोः ।" {उ०}
"अघं परस्यति अघायति । - - - - - अघायतीति अघायत् तस्मात् अघायतः ।" {म०}
"यः परस्याघमिच्छत्यद्घायति ततः ।" {य० भा०}

3.29.{क} रेवान् {ब्रह्मणस्पतिः}

रै इति धननाम । यो ब्रह्मणस्पतिर्धनवान् ।" {उ०}
रेवान् विद्याधनवान् । अत्र रयिशब्दान्मतुप् ।" {य० भा०}

3.29.{ख} अमीवहा {ब्रह्मणस्पतिः}

"अमीवा व्याधिः । व्याधेर्हन्ता ।" {उ०}
"यश्चामीवहा अमीवस्य रोगस्य हन्ता ।" {म०}

"अमीवहा । अमीवानविद्यादिरोगान् हन्ति सः ।" {य०भा०}

<u>3.29.{ग} वसुवित् {ब्रह्मणस्पतिः}</u>

"वसुनो धनस्य सारासारतां वेत्ति विदित्वा च यथायोग्यं स्तोतृभ्यो ददाति ।" {उ०}

"वसुवित् वसु धनं वेत्तीति ।" {म०}

"यो वसूनि सर्वाणि वस्तुनि यथावद् वेत्ति वेदयति वा ।" {य० भा०}

<u>3.29.{घ} तुरः {ब्रह्मणस्पतिः}</u>

"यस्तुरः यस्त्वरणः अविलम्बकारी ।" {

"यस्तुरः शीघ्रकारी । कालातिक्रमो हि प्रत्यग्रं कार्यरसं पिबतीत्याहुः ।" {उ०}

<u>3.30.{ख} अररुषः {यज्ञबाधकः, कृपणः}</u>

"रा दाने ।" अस्य क्वसौ षष्ठ्यां ररुष इति भवति. तन्नत्रा प्रतिषिध्यते । अररुषः अदातुः ।" {उ०}

"रा दाने इति इति धातोः क्वसुन्नन्तस्य षष्ठ्येकवचने ररुष इति रूपम् । ररौ इति ररिवांस्तस्य ररुषः । दानं कृतवत इत्यर्थः । तस्य निषेधादररुष इति । कदाचिदपि हविर्दानमकृतवत इत्यर्थः ।" {म०}

"राति ददाति स ररिवान् । न ररिवानररिवान् तस्य । अररुषः परस्वादायिनो मर्त्यस्य ।" {य० भा०}

<u>3.30.{ग} मर्त्यस्य {यज्ञकर्ता}</u>

"मर्त्यस्य मरणधर्मिणो मनुष्यस्य" {उ०}

<u>3.32.{ग} अघशंसः {यज्ञबाधकः}</u>

"अघं पापं यः शंसति चौरादिः सो घशंसः ।" {उ०}

"अघशंसः सर्वदा पापस्य प्रशंसकः ।" {म०}

<u>3.37.{ख} सुप्रजाः {यज्ञफलम्}</u>

"अहं प्रजाभिः बन्धुभृत्यादिरूपाभिः कृत्वा सुप्रजाः स्यामनुकूलत्वेन शोभनाः प्रजा यस्य तादृशो भवेयम् ।" {म०}

"सुप्रजाः शोभना सुशिक्षा सद्विद्यासहिता प्रजा यस्य सः ।"
{य० भा०}

<u>3.37.{ग} सुवीरः</u>

"वीरैः पुत्रैः सुवीरः स्यां शास्त्रीयमार्गवर्ति-शोभनपुत्रयुक्तो भवेयम् ।" {म०}

"सुवीरः । शोभना वीराः शरीरात्मबलसहिता यस्य सः ।"
{य० भा०}

<u>3.37.{घ} सुपोषः {यज्ञफलम्}</u>

"शोभनपोषश्च पोषैः । पोषो भूगो हिरण्यधान्यादिभिः ।"
{उ०}

"सुपोषः स्यां बहुमूल्यार्ह हिरण्यादियुक्तो भवेयम् ।" {म०}

"सुपोषः श्रेष्ठाः पोषाः पुष्टयो यस्य सः ।" {य० भा०}

<u>3.38.{घ} अभिसहः {बलम्}</u>

"सह इति बलनाम ।" {उ०}

3.42. [क] सौमनसः [प्रसन्नत्वम्]

"सौमनसो सुमनसो भावः प्रीत्यतिशयः ।" [म0]

3.43. [ख] क्षेमाय [कल्याणम्]

"क्षेमाय अविनाशाय" [उ0]

"क्षेमाय विद्यमानस्य वसुनो रक्षणं क्षेमस्तदर्थम् ।" [म0]

3.43. [ग] शिवं शग्मम् [सुखम्]

"शिवं शग्मं द्वे अप्येते सुखस्य नामनी । अनेकप्रकारं सुखं भवत्विति शेषः ।" [उ0]

"शिवं शग्ममिति द्वे सुखनामनी । तत्राद्य – मैहिकं द्वितीयमामुष्मिकम् । उभयविधं सुखं भूयादिति शेषः ।" [म0]

"पदयोरनयोरर्थः सुखमिति द्वाभ्यामेवोद्टङ्कितं परं तत्र विशेषो महीधरेणैव प्रदर्शितः ऐहिकामुष्मिकभेदात् ।

3.43. [घ] शंयोः [सुखकामः]

"कस्य शंयोः । शमिति सुखनाम । "इदंयुरिदंकामयमानः" सुखकामस्य ।" [उ0]

"शयोः शमिति सुखनाम । तत् कामयते इति शंयुः ।" [म0]

3.44. [ग] करम्भेण [हविर्विशेषः]

"करम्भेण सजोषसः करम्भपात्रैः समानप्रीतयः ।" [उ0]

"यवमयो हविर्विशेषः करम्भः ।" [म0]

दयानन्देनास्य पदस्य "अविद्याहिंसनेनेत्यर्थो निर्दिष्टः । हिंसार्थात्

कृधातोरसुच्प्रत्यये स्य निष्पत्तिश्चोक्तः । उव्वटेन पदार्थों न स्पष्टतया निर्दिष्टः महीधरेणैव यवमयो हविर्विशेषो र्थः दर्शितः ।

3.47.[क] मयोभुवा [सुखकारणम्]

"मय इति सुखनाम । सुखेन या भावयति वाक् तामहं ब्रवीमि ।" [उ०]

"मय इति सुखनाम । मयो भवति या सा मयोभूः तया मन्त्ररूपस्तुत्येत्यर्थः ।" [म०]

"मयोभुवा या मयः सुखं भावयति तया सत्यप्रियमङ्गलकारिण्या । मय इति सुखनामसु पठितम् ।" [दयानन्दः]

इनयानन्देन कीदृशी वाक् सुखदा भवतीति विषये सत्या प्रिया मङ्गलकारिणी चेति निर्दिश्य वैशिष्ट्यं प्रकाशितम् ।

3.48.[ख] निचुम्पुण [अवभृथः]

"निचुम्पुण नीचैः क्वणन । "उपांश्ववभृतेष्टया चरन्ति" इति श्रुतिः । यस्त्वं नीचैश्चरणो सि नीचैः क्वणनः ।" [उ०]

"चुप मन्दायां गतौ । नितरां चोपति मन्दं गच्छति निचुम्पुणः । उणप्रत्ययो मुमागमश्च । यद्वा नीचैरस्मिन्क्वणन्ति नीचशब्देन । कर्म कुर्वन्त्यवभृथो निचुम्पुणः ।" [म०]

दयानन्देनास्य "धैर्येण शब्दविद्याध्यापक" इति "प्राप्तज्ञानो मनुष्य" इत्यप्यर्थः क्रमेण नवीनतया निर्दिष्टः ।

3.48.[घ] रिषः [वधः]

"रिषतिर्हिंसार्थः क्विबन्तः । तस्य पन्चमी । रिषः बन्धनात् ।" [उ०]

"रिषो वधात्" [म०]

"रिषः हिंसकात् शत्रोः पापाच्च ।" [दयानन्दः]

अत्र दयानन्दकृतो र्थः स्पष्टतया वभाति ।

<u>3.48.[क] अवभृथः [यज्ञः]</u>

"अवभृथो यज्ञः हे अवभृथ यज्ञ, अवाचीनं पात्राण्यस्मिन् भ्रियन्त इत्यवभृथः ।" [उ०]

"वरुणप्रघासस्य कर्मणो न्तो तदङ्गभूतं यदवभृथाख्यं कर्म जलसमीपे क्रियते ानेन मन्त्रेण दम्पतीभ्यां जले स्नानं कर्तव्यम् । हे अवभृथ, अवाचीनानि पात्राणि जलमध्ये भ्रियन्ते यस्मिन् यज्ञविशेषे सो यमवभृथः ।" [म०]

"अवभृथ विद्याधर्मानुष्ठानेन शुद्ध" [दयानन्दः]

तत्र उव्वटेन महीधरेण पात्रवाचकं निर्दिष्टम्, दयानन्देन त्वन्यदेव किन्चित् सूचितम् ।

<u>3.47.[ख] अस्तम् [गृहम्]</u>

"अस्तं गृहान्" [उ०]

"अस्तमिति गृहनाम ।" [म०]

<u>3.47.[ग] सचाभुवः [ऋत्विजः]</u>

"हे सचाभुवः । सचा सहेत्यर्थः । सहभवनशीला ऋत्विजः ।" [उ०]

"सचेति सहार्थे व्ययम् । सहभवनशीलाः परस्परं यजमानेन पत्न्या वा स्मिन् कर्मणि सहावस्थिता हे ऋत्विजः ।" [म०]

4.1.1. देवयजनम् {यज्ञकर्म, तत्स्थानम्}

{1} "देवयजनं देवानां विदुषां यजनं पूजनं तेभ्यो दानं च ।"
{दयानन्दः}

{2} "देवा इज्यन्ते यस्मिन् स्थाने तद्देवयजनम् ।" {सायणः}

दयानन्देनास्य पदस्य क्रियारूपो र्थो निर्दिष्टः, सायणेन यज्ञ-स्थानरूप इति विशेषः ।

{3} "देवयजनं देवा इज्यन्ते यस्मिँस्तद्देवयजनं स्थानम् ।"
{म0}

अत्र सायणमहीधरयोः अर्थे साम्यं ज्ञेयम् ।

4.1.2. ऋक् {ऋग्वेदः, यज्ञसाधनम्}

{1} "ऋचन्ति स्तुवन्ति पदार्थान् येन स ऋग्वेदः ।" {दया0}

उव्वटेन स्वभाष्ये ऋचः सामसहितस्य यज्ञरूपसमुद्रतरणे सहायकत्वं निर्दिष्टं किन्तु महीधरेण तद्विषये न किमप्युल्लिखितं विशेषेण । दयानन्देन तस्य लक्षणनिरूपणं कृतमिति विशेषः ।

4.1.3. साम {सामवेदः, यज्ञसाधनम्}

{1} "सामयन्ति सान्त्वयन्ति कर्मान्तं फलं प्राप्नुवन्ति येन स सामवेदः ।" {दया0}

अयं दयानन्दकृतः सामलक्षणनिर्देशः अपूर्वो वर्तते ।

4.1.6. स्वधितिः {यज्ञोपकरणम्, क्षुरः}

{1} "स्वधिते, रोगनाशने स्वधितिर्वज्रवत् प्रवर्तमानः । स्वधिति-रिति वज्रनामसु पठितम् ।" {दया0}

§2§ "स्वधितिर्वज्रः । वज्रकर्म कुर्वन्नवज्रो पि वज्रमुच्यते ।" §उ0§

§3§ "हे स्वधिते क्षुर ।" §म0§

वज्रकर्मणः साम्येन क्षुरस्य वज्रत्वकल्पनं उव्वट-दयानन्दाभ्यां निर्दिष्टम् । तत्र कीदृशं वज्रकर्मेति उव्वटेन नोक्तम्, दयानन्देन रोगनाशकत्वं कल्पितमिति विशेषः ।

4.2.2. दीक्षा

"दीक्षातपसोः तनूरसि" इति मन्त्रांशे पठितं दीक्षापदं ब्रह्मचर्यादिनियमसेवनरूपमर्थं बोधयतीति दयानन्द आह । तत्र "दीक्षातपसोः तनूः" इति वाक्यगम्यः पदार्थो न निर्दिष्ट इति न्यूनता । सायणेन तु दीक्षाभिमानिदेवतायाः स्वरूपमिति तात्पर्यमत्र निर्दिष्टम् । तस्योद्देश्यता च क्षौमवस्त्रे निरूपिता ।

§1§ "दीक्षैव दीक्षा" §उ0§

§2§ "दीक्षा दीक्षणीयेष्टिः ।" §म0§

4.2.3. तपः

§1§ "तपो धर्मानुष्ठानम् ।" §~~उव्वट~~ दयनन्दः§

सायणेन पदस्यास्य तपोभिमानिदेवता इत्यर्थो निर्दिष्टः ।

§2§ "तपः शब्देन उपसद उच्यन्ते तत्प्रधानत्वात् ।" §उ0§

§3§ "तप उपसदिष्टिः ।" §म0§

अत्रार्थत्रयं पदस्यास्य दृश्यते धर्मानुष्ठानम्, तपोऽभिमानिदेवता उपसदश्च ।

4.3.1. महीनां पयः §यज्ञद्रव्यम्, नवनीतम्§

§1§ "महीनां पृथिवीनाम् । महीति पृथिवीनामसु पठितम् ।

पयः रसनिमित्तम् ।" ‖दया०‖

‖2‖ "हे नवनीत, त्वं महीनां गवाम् । महीशब्दो गोनामसु पठितः । पयोसि । क्षीरजन्यत्वात् पयस्त्वोपचारः ।" ‖सायणः‖

अत्र सायणेन नवनीतरूपे र्थे महीनां पयः इति पदस्य तात्पर्यं निरूपितम्, दयानन्देन तु स्पष्टमुद्देश्यं न निर्दिष्टम्..पृथिव्या रसनिमित्त-मित्येवोक्तम् ।

4.3.2. वृत्रः ‖यज्ञबाधकः असुरः मेघः‖

‖1‖ "वृत्रस्य मेघस्य ।" ‖दयानन्दः‖

‖2‖ "वृत्रस्य वृत्रनामकस्य" ‖सायणः‖

"वृत्रस्य कनीनक" इति मन्त्रांशपठितस्यास्य वृत्रशब्दस्य दयानन्देन मेघः, सायणेन वृत्रनामासुर इत्यर्थो तित्तिरिप्रामाण्योपदर्शनपूर्वकं निर्दिष्ट इति विशेषः ।

4.3.3. कनीनकः ‖यज्ञद्रव्यम्, अन्जनम्‖

अन्जनमुद्दिश्य पदस्यात्र प्रयोगः ।

‖1‖ -- "कनीनकः -- यःकनति दीपयतीति स एव कनीनकः ।" ‖दयानन्दः‖

‖2‖ "कनीनिका असि, नेत्रमध्यगतकृष्णमण्डलरूपा असि ।" ‖सा०‖

अत्र मन्त्रे कनीनकपदस्य पाठो दृश्यते, दयानन्देन च तस्यैव दीपक इत्यर्थो निर्दिष्टः, सायणेन तु कनीनिकापरमत्र प्रयुक्तम्, कृष्णमण्डलरूपं तात्पर्यं च सूचितमिति विशेषः ।

‖3‖ "कनीनको स्ति नेत्रमध्यगतकृष्णमण्डलरूपो सि ।" ‖म०‖

<u>4.3.4. चक्षुर्दाः {यज्ञद्रव्यम्, अन्जनम्}</u>

{1} "कष्टेनैन तद्ददातीति ।" {दया0}

{2} "चक्षुर्दा असि मनीनिकारूपत्वात् दृष्टिप्रदत्वमुपपन्नम् ।" {सायणः}

यद्येतदन्जनं निर्दिश्य प्रयुक्तमिति भाष्याद्वगम्यते । तेन तस्यैव चक्षूरोगनिवर्तकतया चक्षुर्दा इति पदेन बोधनं युक्तम्, सायणादिना कनीनिकारूप-त्वादिति निर्देशः स्थूलदृष्ट्या युक्तः प्रतीयते । किन्तु अन्जनस्य कनीनकत्वोक्त्या कनीनकशुद्धिहेतुत्वेन च सो र्थ उपपन्न एवेति निश्चेतुं शक्यते ।

<u>4.5.1. वामम् {यज्ञफलम्}</u>

{1} "वामं प्रशस्तं गुणकर्मसमूहम् । वाममिति प्रशस्यनामसु पठितम् ।" {दयानन्दः}

{2} "वामं प्रयति वननीयं सम्भजनीयम्, अनुष्ठानं प्राप्नुवति सति तदीयं सम्भावितं फलम् ।" {सायणः}

अत्र मन्त्रार्थनिरूपणप्रसङ्गे वामशब्दस्य सम्भनीयम् इत्यर्थः सायणेन कृतः, तत्र सम्भजनीयता किंमूला इत्यस्योत्तरं प्रशस्यता दयानन्दकृताद् भाष्याद्व-गम्यते, तद्विशेष्यत्वं यज्ञस्य फलं यदि सायणभाष्येण सूच्यते तर्हि गुणकर्मसमूहता मूर्त-द्रव्यात्मिका दयानन्दकृतभाष्याद्वधार्यत इत्यन्योन्यपूरकता स्पष्टा ।

<u>4.7.5. दीक्षा {यज्ञफलम्}</u>

अग्ने विशेषणम् ।

{1} "दीक्षायै धर्मनियमाचरणरीतये ।" {दयानन्दः}

{2} "व्रतनियमो दीक्षा ।" {सायणः}

मन्त्रार्थान्वयदृष्ट्या अनेन पदेन यज्ञकर्तुः व्रतनियमपूर्तिरूपमिष्ट-मभिप्रेतमिति ज्ञायते ।

4.7.9. सरस्वती {यज्ञफलम्, वाक्}

{1} "सरस्वत्यै विद्यासुशिक्षासहितायै वाचे ।" {दया०}

{2} "मन्त्रोच्चारणशक्तिः सरस्वती ।" {सायणः}

अत्र यज्ञकर्तुः यज्ञफलत्वेनेष्टस्य मन्त्रोच्चारणसामर्थ्यस्य बोध इति भाष्यादवगम्यते ।

4.9.1. ऋक्सामयोः शिल्पे {देवता}

{1} "हे शुक्लकृष्णरेखे, कृष्णाजिनगते, युवां ऋक्सामयोः शिल्पे स्थः । ऋगभिमानिसामाभिमानिदेवतयोर्ये शिल्पे चातुर्ये तद्रूपे भवथः । ----"
{सायणः 4/4/1}

{2} "ऋक्सामयोः ऋक् साम च तयोर्वेदयोः । अध्ययनानन्तरम् । शिल्पे मानसप्रसिद्धक्रियया सिद्धे ।" {दयानन्दः}

सायणभाष्ये कृष्णाजिनगतयोः शुक्लकृष्णरेखयोः ऋक्सामचातुर्यरूपत्वं सोदाहरणं दर्शितम् । तत्र कृष्णाजिनस्य द्रव्यत्वात् यज्ञद्रव्यत्वम्, ऋगभिमानिदेवताया सामाभिमानिदेवतायाश्च निर्देशात् देवतानिर्देशश्च सूच्यते । दयानन्देन ऋक्सामपदयो वेदमात्रे तात्पर्यं निर्दिष्टमिति वैषम्यम् ।

4.10.1. ऊर्क् {मेखला, यज्ञाङ्गोपकरणम्}

{1} "ऊर्गन्नरसरूपा" {सायणः 4/4/2}

{2} "ऊर्क् पराक्रमान्नादिप्रदा शिल्पविद्या ।" {दयानन्दः}

{3} "ऊर्गसि अन्नं भवसि ।" {उ०}

{4} "ऊर्क् अन्नरसरूपासि ।"

"अङ्गिरसः स्वर्गं लोकं गच्छन्तो न्नरसं व्यभजन्त, विभज्यमाने व-शिष्टो न्नरसो भूमौ पतितः शणमुन्जनामकतृणरूपेणाविर्भूतः तस्माच्छणमुन्जमयी मेखला ।" [म०]

महीधरेण मेखलाया अन्नरसबोधकेन ऊर्क्पदेन कथं निर्देश इति सोदाहरणं निर्दिष्टमिति विशेषः । दयानन्देन तु शिल्पविद्या इत्यर्थः कृतो नवीनोपि प्रसङ्गे नानुकूलः ।

<u>4.10.2. सोमस्य नीविः [मेखला, यज्ञोपकरणम्]</u>

[1] "सोमदेवतायाः प्रियभूतग्रन्थिरसि । मूलाग्रयोरेकीकरणेन ग्रन्थिविशेषो नीविरित्युच्यते ।" [सायणः]

[2] "सोमस्य उत्पन्नस्य पदार्थसमूहस्य । नीविः या नितरां व्ययति संवृणोति ।" [दयानन्दः]

[3] "सोमस्य नीविरसि । "पितृदेवत्या वै नीविः" इत्यादीक्षि तस्योक्तम् । अह तु सोमयागार्था नीविः सोमेन व्यपदिश्यते ।" [उ०]

सायणेनोव्वटेन च नीविलक्षणं निर्दिश्य तस्य सोमने सह सम्बन्धस्य प्रदर्शने यत्नो विहितः । दयानन्देन नीविशब्दस्य व्युत्पत्तिर्दर्शिता प्रयोग-दृष्ट्यानुकूलो र्थस्तु न दर्शित इति न्यूनत्वम् ।

<u>4.10.3. इन्द्रस्य योनिः [कृष्णविषाणा, यज्ञसाधनम्]</u>

[1] "हे कृष्णविषाणे त्वं पूर्वमिन्द्रस्य योनिरसि तथेदानीं मध्यस्थानं भवेति शेषः । पुरा कदाचिद यज्ञपुरुषो दक्षिणां देवीं समभवत् । तस्मात् सम्भवनादिन्द्रो जायत तदानीमन्यान्यस्योत्पत्तिर्माभूदिति विचार्येन्द्रः तद्योनिमाच्छिद्य मृगेषु न्यदधात् । निहिता सा योनिः कृष्णविषाणा भूत् ।"

[सायणः 4/4/3]

[2] "इन्द्रस्य परमैश्वर्येण युक्तस्य योजकस्य वा । योनिः

निमित्तम् ।" {दयानन्दः}

{3} "कृष्णविषाणां सिचि बध्नीते । इन्द्रस्य योनिः । "देवाश्च वा असुराश्च" इत्यादि निदानम्, यथा इन्द्रस्य योनिर्जन्मस्थानम्, पूर्वं त्वमसि एवमिदानीं यजमानस्येति दर्शनार्थो र्थवादः ।" {उ0}

{4} "हे कृष्णविषाणे, त्वं यथा पूर्वमिन्द्रस्य योनिरसि तथेदानीं यजमानस्य स्थानं भवेति । शेषः । पुरा कदाचिद् यज्ञपुरुषो दक्षिणां देवीं समभवत् तस्मात् सम्भवनादिन्द्रो जायत तदानीमस्यान्यत्रोत्पत्तिर्मा भूदिति विचार्येन्द्रः स्वां योनिं दक्षिणाया आच्छद्य मृगेषु न्यदधात् । निहिता सा योनिः कृष्ण-विषाणा भूदिति तित्तिरिश्रुतौ यज्ञो दक्षिणामभ्यधादित्याख्याने कथा । तस्मात् कृष्णविषाणाया इन्द्रयोनित्वम् ।" {म0}

सायणोव्वटमहीधरैः इन्द्रस्य योनिरिति कृष्ण"-विषाणायाः निर्देशो विहितः, दयानन्देन तु परमैश्वर्ययुक्तस्य कस्यचिन्निमित्तमित्युक्तम् ।

<u>4.11.1. व्रतम् {यज्ञद्रव्यम्, पयः}</u>

अत्र उव्वटेन व्रतशब्दस्य पय इत्यर्थो निर्दिष्टः । महीधरेणापि तथैवोक्तम् ।

{1} "व्रतं कृणुत । व्रतशब्देन पयो भिधीयते ।" {उ0}

{2} "हे परिचारकाः, व्रतं कृणुत दोहनादिना क्षीरं सम्पादयत। दीक्षितस्य भोजनाय यन्नियतं पयस्तद्व्रतमित्युच्यते ।" {म0}

अत्र उव्वटेन सामान्यतया व्रतशब्देन पयसो भिधानं निर्दिष्टम्, महीधरेण तत्र दीक्षितभोजनाय नियतत्वस्य वचनेन वैशिष्ट्यं सूचितमिति भेदः ।

<u>4.11.2. ब्रह्म {यज्ञाङ्गम्, वेदत्रयम्}</u>

मन्त्रे "अग्निर्ब्रह्म" इत्यानुपूर्व्या पठितं ब्रह्मपदमत्र ब्रह्मणः अग्नेश्च

समानरूपत्वं सूचयति । तत्रोव्वटेन महीधरेण च ब्रह्मपदस्य त्रयीरूपो र्थो निर्दिष्टः।

{1} "अग्निः ब्रह्म त्रयीलक्षणम् ।" {उ0}

{2} "अग्निर्ब्रह्म । ब्रह्मशब्देन वेदत्रयमभिधीयते । तस्य वेदत्रयस्याग्नित्वमुपचर्यति । आधानेन निष्पन्नस्य वैदिकस्याग्नेर्वेदव्यतिरेकेणाभ्भवात् ।" {म0}

महीधरेण वेदत्रयस्य अग्नित्वं कथमिति युक्तिपूर्वकं निर्दिष्टमत्रेति वैशिष्ट्यम् ।

4.12.1. श्वात्राः {आपः, यज्ञद्रव्यम्}

यज्ञे पीतं जलमुद्दिश्य तद्विशेषणतया स्य प्रयोगः ।

{1} "श्वात्रा भवत क्षिप्रपरिणामाः शीघ्रं जीर्णा भवत । श्वात्रमिति क्षिप्रनामेति यास्केनोक्तम् ।" {सायणः 4/5/4}

{2} "श्वात्राः श्वात्रं प्रशस्तं विज्ञानं धनं वा ~~विद्यन्ते~~ विद्यते यासां ताः ।" {दयानन्दः}

सायणादिपूर्वाचार्यैरस्य पदस्य क्षिप्रपरिणामा इत्यर्थो निर्दिष्टः, दयानन्देन प्रशस्तविज्ञानवत्त्वं प्रशस्तधनवत्त्वं वेति निर्दिशता आत्मनो पि पदार्थविषये सन्देहः प्रदर्शितः ।

4.12.2. सुशेवाः {आपः, यज्ञद्रव्यम्}

पीतानामपां हितकरत्वशंसनाय प्रयुक्तं पदमेतदस्ति ।

{1} "किन्चास्माकं पीतवतामन्तरुदरे जलपाकस्थाने सुशेवाः शोभनसुखा भवतेत्यनुवर्तति । शेवमिति सुखनाम ।" {सायणः 4/5/3}

{2} "सुशेवाः सुष्ठु शेवं सुखं याभ्यस्ताः । शेवमिति सुखनामसु पठितम् ।" {दयानन्दः}

4.12.3. ऋतावृधः {आपः, यज्ञद्रव्यम्}

{1} "ऋतावृधः यज्ञवृद्धिहेतवः ।" {सायणः 4/5/3}

{2} "ऋतावृधः या ऋतं सत्यं वर्धयन्ति ताः ।" {दया०}

{3} "ऋतावृधः सत्यवृधः यज्ञवृधो वा ।" {उ०}

सायणेन महीधरेण च पदस्यास्य जलविशेषणतया प्रयुक्तस्यार्थः यज्ञवृद्धिहेतव इति निर्दिष्टः । दयानन्देन सत्यवृद्धिहेतव इत्युक्तम् । एतदुभयमुव्वटेन भाष्ये दर्शितमिति भेदः ।

4.13.1 अंहोमुचः {मूत्ररूपा अपः}

विसृज्यमानस्य मूत्रस्यानेन पदेन निर्देशः ।

{1} "अंहोमुचः अंहसः पापात् पुरुषं पृथक् कुर्वत्यः ।" {सायणः 4/5/5}

{2} "अंहोमुचः दुःखमोचयित्र्यः" {दयानन्दः}

{3} "अंहोमुचः अंहः पापमशुभं मुन्चन्ति पृथक् कुर्वन्तीत्यंहोमुचः । हे मूत्राख्या अपः ।" {उ०}

अत्र उव्वटकृतं व्याख्यानं विशिष्यते ।

4.13.2. स्वाहाकृताः {आपः}

{1} "स्वाहाकृताः पूर्वं क्षीरपानकाले स्वाहेत्यनेन मन्त्रेण स्वीकृता यूयं पृथिवीमाविशत ।" {सायणः 4/5/5}

{2} "स्वाहाकृताः या क्रियया सुसंस्कृताः क्रियन्ते ताः ।" {दयानन्दः}

{3} "स्वाहाकृताः सुष्ठु त्यक्ताः ।" {उ०}

विसृज्यमानं मूत्रमुद्दिश्य प्रयुक्तमेतत् पदं तस्य सुष्ठु त्यक्तत्वं सूचयतीति उव्वट आह । सायणाद्यैस्तु स्वाहेति मन्त्रेण पूर्वं स्वीकृता इति निर्दिष्टम् ।

4.18.1. शुक्रम् {हिरण्यम्, यज्ञद्रव्यम्}

{1} "शुक्रमसि दीप्यमानमसि ।" {सायण: 4/6/1}

{2} "शुक्रम् शुद्धम् ।" {दयानन्द:}

एतत्पदं सप्तदशे मन्त्रे पि पठितमस्ति । तत्रोव्वटेन अस्य पदस्य आज्यमित्यर्थो निर्दिष्टः । महीधरेण च दीप्यमानो ग्निरित्यर्थो निरूपितः । अष्टादशे मन्त्रे तु अस्य उव्वटेन अग्नेः रेत इति, महीधरेण तु दीप्यमानमित्येव निर्दिष्टम् ।

4.18.2. यन्त्रम्

{1} "यन्त्रम् नियमनम् ।" {सायण: 4/6/1}

{2} "यन्त्रम् यन्त्रयति संकुचति चालयति निबध्नाति वा येन तत्" {दयानन्द:}

{3} "तन्वो यन्त्रम् अशीय शरीरस्य यमनं दार्ढ्यम् अशीय व्याप्नुयाम् ।" {उ0}

{4} "तन्वः शरीरस्य यन्त्रं नियमनं दार्ढ्यम् ।" {म0}

सायणादीनां पूर्वाचार्याणां मते अस्य दार्ढ्यमित्यर्थो वगम्यते । तैः पदार्थ एव दर्शितः, दयानन्देन व्युत्पत्तिः सूचितेति विशेषः ।

4.18.3. चन्द्रम् {यज्ञद्रव्यम्, हिरण्यम्}

हिरण्यमुद्दिश्य पदस्यात्र प्रयोग इति उव्वटाद्या आहुः । अनेन

हिरण्यस्य मन आह्लादने सामर्थ्यं सूच्यते ।

§1§ "चन्द्रमसि । चदि आह्लादले ।" §उ0§

§2§ "तथा चन्द्रमाह्लादकमसि । चदि आह्लादने चन्दतीति चन्द्रम् ।" §म0§

उव्वटेन धातुरेव निर्दिष्टो न त्वर्थः, महीधरेण पदव्युत्पत्तिः, धातुः, पदार्थश्चैते निरूपिता इति विशेषः ।

4.19.4. क्षत्रिया §यज्ञद्रव्यम्, सोमक्रयणी§

§1§ "या च क्षत्रिया सि । क्षतात् त्रायत इति क्षत्रियः । जात्या स्तूयते वा ।" §उ0§

§2§ "क्षत्रियासि सोमक्रयसाधनत्वेन । तथा हि देवेषु क्षत्र जात्यभिमानी सोमः । तदुक्तं बृहदारण्यके "यान्येतानि देवत्रा क्षत्राणीन्द्रो वरुणः सोमो रुद्रः" इति । तेन सोमेन क्षत्रेणाभिमन्तव्यस्य सोमलताद्रव्यस्य क्रयहेतुत्वेन त्वं क्षत्रियासि ।

अत्र उव्वटापेक्षया महीधरकृतं व्याख्यानं मनोहरमिति विशेषः ।

§3§ "क्षत्रिया या क्षत्रस्यापत्यवद् वर्तते ।" §दया0§

4.19.5. उभयतः शीर्ष्णी §यज्ञद्रव्यम्, सोमक्रयणी गौः§

एतत्पदमत्र सोमक्रयणीं गामुद्दिश्य तद्विशेषणतया प्रयुक्तमस्ति । अनेन तस्याः उभयतो मुखत्वं सूच्यत इत्युव्वटेन निर्दिष्टम् । महीधरेण प्रायणीयोदयनीययोः शीर्षत्वेन, सर्वतोमुखत्वेन चेति द्विधा उभयशीर्षत्वमुपपादितम् ।

§1§ "उभयतः शीर्ष्णी उभयतोमुखी । वाक्ये पदानामन्यथा चान्यथा च क्रमो भवतीत्येतदभिप्रायम् । सयदेनयासयान सविपर्यासं वदति" इत्यादिश्रुतिः ।" §उ0§

(2) "उभयतः शीर्ष्णी उभयतः शीर्षे यस्याः सा । "द्वे शीर्षे प्रायणीयोदयनीये" इति यास्कोक्तेः । यद्वोभयतः शीर्ष्णी सर्वतोमुखी वाग्रूपत्वात् ।" (म०)

उव्वटकृतं व्याख्यानं विशेषतो वाचो वैशिष्ट्यं दर्शयति । तत्र वाक्ये पदानां क्रमस्य विपर्यासस्योदाहरणात् । महीधरस्य व्याख्याने प्रायणीयोदयनीयरूपोभयात्मकशीर्षदर्शनाद् यज्ञप्रक्रियानुकूलता सूच्यते । उव्वटरीत्या पि महीधरेण व्याख्यानं यद्यपि कृतम्, परं तत्राभिप्रायः साधु नोपपद्यते ।

(3) "उभयतः शीर्ष्णी उभयतः शिरोवदुत्तमा गुणा यस्यां सा ।"
(दया०)

4.22.1. तोतः (कलत्रम्, इष्टम्)

(1) " तोतोरायः । त्वयि रायः पशवः सन्त्विति शेषः ।"
(उ०)

(2) "तोतः शब्दः कलत्रवाची अव्ययम् । तोतः कलत्रे रायो धनानि पशवो वा पदरूपेण तिष्ठन्तु । यद्वाव्ययामनेकार्थत्वात्तोत : शब्दो युष्मत् पर्यायः ।" (म०)

महीधरेणात्र कलत्ररूपो थों न्यश्च युष्मद् रूपो निर्दिष्ट इति विशेषः।

(3) "तोतः तुवन्ति जानन्ति प्राप्नुवन्ति हिंसन्ति वा येन सः । अत्र तु गतिवृद्धिहिंसास्विति धातोर्बाहुलकादौणादिकस्तन्प्रत्ययः ।" (दया०)

अत्र दयानन्देन प्रस्तुता व्युत्पत्तिः पदार्थनिर्देशस्य न्यूनतया हीनफला ।

4.25.3. सवीमा

(1) "सतीमनि प्रसवे पूर्णे हि दातव्ये ।" (उ०)

{2} "सवीमनि अनुज्ञानिमित्तं सर्वान् कर्माण्यनुज्ञातुमित्यर्थः । "षु प्रसवैश्वर्ययोः" "वृत्तृत्तुभ्य इमनिच्" इतीमनिच् । गुणावादेशौ । सवीमा प्रसवो नुज्ञेत्यभिधानम् ।"

महीधरेण पदस्य सुधातुल्यं मूलं सप्रत्ययं निर्दिश्य पदार्थश्च सूचित इति विशेषः ।

{3} "सवीमनि यः सूयते संसारः तस्मिन् ।" {दया०}

<u>4.27.1. सुमित्रधः {सोमः, यज्ञद्रव्यम्}</u>

इदं पदं सोममुद्दिश्य प्रयुक्तमस्ति । अनेन सोमस्य शो भनमित्रवत् व्यवहार इष्यते ।

{1} "शोभनानि मित्राणि दधाति पुष्णातीति सुमित्रधः ।" {उ०}

{2} "शोभनानि मित्राणि दधाति पुष्यतीति सुमित्रधः । क्रीत्वा वाससा बद्धस्य सोमस्य वरुणदेवताकत्वेन क्रूरत्वात् तच्छान्त्यर्थो मित्रत्वेन प्रार्थ्यते ।8 {म०}

महीधरेण श्रुतिवाक्योदाहरणेन पदप्रयोगबीजं च सूचितमिति विशेषः ।

{3} "सुमित्रधः यः शोभनानि मित्राणि दधाति सः ।" {दया०}

<u>4.27.2. मित्रः {सोमः, यज्ञद्रव्यम्}/{देवता, सोमः}</u>

एतत्पदं सोममुद्दिश्य प्रयुज्यते ।

{1} "हे सोम, मित्रस्त्वं सन्नो स्मानभ्येहि । मित्रशब्देनेहादित्यो गृह्यते ।" {उ०}

{2} "मित्रः सखा प्रीतियुतः । यद्वा मित्रः रविरूपः ।" {म०}

महीधरेणार्थद्वयं मित्रस्य सखा, आदित्यश्चेति निर्दिष्टम् । निश्चय-

स्तु न कृतः । मन्त्रप्रसङ्गात् सखारूपो र्थः साधुः प्रतीयते ।

[3] "मित्रः सुहृद् सन् ।" [द०]

<u>4.23.1. एतशः [अश्वः]</u>

अत्र मन्त्रवाक्यादेतशस्य गमनसाधनत्त्वं ज्ञायते । एतस्य पदस्याश्वरूपो र्थो भाष्यकारैर्निर्दिष्टः ।

[1] "एतश इति अश्वनामसु पठितम् ।" [उ०]

[2] "एतशैरश्वैः ।" [म०]

[3] "एतशेभिः विज्ञानवेगादिभिरागमकैगुणैरश्वैः ।" [द०]

<u>4.31.2. अर्वा [पुरुषः]</u>

इदं पदं पुरुषानुद्दिश्यात्र प्रयुक्तम् । महीधरेण अश्वेषु इत्यर्थो पि निर्दिष्टः, स च प्रसिद्ध एव अर्वशब्दार्थः । उव्वटेन श्रुतिवाक्योद्धरणपुरस्सरं पुमर्थे पदस्यास्य प्रयोगदर्शनात् तदर्थस्य प्राधान्यं भवितुमर्हति । किन्तु मन्त्रे अमूर्तद्रव्याणां बाहुल्यादश्वरूपार्थस्यापह्नवश्च कठिन इति ज्ञेयम् ।

[1] "वाजं वीर्यम् । अर्वत्सु पुरुषेषु ।" [उ०]

[2] "अर्वत्सु अश्वेषु वाजं बलं विततानेत्यनुवर्तते । यद्वा अर्वत्सु पुरुषेषु वाजं वीर्यं विततान । "वीर्यं वै वाजः पुमांसो र्वन्तः" इति श्रुतेः ।" [म०]

[3] "अश्वेषु प्राप्तवेगगुणेषु विद्युदादिषु वा ।" [द०]

<u>4.33.1. उस्रौ [यज्ञाङ्गपशुः, शकरवाहकः]</u>

यज्ञे सहायकयोरनडुहोः सम्बोधनमनेन विधीयते इत्युव्वटादयः । तस्मात् संज्ञामात्रमिदम् ।

[1] "हे उस्रौ अनड्वाहौ ।" [उ०]

महर्षिदयानन्देन अस्य पदस्य सूर्यवायुपरत्वं निर्दिष्टम् -

{2} "उग्रे रश्मिमन्तौ निवासहेतू सूर्यवायू । उग्रा इति रश्मिनामसु पठितम् । गोनामसु च ।" {द0}

अत्र दयानन्ददर्शितः सूर्यवायुरूपो यौ नवीनः ।

4.33.2. धूर्षाहौ {अनड्वाहौ, यज्ञाड्0गम्/वाहकपशुरूपौ}

यज्ञे सहायकयोरनडुहोर्विशेषणम् ।

{1} "धुरं सहेते तौ धूर्षाहौ, शकटधुरं वोढुं समर्थौ ।

{2} "षह मर्षणे । धुरं सोढुं यौ शक्नुतस्तौ तथोक्तौ ।" {उ0}

अनेन अनडुहोः शकटस्थभारवहनक्षमत्वं सूचितम् । उव्वटेन मूलधातुरपि दर्शितः मर्षणार्थो "षह" इति विशेषः ।

{3} "धूर्षाहौ यौ धुरं पृथिव्याः शरीरस्य ज्ञानादीनां वा धारणं सहेते तौ ।" {द0}

4.33.3. अनश्रू {अनड्वाहौ, यज्ञाड्0गम्}

पदमेतत् यज्ञे सहायकयोरनडुहोः विशेषणत्वेन प्रयुक्तम् । अनेन तयोः क्लेशं विना भारवहनमभिप्रेतं व्यज्यते ।

{1} "अनश्रू । अश्रुरहितौ हृष्टावित्यर्थः ।" {उ0}

{2} "अनश्रू । नेत्रयोरश्रुरहितौ । सोत्साहावित्यर्थः ।" {म0}

अश्रु दुःखितस्य प्रवहति, तस्मात् तत् क्लेशव्यञ्जकं भवति, क्लेशाभावेन हृष्टता भवति, हृष्टत्वे उत्साहो भिवर्धते इति भाष्ययोरर्थो नुकूल एव ।

दयानन्देन अनश्च्यू इदं पाठं प्रदर्शयित्वा तस्य अव्यापिनौ इत्यर्थो दर्शितः । एतस्य कल्पनापोढत्वात् नैरर्थक्यम् ।

58

4.33.4. अवीरहणौ [अनड्वाहौ, यज्ञाङ्गम्]

यज्ञे सहायकयोरनडुहोः विशेषणत्वेन प्रयुक्तं मन्त्रगतं पदमिदं तयोः उद्धतत्वेन सम्भाविताया यजमानस्य क्षतेः निराकृत्येष्टतां व्यनक्ति -

[1] "वीराणां यौ युवां वधं न कुरुतं ताववीरहणौ । प्रशस्तावित्यर्थः ।" [उ०]

[2] "अवीरहणौ न वीरान् हतस्तौ । शृङ्गादिभिर्वीराणां शिशूनां हननमकुर्वाणौ ।" [म०]

[3] "अवीरहणौ वीरहननरहितौ ।" [द०]

4.33.5. ब्रह्मचोदनौ [अनड्वाहौ, यज्ञाङ्गम्]

अनडुहौ विशेषणत्वेन प्रयुक्तं पदमेतत् तयोर्यज्ञे प्रेरकत्वं सूचयति ।

[1] "ब्रह्मचोदनौ ब्राह्मणान् यज्ञं प्रति प्रेरयितारौ ।" [उ०]

[2] "ब्रह्मचोदनौ ब्रह्मणो विप्रान् चोदयतस्तौ ब्राह्मणानां यज्ञं प्रति प्रेरकौ ।" [म०]

अत्र भाष्यकाराभ्यां अनडुहोः कथं केन प्रकारेण वा यज्ञे प्रेरकत्वमिति न सूचितम् । तदत्र विमृश्यम् ।

[3] "ब्रह्मचोदनौ आत्माऽन्नप्राप्तिकारकौ ।" [द०]

अत्र दयानन्दकृतोऽर्थो नवीनः ।

4.34.3. परिपरिणः [यज्ञबाधकाः]

सोमस्य प्रयोगे अधिगमे च अयोग्यानां दुश्चरितानां जनानां वाचकमेतत् पदं मन्त्रवाक्याद्वगम्यते - -"मा त्वा परिपरिणो विदन्" इति । तस्य उव्वटेन परिणेतारो दुर्जना इति, महीधरेण तस्करविशेषा इत्यर्थो निर्दिष्टः ।

{1} "परिपरिणः परिणेतरो दुर्जनाः ।" {उ०}

{2} "सर्वतः सञ्चरन्तस्तस्करविशेषः परिपरिण उच्यन्ते ।" {म०}

{3} "परिपरिणः परितः सर्वतश्छलेन रात्रौ वा परस्वादायिनश्चोराः । छन्दसि परिपन्थिपरिपरिणौ पर्यवस्थातरि । अनेनेतौ शब्दौ स्तेनविषये निपात्येते ।" {द०}

अत्र व्युत्पत्त्या सह व्याकरणनियमस्य प्रदर्शनं दयानन्दस्य विशिष्टमस्ति ।

<u>4.34.4. वृकाः {यज्ञबाधकाः}</u>

सोमस्याधिगमे योग्यान् सत्त्वविशेषानुद्दिश्य मन्त्रे प्रयुक्तमेतत् पदं तेषां वृकवत् हानिजनकत्वं दर्शयति ।

{1} "वृकाः विकर्तनशीलाः ।" {उ०}

{2} "वृका विकर्तनशीला आरण्यश्वानो दुर्जना वा ।" {म०}

{3} "वृकाः स्तेनाः । वृक इति स्तेननामसु पठितम् ।" {द०}

<u>4.34.5. अघायवः {यज्ञबाधकाः}</u>

सोमाधिगमे योग्यान दुष्टान् सत्वानुद्दिश्य प्रयुक्तं मन्त्रस्थं पदमिदं तेषां परोपपीडकत्वं सूचयति ।

{1} "अघं पापं ये परस्य कर्तुमिच्छन्ति ते अघायवः ।" {उ०}

{2} "परस्याघं कर्तुमिच्छन्ति ते अघायवः ।" {म०}

{3} "अघायवः आत्मनो घं पापमिच्छवः" "अघायवः पापिनो मनुष्याः ।" {दया०}

4.36.1. उत्तम्भनम् {यज्ञसाधनम्, काष्ठविशेषः}

महीधरोक्त्या पदमेतत् काष्ठविशेषं सूचयतीति ज्ञायते ।

{1} "वरुणस्य त्वमुत्तम्भनं भवसि न तु शकटस्य ।" {उ0}

{2} "हे काष्ठ, त्वं वरुणस्योत्तम्भनमसि वस्त्रबद्धस्य सोमस्योन्नमनं भवसि न तु शकटस्येत्यर्थः । उत्तभ्यते शकटमुखाग्रमुन्नतत्वेन स्थाप्यते यस्मिन् काष्ठे तत् काष्ठमुत्तम्भनम् ।" {म0}

महीधरेण पदार्थबोधनाय प्रसङ्गः परिभाषा चैतद्द्वयं साधु विमृष्टमिति विशेषः ।

{3} "उत्तम्भनं उत्कृष्टं प्रतिबन्धनम् । उदः स्थास्तम्भोः पूर्वस्य अनेन पूर्वस्य सस्य पूर्वसवर्णादेशः ।" {द0}

4.36.2. स्कम्भसर्जनी {यज्ञसाधनम्, काष्ठनिर्मिता शम्या}

महीधरोक्त्या काष्ठनिर्मितायाः शम्यायाः पदमेतत् वाचकमवगम्यते।

{1} "स्कम्नोतिः स्तम्नोतिना समानार्थः । "अर्ज सर्ज अर्जने ।" स्कम्भशब्देनात्र युगमुच्यते । तस्य सर्जनी वशीकरण्यौ स्कम्भसर्जनी वरुणस्य युवां स्कम्भसर्जनी शम्ये स्थः भवथः ।" {उ0}

{2} "शकटयुगे बद्धयोर्बलीवर्दयोर्गलबहिर्भागे काष्ठनिर्मिते शम्ये स्थाप्येते । ताभ्यां वृषयोरितस्ततो गमनं निवार्यते ततस्ते स्कम्भसर्जनीशब्देनोच्येते ।" {म0}

"हे शम्ये युवां वरुणस्य स्कम्भसर्जनी स्थः । "स्कम्भ रोधने" । "सर्ज अर्जने" । स्कम्भनं स्कम्भो रोधः स सज्यते क्रियते याभ्यां ते स्कम्भसर्जन्यौ ।"

महीधरेण पदव्युत्पत्तिः, पदबोध्य वस्तुस्वरूपञ्च साधु निर्दिष्टमिति वैशिष्ट्यम् ।

§3§ "स्कम्भतर्जनी या क्रिया स्कम्भानामाधारकाणां सर्जन्युत्पादिका सा ।" §द0§

4.36.3. ऋतसदनी §यज्ञाङ्गम्, यज्ञस्थानम्§

पदमेतत् यज्ञे उपवेशनस्थानं निर्दिशतीति महीधरोक्त्या ज्ञायते ।

§1§ "आसन्दीमभिमृशति । वरुणस्य ऋतसदनी सत्यसदनी त्वं भवसि ।" §उ0§

§2§ "हे आसन्दि, त्वं वरुणस्य सोमस्य सम्बन्धिनी ऋतसदन्यसि ऋताय यज्ञाय सद्यते यस्यां सा ऋतसदनी । "करणाधिकरणयोः" इति ल्युप्रत्ययः । ऋतं यज्ञस्तन्निष्पत्त्यर्थमुपवेशनस्थानभूतासीत्यर्थः ।" §म0§

§3§ "ऋतसदनी या क्रिया ऋतानां जलानां सदनी गमनागमनकारिणी ।" §द0§

4.36.4. वरुणः §यज्ञद्रव्यम्, सोमः§

महीधरोक्त्या पदमेतत् सोमवाचकं भवति ।

§1§ "व्रियते वेष्ट्यते वस्त्रादिनेति वरुणशब्देनात्र वस्त्रबद्धः सोम उच्यते ।" §म0§

दयानन्देन मन्त्रे बहुधा पठितस्य वरुणपदस्य स्वभाष्ये जगत्, वायुः, सूर्यः, वरपदार्थसमूहः, उत्कृष्टगुणसमूहश्चेत्यर्थाः प्रदर्शिताः सन्ति ।

§2§ "वरुणस्य वरितुं प्राप्तुं योग्यस्य श्रेष्ठस्य जगतः । वरुण इति पदनामसु पठितम् ।"

"वरुणस्य वायोः । अनेन ज्ञानप्राप्तिगमधातोरर्थस्य ग्रहणम्" "वरुणस्य सूर्यस्य" "वरुणस्य वरपदार्थसमूहस्य" "वरुणस्य उत्कृष्टगुणसमूहस्य" §द0§

4.36.5. ऋतसदनम् [यज्ञसाधनम्, कृष्णाजिनम्]

एतत् कृष्णाजिनमुद्दिश्य प्रयुज्यत इति भाष्ये निर्दिष्टम् ।

[1] "कृष्णाजिनमस्यामास्तृणाति । वरुणस्य ऋतसदनमसि । वरुणस्य सत्यसदनं त्वं भवसि । सीदन्त्यस्मिन्निति ~~सदम~~ सदनम् ।" [उ०]

[2] "हे कृष्णाजिन, वरुणस्य बद्धस्य सोमस्य ऋतसदनं यज्ञार्थमुपवेशनस्थानमसि ।" [म०]

[3] "ऋतसदनं ऋतानां यथार्थानां पदार्थानां सदनं स्थानम् ।"
[दयानन्दः]

4.37.1. गयस्फानः [सोमः, यज्ञद्रव्यम्]

सोममुद्दिश्य तद्विशेषणतया मन्त्रे प्रयुक्तमेतत् पदं सोमस्य वृद्धिमूलकत्वं दर्शयति ।

[1] "गयस्फानः गृहस्य पुत्रपशुभूहिरण्यादिभिर्वर्धयिता ।" [उ०]

[2] "गयस्फानः । गय इति गृहनाम । स्फायी वृद्धौ गयान् स्फाययतीति गयस्फानः गृहाभिवर्धकः ।" [म०]

महीधरस्य व्याख्यानं प्रकृतिस्वरूपं अत्र साधु निर्दिशति। एतदत्र विशिष्टम् ।

[3] "गयस्फानः । गयानामपत्यधनगृहाणां फानो वर्धयिता । गय ~~इत्यस्वन्ति~~ इत्यपत्यनामसु पठितम् । धननामसु । गृहनामसु च ।" [द०]

4.37.2. प्रतरणः [सोमः, यज्ञद्रव्यम्]

सोममुद्दिश्य तस्य विशेषणत्वेन प्रयुक्तमेतत् पदं सोमस्य शक्तिविशेषं यजमानस्य विपदादिभ्यो रक्षणे समर्थं सूचयति ।

[1] "प्रतरन्ति येनापदः स प्रतरणः ।" [उ०]

(2) "प्रकर्षेण तरन्त्यापदो येन स प्रतरणः । यद्वा प्रतारयति यज्ञपारं प्रापयतीति प्रतरणः ।" (म०)

(3) "प्रतरणः प्रतरति दुःखानि येन सः ।" (द०)

4.37.3. सुवीरः (सोमः, यज्ञद्रव्यम्)

सोमस्य विशेषणम् ।

(1) "सुवीरः शोभनवीरः ।" (उ०)

(2) "शोभनास्त्वत्प्रसादलब्धा वीरा अस्मत्पुत्रपौत्रा यस्य तव स त्वं सुवीरः ।" (म०)

अत्र महीधरकृतं व्याख्यानं शोभनं स्पष्टार्थत्वात् ।

(3) "सुवीरः । शोभना वीरा यस्मिन् सः ।" (द०)

4.37.4. अवीरहा (सोमः, यज्ञद्रव्यम्)

(1) "अवीरहा अहन्ता वीराणाम् ।" (उ०)

(2) "अवीरहा न वीरान् हन्तीति ।" (म०)

(3) "अवीरान् कातरान् मनुष्यान् हन्ति येन सः । अत्र कृतो बहुलमिति करणे क्विप् ।" (द०)

5.1.1. अग्नेस्तनूः (हविः, यज्ञद्रव्यम्)

विष्णुमुद्दिश्य हूयमानस्य हविषः स्तुत्यर्थे पदस्य मन्त्रे ऽस्मिन् प्रयोगं निर्दिशति महीधरः । उव्वटस्यापि तस्मिन्नर्थे संकेतः प्रतीयते ।

(1) "अग्नेस्तनूरसि"अग्निशब्देन शरीरं गायत्र्युच्यते" इति श्रुतिः। अग्नेस्तनूः शरीरं भवसि । हुतं हविरग्नेः शरीरं भवत्येव ।" (उ०)

(2) "हे हविः त्वमग्नेस्तनूरसि । अग्निसंज्ञो यो देवः सोमस्य राज्ञो भृत्यस्तस्य गायत्रीछन्दोधिष्ठातुस्तनूः शरीरं भवसि, तृप्तिजनकत्वात् ।" (म०)

महीधरेणात्र अग्निनाम्नो देवस्य सोमभृत्यत्वं गायत्रीच्छन्दोधिष्ठातृत्वं च स्पष्टमुक्तं नोव्वटेन तथेति विशेषः

5.1.2. सोमस्य तनुः (हविः, यज्ञद्रव्यम्)

इदं विष्णुमुद्दिश्य हूयमानस्य हविषः स्तुत्यर्थं प्रयुक्तं पदमस्ति । अनेन हविषः सोमरूपत्वं व्यज्यते ।

(1) "सोमस्य शरीरमसि विष्णवे त्वां जुष्टं गृह्णामि । सोमः परोक्षेण त्रिष्टुबुच्यते" इति श्रुतिः ।" (उ०)

(2) "सोमसंज्ञः कश्चिद् सोमस्य राज्ञो भृत्यस्त्रिष्टुप् छन्दो धिष्ठाता तस्य तृप्तिहेतुत्त्वात्तनूरसि ।" (म०)

(3) "सोमस्य जगत्युत्पन्नस्य पदार्थसमूहस्य रसस्य वा । तनुः विस्तारकम् ।" (द०)

5.2. अग्नेः जनित्रम् (शकलम्, यज्ञसाधनम्)

शकलमुद्दिश्य मन्त्रे स्मिन् अस्य पदस्य प्रयोगमुव्वटाद्याः कथयन्ति। तत्र शकलपदार्थस्तु उव्वटेन महीधरेण वा स्पष्टं नोक्तः । अग्नेः जनकत्वं जनित्रपदस्याभिधेयं ताभ्यामुक्तम् -

(1) "आतिथ्ये अग्निमन्थनं शकलमादत्ते । अग्नेर्जनित्रम् । जायतेस्मिन्नग्निरिति जनित्रम् ।" (उ०)

(2) "हे शकल त्वमग्नेर्जनित्रम् जननाधारभूतं मसि । जायते -स्मिन्निति जनित्रम् ।" (म०)

उव्वटेन शकलस्य मन्थनोपयोगित्वं सूचितम्, महीधरेण अग्नेर्जननाधारत्वमिति विशेषः ।

5.2. वृषणौ (यज्ञद्रव्यम्, कुशतरुणौ)

अस्य पदस्य मन्त्रे कुशतरुणद्वयमुद्दिश्य प्रयोगमुव्वटो निर्दिशति ।

§1§ "दर्भतरुणके निदधाति । वृषणौ स्थः । "वृषु सेचने" । वृषणौ वर्षितारौ सेक्तारौ भवथः ।" §उ0§

§2§ "हे दर्भौ, युवां वृष्णौ सेक्तारौ स्थः भवथः । वृषतः इति वृषणौ । कनिन्प्रत्ययः । यथा पुत्रजननाय स्त्रीपुरुषौ वीर्यस्य सेक्तारौ तद्-वद् युवामप्यरण्योरग्निजननसामर्थ्यसम्पादकावित्यर्थः ।" §म0§

उव्वटभाष्ये व्युत्पत्तेरेकभागो वृषुधातुः सेचनार्थो प्रकृतिरूपो निर्दिष्टः, महीधरेण पुनः ।

5.2. वृषणौ

कनिन्प्रत्ययः एव सूचित इत्यत्र द्वयोरपि परस्परं पूरकत्वं दृश्यते ।

5.2. उर्वशी §यज्ञपात्रम्, अधरारणि§

अप्सरो विशेषरूपे र्थे रूढस्यास्य पदस्य मन्त्रे स्मिन् अधरारणिमु-द्दिश्य प्रयोगो भाष्यकृद्भ्यां निर्दिष्टः ।

§1§ "अधरारणि" निदधाति । उर्वश्यसि ।" §उ0§

§2§ "हे अधरारणे, त्वमुर्वशी असि । यथोर्वशी पुरूरवोनृपस्य भोगायाधस्ताच्छेते तद्वत् त्वमधो वस्थितासीत्यर्थः ।" §म0§

अत्र महीधरेण उर्वश्या अधरारणित्वेन कल्पने बीजं निर्दिष्टमिति विशेषः ।

5.2. आयुः §यज्ञद्रव्यम्, घृतम्§

अत्र हूयमानस्यान्यस्य आयुः शब्देन निर्देशं भाष्यकृतावाहुः -

§1§ "उत्तरारण्या आज्यविलापनीमुपस्पृशति आयुरसि ।" §उ0§

§2§ "हे स्थालीगताज्य, त्वमायुरसि अरणिद्वयेन जनिष्यमाण-

स्याग्नेरायुः प्रदं भवति ।" ॥म०॥

5.2. पुरूरवाः ॥यज्ञपात्रम्, उत्तरारणिः॥

अत्र उत्तरारणिमुद्दिश्य पुरूरवः शब्दस्य प्रयोगः भाष्यकृतावूचतुः-

॥1॥ "उत्तरारणिं निदधाति पुरूरवा असि ।" ॥उ०॥

॥2॥ "हे उत्तरारणे, त्वं पुरूरवा असि । यथा पुरूरवा नृप ऊर्वश्या अभिमुख उपरि वर्तते तथा त्वमपीत्यर्थः ।" ॥म०॥

5.5. अनभिशस्ति ॥यज्ञद्रव्यम्, आज्यम्॥

इदं हूयमानस्य हविष आज्यरूपस्य विशेषणत्वेन प्रयुक्तं पदमस्ति । अनेन आज्यस्य अनिन्दनीयता सूच्यत इति भाष्यकृतोः संमतमस्ति ।

॥1॥ "अनभिशस्ति । अभिपूर्वः शंसतिर्गर्हार्थे वर्तते । न विद्यते अभिशस्तिर्यस्य तत्तथोक्तम् ।" ॥उ०॥

॥2॥ "अनभिशस्ति नास्ति अभिशस्तिर्निन्दा यस्य तत् । अभिपूर्वः शंसतिर्गर्हायां वर्तते ।" ॥म०॥

5.5. अभिशस्तिपाः ॥यज्ञद्रव्यम्, आज्यम्॥

सायणेनास्य आज्यमुद्दिश्य प्रयोगो निर्दिष्टः । व्युत्पत्तिमूलोर्थश्चोक्तः -

॥1॥ "ऋत्विजां परस्परविरोधेन निन्दनमभिशस्तिः तस्याः पाति रक्षतीत्यनभिशस्तिपाः ।" ॥सा० 5/2/3॥

॥2॥ "अभिशस्तेः पाति रक्षतीत्यभिशस्तिपाः ।" ॥उ०॥

॥3॥ "अभिशस्तिर्ऋत्विजां परस्परविरोधेन निन्दनं तस्याः पाति रक्षतीत्यभिशस्तिपाः । पुंस्त्वं छान्दसम् ।" ॥म०॥

{4} "अभिशस्तिपाः योभिशस्तेर्हिंसमात् पाति रक्षति ।" {द०}

अत्र पूर्वाचार्यैर्निन्दाया रक्षक इत्यर्थः कृतः । दयानन्देन हिंसाया रक्षक इत्युक्तम् । अयमेव भेदः ।

5.5. अनभिशस्तेन्यम् {यज्ञद्रव्यम्, आज्यम्}

आज्यमुद्दिश्य तद्विशेषणतया प्रयुक्तमेतत्पदं सायणो निर्दिशति । अनेन आज्यस्य स्वर्गादिहेतुत्वं सूच्यत इत्यर्थन्याह ।

{1} "अनभिशस्तेन्यम् अनभिशस्तमनभिनिन्दितं यत् स्वर्गादिफलं तद्धेतुत्वादनभिशस्तेन्य आज्य ।" {सा० 5/2/3}

{2} "अनभिशस्ते प्रदेशे स्वर्गादौ नयतीति अनभिशस्तेन्यम् ।" {उ०}

{3} "अनभिशस्तौ अनिन्दिते स्वर्गादौ नयतीत्यनभिशस्तेनीः । द्वितीया प्रथमार्थे । पुंस्त्वं व्यत्ययेन ।" {म०}

{4} "अनभिशस्तेन्यम्, यदनभिशस्ते विद्यमानहिंसने नयति तत् ।" {द०}

5.7.1. अंशुः {यज्ञद्रव्यम्, सोमः}

सायणेन सोमवल्ल्या अवयवत्वे शे स्य तात्पर्य निर्दिष्टम् –

{1} "अंशुशब्दः सोमवल्ल्या अवयवमाचष्टे ।" {सा० 5/2/5} "वीप्सा सर्वसंग्रहार्था, हे सोमदेव, ते त्वदीयों शुरंशुः सर्वे प्यवयवाः ।" {सा०}

{2} "सोमवल्ल्या अवयवों शुरुच्यते । वीप्सा सर्वसङ्ग्रहार्था । सोम देव, ते तवांशुरंशुः सर्वो प्यवयवः ।" {म०}

अत्रोभयोः साम्यं स्पष्टमेव ।

5.7.3. सुत्या {यज्ञप्रक्रिया}

{1} "सुत्यां सोमाभिषवक्रियाम् ।" {सा०}

{2} "तव सम्बन्धि सवनं सुत्याम् ।" {उ०}

{3} "सुत्याम् सुन्वन्ति यया क्रियया तस्याम् ।"

अत्र दयानन्देन व्युत्पत्तिः पदस्य दर्शिता । तात्पर्यं तु सम्यङ्० नोक्तम् ।

5.7.4. सनिः {यज्ञफलम्, इष्टम्}

{1} "सन्या धनलाभेन ।" {उ०}

{2} "सनिर्धनदानम् ।" {म०}

अत्र सोमस्य धनार्थं प्रार्थनया तस्य धनदातृत्वं सूच्यते ।

{3} "सन्न्या समानान् पदार्थान् नयति यया तया ।" {द०}

एषा व्युत्पत्तिः पदार्थं सम्यङ्० न बोधयति ।

5.10.1. सिंही {यज्ञाङ्०गम्, उत्तरवेदिः}

अस्य उत्तरवेदीसुदिदक्षय प्रयोगं सायणो निर्दिशति ।

{1} "हे उत्तरवेदे त्वं सिंही सिंहसमाना भूत्वा" {सा० 5/3/2}

{2} "सिंह्यसि । तेभ्यो ह वाक् चुक्रोध" इत्युपक्रम्य "सिं ही भूत्वा ददानाचचार" इतीतिहासो वेदिमन्त्राणां निदानभूतः ।" {उ०}

{3} "वाक् पूर्वमसुरेभ्यः क्रुद्धा सिंही भूत्वा चचारेतीतिहासः । सा वेदिमन्त्रैरुच्यते । हे उत्तरवेदे, या त्वं सिंही सिंहसमाना भूत्वा ।" {म०}

उव्वटेन इतिहासांशः श्रुतिवाक्यस्याद्यन्तभागोपन्यासेन, महीधरेण स्वरचितवाक्येन सूचित इति भेदः ।

§4§ "सिंही हिनस्ति दोषान् यया यद्वा सिन्चत्युच्चारयति यया वाचा सा । हिंसः सिंह इति हयवरडिति व्याख्याने महाभाष्यकारोक्तिः । सिचेः संज्ञायां हनुमौकश्च §उ० 5/62§ अनेन कप्रत्ययो हकारादेशो नुमागमश्च । अत्र सर्वत्र गौरादया कृतिगणान्तर्गतत्वान् ङीष् ।" §द०§

5.10.2. सपत्नसाही §यज्ञाङ्गम्, उत्तरवेदिः§

उत्तरवेदिमुद्दिश्य पदस्यास्य प्रयोगः सायणेन कथितः ।

§1§ "सपत्नसाही शत्रूणामभिभवित्री अभिभवसि ।" §सा० 5/3/2§

§2§ "सपत्नान् सोढुं शीलमस्या इति सपत्नसाही ।" §उ०§

शत्रूणामभिभवित्री इत्यर्थः ।

§3§ "सपत्नान् सहते भिभवतीति सपत्नसाही । कर्मण्यण् । शत्रूणामभिभवित्री ।" §म०§

उव्वटेन महीधरेण च पृथक् व्युत्पत्तिसहकृतो र्थः कृतः ।

§4§ "सपत्नसाही यया सपत्नान् शत्रून् सहन्ते सा ।" "सपत्नशाही यया सपत्नात् दोषान् सहन्ते मृष्यन्ति दूरीकुर्वन्ति सा ।" "सपत्नसाही यया सपत्नान् दुष्टानि शीलानि सहन्ते सा ।" §द०§

दयानन्देन मन्त्रे वारत्रयं पठितस्य पदस्यास्य पृथक् त्रिधा र्थो निर्दिष्ट इति विशेषः ।

5.12.2. आदित्यवनिः

§1§ "आदित्यान् वनुते सम्भजते प्रीणयतीति आदित्यवनिः ।" §सा० 5/4/3§

§2§ "आदित्यादीन् वनुते सम्भजत इत्यादित्यवनिः ।" §उ०§

महीधरीयं व्याख्यानं सायणेन समानम् ।

§3§ "आदित्यवनिः या आदित्यान्मासान् वनति संभजति

सा ।" (द०)

दयानन्देनात्र "आदित्यान् मासान्" इति पदेन "आदित्यसम्बन्धिनो मासान्" इति, "मासरूपान् आदित्यान्" इति वा थों भिप्रेत इति स्पष्टं नावगम्यते ।

पूर्वाचार्यदृष्ट्या स्य उत्तरवेदिविशेषणत्वं गम्यते दयानन्दमते पुनर्वाचो विशेषणत्वमिति विशेषः ।

5.12.3. ब्रह्मवनिः (उत्तरवेदिः, यज्ञाङ्गम्)

(1) "ब्राह्मणजातिक्षत्रियजात्योः प्रीणयितृत्वमत्र विशेषः ।"

(सा० 5/4/2)

अत्र महीधरीयं व्याख्यानमक्षरशः समानम् ।

(2) "यया ब्रह्मविदो मनुष्याः ब्रह्म परमात्मानं वेदं वा वनन्ति संभजन्ति सा ।" (द०)

अत्र दयानन्देन सव्युत्पत्तिकः पदार्थनिर्देशः कृतः सविशेषः इति नवीनत्वम् । पूर्वाचार्यापेक्षया वाचमुद्दिश्य तद्विशेषणतया पदव्याख्यानं च विशिष्टम् ।

5.12.4. क्षत्रवनिः (उत्तरवेदिः, यज्ञाङ्गम्)

(1) "क्षत्रवनिः यया क्षत्रं राज्यं धनुर्विद्यां शूरवीरान् पुरुषान् वा वनन्ति सम्भजन्ति सा ।"

अस्य पदस्य व्याख्यानं दयानन्देनैव पृथग् विहितं न पूर्वाचार्यैरिति वैशिष्ट्यम् ।

5.12.5. सुप्रजावनी [उत्तरवेदिः, यज्ञाङ्गम्]

[1] "पुत्रपौत्रादिरूपायाः शोभनप्रजायाः सुवर्णरजतादिधनपुष्टेश्च सम्पादनमत्र विशेषः ।" [सा० 5/4/2]

[2] "सुप्रजावनिः पुत्रपौत्रादिरूपायाः शोभनप्रजायाः सम्पादयित्री ।" [म०]

सायणेन एकस्मिन्नेव वाक्ये "सुप्रजावनी" "रायस्पोषवनी" इत्यनयोः पदयोरभिप्रायो व्याख्यातः, महीधरेण पृथग् द्वयोर्वाक्ययोः तात्पर्यं सूचितमिति तत्र वैशिष्ट्यम् ।

[3] "सुप्रजावनिः यया शोभनाः प्रजा वनति संभजति सा" [द०]

अत्र दयानन्दकृतो र्थः पूर्वाचार्यानुमत एव । केवलं व्युत्पत्तिनिर्देशो विशिष्टः ।

5.12.6. रायस्पोषवनी [उत्तरवेदिः, यज्ञाङ्गम्]

[1] "रायस्पोषवनिः सुवर्णरजतादिधनपुष्टेः सम्पादयित्री ।" [म०]

[2] "रायस्पोषवनिः यया रायो विद्याधनसमूहस्य पोषं पुष्टिं वनति संभजति सा ।" [द०]

अत्र दयानन्देन रायः इति पदस्य विद्याधनसमूहस्य इति निर्दिष्टो र्थो व्युत्पत्तिश्च विशिष्टत्वं ज्ञापयति ।

5.13.1. ध्रुवक्षित् [दक्षिणपरिधिः, यज्ञाङ्गम्]

इदं दक्षिणपरिधिमुद्दिश्य प्रयुक्तमिति सायणः ।

[1] "दक्षिणपरिधे, त्वं ध्रुवे स्थिरे क्षियति निवसतीति अच्युतक्षित्" [सा० 5/4/4]

{2} "ध्रुवे नित्ये यज्ञे क्षियतीति ध्रुवक्षित् ।" {उ०}

{3} "ध्रुवे स्थिरे यज्ञे क्षियति निवसति ध्रुवक्षिदसि ।" {म०}

{4} "ध्रुवक्षित्, यो ध्रुवाणि सुखानि शास्त्राणि वा क्षियति निवासयति सः ।" {द०}

अत्र दयानन्दकृतो र्थो भिन्न इति स्पष्टमेव ।

5.13.2. अच्युतक्षित् {दक्षिणपरिधिः, यज्ञाङ्गम्}

दक्षिणपरिधिमुद्दिश्य पदमेतत्प्रयुक्तमिति सायणादयः ।

{1} "अच्युते यज्ञे क्षियतीत्यच्युतक्षित् ।" {उ०}

{2} "अच्युते विनाशरहिते यज्ञे क्षियति निवसतीत्यच्युतक्षित् ।" {म०}

{3} "अच्युतक्षित् यो च्युतान्नाशरहितान् पदार्थान् क्षियति निवासयति सः ।" {द०}

पूर्वाचार्यैः पदस्यास्य यज्ञे निवासकर्तृत्वरूपो र्थो निर्दिष्टः, दयानन्देन तु तद् भिन्न एव नाशरहितानां पदार्थानां धारकत्वरूपः सूचितः ।

5.13.3. अग्नेः पुरीषम् {यज्ञद्रव्यम्, गुग्गुलुः}

गुग्गुलुप्रभृतिसंभारसमूहमुद्दिश्य पदस्यास्य प्रयोगं सायणो निर्दिशति -

{1} "हे गुग्गुलुप्रभृतिसंभारसमूह, त्वम् उत्तरवेदिगतस्याग्नेर्भस्म भासकमसि । तथा तस्याग्नेः पुरीषं पूरकमसि । तदेतदग्निपूरकत्वप्रसिद्धमित्येतत्तित्तिरिर्दर्शयति । "अग्नेर्ह्येतत्पुरीषं यत्सम्भारा इति ।" {सा० 5/4/4}

{2} "अग्नेः पुरीषमसि अग्नेः पूरयितृ भवसि । शरीरं हैवास्य पीतदारु" इत्यादिश्रुतिः । सम्भाराणां शरीरपूरणात् पुरीषत्वमुपपद्यते ।" {उ०}

{3} "हे गुग्गुलुप्रभृतिसम्भारसमूह, त्वमग्नेः पुरीषं पूरकमसि । पूरयतीति पुरीषम् ।" {म०}

अत्र उव्वटकृतं व्याख्यानं स्पष्टार्थतया विशिष्यते ।

{4} "अग्नेः विद्युदादेः । पुरीषं पशूनां प्रपूर्तिकरं साधनम् पुरीष्यो ऽसि पशव्यो ऽसि । शत० 6/3/3/18 ।" {द०}

दयानन्देनात्र अग्नेः पशूनां च पूरकत्वं पदस्यार्थतया निर्दिष्टमिति विशेषः ।

<u>5.14.1. होत्राः {होमकर्तारः}</u>

{1} "बिहोत्रा होमकर्तारः ।" {सा० 5/5/1}

{2} "सप्त वषट्कर्तारो होत्रा इत्युच्यन्ते ।" {उ०}

{3} "होत्राः होमकर्तारः ।"

"होत्रा होतारः सप्त वषट्कर्तारः ।" {म०}

महीधरेण सायणस्य उव्वटस्य च मतं स्वभाष्ये सूचितम्, अयमत्र विशेषः ।

{4} "होत्राः ये जुह्वत्याददति वा ते ।" {द०}

<u>5.21.1. रराटम् {मण्डपः, यज्ञाङ्गम्}</u>

हविर्धानाख्यमण्डपमुद्दिश्य पदस्यास्य प्रयोगः सायणेन निर्दिष्टः, पदार्थश्च ललाट इति ।

{1} "स च मण्डपो विष्णुदेवताकत्वाद् विष्णुरित्युपचर्यते । विष्णोश्च मूर्तिधरस्य सर्वावयवसद्भावाल्ललाटस्थो ऽवयवो ऽस्ति ।" {सा० 5/5/9} तद्वद् हविर्धानमण्डपस्यापि पूर्वद्वारवर्तिस्तम्भयोर्मध्ये काचिद्दर्भमयमालाधार वंश त्वं विष्णोर्विष्णुमूर्तित्वेनोपचारितस्य हविर्धानमण्डपस्य रराटमसि ललाटस्थानीयो भवसि ।" {सा० 5/5/9}

{2} "हविर्धानमण्डपस्यापि पूर्वद्वारवर्तिस्तम्भयोर्मध्ये काचिद्-

दर्भमाला ग्रथ्यते । तां मालां तद्बन्धनाधारतिर्यग्वंशं वा सम्बोध्य पुरुषललाटत्वे-नोपचयति ।" §म0§

§3§ "विष्णोर्यज्ञस्य ललाटमसि ।" §उ0§

§4§ "रराटम् परिभावितजगत् ।" §द0§

5.21.2. श्नप्त्रे

§1§ "हे रराट्यौ, युवां विष्णोर्विष्णुनामकस्य हविर्धानमण्डपस्य श्नप्त्रे स्थः ओष्ठसम्बन्धिरूपे भवथः ।" §सा0 5/5/9§

§2§ "विष्णोर्यज्ञस्य श्नप्त्रे सृक्किणी स्तः ।" §उ0§

ओष्ठसन्धिरुच्यते श्नप्त्रशब्देन ।

§3§ "हे रराट्यन्तौ, युवां विष्णोः विष्णुनामकस्य हविर्धान-मण्डपस्य श्नप्त्रे स्थः । ओष्ठसन्धिरूपे भवथः ।" §म0§

अत्र त्रयाणामपि साम्यं स्पष्टमेव ।

§4§ "श्नप्त्रे शुद्धे इव । अत्र ष्णाशौच इत्यस्य वर्णव्यत्ययेन सस्य सः ।" §द0§

"द्वे श्नप्त्रे इव जडचेतनसमूहौ स्तः ।" §द0§

अत्र दयानन्देन श्नप्त्रशब्दस्य शुद्धे इव इत्यर्थः स्वभाष्ये निर्दिष्टः, परमस्य विशेषणपदस्य विशेष्यभूतं शुद्धत्वविशिष्टं किमिति नोक्तम् । अन्वय-प्रसङ्गे तु तेनैव "द्वे श्नप्त्रे इव जडचेतनसमूहौ" इति वदता पूर्वाचार्यसम्मतो र्थो मनसि स्मृत एव । तथा पि विष्णोः जडचेतनरूपद्वयप्रदर्शने तस्याग्रहः प्रतीयते ।

5.21.3. स्यूः §यज्ञाङ्गम्, रज्जुविशेषः§

पदमिदं रज्जुविशेषमुद्दिश्य प्रयुक्तमिति सायणः ।

§1§ "हे रज्जो त्वं विष्णोर्विष्णुनामकस्य हविर्धानमण्डपस्य सम्बन्धिनी स्यूरसि । ग्रन्थिकरणाय स्यूता भवसि ।" §सा० 5/5/9§

§2§ "स्युरसि । "षिवु तन्तुसन्ताने" सीव्यत्यनेनेति स्यूः सूचिर्वा ।" §उ०§

§3§ "हे लस्यूजनि, त्वं विष्णोर्हविर्धानस्य स्यूरसि । सीव्यत्यनेनेति स्यूः सूचिः । षिवु तन्तुसन्ताने ।" क्विपि "च्छ्वोः शूडनुनासिके च" इति वस्योडादेशः ।" §म०§

उव्वटभाष्ये धातुसहितो विग्रहः प्रदर्शितः, महीधरभाष्ये तदपेक्षया सूत्रप्रत्ययनिर्देशो धिक इति विशेषः ।

§4§ "स्यूः यः सीव्यति सः ।" §द०§

<u>5.21.4. ध्रुवः §यज्ञाङ्गम्, रज्जुग्रन्थिः§</u>

पदस्यास्य रज्जुग्रन्थिमुद्दिश्य सायणेन व्याख्यानं विहितम् -

§1§ "हे रज्जुग्रन्थे, त्वं विष्णोर्हविर्धानस्य सम्बन्धी भूत्वा ध्रुवो सि स्थिरो भवसि ।" §सा० 5/5/9§

§2§ "ग्रन्थिं करोति । विष्णोर्ध्रुवो सि ग्रन्थिरसि ।" §उ०§

§3§ "हे रज्जुग्रन्थे, त्वं विष्णोर्हविर्धानस्य ध्रुवो सि ग्रन्थिर्भवसि ।" §म०§

§4§ "ध्रुवः निश्चलः ।" §द०§

<u>5.22.1. नारी §यज्ञाङ्गम्, अभ्रिः§</u>

अभ्रिमुद्दिश्य पदस्यास्य प्रयोगं सायण आह -

§1§ "अभ्रिशब्देन काष्ठनिर्मितं खननसाधनमुच्यते ।" "हे अभ्रे, त्वाददे त्वां स्वीकरोमि । त्वं तु नार्यसि खननसाधनत्वेन कर्मोपयोगित्वाद् नराणां

पुरूषाणाम् अनुष्ठातृणां सम्बन्धिनी भवति ।" ‖सा० 5/6/1‖

‖2‖ "नारीति प्रशस्यते श्रिः । नरस्यापत्यं स्त्री नारी ।" ‖उ०‖

महीधरीयं व्याख्यानं सायणेन समानम् ।

‖3‖ "नारी नराणामियं क्रिया ।" ‖द०‖

दयानन्देन नराणां क्रिया इत्यर्थः प्रदर्शित इति नवीनत्वम् ।

5.22.2. बृहद्रवाः ‖यज्ञाङ्गम्, उपवगर्तः‖

उपवाख्यगर्तमुद्दिश्य पदस्यास्य मन्त्रे प्रयोगमाहुः सायणादयः ।

‖1‖ "बृहद्रवाः बृहन्महान् रवो ध्वनिर्यस्येति विग्रहः । सकारान्तो यं शब्दः । खातुं भूमावभ्र्यां प्रहृतायां ध्वनिर्महान् भवतीत्यर्थः ।" ‖सा० 5/6/1‖

‖2‖ "बृहन् महत् रवो स्येति बृहद्रवाः ।" ‖उ०‖

‖3‖ "बृहन्महान् रवो ध्वनिर्यस्य सः । सकारान्तो रवशब्दः ।" ‖म०‖

खातुं भूमौ प्रहारे महान् ध्वनिर्भवतीत्यर्थः ।"

‖4‖ "बृहद्रवाः यथा बृहच्छब्दवान् ।" ‖द०‖

5.23.3. निष्ट्यः ‖पुत्रादिः यज्ञबाधकः‖

‖1‖ "स्त्यै ष्ट्यै शब्दसंघातयोरिति धातुः । नितरां स्त्यायति सङ्घातरूपेण सह वर्तत इति निष्ट्यः पुत्रादि ।" ‖सा० 5/6/2‖

‖2‖ "निष्ट्यः पुत्रः । स हि निर्गत्य शरीरात् ततो विस्तीर्णो भवति ।" ‖उ०‖

‖3‖ "स्त्यै ष्ट्यै शब्दसंघातयोः नितरां स्त्यायति सङ्घातरूपेण सह वर्तत इति निष्ट्यः । यद्वा निर्गत्य शरीरात् स्त्यायति विस्तीर्णो

भवतीति निष्ट्यः पुत्रादिः । यद्वा निर्गतो वर्णाश्रमेभ्यो निष्ट्यः चण्डालादिः "निसो गते" इति वार्तिकेन निस उपसर्गाद् गतार्थे त्यप् इति काशिकायाम् ।" {म०}

अत्र महीधरेणोपस्थापितः पदस्यास्य तृतीयः चण्डालादिरूपो र्थो नवीनत्वाद्विशिष्यते ।

{4} "निष्ट्यः नेशन्ति समादधते येन यज्ञेन तत्सहितः साधुविद्वान् । अत्र निशधातोर्बाहुलकादौणादिकस्तः प्रत्ययस्ततो यत् ।" {द०}

पूर्वाचार्यैस्य पदस्य पुत्ररूपो र्थः, तन्मूलं स्त्यै इति धातुश्च निर्दिष्टः, दयानन्देन मूलं निशधातुरर्थश्च साधुर्विद्वानिति कथित इति भेदः ।

5.23.4. अमात्यः {यज्ञबाधकः}

{1} "धनिकस्य स्वामिनो धनगृहादिनिर्वाहको मात्यः ।" {सा० 5/6/1}

{2} "अमाशब्दो गृहार्थः सहार्थो वा । अमा गृहे सह वा भवोमात्यः । "अव्ययात् त्यप्" इति भवार्थे त्यप् । धनिकस्य स्वामिनो धनगृहादिनिर्वाहको मात्यः ।" {म०}

अत्र गर्ताद्दुद्दुयमानस्य बलगस्य पूर्वं क्षेपकः यजमानस्याशुभकामो जनः पदेमानेन सूच्यत इति भाष्यकारा आहुः ।

{3} "अमात्यः मेधावी ज्ञानकः प्रधानभृत्यः ।" {द०}

दयानन्दकृतो र्थः विचित्रः ।

5.23.5. ~~बलक~~ वलगः {अहितं वस्तु}

पूर्वे भाष्यकाराः सायणादयः केनाप्यशुभकामेन जनेन भूमौ निक्षिप्तं द्रव्यमुद्दिश्य पदमेतत् प्रयुक्तमाहुः -

{1} "पराजित्य पलायमाने राक्षसैरिन्द्रादिवधार्थमभिचाररूपेण

भूमौ निखाता अस्थिकेशनखादिपदार्थाः वलगा इत्युच्यन्ते ।" {सा०}

{2} "वलो वृणोतेः । यस्य वधार्थं क्रियते तं रोगादिभिवृण्वन् आच्छादयन् गच्छतीति वलगः ।" {उ०}

{3} "यस्य वधार्थं क्रियते तं वृण्वन्नाच्छादयन् गच्छतीति वलगः। ते वलगा बाहुमात्रे खातास्तदुद्धारार्थमुपरवस्य तावन्मात्रखननम् ।

अत्र स वलगपदस्य सायणभाष्यादस्थिकेशादिकरूपमुद्देश्यं ज्ञायते । उव्वटभाष्ये तस्य पदस्य प्रयोगे बीजख्यापकं व्युत्पत्तिरूपं प्राप्यत इति विशेषः ।

दयानन्देन मन्त्रे बहुधा पठितस्य पदस्यास्य बहवो र्थाः निर्दिष्टा-

"बलगं बलं गच्छन्तम्"

"बलगम् बलप्रापकम्"

"बलगम् आत्मबलप्रापकम्"

"बलगम् राज्यबलप्रापकम्" {द०}

एते र्थाः पूर्वाचार्यनिर्दिष्टार्थापेक्षया नवीनाः सन्ति । परमेषां कथं प्रामाण्यमिति सन्देह एव ।

<u>5.23.6. समानः {यज्ञबाधकाः, यजमानशत्रवः}</u>

{1} "समानो धनकुलादिभिः सदृशः ।" {सा० 5/6/2}

{2} "समानः विद्यादिभिः सदृशः ।" {उ०}

{3} "समानो धनकुलादिभिः सदृशः ।" {म०}

अत्र महीधरीयं व्याख्यानं सायणानुरूपमस्ति । तत्र धनकुलादिशब्द-प्रयोगः, उव्वटभाष्ये विद्यादिशब्दप्रयोग इति रीत्या समानशब्देन धने, कुले, विद्यायाम्, पौरुषे च समान इत्यादिकमुन्नेयमिति सूच्यते ।

{4} "समानः सदृशः ।" {द०}

5.23.7. असमानः [यज्ञबाधकः]

[1] "असमानः न्यूनो धिको वा ।" [सा० 5/6/2]

तत्रैव -"समानासमानशब्दौ द्वावेव शत्रुवाचकावभिहितौ । एतदेवाभिप्रेत्य तित्तिरिराह । द्वौ वा व पुरुषौ यश्चैव समानो यश्चासमानो यमेवास्मै तौ वलगं निखनतस्तमेवोद्वपतीति ।" [सा०]

[2] "असमानः विद्यादिभिरसदृशः ।" [उ०]

अत्र महीधरेण सायणवदेवार्थो निर्दिष्टः । उव्वटभाष्ये असमान इत्यस्य विद्यादिभिरसदृशः" इत्यर्थो निर्दिष्टः । स च कीदृश इति प्रश्ने सति न्यूनत्वमधिकत्वं वा विद्यादिष्विति कथयितुं शक्यते । एकस्य कुलं श्रेष्ठमन्यस्यावरम्, एकस्य विद्या धिका न्यस्य सा न्यूनेति असमानताया रूपं भवति । एतद्-व्याख्यानकौशलं सायणस्य विशिष्यते ।

[3] "असमानः असदृशः" [द०]

5.23.8. सबन्धुः [यज्ञबाधकः]

[1] "कुलशीलादिभिः समानो मातुलशालादिः सबन्धुः ।" [सा० 5/6/2]

[2] "सबन्धुः स्वजनः ।" [उ०]

[3] "सबन्धुः कुलशीलादिभिः समानो मातुलपैतृस्वस्रेयादिः तद्विपरीतो सबन्धुः ।" [म०]

उव्वटेन संक्षेपतः पदस्यास्य स्वजन इत्यर्थो निर्दिष्टः । महीधरेण सायणभाष्ये शालशब्दस्य स्थाने पैतृस्वस्रेय शब्दस्य विन्यासः कृतः, तेन तत्सदृशानामन्येषां ग्रहणं प्रतीयत इति विशेषः ।

[4] "सबन्धुः यथा समाना बन्धवो यस्य मित्रस्य सः ।" [द०]

5.23.9. सजातः (यज्ञबाधकः, भ्राता)

(1) "सजातः समानजन्मा भ्राता ।" (सा० 5/6/2)

(2) "सजातो भ्राता । स हि समानजन्मा भवति ।" (उ०)

(3) "सजातः समानजन्मा भ्राता ।" (म०)

अत्र त्रयाणामर्थसाम्यं स्पष्टम् ।

(4) "सजातः यथा सहैव जातः ।" (द०)

5.24.1. स्वराट् (यज्ञप्रक्रिया, प्रथमगर्तः)

पदमेतत् प्रथमगर्तमुद्दिश्य प्रयुज्यत इति सायणाशयः ।

(1) "हे प्रथमगर्त, त्वं स्वराडसि स्वयमेव राजमानो सि ।" (सा० 5/6/3)

(2) "स्वकीयमेव राज्यं यस्य स स्वराट् ।" (उ०)

(3) "स्वेनैव राजत इति स्वराट् स्वयमेव राजमानो भवति ।" (म०)

सायणाद्यपेक्षया उव्वटस्य व्याख्यानं भिन्नमस्ति । उद्दिश्यमानस्य खातस्य कथं स्वकीयं राज्यम्, स्वतो राजमानत्वं वेति केनापि नोक्तमिति नैयून्यम् ।

(4) दयानन्देन पदस्यास्य विद्वांसमुद्दिश्य प्रयोगो निर्दिष्टः । एतत्तस्य वैशिष्ट्यम् - "स्वराट् यः स्वयं राजते सः ।" (द०)

5.24.2. सपत्नहा (गर्तः)

(1) "सपत्नहा शत्रुघाती भव ।" (सा० 5/6/3)

(2) "सपत्नान् शत्रून् हन्तीति सपत्नहा ।" (उ०)

अत्र सायणोव्वटादिभाष्यवाक्येभ्यः उपबस्य "सपत्नहा इति

निर्देशो वगम्यते । कीदृशं तस्य सपत्नहननम्, इति स्पष्टं नावगम्यते ।

{3} "सपत्नहा यः सपत्नान् शत्रून् मेधावयवान् वा हन्ति स: ।" {द0}

अत्र दयानन्दकृतो मेधावयवस्पो र्थो नवीनः ।

<u>5.24.3. सत्रराट् {उपबः}</u>

{1} "सत्रेषु द्वादशाहादिषु राजत इति सत्रराट् ।" {सा0 5/6/3}

{2} "सत्रं द्वादशाहादि तत्र राजति सततं वा राजति सत्रराट् ।" {उ0}

अत्र महीधरीयं व्याख्यानं सायणानुरूपम् । वस्तुतस्त्रयाणामेव साम्यम् ।

{3} "सत्रराट् यः सत्रेषु यज्ञेषु राजते सः ।" {द0}

विद्वांसमुद्दिश्य पदस्यास्य प्रयोगो दयानन्देन कृत इति भेदः ।

<u>5.24.4. अभिमातिहा {उपबः}</u>

{1} "अभिमातिहा शत्रुघाती ।" {सा0 5/6/3}

{2} "अभिमातिरननुकूलः शत्रुः तं हन्ति अभिमातिहा ।" {उ0}

यस्मिन् मन्त्रे पदमिदं प्रयुक्तं तत्रैव "सपत्नहा" इति तत्समानार्थकं पदन्च प्रयुक्तम् । तयोः पुनरुक्तौ किं बीजमिति भाष्यकारैर्नोक्तम् । उव्वटेन कृतं "अभिमातिरित्यस्य अननुकूलः शत्रुरिति व्याख्यानमपि न रम्यम्, अननुकूलत्वस्यैव शत्रुत्वमूलतया प्रसिद्धेः । यद्वाशत्रवो बहुविधाः केचन विचारविरोधाद्-विमुखाः कार्येषु, केचिद् घातका इत्यादयः । तत्र उव्वटदृष्ट्या प्रथमानां ग्रहणमिति भावो पि गृहीतुं शक्यते ।

§3§ "अभिमातिहा ये भिमिमत इत्यभिमातयस्तान् हन्ति सः । अत्रौणादिकः वितच् ।"

अत्र पदार्थप्रस्तुतिहेतोर्व्युत्पत्तिनिर्देशो दयानन्दस्य विशिष्ट इति ज्ञेयम् ।

5.24.5. जनराट् §उपधः§

§1§ "जनेषु यजमानेषु राजत इति जनराट् ।" §सा० 5/6/3§

§2§ "जने राजतीति जनराट् ।" §उ०§

सायणभाष्ये जनशब्दस्य वाच्यतया यजमानानां निर्देशो विशिष्यते ।

§3§ "जनराट् यो जनेषु धार्मिकेषु विद्वत्सु राजते सः ।" §द०§

दयानन्देन जनशब्देन धार्मिकानां विदुषां निर्देशःसूचित इति भेदः ।

5.24.6. सर्वराट् §उपधः§

§1§ "सेसर्वेषु राजत इति सर्वराट् ।" §सा० 5/6/3§

§2§ "सर्वत्र राजत इति सर्वराट् ।" §उ०§

अत्र द्वयोरप्यर्थसाम्यं प्रायः इति सुस्पष्टम् ।

§3§ "सर्वराट् यः सर्वस्मिन् राजते सः ।" §द०§

5.26.1. पितृषदनम् §दर्भाः§

पितृणामासनार्थमास्तृतान् दर्भानुद्दिश्य पदमेतत् प्रयुक्तमिति सायणः ।

§1§ "पितरः सीदन्त्युपविशन्ति यस्मिंस्तत् पितृषदनम् ।"§सा०§ हे बर्हिस्त्वं तथाविधमसि ।"

§2§ "बर्हींषि प्रास्यति पितृषदनमसि । पितर एषु सीदन्तीति पितृषदनम् ।" §उ०§

(3) "पितृषदनम् यथा विद्यावन्तो ज्ञानिनस्सीदन्ति यस्मिंस्तत्तथा ।" (द0)

5.28.1. इन्द्रस्य छदिः (कटम्)

सदोमण्डपप्रावरणाय आरोप्यमाणं कटमुद्दिश्य पदमेतत् प्रयुज्यते ।

(1) "छदिशब्देन तृणनिर्मितः कट उच्यते । हे तृणनिर्मित, त्वम् इन्द्रस्य छदिरसि । इन्द्र-सम्बन्धिकटो भवसि ।" (सा0 5/7/4)

(2) "सदस इन्द्रदेवताकत्वेन तदीयच्छदिष इन्द्रदेवताकत्वम् ।" (म0)

(3) "इन्द्रस्य परमैश्वर्यस्य छदिः दुःखापवारकत्वेन प्रापकः प्रापिका वा ।" (द0)

5.28.2. विश्वजनस्य छाया (कटम्)

सदोनामकमण्डपस्य निर्माणानन्तरं तदुपरि प्रावरणार्थं आरोपितं कटमुद्दिश्य पदमिदं युज्यत इति सायणः ।

(1) "प्रावरणाय सदोमध्यमवर्तिनो विश्वजनस्य यजमानर्त्विग्रूपस्य सर्वप्राणिनश्छाया भूयादिति शेषः ।" (सा0 5/7/4)

(2) "अतस्त्वं विश्वजनस्य छाया भवेति शेषः । सदोमध्यवर्तिनः सर्वजनस्य यजमानर्त्विग्रूपस्य प्राणिनः प्रावरणाय छाया भवेत्यर्थः ।" (म0)

(3) "विश्वजनस्य विश्वस्मिन् जगति सर्वस्य जनसमूहस्य छाया दुःखछेदकाश्रयो वा ।" (द0)

5.31.1. विभुः (धिष्ण्यम्)

इदमाग्नीध्रधिष्ण्यस्य नामेति सायणाद्या आहुः ।

(1) "विभुशब्दप्रवाहणशब्दावाग्नीध्रधिष्ण्यस्य नामनी । ते वै

द्विनाभान इति कण्वेन उक्तत्वात् ।" {सा0 5/8/1} तत्रैव - "विविधभवना-द्विभुः । एतस्मादेव धिष्ण्यादितरधिष्ण्येष्वग्निविहरणादेतस्य विविधभवनं द्रष्टव्यम् ।" {सा0}

{2} "विभवतीति विभुः ।" {उ0}

{3} "विविधं भवतीति विभुः । एतस्मादेव धिष्ण्यादितर-धिष्ण्येष्वग्निविहरणादेतस्य विभुत्वम् ।" {म0}

{4} "विभूः यथा व्यापक आकाशो वैभवयुक्तो राजा वा ।" {द0}

दयानन्देन ईश्वरं विद्वांसं वा उद्दिश्य पदस्य प्रयोगो निर्दिष्ट इति विशेषः ।

5.31.2. प्रवाहणः

आग्नीध्रं धिष्ण्यमुद्दिश्य पदमेतत् प्रयुज्यत इति सायणः ।

{1} "हविषः प्रवाहणपरत्वात् प्रवाहणत्वम् ।" {सा0 5/8/1}

{2} "प्रवाहयति गमयतीति प्रवाहणः ।" {उ0}

{3} "प्रवाहयतीति प्रवाहणः । तस्य हि दक्षिणोत्तरत ऋत्विजो गच्छन्ति । हविषः प्रवाहयितृत्वाद्वा प्रवाहणत्वम् ।" {म0}

सायणेन हविषः प्रवाहणकर्तृतया प्रवाहणनाम्नः प्रयोगो निर्दिष्टः, उव्वटेन कृतं व्याख्यानमस्पष्टतया प्रवाहणं गमनं सूचयति - कुत्र किं वेत्यादि नोक्तम्, महीधरेण तु ऋत्विजां गमनागमनादिसाधकतया, हविषः प्रवाहणाच्चेति स्पष्टं निर्दिष्टमिति विशेषः ।

{4} "प्रवाहणः यथा वायुर्महानदो वा तथा ।" {द0}

5.31.3. श्वात्रः {धिष्ण्यम्}

उव्वटेन प्रशास्तृधिष्ण्यमुद्दिश्य पदस्यास्य प्रयोगः सूचितः, मही-

धरेण मैत्रावरुणधिष्ण्यमुद्दिश्य निर्दिष्टः ।

§1§ "श्वात्रो मित्रः ।" §सा० 5/8/1§

§2§ "शु क्षिप्रमततीति श्वात्रः ।" §उ०§

§3§ "मैत्रावरुणधिष्ण्यं हे मैत्रावरुणधिष्ण्यं, त्वं श्वात्रः प्रचेताश्चासि । शु क्षिप्रमततीति श्वात्रो मित्रः ।" §म०§

अत्र पदव्युत्पत्तिनिर्देशो यम् उव्वटमहीधरयो विशेषानुमापकः ।

§4§ "श्वात्रः ज्ञानवान् श्वात्रतीति गतिकर्मसु पठितम् ।" §द०§

5.31.4. तुथः §धिष्ण्यम्§

इदं ब्राह्मणाच्छंसिधिष्ण्यमुद्दिश्य प्रयुज्यत इत्युव्वट आह ।

§1§ "तुथशब्देन देवान् प्रति दक्षिणानां विभागकर्ता पुरुष उच्यते । तुथो ह स्म वै विश्ववेदा देवानां दक्षिणा विभजतीति तित्तिरिणोक्तत्वात् ।" §सा० 5/8/1§

§2§ "तुथो सि विश्ववेदाः ।"ब्रह्म वै तुथः" इति श्रुतिः।" §उ०§

सायणेन तुथशब्दस्य "देवान् प्रति दक्षिणानां विभागकर्ता पुरुष" इत्यर्थो तित्तिरिवाक्यप्रामाण्योपन्यासेन निर्दिष्टः, उव्वटेन ब्रह्म इत्यर्थो निर्दिष्टः । महीधरेण उभयोरप्युल्लेखः, स्वभाष्ये कृत इति विशेषः ।

§3§ "तुथः ज्ञानवर्धकः ।" §द०§

5.31.5. हव्यवाहनः §अग्निः§

इदं होतृधिष्ण्यनाम वर्तत इति भाष्यकाराः ।

§1§ "देवान् प्रति हविः प्रापणाद्धव्यवाहनत्वम् ।" §सा० 5/8/1§

§2§ "हव्यं वहति देवान् प्रति प्रापयतीति हव्यवाहनः ।" §उ०§

§3§ "हव्यवाहनःयथाग्निर्हव्यानि वहति तथा ।" §द०§

5.31.6. विश्ववेदा:

ब्राह्मणाच्छंसिधिष्ण्यनामेदम् ।

§1§ "विश्वं वेत्तीति विश्ववेदा: सर्वज्ञ: ।" §सा० 5/8/1§

§2§ "विश्ववेदा: सर्वज्ञ: सर्वधनो वा ।" §उ०§

§3§ "विश्ववेदा: यथा सूत्रात्मा पवनस्तथा ।" §द०§

उव्वटभाष्ये "सर्वधन" इत्यर्थो धिक इति विशिष्यते ।

5.32.1. उशिक् §पोत्रधिष्ण्यम्§

पोत्रधिष्ण्यनामेदम् । इति सायण: ।

§1§ "उशिक् कमनीय: ।" §सा० 5/8/2§

§2§ "पोतु: उशिगसि कवि: । "वश कान्तौ§ । तस्य कृतसंप्रसारणस्योशिक् । कान्तो सि ।" §उ०§

§3§ §उशिक् कान्तिमान्" §द०§

अत्र सर्वेषां कान्तिमत्वे तात्पर्यमिति सामान्यं स्पष्टम् ।

5.32.2. कवि: §पोत्रधिष्ण्यम्§

इदं पोत्रधिष्ण्यमुद्दिश्य प्रयुज्यत इति सायण: ।

§1§ "कविर्विद्वान्" §सा० 5/8/2§

§2§ "कवि: क्रान्तदर्शन/§ §उ०§

§3§ "कवि: क्रान्तप्रज्ञ: क्रान्तदर्शनो वा ।" §द०§

5.32.3. अङ्घारि: §नेष्टृधिष्ण्यम्§

द्युलोके सोमरसकन्या कस्यचिन्नामेदमत्र नेष्ट्रीयधिष्ण्ये उपचर्यत इति सायण: ।

§1§ "द्युलोके सोमरक्षकौ द्वावङ्गधारिबम्भारी । तथा च सोमरक्षकविषयमन्त्रे स्वान भ्राजाङ्घारे बम्भारे इत्याम्नातम् । त्रयोर्नामद्वय-मस्मिन् नैष्ट्रीयधिष्ण्ये इत्युपचयति ।" §सा० 5/8/2§

§2§ "अंहःशब्दः पापवचनः । तस्य हकारस्य घकारश्छान्दसः । तस्यारिः अङ्घारिः ।" §उ०§

§3§ "नेष्टुः अग्न्यस्याहंसः पापस्यारिरङ्घारिः ।" §म०§

सायणेन पूर्वं पदोद्देश्यतया द्युलोकस्थ सोमरक्षकस्य निर्देशः, तस्य पदस्यात्र नैष्ट्रीयधिष्ण्ये प्रयोगश्च सूचितः । उव्वटेन सविशेषा व्युत्पत्तिस्थापिता तस्य पदस्यार्थः पापनाशक इति च निर्दिष्टः । महीधरेणोव्वटमतमनुसृतमिति भेदः।

§4§ "अंघस्य कुटिलगामिनो जीवस्यारिः शत्रुः ।" §द०§

पूर्वाचार्यैरस्य पदस्य पापापह इत्यर्थो निर्दिष्टः दयानन्देन कुटिल-गामिजीवनाशक इति निर्दिष्टः । एष एवात्र भेदः ।

5.32.4. बम्भारिः §नेष्टृधिष्ण्यम्§

इदं नेष्टृधिष्ण्यस्य नाम वर्तते इति सायणादयः ।

§1§ "बम्भारिः । डुभृञ् धारणपोषणयोः । भर्ता ।" §उ०§

§2§ "बिभर्तीति बम्भारिः त्वं तद्रूपो ऽसि हे नेष्टृधिष्ण्य ।" §म०§

उव्वटेन पदप्रकृतिरूपस्य डुभृञ्धातोः पदार्थस्य भर्तृत्वस्य च संकेतो विहितः । महीधरेण तस्य मतमेवान्यप्रकारेण निर्दिष्टम् ।

§3§ "बम्भारि । बन्धस्यारिः । अत्र वर्णव्यत्ययेन धस्य भः ।" §द०§

5.32.5. अवस्यूः §अच्छावाकधिष्ण्यम्§

एतद्वायुविशेषवाचकं पदमत्र अच्छावाकधिष्ण्य उपचयति इति सायणः।

§1§ "अवसमन्नं तदिच्छति क्विप प्रत्यय औणादिकः । स हि पुरोडाशयुगलमिच्छति ।" §उ0§

§2§ "अवोन्नमिच्छतीत्यवस्युः । सुप आत्मनः क्यच् "क्याच्छन्दसि" इति क्यजन्तादुप्रत्ययः दीर्घश्छान्दसः औणादिक प्रत्ययो वा ।" §म0§

उभयोर्भाष्ययोः पदार्थसाम्ये पि महीधरभाष्ये शब्दव्युत्पत्तिपक्षे धातुसूत्रप्रत्ययनिर्देशस्य द्विधा निर्देशात् विशेषो ज्ञायते ।

§3§ "अवस्यूः यो वलीव्यति तारादितन्तून् संतानयति येन सः।"

§द0§

5.32.6. दुवस्वान् §अच्छावाकधिष्ण्यम्§

एतदपि वायुविशेषवाचकं पदमत्र अच्छावाकधिष्ण्य उपचर्यत इति सायणः ।

§1§ "अवस्यूरिति दुवस्वानिति । एतौ शब्दौ वायुविशेषवाचकौ अवस्यवे त्वा वाताय दुवस्वते त्वा वाताय स्वाहेति मन्त्रान्तरे समाम्नानात् । तदेतन्नामद्वयमच्छावाकधिष्ण्य उपचर्यते ।" §सा0 5/8/2§

§2§ "दुव इति हविर्नाम । दुवस्वान् हविष्मान् । अच्छावाको हि पुरोडाशयुगलं लभते ।" §उ0§

§3§ "दुवो स्यास्तीति दुवस्वान् हविष्मान् । दुव इति हविर्नाम । अच्छावाको हि पुरोडाशभागं लभते ।" §म0§

अच्छावाकधिष्ण्ये दुवस्वान् इति पदस्य प्रयोगमूलं महीधरेणोद्घटेन प्रस्तुतमिति विशेषः ।

§4§ "दुवस्वान् दुवः प्रशस्तं परिचरणं विद्यते यस्य सः ।" §द0§

5.32.7. शुन्ध्युः

एतन्मार्जालीयधिष्ण्यस्य नाम इति सायणः ।

{1} "शुन्ध्युः शोकः ।" {सा० 5/8/2}

{2} "शुन्धयतीति शुन्ध्यूः ।" {म०}

{3} "शुन्ध्यूः शुद्धः ।" {द०}

सायणेन पदस्यास्य शोक इत्यर्थो निर्दिष्ट, महीधरेण दयानन्देन च शुद्ध इति विशेषः ।

5.32.8. मार्जालीयः

मार्जालीयधिष्ण्यस्य नामेदमिति सायणः ।

{1} "पात्रप्रक्षालनेन लेपमार्जनस्थानभूतो मार्जालीयः ।" {सा० 5/8/2}

{2} "मृजूष् शुद्धौ । तत्र हि पात्राणि प्रक्षाल्यन्ते ।" {उ०}

{3} "मार्ष्टीति मार्जालीयः ।" {म०}

उव्वटभाष्ये धातुनिर्देशः, सायणभाष्ये स्वरूपनिर्देशश्च साधुः ।

{4} "मार्जालीयः शोधकः । स्थाचतिमृजेरालच् वालजलीयचः । {उ० 1/115} अनेन सूत्रेणात्र मृजूष् शुद्धौ इत्यस्मादालीयच्प्रत्ययः ।" {द०}

अत्र सूत्रधातुप्रत्ययानामर्थनिर्देशो दयानन्दस्य विशिष्यते ।

5.32.9. सम्राट् {अग्निः}

उत्तरवेदिगतमाहवनीयमग्निमुद्दिश्य पदमिदं प्रयुक्तमिति सायणः ।

{1} "उत्तरवेदिगत हे आहवनीय, बहुविधाहुत्याधारत्वेन सम्यक् राजनात् सम्राडसि ।" {सा० 5/8/4}

{2} "सम्राट् संगतदीप्तिः ।" {उ०}

§3§ "सम्राट् यथा सम्यग्राजते तथा T" §द०§

<u>5.32.10. कृशानुः §यज्ञप्रक्रिया, अग्निः§</u>

इदमाहवनीयमग्निमुद्दिश्यात्र प्रयुज्यत इति सायणः । व्युत्पत्तिस्तु -

§1§ "पयोव्रतादिभिः कृशां यजमानमनुगच्छतीति कृशानुः ।"
§सा० 5/8/4§

§2§ "कृशो यजमानः पयोव्रतैस्तपःक्षीणः एनमनुगच्छतीति कृशानुः बहिष्पवमानदेशः ।" §उ०§

सायणभाष्ये यजमानो नुगम्य इति, उव्वटभाष्ये ग्निरनुगम्य इति प्रत्ययो भेदमाचष्टे ।

§3§ "कृशानुः तनूकर्ता" §द०§

<u>5.32.11. परिषद्यः</u>

सायणेन बहिष्पवमानदेशमुद्दिश्य पदस्यास्य प्रयोगः सूचितः ।

§1§ "हे बहिष्पवमानदेश, त्वं परिषद्यो सि । स्तोतुं समेता ऋत्विजः परिषत्, तद्योग्यः ।" §सा० 5/8/3§

§2§ "परिषदनीय उद्गातृप्रभृतिभिः ।" §उ०§

§3§ "परिषद्यः परिषदि भवः ।" §द०§

<u>5.32.12. नभः §चात्वालः§</u>

सायणेन चात्वालमुद्दिश्यास्य पदस्य मन्त्रे प्रयोगो निर्दिष्टः -

§1§ "हे चात्वाल, त्वं नभो सि खनने तच्छिद्ररूपत्वादाकाशत्वम् ।"
§सा० 5/8/4§

§2§ "न भातीति नभः । यद्वा नभ आकाशः आकाशस्थः ।" §उ0§

सायणेन नभः शब्दस्य व्युत्पत्तिप्रसङ्गे सच्छिद्रत्वं नभः पदस्य प्रयोगे बीजं कल्पितम्, उव्वटेन भाहीनत्वमिति भेदः ।

§3§ "नभः यो नभते हन्ति परपदार्थहर्तॄन् सः । नभत इति वधकर्मसु पठितम् ।" §द0§

5.32.13. प्रतक्वा §चात्वाल§

इदं चात्वालस्य गमनीयत्वसूचकं विशेषणात्मकं पदमिति सायणेन निर्दिष्टम् ।

§1§ "प्रतक्वा प्रकृष्टगमनयुक्तः । कृष्णविषाणादयागाद्यार्थं हि चात्वालः प्रकर्षेण गम्यते ।" §सा0 5/8/4§

§2§ "तक्वतिर्गत्यर्थः । प्रदक्षिणमेनं तक्वन्ति निर्गच्छन्ति ऋत्विजः स शामित्रदेशः ।" §उ0§

§3§ "प्रतक्वा यथा प्रतकति प्रकर्षेण हर्षतीति अत्रान्येभ्यो पि दृश्यन्त इति वनिप् ।" §द0§

5.32.14. मृष्टः §शामित्रः§

सायणेन पशुविशसनप्रदेशस्य शामित्रसंज्ञस्य विशेषणरूपं पदमेतदिति निर्दिष्टम् –

§1§ "शामित्रशब्देन पशुविशसनप्रदेश उच्यते । हे शामित्र, त्वं मृष्टो सि । क्रियमाणस्य पशुविशसनस्य विहितत्वेनाशुद्धिहेतुत्वात् सत्यपि विशसने शुद्धो सि ।" §सा0 5/8/4§

§2§ "मृष्टो मृष्टकारी । शृतं हविर्मृष्टं भवति ।" §उ0§

(3) "हे शामित्र, त्वं मृष्टो सि पशुविशसनस्य विहितत्वेना-शुद्धिहेतुत्वाभावात् सत्यपि विशसने शुद्धो ऽसि । यद्वा मृष्टः शृतत्वान्मिष्टः पक्वं हविर्मृष्टं भवति ।" (म०)

अत्र सायणेन मृष्टपदस्य शुद्धत्वं वाच्यतया सोदाहरणं प्रतिपादितम्, उव्वटेन मिष्टत्वमिति भेदः ।

(4) "मृष्टः यो मार्ष्टि मार्ष्यति वा ।" (द०)

5.32.15.हव्यसूदनः (चात्वालः)

इदं चात्वालस्य पाकस्थानत्वसूचकं पदमिति सायणः ।

(1) "हव्यस्य हृदयजिह्वादिरूपस्य हविषः सूदनः पाकहेतुरसि ।" (सा० 5/8/4)

(2) "हव्यसूदनः । सूदः सूपकार उच्यते । हविषः पक्ता ।" (उ०)

(3) "हव्यसूदनः यथा हव्यानि सूदते क्षरतिथा ।" (द०)

5.32.16. ऋतधामा (औदुम्बरी)

औदुम्बर्यां विशेषणात्मकं पदमिदमिति सायणभाष्यादवगम्यते ।

(1) "हे औदुम्बरि त्वं ऋतधामा सामगानाम् ऋतम् अवश्यम्भावि धामोपवेशनस्थानं यस्यास्तादृशी ।" (सा० 5/8/3) सामगा ह्यौदुम्बरीं स्पृष्ट्वो-द्गायन्ति ।"

(2) "ऋतो यज्ञस्तस्य धाम स्थानं जन्म वा । तत्र हि उद्गातारो यज्ञस्य कारणभूतास्तिष्ठन्ति ।" (उ०)

(3) "हे औदुम्बरि, त्वमृतधामा ऋतं सामगानं धामोपवेशनस्थानं यस्याः सा ।" औदुम्बरीं स्पृष्टोद्गायन्ति ।" (म०)

{4} "ऋतधामा यथा सत्यं जलं वा दधाति तथा ।" {द०}

अस्य पदस्य सायणेन सामगानामुपवेशनस्थानम्, उव्वटेन यज्ञस्थानम्, दयानन्देन सत्यधारकं जलधारकं वा इत्यर्थो दर्शित इति विशेषः ।

5.32.17. स्वर्ज्योतिः {औदुम्बरी}

इदमप्यौदुम्बर्याः विशेषणम् ।

{1} "उन्नतत्वेन स्वर्गे प्रकाशकः ।" {सा० 5/8/3}

{2} "स्वर्ज्योतिः आदित्यज्योतिः ।" {उ०}

{3} "स्वर्ज्योतिः यथा स्वरन्तरिक्षलोकसमूहं द्योतते तथा ।" {द०}

5.33.1. समुद्रः {ब्रह्मासनप्रदेशः}

अस्य पदस्य ब्रह्मासनप्रदेशमुद्दिश्य प्रयोगः सायणेन निर्दिष्टः ।

{1} "हे ब्रह्मासनप्रदेश, त्वं समुद्रो सि । सर्वे देवाः सम्यगुत्कर्षेण द्रवन्त्यत्रेति समुद्रः ।" {सा० 5/8/3}

{2} "समुद्र इव त्वमसि सर्वव्यधनः, तत्र हि समुद्र इवागाधो ज्ञानेन ब्रह्मणि ब्रह्मणि तिष्ठति ।" {उ०}

{3} "समुद्रः समुद्द्रवन्ति भूतानि यस्मात् सः ।" {द०}

महीधरेण सायणोव्वटयोरेवार्थः समुपस्थापितः । दयानन्देन परमेश्वरस्य विशेषणत्वेन पदस्य व्याख्यानं विहितम्, तदनुसारं पदार्थश्च दर्शित इति विशेषः ।

5.33.2. विश्वव्यचा {ब्रह्मासनप्रदेशः}

ब्रह्मासनप्रदेशस्य विशेषणमिदमिति सायणभाष्यादवगम्यते ।

{1} "विश्वं सर्वं यज्ञं व्यचतीति गच्छतीति विश्वव्यचा ।"

(सा० 5/8/3)

(2) "विश्वं च यज्ञं च व्यन्चति कृताकृतप्रत्यवेक्षणेन ।" (उ०)

(3) "विश्वं सर्वं यज्ञं व्यचति गच्छति कृताकृतप्रत्यवेक्षणायेति विश्वव्यचाः ।" (म०)

अत्र उव्वटमहीधराभ्यां कृतः कृताकृतावेक्षणरूपो ब्रह्मकर्तव्यनिर्देशः सायणभाष्यापेक्षया विशिष्यते ।

(4) "विश्वव्यचाः यथा विश्वस्मिन् व्यचो व्याप्तिर्यस्यास्ति तथा ।" (द०)

दयानन्देन परमेश्वरमुद्दिश्य पदस्य प्रयोगः, व्यापकत्वरूपोऽर्थश्च निर्दिष्ट इति विशेषः ।

5.33.3. अजः (अग्निः/ अध्या०, परब्रह्म)

प्राचीनवंशद्वारवर्तिनमग्निमुद्दिश्य पदस्यास्य मन्त्रे प्रयोगः सायणेन निर्दिष्टः । अस्य परब्रह्मवाचकत्वमपि तेन सूचितम् ।

(1) "हे प्राचीनवंशद्वारवर्तिन्नग्ने, त्वम् अजोऽसि । अजति यज्ञप्रदेशेषु गच्छतीत्यजः । अथवा परब्रह्मत्वोपचारेण न जायते इत्यजः ।" (सा० 5/8/3)

(2) "अजः । अज गतिक्षेपणयोः। अजनः अयमेवाहवनीयादिभावेन अजति गच्छति ।" (उ०)

(3) "अजति आहवनीयरूपेण यज्ञप्रदेशे गच्छतीत्यजः । यद्वा पर-ब्रह्मात्मत्वमुपचयति ।" (म०)

(4) "अजः यः कदाचिन्न जायते ।" (द०)

पूर्वाचार्यैर्यज्ञप्रक्रियाविषयकोऽग्निरूपोऽर्थः पदस्यास्य प्राधान्येन निर्दिष्टः, परब्रह्मणो वाच्यत्वं च स्वीकृतम् । दयानन्देन ईश्वररूपोऽर्थ एव

सूचित इति विशेषः ।

5.33.4. एकपात् [अग्निः/आध्या०, परब्रह्म]

प्राचीनवंशद्वारवर्तिनमुद्दिश्य प्रयुज्यमानमेतत् पदं मूलतः परब्रह्म-वाचकं तन्माहात्म्यसूचकं चास्तीति सायणेन निर्दिष्टम् -

[1] "सर्वाणि भूतान्येकः पादो यस्यासावेकपात् ।" तथा च श्रुत्यन्तरम् - "पादो स्य विश्वा भूतानि इति ।" [सा० 5/8/3]

[2] "एकपात् । एकः प्राजहितः । एकं पाति एकपात् । स ह्यनुगतस्तस्माद्बुद्ध्यते ।" [उ०]

[3] "एकः पातीत्येकपात् । यद्वा एकः पादः सर्वाणि भूतानि यस्येत्येकपात् । पादो स्य विश्वा भूतानि इति श्रुतेः ।" [म०]

अत्र भाष्यत्रये त्रिविधा व्युत्पत्तिर्भिन्नरूपा दृश्यते"सर्वाणि भूता-न्येकः पादः यस्य" इति, "एकं पाति" इति, "एकः पाति" इति ।

[4] "एकपात् एकस्मिन् पादे विश्वं यस्यास्ति ।" [द०]

5.33.5. अहिः [गार्हपत्याग्निः]

पदमेतत् प्राचीनवंशपश्चिमभागवर्तिनो गार्हपत्याग्नेः वाचकमिति सायणः ।

[1] "प्राचीनवंशस्य पश्चिमभागवर्ती पुरातनो गार्हपत्यो ग्निः प्राजहित उच्यते । हे प्राजहित, त्वम् अहिरसि । न हीयते इत्यहिः । शाला-द्वारीये नूतने गार्हपत्ये समुत्पन्नो यमग्निः स्वरूपेण न हीयते ।" [सा० 5/8/3]

[2] "प्राजनितम् । अहिरसि बुध्न्यः । अहिः अयनः शालाद्-वार्यादिभिभाविरिति ।" [उ०]

[3] "अहिः समस्तविद्यासु व्यापनशीलः ।" [द०]

अत्र दयानन्दस्य समस्तविद्यासु व्यापनशील इत्यर्थो नवीनः प्रतिभाति ।

5.33.6. बुध्न्यः {गार्हपत्याग्निः}

इदं गार्हपत्यनामानमग्निमुद्दिश्य प्रयुक्तं पदमिति सायणेन निर्दिष्टम् ।

{1} "बुध्नो मूलं तत्र भवो बुध्न्यः । आधानकाले प्रथममाहितत्वान्मूलभावित्वमुपपन्नम् ।" {सा० 5/8/3}

{2} "बुध्नमादिरुच्यते तत्र भवो बुध्न्यः । स हि प्रथमं मथ्यते ।" {उ०}

{3} "बुध्न्यः बुध्ने अन्तरिक्षे भवः ।" {द०}

बुध्नमन्तरिक्षं भवति ।

5.34.1. सगराः {अग्नयः, यज्ञप्रक्रिया}

अग्नीनां विशेषणत्वेन प्रयुक्तं पदमेतत्तेषां समानं माहात्म्यं समानस्तुतिनिर्देशात् सूचयतीति सायणभाष्यादवगम्यते ।

{1} "ते चाग्नयः सगराः समानस्तुतयः । गॄ स्तुताविति धातुः । सर्वेषां द्विनामत्वात् समानस्तुतित्वम् ।" {सा० 5/8/5}

{2} "सगराः समानगराः समानस्तुतयः ।" {उ०}

{3} "गरेण स्तुत्या सहिताः सगराः ।" {म०}

पूर्वाचार्यैःपदस्यास्य समानस्तुतय इति, महीधरेण तु स्तुतिसहिता इत्यर्थो निर्दिष्ट इति भेदः।

{4} "सगराः सगरो न्तरिक्षमवकाशो येषां ते । अर्श आदित्वादच् ।" "सगरो न्तरिक्षं विद्योपदेशावकाशो येषां ते ।" {द०}

दयानन्देन विद्ज्जनोद्देश्यतया पदस्यास्य तात्पर्यं निर्दिष्टम् ।

5.35.1. विश्वरूपं ज्योतिः {यज्ञसाधनम्, आज्यम्}

पदमिदमाज्यमुद्दिश्य प्रयुक्तमत्रेति सायणेन निर्दिष्टम् -

{1} "हे आज्य, त्वं विश्वरूपं ज्योतिरसि । बह्वीष्वाहुतिषु उपयुक्तत्वाद् विश्वरूपत्वम्, दीप्यमानत्वाज्ज्योतिष्ट्वम् । {सा0 5/9/1}

{2} "यथा त्वं ज्योतिरसि आज्यत्वात् यथा च विश्वरूपं वैचित्र्यात् त्वमसि ।" {उ0}

{3} "हे आज्य, त्वं ज्योतिरसि । किंभूतम् । विश्वरूपं सर्वरूपं बह्वीष्वाहुतिषूपयुक्तत्वाद्विश्वरूपत्वम् । आज्यत्वाद्वा दीप्यमानत्वाद्वा ज्योतिष्ट्वम् । " {म0}

{4} "ज्योतिः सर्वप्रकाशकः ।" "विश्वरूपं यथा सर्वं रूपं यस्मिंस्तथा ।" {द0}

5.35.2. तनूकृतः {यज्ञबाधकाः, रक्षांसि}

शरीरनाशकानां रक्षसां विशेषणात्मकं पदमिदं वर्तत इति सायणः -

{1} "तनूं शरीरं कृन्तन्ति छिन्दन्तीति तनूकृन्ति रक्षांसि ।" {सा0 5/9/1}

{2} "कृती छेदने । तनूः शरीरं तत् कृत्तन्ति छिन्दन्ति ये वृकादयः ते तनूकृतः ।" {उ0}

{3} "तनूं शरीरं कृन्तन्ति छिन्दन्तीति तनूकृतो राक्षसाः ।" {म0}

उव्वटेन "वृकादीनां तनूकृत्त्वं दर्शितम्, सायणमहीधराभ्यां रक्षसामिति विशेषः ।

{4} "तनूकृद्भ्यः यथा विस्तारकारिभ्यस्तथा ।" {द०}

5.36.2. जुहुराणम् {यज्ञबाधकम्, पापम्}

पदमिदं पापस्य विशेषणमस्तीति सायणभाष्यादवगम्यते ।

{1} "जुहुराणं कुटिलं फलप्रतिबन्धकम् ।" {सा० 5/9/2}

{2} "जुहुराणमेनः । हूर्छा कौटिल्ये" । हूछतेः सनो लोपश्च" इत्यौणादिकेन सूत्रेण सिद्धिः । हूर्छितुमिच्छति कुटिलीकर्तुमिच्छतीति ।" {उ०}

{3} "हूर्छा कौटिल्ये" अस्मात् हुछतेः सनो लुक् छलोपश्च {उणा० 2/88} औणादिकसूत्रेणानच्प्रत्यये रूपम् । हूर्छितुं कुटिलीकर्तुमिच्छतीति जुहुराणम् । अभिलषितक्रियाप्रतिबन्धकम् ।"

अत्र महीधरीयं व्याख्यानं सम्यग् धातुप्रकृतिप्रत्ययसहितायाः व्युत्पत्तेरुल्लेखाद् विशिष्यते ।"

{4} "जुहुराणं कुटिलम् ।" {द०}

6.8.1/6.11.1. रेवती {पशव/देवता, सरस्वती}

अस्य पदस्य पशुरूपो वाग्देवतारूपश्चार्थो भाष्यकारैर्निर्दिष्टः ।

{1} "हे रेवतीः, क्षीरादिधनवन्तो हे पशवः ।" {सा० 6/2/1}

{2} "रेवतीशब्दो धनवतीं वाग्देवतामाचष्टे ।" {सा० 6/2/7}

{3} "लिङ्गव्यत्ययः । हे रेवन्तो धनवन्तः पशवः ।" {उ०}

{4} "रयिर्धनं क्षीरादि यासां ता रेवत्यः । लिङ्गवचनव्यत्ययः । रेवन्तः "रेवन्तो हि पशवः" इति श्रुतेः । हे रेवन्तः क्षीरादिधनवन्तः पशवः ।" {म०}

अत्र सायणेन रेवतीपदस्य धनवद्वाचकस्य पशुरूपो वाग्देवतारूपश्चार्थः प्रतिपादितः । उव्वटेन लिङ्गमात्रव्यत्ययो निर्दिष्टः, महीधरेण वचनस्यापि व्यत्यय उक्तः । किन्च महीधरेण स्वपक्षे विग्रहश्च दर्शित इति विशेषः ।

{5} "रेवती: रायः प्रशस्तानि धनानि विद्यन्ते यासु ताः प्रजाः ।" {द०}

दयानन्देनात्र प्रजारूपो ऽर्थो निर्दिष्टः ।

6.2.1. अग्रेणीः {यूपशकलः}

सायणेन पदमिदं यूपशकलस्य विशेषणरूपं निर्दिश्य अस्यार्थः यूपस्य प्रथमावयवभूत इति निर्दिष्टः ।

{1} "यूपस्य त्रयो नेतारः प्रथमशकलः स्वरुश्चषालश्चेति । तेषामूर्ध्वनेतॄणां मध्ये अग्रे प्रथमं नीयत इत्यग्रेणीरसि । यूपस्य प्रथमावयवभूतो भवसीत्यर्थः ।" {सा० 6/1/1}

{2} "प्रथमशकलं प्रास्यति । अग्रेणीरसि । अग्रे प्रथमं यूपस्य छिद्यमानस्यापनीयत इत्यग्रेणीः यूपावयवभूत इत्यर्थः । यद्वा अग्रे वस्थितो यूपमवटं प्रति नयतीत्यग्रेणीः । पुरःसर इत्यर्थः ।" {उ०}

अत्र महीधरभाष्यमुव्वटभाष्येण सर्वथा समानम् ।

अत्र सायणस्य भाष्यं यूपस्य नेतृत्रयनिर्देशपूर्वकं व्याख्यानाद् विशिष्यते।

{5} "अग्रेणीः यथाध्यापकाः शिष्यान् । पिता स्वसन्तानान् वा पुरस्तादेव सुशिक्षया विद्यां प्रापयति तथा ।" {द०}

6.2.2. स्वावेशः {यूपशकलम्}

यूपशकलमुद्दिश्य पदमेतद् प्रयुक्तमिति सायणेन निर्दिष्टम् ।

{1} "हे यूपशकल, स्वावेशः शोभन आवेशो यूपावस्थितिलक्षणो यस्मिन् तादृशस्त्वम् ।" {सा० 6/1/1}

{2} "स्वावेशमुन्नेतॄणां ऊर्ध्वं नेतॄणामध्वर्यूणां स्वावेशः । ते ह्येव-मस्मिन् यूपावटे सुखेनविशयन्ति स्थापयन्ति । स हि लघुप्रमाणो भवति ।" {उ०}

{3} "उन्नेतृणामुन्नयनकर्तृणामध्वर्यूणां स्वावेशः सुखेनावेशयितुं शक्यः । ते ह्येनं यूपावटे सुखेनावेशयन्ति लघुत्वात् ।" {म०}

सायणेन पदस्यास्य विग्रहे शोभन आवेशो यस्मिन्निति निर्दिष्टम्। तत्र कीदृशं शोभनत्वमिति न स्पष्टम् । उव्वटादिभिर्लघुतया सुखेनावेशयितुं शक्यत्वं शोभनत्वमुक्तमिति विशेषः ।

{4} "स्वावेशः यथाप्तः शोभनं धर्ममाविशति तथा नेता ।" {द०}

6.7.1. उपावीः {तृणम्}

तृणविशेषमुद्दिश्य पदस्यास्य प्रयोगः सायणेन निर्दिष्टः ।

{1} "हे तृणविशेष, त्वम् उपावीरसि उप समीपम् अवति गच्छतीत्युपावीः ।" {सा० 6/2/1}

{2} "तृणमादत्ते ।उपावीरसि । उपसमीपे अवस्थितः अवति रक्षतीत्युपावीः द्वितीयः सखा ।" {उ०}

अत्र महीधरेण पूर्वाचार्यमतसंग्रहः कृतः । विशेषो नास्ति ।

{3} "उपावीः उपागतपालक इव ।" {द०}

6.12.1. आतानः {यज्ञः}

अस्य पदस्य सायणेन यज्ञ इत्यर्थो निर्दिष्टः ।

{1} "आसमन्तात्तन्यत इत्यातानो यज्ञः ।" {सा० 6/3/1}

{2} "हे आतान यज्ञ, "यज्ञो वा आतानो यज्ञं हि तन्यते" इति श्रुतिः ।" {उ०}

{3} "आसमन्तात् तन्यते विस्तायति इत्यातानो यज्ञः ।" {म०}

सायणेन यः पदस्य विग्रहो निर्दिष्टः, स उव्वटेनोद्धृते श्रुतिवाक्ये पि मूलतया वर्तते । महीधरेण तन्यते इत्यस्य "विस्तार्यते" इत्यर्थः सूचितः ।

(5) "आतान, समन्तात् सुखं तनितः" (द०)

अत्र दयानन्देन आतानशब्दस्य पूर्वाचार्यैरनुक्तः सुखद इत्यर्थो निर्दिष्टः । व्याकरणप्रक्रियादृष्ट्या यमर्थः संगच्छते, वेदार्थदृष्ट्या परम्पराभेदस्तु विशेषाभावादग्राह्य इति विशेषः ।

<u>6.23.1. हविष्मतीरापः (सोमाभिषवणहेतव आपः)</u>

सायणेन सोमाभिषवणहेतूनामपां वाचकमेतत्पदं निर्दिष्टम् ।

(1) "सोमाभिषवणसाधनभूता वसतीवरीसंज्ञका आपः ।"
"हविष्मतीः सोमेन युक्ता इमा वसतीवरीः अपः ।" (सा० 6/6/1)

(2) "हविष्मतीः हविषा संयुक्ता इमा आपः ।" (उ०)

(3) "हविष्मतीः प्रशस्तानि हवींषि विद्यन्ते यासु ताः ।" (द०)

<u>6.25.5. होत्रा (यज्ञाङ्गम्)</u>

(1) "वषट्कारयाजिनो ब्रह्मर्षयो होत्रा उच्यन्ते ।" (उ०)

(2) "होत्राः वषट्कारवादिनः सप्त होतृकान् ।" (म०)

(3) "होत्राः हवनकर्मानुष्ठात्र्यः ।" (द०)

अत्र दयानन्देन कृताः स्त्रीलिङ्गप्रयोगस्य तात्पर्यमिदं सूचयति । पूर्वाचार्यदृष्ट्या तु पदमेतत् होतृविशेषवाचकमवगम्यते ।

<u>6.28.1. कार्षिः (यज्ञद्रव्यम्, आज्यम्)</u>

पदमिदमाज्यस्य विशेषणात्मकं वर्तत इति सायण-भाष्यादवगम्यते ।

अनेन आज्यस्य मलापकर्षकत्वं सूच्यते इति च तत्र निर्दिष्टम् ।

§1§ "आज्यपदार्थ, त्वं कार्षिः कर्षणशीलः । अन्तर्मलस्यापनेता–सि । एतमर्थं तिरत्तिरिर्दर्शयतिका र्षिरसीत्याह । शमलमेवाज्यमपक्षणावयतीति ।" §सा० 6/7/6§

§2§ "शमलेनाज्यमपोहति कार्षिरसि । "कृष विलेखने" हे आज्य आकृष्टं त्वमसि । त्वं देवतया भक्षितमित्यर्थः ।" §उ०§

§3§ "हे आज्यपदार्थ, त्वं कार्षिराकृष्टो सि देवतया भक्षितो – सीत्यर्थः । यद्वा कर्षतीत्येवं शीलं कार्षिः । अन्तर्गत शमलापनेता सि । तदाह तित्तिरिः कार्षिरसीत्याह शमलमेवासामुपप्लावयतीति ।" §म०§

सायणेन कार्षिरिति पदस्य व्याख्याने अन्तर्मलापनयनं कथितम्, महीधरेणान्तर्गतमलस्यापनयनमिति भेदः । तित्तिरिवाक्ये पि पाठभेदो दृश्यते ।

§4§ "कर्षति हलेन भूमिमिति इन् । वपादिभ्य इतीन् ।" §द०§

7.12.4. धुनिः §यजमानः§

इदं यजमानस्य विशेषणमिति सायणभाष्यादवगम्यते –

§1§ "धुनिं त्वदनुग्रहात् शत्रुं कम्पयन्तम् ।" §सा० 7/6/1§

§2§ "धुनिम् । "धून् कम्पने" । कम्पयितारं शत्रूणाम् ।" §उ०§

उव्वटभाष्ये "धून्" इति पदप्रकृतिनिर्देशाद विशेषः ।

§3§ "धुनिम् इन्द्रियकम्पकम् ।" §द०§

अत्र दयानन्देन इन्द्रियाणां कम्पकम्, इत्यर्थो निर्दिष्टः, पूर्वाचार्यैस्तु शत्रुकम्पक इत्यर्थो विहितः ।

7.14.1. संस्कृतिः

सायणेन पदस्यास्य समीचीना कृतिरित्यर्थो निर्दिष्टः ।

(1) "संस्कृतिः समीचीना कृतिः ।" (सा० 7/6/6)

(2) "संस्कृतिः सोमसंस्कारः ।" (म०)

अत्र सायणेन सामान्यतया समीचीना कृतिरिति पदार्थो निर्दिष्टः, महीधरेण यज्ञानुसारं सोमसंस्काररूपो ऽर्थ उक्त इति विशेषः ।

(3) "संस्कृतिः विद्यासु शिक्षाजनिता नीतिः ।" (द०)

7.17.1. विपः (यज्ञा०ग्र, अध्वर्यू)

(1) "विपः विपश्चितौ मेधाविनौ अध्वर्यू" "छान्दसः प्रातिपदिकैकदेशलोपः ।" (उ०)

(2) "विपः विपश्चितौ मेधाविनौ अध्वर्युप्रतिप्रस्थातारौ ।" (म०)

अत्र महीधरेण अध्वर्युणा सह प्रतिप्रस्थातुरपि निर्देशः कृतः ।

(3) "विविधं पातीति विपो मेधावी विप इति मेधाविनामसु पठितम् ।" (द०)

7.17.2. शच्या (कर्म, यज्ञप्र०)

सायणेन पदमिदं कर्मवाचकं निर्दिष्टम् ।

(1) "शच्या कर्मणा निमित्तभूतेन ।" (सा० 7/7/2)

(2) "शच्या । शचीति कर्मनाम । कर्मणा निमित्तभूतेन ।" (उ०)

(3) "शच्येति निमित्ततृतीया वा । कर्मनिमित्तं व्याप्नुत इत्यर्थः ।" (म०)

अत्र त्रयाणामर्थसाम्यं स्पष्टम् ।

(4) "शच्या प्रज्ञया । शचीति प्रज्ञानामसु पठितम् ।" (द०)

अत्र दयानन्दकृतः शचीशब्दस्य प्रज्ञारूपो ऽर्थः पूर्वाचार्यकृतार्थतो भिन्नः । तैः कर्मणः शचीपदवाच्यस्य निर्देशात् ।

7.17.3. शर्या [अङ्गुल्यः]

[1] "शर्याभिः स्वाङ्गुलिभिः ।" [सा० 7/7/2]

[2] "शर्याभिरङ्गुलीभिः ।" [उ०]

[3] "शर्याभिः गतिभिः ।" [द०]

सायणादिभिः शर्यापदस्याङ्गुलीरूपो र्थ उक्तः । दयानन्देन गति-रूप इति भेदः ।

7.17.4. तुविनृम्णः [यजमानः]

इदं यजमानस्याभिधायकं पदमिति सायणभाष्यादवगम्यते ।

[1] "तुविनृम्णो बहुधनयुक्तो बहुदक्षिणोपेतो स्ति ।" [सा० 7/7/2]

[2] "तुवीति बहुनाम नृम्णमिति धननाम बहुधनो महादक्षिणः ।" [उ०]

[3] "तुविनृम्णं यस्य बहुधनः महादक्षिणः ।" [म०]

अत्र उव्वटेन महीधरेण च "तुविनृम्णः" इति समस्तपदान्तर्गतयोः पदयोः पृथक् पृथगर्थौ निर्दिष्टः । महीधरेण विग्रहश्च प्रदर्शित इति विशेषः ।

[4] "तुविनृम्णः तुवीनि बहूनि धनानि यस्य सः । तुवीति बहुनामसु पठितम् ।" [द०]

7.25.1. ध्रुवक्षितिः [यज्ञाङ्गम्, गृहविशेषः]

इदं गृहविशेषस्य वैश्वानराद्यो दिदृश्यमानस्य विशेषणं पदमस्ति । अनेन तस्य स्थिरनिवासत्वं सूच्यत इति सायणः ।

[1] "हे गृहत्वं गृहनामको सि । कीदृशस्त्वं ध्रुवक्षितिः । क्षि निवास-गत्योः । स्थिरनिवासः । आवैश्वदेवी शंसनमवस्थानात् ।" [सा० 7/10/1]

§2§ "क्षि निवासगत्योः । ध्रुवाणामपि त्वं ध्रुवनिवासः ।"
§उ0§

§3§ "ध्रुवा स्थिरा क्षितिनिवासो यस्य स ध्रुवक्षितिः ।" §म0§

अत्र महीधरेणैव पदविग्रहो निर्दिष्ट इति विशेषः ।

§4§ "ध्रुवक्षितिः ध्रुवा क्षितयो भूमयो यस्मिन् ।" §द0§

7.25.2. अच्युतक्षित्तमः §यज्ञाङ्गम्, गृहविशेषः§

इदं वैश्वानरायोद्दिश्यमानस्य गृहविशेषस्य विशेषणमस्ति ।

§1§ "अच्युतानां च्युतिरहितानां क्षरणशून्यानां च्युतक्षितीनामपि मध्ये अच्युतक्षित्तमः । अच्युते क्षियन्ति निवसन्तीत्यच्युतक्षितः। "तेषां श्रेष्ठो सि।"
§सा0 7/10/1§

§2§ "अच्युते क्षियतीत्यच्युतक्षित् अतिशयेन अच्युतक्षित् अच्युत-क्षित्तमः ।" §उ0§

§3§ "अच्युतानां च्युतिरहितानां क्षरणशून्यानां मध्ये अच्युत-क्षित्तमः । अच्युते च्युतिरहिते पात्रे क्षियति निवसतीति अच्युतक्षित् अतिशयेना-च्युतक्षित् अच्युतक्षित्तमः ।" §म0§

महीधरस्य व्याख्यानमत्र सर्वापेक्षया सुस्पष्टमिति विशेषः ।

§4§ "अच्युतं क्षयति निवासयति सो तिशयितः ।" §द0§

7.26.1. द्रप्सः §यज्ञद्रव्यम्, सोमरसः§

इदं रसवाचकं पदमिति सायणभाष्याद् ज्ञायते ।

§1§ "हे सोम, त्वे त्वदीयो यो द्रप्सो रसो रसैकदेशः ।"
§सा0 7/11§

§2§ "द्रप्सः विप्रुड् रसैकदेशः ।" §उ0§

(3) "द्रप्सः यज्ञपदार्थसमूहः । अत्र वा शर्परकरणे खर्परलोप इति विसर्जनीयलोपः ।" (द०)

अत्र दयानन्दकृतः यज्ञपदार्थसमूहरूपो र्थनिर्देशः विसर्जनीय लोप-विषयको निर्देशो नवीनः ।

<u>7.31.1. नभोवरेण्यम् (यज्ञाङ्गम्, सोमभागः)</u>

इदमिन्द्राग्नी उद्दिश्याभिषुतं सोमं प्रति प्रयुक्तं विशेषणात्मकं पदं तस्य देवैः प्रार्थनीयत्वं सूचयतीति सायणः ।

(1) "नभो नभः स्थितैः स्वर्गनिवासिभिर्देवैर्वरेण्यं प्रार्थनीयम्।" (सा० 7/13)

(2) "नभ आदित्यो भवति नेता भासां ज्योतिषां प्रभवः । लुप्तोपमं चैतत् । नभ इव आदित्यमिव वरणीयम् ।" (उ०)

(3) "नभ इवादित्य इति वरेण्यो वरणीयः प्रार्थनीयस्तम् । नभ आदित्यो भवति नेता भासां ज्योतिषां प्रभवो पि इति यास्कोक्तेर्नभ आदित्यः लुप्तोपमानम् । यद्वा गीर्भिः स्तुतिरूपाभिर्वाग्भिः युतमिति शेषः।" नभो नभः स्थितैः स्वर्गस्थैर्देवैर्वरेण्यं प्रार्थनीयम् । नभः शब्देन लक्षणया नभःस्था देवा उच्यन्ते ।" (म०)

उव्वटेन आदित्यस्यैव प्रार्थनीयत्वं निर्दिष्टमिति विशेषः ।

(4) "दयानन्देन पदस्यास्य श्रेष्ठं सुखमित्यर्थो निर्दिष्टः - "नभः सुखम् । नभ इति साधारणनामसु पठितम् ।" (द०)

<u>7.35.1. शार्याति (यज्ञविशेषः)</u>

इदं पदं शर्यातिकृतं यज्ञविशेषं सूचयतीति सायणभाष्यादवगम्यते ।

(1) "शर्यातिनामि कश्चिद्राजा, तस्य सम्बन्धिनि यज्ञे ।" (सा० 7/17)

[2] "शार्यातो मानवः तस्यापत्यं शार्यातः । "शार्यातो ह वा इदं मानवो ग्रामेण चचार इति श्रुतिः ।" [उ0]

शार्यातस्य मानवविशेषत्वकथनं तदनुकूलश्रुतिवाक्योपन्यासश्च उव्वटस्य विशिष्यते । महीधरः सायणमनुसरति ।

[3] "शर्याभिरङ्गुलिभिर्निर्वृत्तानि कर्माणि शार्याणि तान्यतति व्याप्नोति शार्यातस्तस्मिन् । शर्या इत्यङ्गुलिनामसु पठितम् ।" [द0]

अत्र दयानन्दकृतो र्थो नवीनः ।

7.45.3. चन्द्रदक्षिणाः [यज्ञाङ्गम्, गावः]

यज्ञे दीयमानानां गवां विशेषणतया प्रयुज्यमानमेतत् पदं तासां सुवर्णद्वितीयदक्षिणावत्त्वं प्रस्तौति ।

[1] "चन्द्रं सुवर्णं यजमानस्य हस्तगतं द्वितीयं यासां ताश्चन्द्रद्वितीयदक्षिणा इति प्राप्ते चन्द्रदक्षिणा इत्युक्ताः । शाकपार्थिवादित्वान्मध्यमपदलोपी समासः ।" [उ0]

[2] "चन्द्रमिति हिरण्यनाम । चन्द्रं सुवर्णं यजमानहस्तस्थं द्वितीयं दक्षिणा यासां ताश्चन्द्रद्वितीयदक्षिणा इति प्राप्ते शाकपार्थिवादित्वात् द्वितीयपदलोपः ।" [म0]

[3] "चन्द्रदक्षिणाः चन्द्रं सुवर्णं दक्षिणा दानं येषां ते । चन्द्रमिति हिरण्यनामसु पठितम् ।" [द0]

7.46.1. सुधातुदक्षिणम् [यज्ञाङ्गम्, आग्नीध्रः]

इदमाग्नीध्रस्य विशेषणतया प्रयुक्तं पदं तस्य सुवर्णदक्षिणायोग्यत्वमाचष्टे ।

[1] "सुधातुदक्षिणं शोभनो धातुः सुवर्णं दक्षिणा यस्य स सुधातुदक्षिणः तम् । सुवर्णं हि आग्नीध्रे दीयते ।" [उ0]

§2§ "सुधातुदक्षिणम् शोभना धातवो दक्षिणा यस्य दातुस्तम् ।"
§द0§

अत्र दयानन्देन दातुः विशिष्टत्वं पदेनानेन सूचितम्, उव्वटेन गृहीतुराग्नीध्रस्येति भेदः ।

8.5.2. अरपः §यज्ञाङ्गम्, यजमानसन्ततिः, यज्ञफलम्§

इदं पदं यजमानपुत्रस्य आशीर्विषयभूतस्य अपापत्वसूचकं विशेषणमिति भाष्यकारः आहुः ।

§1§ "अरपः । रपो रिप्रमिति पापनामनी भवतः । अपापः ।"
§उ0§

§2§ "अरपः पापरहितः ।" "नास्ति रपो यस्यासावरपः । "रपो रिप्रमिति पापनामनी भवतः" इति यास्कः ।" §म0§

§3§ "अरपः निष्पापः ।" §द0§

8.7.1. चनोधाः §यज्ञाङ्गम्, सावित्रग्रहः§

इदं सावित्रग्रहस्य विशेषणमिति सायणादिभाष्येभ्यो वगम्यते । अनेन तस्य अन्नधारयितृत्वं सूच्यते ।

§1§ "चनः अन्नं धत्त इति चनोधाः । अन्नस्य धारयिता भवसि ।" §सा0 8/4§

§2§ "चन इत्यन्ननाम । अभ्यासे भूयांसमर्थं मन्यन्ते । अतिशयेन चान्नस्य धारयिता सि ।" §उ0§

अत्र महीधरेण सायणानुवादः सर्वथा विहितः ।

§3§ "चनोधाः चनांस्यन्नानि दधातीति । चन इत्यन्ननामसु पठितम् ।" §द0§

अत्र सर्वेषामर्थः समान इति स्पष्टमेव ।

8.8.1. सुशर्मा [यज्ञाङ्गम्, वैश्वदेवगृहः]

इदं वैश्वदेवगृहस्य विशेषणमिति पूर्वेषां भाष्यकाराणामाशयः । अनेन तस्य सुखात्मकत्वं सूच्यते ।

[1] "हे वैश्वदेवगृह, त्वं सुशर्मासि शोभनं शर्म सुखं यस्य तादृशो भवसि ।" [सा० 8/5]

[2] "सुशर्मा सि स्वाश्रयो सि ।" [उ०]

[3] "शोभनं शर्म सुखमाश्रयो वा यस्य स सुशर्मा ।" [म०]

[4] "सुशर्मा शोभनानि गृहाणि यस्य सः । शर्मेति गृहनामसु पठितम् ।" [द०]

दयानन्देन पतिमुद्दिश्य स्त्रिया अस्य पदस्य प्रयोग उक्तः, तदनुकूल एव शोभनगृहयुत इत्यर्थश्च निर्दिष्ट इति भेदः ।

8.8.2. सुप्रतिष्ठानः [यज्ञाङ्गम्, वैश्वदेवगृहः]

वैश्वदेवगृहस्य विशेषणमिदं तस्य गृहस्य पात्रे स्थिरां स्थितिं सूचयति ।

[1] "सुष्ठु प्रतिष्ठानं पात्रे स्थितिर्यस्य तादृशो सि ।" [सा० 8/5]

[2] "शोभनं प्रतिष्ठानं प्रतिष्ठा अस्येति सुप्रतिष्ठानः महत्साधनसम्पन्नः ।" "प्राणो वै सुशर्मा सुप्रतिष्ठानः" इति श्रुतिः । प्राणहेतुत्वात् प्राण इत्युच्यते । अन्नं वै गृहो न्नं वै प्राणहेतुः ।" [उ०]

[3] "सुप्रतिष्ठानः सुष्ठु प्रतिष्ठानं पात्रे स्थितिर्यस्य तादृशोसि । विशेषणद्वयेन प्राणरूपो सीत्यर्थः । "प्राणो वै सुशर्मा सुप्रतिष्ठानः" इति श्रुतेः । गृहस्यान्नरूपत्वादन्नस्य च प्राणहेतुत्वात् गृहस्य प्राणत्वम् ।" [म०]

अत्र श्रुतिवाक्यनिर्देशपूर्वकमुव्वटस्य महीधरस्य च व्याख्यानं विशिष्यते ।

[4] "सुप्रतिष्ठानः सुष्ठु प्रतिष्ठानं प्रतिष्ठा यस्य सः ।" [द०]

<u>8.11.1. हरिः [यज्ञाङ्गम्, सोमः]</u>

द्रोणकलशाद् हारियोजनग्रहे गृह्यमाणं सोममुद्दिश्य तद्विशेषणत्वेन पदमेतत् प्रयुज्यत इति सायणेन निर्दिष्टम् । अनेन तस्य सोमस्य हरितवर्णत्वं प्रकाश्यते ।

[1] "हे सोम, त्वं हरिः हरितवर्णो ऽसि ।" [सा० 8/7]

[2] "हरिरसि हरितवर्णो ऽसि । हरिः सोमो हरितवर्ण इति।" [उ०]

[3] "हे ग्रह, त्वं हरिर्हरितवर्णो ऽसि । हरी रश्मिर्हरिः सोमो हरिर्हरितवर्णवान्" इत्यभिधानात् ।" [म०]

[4] "दयानन्देन पदस्यास्य पुरुषविशेषमुद्दिश्य प्रयोगः गृहाश्रमव्यवहारपालक इत्यर्थश्च निर्दिष्टः । – "हरिः हरते वहते यथायोग्यं गृहाश्रमव्यवहारान् ।" [द०]

<u>8.11.2. हारियोजनः [यज्ञाङ्गम्, ग्रहविशेषः]</u>

इदमिन्द्रसम्बद्धस्य ग्रहविशेषस्य विशेषणरूपं पदमस्ति ।

[1] "हे ग्रह, त्वं हारियोजनः, हारी इन्द्राश्वौ तौ येन प्रयुज्येते इति हारियोजनः इन्द्रः । तत्सम्बन्धी भवसि ।" [सा० 8/7]

[2] "इन्द्राश्वौ हरितावत्र युज्येते इति हरियोजनः । स्वार्थे तद्धितः "ऋक्सामे वै हरी" इति श्रुत्यपेक्षः ।" [उ०]

§3§ "हरी इन्द्राश्वौ योजयतीति हरियोजन इन्द्रस्तस्यायं हारियोजन इन्द्रसम्बन्धी ।" §म०§

§4§ "हरीन् योजयति यः सारथिः स हरियोजनः हरियोजन एव हारियोजनस्तद्वत् ।" §द०§

8.12.16. अश्वसनिः §यज्ञाङ्गम्, भक्षविशेषः§

इदं भक्षविशेषस्य विशेषणम् ।

§1§ "हे देव दीप्यमान सोम, ते त्वदीयो यो भक्षः अश्वसनिः अश्वानां दाता ।" §सा० 8/7§

§2§ "यस्तवाश्वं सनोति संभजते भक्षः ।" §उ०§

§3§ "षणु दाने । अश्वान् सनोतीत्यश्वसनिः अश्वानां दाता ।" §म०§

अत्र धातु-विग्रहनिर्देशसहितं महीधरस्य व्याख्यानं विशिष्यते ।

§4§ "अश्वसनिः अश्वानामग्न्यादिपदार्थानां दाता ।" §द०§

8.12.2. गोसनिः §यज्ञाङ्गम्, भक्षविशेषः§

इदमपि भक्षविशेषस्य विशेषणम् ।

§1§ "यो भक्षो गवां दाता ।" §सा० 8/7§

§2§ "यश्च गाः सनोति तस्य तव सम्बन्धिनः ।" §उ०§

§3§ "यश्च ते भक्षो गाः सनोति गवां दाता ।" §म०§

§4§ "गोसनिः गोः संस्कृतवाचो भूमेर्विद्याप्रकाशादेः सनिर्दाता ।" §द०§

दयानन्देन भिन्न एव वागादिरूपार्थो निर्दिष्ट इति भेदः ।

8.22.1. सर्ववीरः [यज्ञाङ्गम्, सोमादयः]

इदं पदं सोमादीनां यज्ञद्रव्याणां वाचकमित्युव्वटभाष्यादवगम्यते ।

[1] "सर्ववीरित्येतः । सोमः पशुः सवनीयाश्च पुरोडाशाः वीरा उच्यन्ते ।" [उ0]

[2] "सर्ववीरः सर्वे वीरा यस्मिन् स तथा । सोमः पशुः सवनीयचरु पुरोडाशा वीरा उच्यन्ते तैः सहितः ।" [म0]

[3] "सर्ववीरः शरीरात्मबलभूषिताः सर्वे वीरा यस्मात् ।" [द0]

अत्र दयानन्दकृतोऽर्थो भिन्नः ।

8.30.1. पुरुदस्मः [यज्ञाङ्गम्, गर्भः/इन्दुः]

इदं इन्दुरूपेण स्तूयमानस्य गर्भस्य वाचकं विशेषणपदमिति उव्वट-भाष्यादवगम्यते ।

[1] "गर्भः स्तूयते इन्दुसंस्तवेन । पुरुदस्मो बहुदानः ।" [उ0]

[2] "पुरुदस्मः पुरु दस्म यस्य बहुदानयुक्तः ।" [म0]

[3] "पुरुदस्मः पुरुर्बहुर्दस्म उपक्षयो दुःखानां यस्मात् सः ।" [द0]

दयानन्देनात्र दुःखानां बहुधोपशमसामर्थ्यवतो गर्भस्य स्वाभीष्टस्य निर्देशो ऽर्थत्वेन कृत इति विशेषः ।

8.30.2. विश्वरूपः [यज्ञाङ्गम्, गर्भविशेषः/इन्दुः]

इदमिन्दोर्विशेषणमत्र गर्भशुद्धिदक्षय प्रयुक्तमित्युव्वटेन सूचितम् ।

[1] "विश्वरूपः बहुरूपा हि गर्भो भवति ।" [उ0]

[2] "विश्वरूपः बहुरूपः ।" [म0]

[3] "विभूनि व्याप्तानि रूपाणि येन सः ।" [द0]

8.30.3. एकपदी {यज्ञाङ्गम्, वशा}

इदं वशाया विशेषणमित्युव्वटभाष्ये महीधरभाष्येण च सूच्यते ।

{1} "वशोत्येकपदी ।" {उ०}

{2} "एकपदीमेकं पदं यस्यास्तां वपयैकपदयुताम् ।" {म०}

{3} "एकमोमिति पदं प्राप्तव्यं यस्यां ताम् ।" {द०}

दयानन्देन पदमिदं सृष्टिविशेषस्य स्वाभीष्टस्य विशेषणत्वेन व्याख्यातमिति विशेषः ।

8.30.4. द्विपदी {यज्ञाङ्गम्, वशा/आध्या०, वाणी}

इदं वशाया विशेषणमिति उव्वटः ।

{1} "वपया अङ्गैश्च द्विपदी ।" {उ०}

{2} "द्विपदीं वपया अङ्गैश्च द्विपदयुताम् ।" {म०}

{3} "द्वे अभ्युदयनिःश्रेयसे सुखे पदे यस्यां ताम्।" {द०}

दयानन्देन इदं विद्याया विशेषणमङ्गीकृतम्, तदनुसारमेवाभ्युदयनिश्रेयसरूपं पदद्वयं निर्दिष्टमिति विशेषः ।

8.30.5. त्रिपदी {यज्ञाङ्गम्, वशा/आध्या०, वाक् विद्या}

इदं वशाया विशेषणम् ।

{1} "उपयद्धोमैश्च त्रिपदी ।" {उ०}

{2} "त्रिपदीं त्रीणि पदानि यस्यास्तामुपयड्ढोमैस्त्रिपदीम् ।" {म०}

{3} "त्रीणि वाङ्मनः शरीरस्थानि सुखानि यस्यास्ताम् ।" {द०}

पूर्वाचार्यैर्यपादिभिस्त्ययद्दोमपर्यन्तैस्त्रिपदीत्वं वर्णितम्, दयानन्देन विद्यामुद्दिश्य वाङ्मनः शरीरसुखैस्त्रिपदीत्वं निर्दिष्टमत्रेति भेदः ।

8.30.6. चतुष्पदी {यज्ञाङ्गम्, वशा/अध्या०, वाक्}

इदं वशाया विशेषणम् ।

{1} "चतुष्पदी पत्नीसंयाजैश्चतुर्भिर्वा पादैः ।" {उ०}

{2} "चतुष्पदीं पत्नीसंयाजैश्चतुर्भिः पादैर्वा चतुःपादयुताम् ।"
{म०}

दयानन्देन सकलविद्यायुक्ताया वाचो विशेषणत्वेन पदमिदं व्याख्यातम्, धर्मार्थकाममोक्षाख्याश्चतुःसंख्याः पुरुषार्थाश्च पदेऽवधारिताः ।

{3} "चतुष्पदीम् चत्वारि धर्मार्थकाममोक्षाः पदानि यस्यास्ताम्"
{द०}

8.39.1. {चमूसुतम् {सोमः, यज्ञाङ्गम्}

इदं सोममुद्दिश्य प्रयुक्तं विशेषणात्मकं पदमिति सायणः ।

{1} "चमू चम्वां अधिषवणचर्मणीत्यर्थः । सुतमभिषुतं सोमम् ।"
{सा० 8/15}

{2} "चमूसुतम् । अधिषवणचर्म चमूशब्देनोच्यते । अधिषवणचर्मण्यभिषुतम् ।" {उ०}

{3} "चमूसुतं चम्वामधिषवणचर्मणि सुतमभिषुतं सोमपानं कृत्वा ।"
{म०}

{4} "चमू सेनया । अत्र "सुपां सुलुगिति तृतीयैकवचनस्य लुक् । सुतं सम्पादितम् ।" {द०}

अत्र पूर्वाचार्यैः अधिषवणचर्मणि सुतमित्यर्थ उक्तः, दयानन्देन सेनया सम्पादितमिति विशेषः ।

8.43.2. रन्ता {यज्ञाङ्गम्, गौः}

इदं गामुद्दिश्य प्रयुक्तं विशेषणपदमस्ति । अनेन पदेन तस्या सुख-हेतुत्वं प्रकाश्यते ।

{1} "रन्ते रमयतीति रन्ता ।" {उ०}

{2} "रन्ते रमणीये ।" {द०}

8.43.3. हव्या {यज्ञाङ्गम्, गौः}

इदं गोविशेषणं तस्या हविः साधनत्वं व्यनक्ति ।

{1} "हूयन्ते स्या विकारा यज्ञेष्विति हव्या ।" {उ०}

{2} "हूयते यद्दुग्धं यज्ञेष्विति हव्या ।" {म०}

हूयते आहूयते सर्वैरिति वा हव्या ।"

अत्र द्वितीय विग्रहनिर्देशः महीधरस्य विशिष्यते ।

{3} "हव्ये स्वीकर्तुमर्हे" {द०}

8.43.4. काम्या {यज्ञाङ्गम्, गौः}

इदं गोः कामपूरकत्वसूचकं विशेषणं पदमस्ति ।

{1} "काम्ये मनुष्याणां ह्येतासु कामाः प्रविष्टाः ।" {उ०}

{2} "काम्यत इति काम्या, "मनुष्याणां" ह्येतासु कामाः प्रविष्टाः" इति श्रुतिः ।" {म०}

{3} "काम्ये कमनीये" {द०}

8.43.5. चन्द्रा {यज्ञाङ्गम्, गौः}

इदं गवामाह्लादजनकत्वसूचकं विशेषणमस्ति ।

(1) "चन्द्र इवाह्लादयतीति चन्द्रा" (उ०)

(2) "चन्दयत्याह्लादयतीति चन्द्रा" (म०)

(3) "चन्द्रे आह्लादकारके" (द०)

8.43.6. ज्योति: (यज्ञाङ्ग०गम्, गौ:)

इदं गो: विशेषणतया प्रयुक्तं पदं वर्तते ।

(1) "ज्योते तस्यैव ज्योतिर्ज्योत्स्ना" (उ०)

द्युत दीप्तौ अस्य ज्योता ।

(2) "द्युत दीप्तौ" द्योतयति प्रकाशयतीति ज्योता दकारस्य ज: ।" (म०)

(3) "ज्योते सुशीलेन द्योतमाने ।" (द०)

8.43.7. अदिति: (यज्ञाङ्ग०गम्, गौ:)

इदमदीनत्वसूचकं गोविशेषणत्वेन प्रयुक्तं पदमस्ति ।

(1) "अदिते अदीने ।" (उ०)

(2) "अदितिरदीना नवखण्डिता" (म०)

(3) "अदिते आत्मस्वरूपेणाविनाशिनि ।" (द०)

8.43.8. सरस्वती (यज्ञाङ्ग०गम्, गौ:)

इदं गो: दुग्धसाधनत्वसूचकं विशेषणमस्ति ।

(1) "सरस्वति, सर इत्युदकनाम सर्तेः तद्वति ।" (उ०)

(2) "सरस्वति, सरतीति सरः क्षीरं तद्वति । सर इत्युदकनाम सर्तेरिति यास्कोक्तेः ।" (म०)

उदकशब्देनात्र क्षीरमुच्यते ।"

अत्र महीधरस्य व्याख्यानं स्पष्टाभिप्रायम् ।

§3§ "सरस्वति, प्रशस्तं सरो विज्ञानं विद्यते यस्यास्तत्सम्बुद्धौ" §द0§

अत्र दयानन्देन सरशब्दस्य विज्ञानरूपो र्थो निर्दिष्ट इति विशेषः ।

8.43.9. मही §यज्ञाङ्गम्, गौः§

इदं गोः महत्त्वसूचकं विशेषणमस्ति ।

§1§ "हे महि, महति ।" §उ0§

§2§ "मही महती ।" §म0§

§3§ "महि पूज्यतमे" §द0§

अत्र दयानन्दकृतः पूज्यतम इत्यर्थो नवीनः ।

8.43.10. विश्रुतिः §यज्ञाङ्गम्, गौः§

इदं गोः प्रशस्यत्वसूचकं विशेषणमस्ति ।

§1§ "विविधं श्रूयत इति विश्रुति ।" §उ0§

§2§ "विविधं श्रूयते स्तूयत इति विश्रुतिः ।" §म0§

§3§ "विश्रुति विविधाः श्रुतयः श्रवणानि तद्वति ।" §द0§

8.48.4. मदिन्तमाः §यज्ञाङ्गम्, आपः§

इदमपां तृप्तिहेतुत्वसूचकं विशेषणमस्ति ।

§1§ "अत्यर्थं मदयन्ति तर्पयन्तीति मदिन्तमाः । माद्यतेः मादस्य इति नुमागमः ।" §उ0§

§2§ "मादयन्तीति मदिन्यः । अत्यर्थं मदिन्यो मदिन्तमाः । तमपि पुंवद्भावः । "नलोपः प्रातिपदिकान्तस्य" इति नलोपः "नाद्रस्य" इति छान्दसो नुडागमः । अत्यर्थं तर्पयन्त्यो मेध्या आपः ।" §म0§

अत्र महीधरव्याख्यानं विशिष्यते ।

(3) "मदिन्तमानाम् अतिशयितानन्दितानां परस्त्रीणां समीपे।" (द०)

अत्र दयानन्दस्यार्थो विचित्रः ।

<u>8.48.5. मधुन्तमा (आपः)</u>

सायणेन अस्य "मध्वन्तमानामिति पाठः प्रस्तुतः, अपां स्वादुत्वसूचकं विशेषणमिति च सूचितम् ।

(1) "मध्वन्तमानां मधुवत् स्वादुतमानाम् ।" (सा० 8/23)

(2) "मधुन्तमानाम् अतिशयेन मधुस्वादोपेता मधुन्तमाः ।" (उ०)

(3) "अत्यन्तं मधुस्वादोपेता मधुन्तमाः ।" (म०)

(4) "मधुन्तमानाम् अतिशयेन माधुर्यगुणोपेतानाम् । वा छन्दसि प्राप्ते नुडागमः ।" (द०)

<u>8.57.1. अंशुः (यज्ञद्रव्यम्, सोमखण्डम्)</u>

इदं खण्डवाचकं पदं सोमस्य खण्डं बोधयति ।

(1) "अंशुषु सोमखण्डेषु" (म०)

(2) "अंशुषु विभक्तेषु सांसारिकेषु पदार्थेषु" (द०)

<u>8.58.5. नृचक्षाः (यज्ञद्रव्यम्, सोमः)</u>

इदं प्रतिख्यातस्य सोमस्य नामेति सायणः ।

(1) "नृचक्षाः प्रतिख्यात इति । प्रतिख्यातः सोमो नृचक्षा इति भवति ।" (सा० 9/7)

(2) "प्रतिख्यातः ब्रह्मन्नुपह्वयस्वेत्यादिना भक्षणार्थं पृष्टः

सोमो नृचक्षा भवति । नृन् मनुष्यान् चष्टे शुभाशुभकारिणः पश्यतीति नृचक्षाः ।" {म०}

अत्र पदार्थव्याख्याने स्पष्टत्वम्, यज्ञप्रक्रियायाः साधु प्रकाशनम्, पदव्युत्पत्तिश्च महीधरस्य व्याख्यानकौशलं सूचयति ।

{3} "नृचक्षाः नृन् मनुष्यान् चष्ट इति ।" {द०}

8.58.6. भक्षः {यज्ञद्रव्यम्, सोमः}

इदं पानावस्थाप्रयुक्तं सोमस्य नाम वर्तते ।

{1} "भक्षः पीत इति । पीतः सोमो भक्षो भवति ।" {सा० 9/7}

{2} "भक्ष्यमाणः पीयमानः सोमो भक्षो भवति ।" {म०}

{3} "भक्षः भोज्यसमूहः ।" {द०}

8.58.7. पितरः {यज्ञद्रव्यम्, सोमः}

अत्रेदं सोमस्य विशिष्टं नाम वर्तते ।

{1} "पितरो नाराशंसाः साद्यमानः इति । यदा सोमः साद्यते तदा पितरो नराशंसा भवति ।" {सा० 9/7}

{2} "भक्षयित्वा सन्नः स्वखरेषु सादितः सोमो नाराशंसाः पितरो भवन्ति ।" {म०}

{3} "पितरः ज्ञानिनः ।" {द०}

8.58.9. नाराशंसाः {यज्ञद्रव्यम्, सोमः/देवता, पितरः}

इदं यज्ञसम्बद्धं संज्ञापदमत्र पितृणां विशेषणत्वेन सोममुद्दिश्य च प्रयुक्तमस्तीति महीधरभाष्यादवगम्यते ।

{1} "नरो अस्मिन्नासीनाः शंसन्तीति नराशंसो यज्ञस्तत्र

हिता योग्या वा नाराशंसा नाराशंसगुणविशिष्टाः पितरः ।" [म०]

[2] "नारानाशंसन्ति नराशंसानामिम उपदेशकाः ।" [द०]

8.59.1. सिन्धुः [यज्ञद्रव्यम्, सोमः]

अत्रेद अवभृथायोद्यतस्य सोमस्य नाम भवति ।

[1] "सिन्धुरवभृथायोद्यत इति । अवभृथार्थं यदा सोम उद्यत-स्तदा सिन्धुर्भवति ।" [सा० 9/7]

[2] "अवभृथार्थमुद्यतः सोमः सिन्धुर्भवति ।" [म०]

[3] "सिन्धुः नदी । सिन्धव इति नदीनामसु पठितम् ।" [द०]

8.59.2. सलिलः [यज्ञद्रव्यम्, सोमः]

अत्रेदं जलप्लुतस्य सोमस्य नाम भवति ।

[1] "सलिलः प्रप्लुत इति । यदा सोमः प्रप्लुतो प्सु निमग्न-स्तदा सलिलो भवति ।" [सा० 9/7]

[2] "प्रप्लुतो प्सु निमग्नः सोमः सलिलो भवति ।" [म०]

[3] "सलिलः शुद्धं जलं विद्यते यस्मिन् सः अर्श आदित्वादच् । सलिलमित्युदकनाम ।" [द०]

8.59.3. समुद्रः [यज्ञद्रव्यम्, सोमः]

अत्रेदमभ्यवाहृतस्य सोमस्य नाम भवति ।

[1] "समुद्रो भ्यवह्रियमाण इति । यदा सोमो भ्यवह्रियते तदा समुद्रो भवति ।" [सा० 9/7]

[2] "जलमभिमुखं नीयमानः सोमः समुद्रो भवति ।" [म०]

[3] "समुद्रः अन्तरिक्षम् । समुद्र इति अन्तरिक्षनामसु पठितम् ।" [द०]

9.2.1. ध्रुवसत् {गृहविशेषः, यज्ञाङ्गम्}

इदमिन्द्रदेवताकं गृहविशेषमुद्दिश्य प्रयुक्तं विशेषणमस्ति । अनेन तस्य गृहस्य स्थिरत्वं सूच्यते ।

{1} "ध्रुवे स्थिरलक्षणे गृहे सीदतीति ध्रुवसदम् ।" {सा० 10/1}

{2} "ध्रुवसदं त्वा सोमाहुतिपरिणामभूतो रस एषु लोकेष्ववा-वर्तमान इह गृह्यते सोमाध्यस्तः । ध्रुवे अस्मिन् लोके सीदतीति ध्रुवसत् ।" {उ०}

{3} "ध्रुवसदं ध्रुवे स्थिरे स्मिन् लोके सीदतीति ध्रुवसत्तमम् ।" {म०}

{4} "ध्रुवेषु ध्रुवेषु विद्याविनययोगधर्मेषु सीदन्तम् ।" {द०}

9.2.2. नृषत् {यज्ञाङ्गम्, गृहविशेषः}

इदमिन्द्रदेवतामुद्दिश्य गृह्यमाणस्य गृहविशेषस्य विशेषणमस्ति । अनेन तस्य गृहस्य मनुष्यसम्बन्धो वगम्यते ।

{1} "नृषु मनुष्येषु सीदतीति नृषदम् ।" {सा० 10/1}

{2} "नृषदं मनुष्यसदम् ।" {उ०}

{3} "नृषु मनेष्येषु सीदतीति नृषत्तम् ।" {म०}

{4} "नृषदम् नायकेषु सीदन्तम् ।" {द०}

9.2.3. मनःषत् {यज्ञाङ्गम्, गृहविशेषः}

इन्द्रमुद्दिश्य गृह्यमाणस्य गृहस्य मनसा सम्बन्धसूचकं विशेषणमेतदस्ति।

{1} "मनसि सीदतीति मनःसदम् ।" {सा० 10/1}

{2} "मनसि सीदतीति मनःषदम् ।" {उ०}

{3} "मनसि सीदतीति मनःषत्ताम् ।" {म०}

{4} "मनःसदम् मनसि विज्ञाने तिष्ठन्तम् ।" {द०}

9.2.4. अप्सुसत् (यज्ञाङ्गम्, सोमः)

इन्द्रमुद्दिश्य गृहीतस्य ग्रहस्येदं विशेषणमस्ति ।

(1) "अप्सुषदमुदकसदम् ।" (उ०)

(2) "अप्सुसदम् जलेषु गच्छन्तम् ।" (द०)

9.2.5. घृतसत् (यज्ञाङ्गम्, सोमः)

इदमिन्द्रमुद्दिश्य गृहीतस्य ग्रहविशेषस्य विशेषणं घृतेन सह तस्य सम्बन्धं सूचयति ।

(1) "घृते सीदतीति" (म०)

(2) "घृतसदम् आज्यं प्राप्नुवन्तम् ।" (द०)

9.2.6. व्योमसत् (यज्ञाङ्गम्, सोमः)

इदमिन्द्रस्य ग्रहत्वेन गृहीतस्य सोमस्य वाचकं विशेषणमस्ति ।

(1) "व्योमशब्देनान्तरिक्षमभिधीयते ।" (उ०)

(2) "व्योम्नि अन्तरिक्षे सीदतीति ।" (म०)

(3) "व्योमसदम् विमानैर्व्योम्नि सीदन्तम् ।" (द०)

9.2.7. पृथिवीसत् (यज्ञाङ्गम्, ग्रहविशेषः)

इदमिन्द्रमुद्दिश्य गृहीतस्य ग्रहस्य विशेषणमस्ति ।

(1) "पृथिविसदम् । पृथिव्यां गच्छन्तम् । अत्र ङ्यापोः संज्ञाछन्दसोर्बहुलम्" इति पूर्वपदस्य ह्रस्वः ।" (द०)

दयानन्देन पदस्यास्य प्रयोगः राजानमुद्दिश्य निर्दिष्टः ।

9.2.8. अन्तरिक्षसत् {यज्ञाङ्गम्, ग्रहविशेषः}

इन्द्रोद्देश्यकग्रहस्य विशेषणमिदमस्ति ।

{1} "अन्तरिक्षसदम् अवकाशे च गमकम् ।" {द०}

9.3.1. उद्वयसम् {यज्ञाङ्गम्, उदकसारम्/आधिभौ०, सूर्ये स्थितं जलम्}

इदमुदकसारस्य विशेषणमस्ति ।

{1} "उद्वयसम् । उद्गतं वयो न्नं यस्य तम् ।" {सा० 10/1}

{2} "रसः सारः सो यां वायुः । "एष वा अपां रसो यो यं पवते" इति श्रुतिः । उद्गतं वयो न्नं यस्माद्वायोस्तमुद्वयसं वायुम् ।"

{3} "किंभूतं रसम् । उद्वयसमुद्गतं वयो न्नं यस्माद्वायोः स उद्वयास्तम् । वायुनैव धान्यानि निष्पद्यन्ते ।"

उव्वटमहीधराभ्यां वायुरूपो र्थः पदस्यास्य निर्दिष्टः, सायणस्योदकमात्रे तात्पर्यदर्शनादत्र भेदः ।

{4} "उद्वयसम् उत्कृष्टं वयो जीवनं यस्मात्तम् ।" {द०}

दयानन्देनात्र जीवनहेतुत्वमपां सारस्योक्त इति विशेषः ।

9.3.3. अपां रसस्य रसः {यज्ञाङ्गम्, सोमरसः/देवता,प्रजापतिः}

पदमेतत् सोमवल्लीरसस्य वाचकमिति सायणभाष्यादवगम्यते ।

{1} "अपां रसस्य उदकस्य सारभूतः सोमवल्लीरूपेण परिणतः यो रसो स्ति, तस्यापि रसस्य यो रसः सारभूतस्तं तादृशम् ।" {सा० 10/1}

{2} "अपां रसो वायुस्तस्यापि रसः प्रजापतिः, स हि यज्ञलोककालाग्निवायुसूर्यर्ग्यजुःसामादिवपुः ।"

सायणेनैतत्पदं सोमवल्लीरसस्य वाचकं निर्दिष्टम्, उव्वटेन तदनुगामिना महीधरेण च प्रजापतेर्वाचकमिति भेदः । यज्ञप्रक्रियायां प्रथमो र्थः साधुः

प्रतीयते । द्वितीयार्थस्य सङ्गतिरत्र कथमिति विचारणीयमेव ।

{3} "अपां रसस्य वायोर्यो रसः सारः प्रजापतिर्हिरण्यगर्भः स हि यज्ञलोककालाग्निवायुसूर्यर्ग्यजुःसामादिवपुः ।" {म०}

{4} "अपां जलानां रसस्य सारस्य यः रसः वीर्यं धातुः ।" {द०}

9.4.1. ऊर्जाहुतयः {यज्ञाङ्गम्, गृहविशेषः}

इदं गृहविशेषस्य अन्नार्थपूरकत्वेनाभीष्टस्य विशेषणमस्ति ।

{1} "ऊर्जमन्नं येनाह्वयन्ति त ऊर्जाहुतयः ।" {सा० 10/1}

{2} "ऊर्जमन्नरसमाह्वयन्ति ये येर्वा ते ऊर्जाहुतयः ।" {म०}

{3} "ऊर्जमन्नरसमाह्वयन्ति ये येर्वा ते ऊर्जाहुतयः ।" {म०}

{4} "ऊर्जाहुतयः ऊर्जा बलप्राणनकारिका आहुतयो ग्रहणानि दानानि वा येषां ते ।" {द०}

दयानन्देन पदमेतत् गृहाश्रमिणां विशेषणत्वेन निर्दिष्टमिति विशेषः ।

9.4.2. विशिप्रियाः {यज्ञाङ्गम्, गृहविशेषः}

इदं गृहविशेषस्य स्थानसम्बन्धविशेषसूचकं विशेषणमिति सायणः ।

{1} "विशिप्रयाणां विविधानि शिप्राणि हनुस्थानीयानि पात्राग्राणि तत्तत्पर्यन्ता विशिप्रियाः ।" {सा० 10/1}

{2} "शिप्रे हनू नासिके वेत्युक्तम् । इह तु हनू एव गृह्येते । विगतं हन्वोः कर्म येषु ग्रहेषु ते विशिप्रियाः शोभनाभिषवसंस्कृताः सुपूताश्च विशिप्रिया उच्यन्ते ।" {उ०}

{3} "शिप्रे हनू नासिके वा । इह तु हनू । शिप्रयोः हन्वोः कर्म शिप्रियं हनुचलनम् । विगतं शिप्रियं येषु ग्रहेषु ते विशिप्रियाः सम्यगभिषुताः सुपूताश्च । तत्र हि हन्वोर्व्यापारो नास्ति सुपेयत्वात् ।" {म०}

अत्र उव्वटमहीधराभ्यामेतत्पदं गृहस्य सुपेयत्वप्रकाशकं विशेषणमिति सूचितम् ।

﴾4﴿ "विशिप्रियाणाम् विविधे धर्मे कर्मणि हनुनासिके येषाम् । शिप्रे हनुनासिके वा ।" ﴾द०"

दयानन्देन पदमेतद् गृहस्थानां विशेषणतया व्याख्यातम् ।

9.4.3. वाजसाः ﴾यज्ञाङ्गम्, रथः﴿

इदं रथस्य विशेषणमिति उव्वटमहीधराभ्यां निर्दिष्टम् ।

﴾1﴿ "वाजमन्नं सनोतीति वाजसाः ।" ﴾उ०﴿

﴾2﴿ "वाजमन्नं सनोति ददातीति वाजसाः । षणु दाने "विट्प्रत्ययः "विड्वनोरनुनासिकस्यात्" इत्याकारः ।" ﴾म०﴿

﴾3﴿ "यो वाजान् संग्रामान् विभजति सः ।" ﴾द०﴿

अत्र राजपुरुषमुद्दिश्य पदस्यास्य प्रयोगः, संग्रामविभाजक इति पदार्थश्च दयानन्देन दर्शितः ।

9.14.1. दधिक्राः ﴾यज्ञाङ्गम्, अश्वः﴿

इदं यज्ञाङ्गस्य अश्वस्य गतिविशेषसूचकं विशेषणमस्ति ।

﴾1﴿ "दधिक्राः धारकान् मार्गविरोधकान् पाषाणादीनप्यति-क्रमत् ।" ﴾सा० 10/3﴿

﴾2﴿ "दधिक्रा अश्वः । स हि अश्ववारं दधत् क्रामति ।" ﴾उ०﴿

﴾3﴿ "दधिक्राः दधाति अश्ववारमिति दधिः । "आदृगम०" इति किप्रत्ययः । दधिः सन् क्रमते ध्वानमिति दधिक्राः । विट्क्रमतेराकारः । यद्वा दधीन् धारकान् मार्गविरोधान् अद्रिपाषाणगर्तकण्टकादीनप्यतिक्रामतीति दधिक्राः ।" ﴾म०﴿

अत्र महीधरस्य व्याख्यानं विशिष्यते ।

§4§ "दधिक्राः यो दधीन् धारकान् क्राम्यति स दधिक्रा अश्वः ।"
§द0§

9.16.1. मितद्रवः §यज्ञाङ्गम्, अश्वः§

इदं यज्ञाङ्गस्य अश्वस्य गतिविशेषसूचकं विशेषणमस्ति ।

§1§ "मितद्रवो यजमानचित्तानुकूलतया परिमितगामिनः ।"
§सा0 10/3§

"मितं परिमितं द्रवन्ति गच्छन्तीति मितद्रवो श्वाः ।"

§2§ "मितद्रवः । ते हि मितं द्रवं गच्छन्ति सुखकरम् ।" §उ0§

"मितद्रवः यजमानमपरिच्छिन्नं ये गच्छन्ति ते मितद्रवः ।"
§उ0§

§3§ "मितं परिमितं द्रवन्ति गच्छन्तीति मितद्रवः । क्विपि तुगभाव आर्षः ।" §म0§

§4§ "मितद्रवः ये परिमितं द्रवन्ति गच्छन्ति ते ।" §द0§

9.16.2. स्वर्काः §यज्ञाङ्गम्, अश्वः§

इदमश्वानां शोभाविशेषप्रकाशकं विशेषणमस्ति ।

§1§ "स्वर्काः सुरूचः । स्वन्चना वा ।" §सा0 10/3§

§2§ "स्वर्काः सुरोचनाः स्वन्चना वा।" §उ0§

§3§ "स्वर्काः शोभनो र्को येषां ते सुरूचः स्वन्चना वा ।" §म0§

§4§ "शोभनो र्को न्नं सत्कारो वा येषां ते ।" §द0§

दयानन्देन राज्ञामिदं पदं विशेषणतया व्याख्यातमिति भेदः ।

9.23.1. पुरोहिताः {यज्ञाङ्गम्, यज्ञकर्तारः}

इदं यज्ञकर्तॄणां वाचकं पदमस्ति ।

{1} "पुरोहिता यागानुष्ठानादौ पुरोगामिनः ।" {सा० 10/5}

{2} "पुरोहिताः अग्रतो व्यवस्थिताः प्रधाना इत्यर्थः ।" {उ०}

{3} "पुरोहिताः यागानुष्ठानादौ पुरोगामिनः प्रधाना इत्यर्थः।" {म०}

{4} "पुरोहिताः सर्वेषां हितकारिणः ।" {द०}

सायणेन पदार्थनिरूपणे पुरोगमनं विशिष्टवस्तुतया निर्दिष्टम्, उव्वटमहीधराभ्यां प्रधानत्वञ्चोक्तम्, दयानन्देन हितकारित्वं चोक्तमिति विशेषः।

10.3.1. अर्थेतः {आपः}

इदमपां विशेषणं यज्ञोपयोगित्वं तासामाचष्टे ।

{1} "हे आपः, अर्थं प्रयोजनमुद्दिश्य नद्यादेः सकाशाद्यज्ञ-प्रदेशं यन्ति गच्छन्तीति अर्थेतः ।" {सा० 11/2}

{2} "अर्थं प्रयोजनं निष्पादयितुं याः यन्ति गच्छन्ति ता अर्थेतः।" {उ०}

{3} "अर्थं प्रयोजनमुद्दिश्य नद्यादेः सकाशाद् यज्ञदेशं यन्ति गच्छन्तीत्यर्थेतः । इणः क्विपि तुगागमः ।" {म०}

{4} "अर्थेतः ये र्थं यन्ति ।" {द०}

10.3.2. परिवाहिणीः {आपः}

इदमपां प्रवाहशीलत्वसूचकं विशेषणमस्ति ।

{1} "परितः सर्वतो वहन्तीति परिवाहिण्य आपः ।" {सा० 11/2}

{2} "परिवाहिणीः सर्वतो बहनशीलाः ।" {उ०}

§3§ "परिवाहिणीः स्थ, परि सर्वतो वहन्तीति परि-
वाहिण्यः सर्वतोवहन-शीलाः ।" §म0§

10.3.3. अपां गर्भः §जलभ्रमः§

महीधरेण पदमिदं जलभ्रमवाचकं सूचितम् ।

§1§ "निवेष्य आवर्तस्तिद्भवा निवेष्याः नद्यादौ यत्राम्भो-
भ्रमस्तत्र होमादाने हे जलभ्रम, त्वमपां गर्भो मध्यवर्ती भवसि ।" §म0§

§2§ "अपां गर्भः स्तोतुं योग्यः ।" §द0§

10.4.1. सूर्यत्वचसः §आपः, यज्ञाङ्गम्§

इदमपां शोभाविशेषपरिचायकं विशेषणमस्ति । अनेन तासां सूर्य-
स्येव समाना दीप्तिः सूच्यते ।

§1§ "सूर्यस्य त्वग्दीप्तिर्यासां ताः सूर्यत्वच स्थ ।" §सा0§

§2§ "सूर्यस्येव त्वक् यासां ताः सूर्यवर्चसः आतपवर्ष्याः ।" §उ0§

§3§ "बह्वपां मध्ये याः स्थिराः सदा धर्मे वर्तमानास्तासु
होमादाने । हे आपः , यूयं सूर्यत्वचसो भवथ सूर्यस्येव त्वचस्तक् यासां ताः सूर्य-
त्वचसः सदा तापे वर्तमानत्वात् त्वचः शब्द सान्तस्त्वग्वाची ।"

महीधरेण पदस्यास्य यज्ञाङ्गरूपासु अप्सु प्रयोगः साधु निर्दिष्टः ।

§4§ "सूर्यस्य त्वचः संचार इव त्वचो येषां ते ।" §द0§

10.4.2. मान्दाः §आपः §यज्ञाङ्गम्§

इदं मन्दगतिप्रयुक्तमपां विशेषणं वर्तते ।

§1§ "मान्दाः गत्यभावान्मन्दरूपाः स्थावराः आपः ।"
§सा0 ।।/2§

§2§ "सरस्याः मान्दास्थ मन्दतेर्मोदनार्थस्य मन्दः । तत्र हि मोदन्ति भूतानि बहूदकत्वात् । तत्र भवा आपो मान्दाः ।" §उ0§

सायणेन मन्दगतिप्रयुक्तत्वं पदस्यास्य व्युत्पत्तिबीजं कथितम्, उव्वटेन बहूदकत्वेन मोदसाधनत्वमित्युक्तमिति भेदः ।

§3§ "मन्दतेर्मोदनार्थस्य रूपं मन्दन्ते भूतानि यत्र बहूदकत्वात् ता मान्दाः ।" §म0§

§4§ "ये जनान् मन्दयन्त्यानन्दयन्ति त एव मान्दाः।" §द0§

10.4.3. व्रजक्षितः §आपः, यज्ञाङ्गम्§

इदं कूपस्थानामपां विशेषणमिति सायणेन निर्दिष्टम् ।

§1§ "व्रजक्षित इति मेघनाम । अत्र तूदकधारणसाम्यात् कूपे विद्यते । व्रजे क्षियन्ति निवसन्तीति व्रजक्षितः कूपस्था आपः ।" §सा0 ।।/2§

§2§ "व्रज इति मेघनामसु पठितम् । इह तूदकवत्त्वसाम्यात् कूप उच्यते ।" व्रजे क्षियन्ति व्रजक्षितः कूपा अवस्थायाः ।" §उ0§

§3§ "व्रज इति मेघनामसु पठितम् । अत्र तूदकधारणसामर्थ्यात् कूप उच्यते । व्रजे कूपे क्षियन्ति निवसन्ति व्रजक्षितः ।" §म0§

10.4.4. वाशा §आपः, यज्ञाङ्गम्§

इदं नीहारोदकवाचकं पदमिति सायणः ।

§1§ "वाशा वश्या नीहारगता आपो नीहारोदवाहः । नदीप्रवाहवन्मनुष्यादिगतिं न प्रतिबध्नाति ततो वश्यत्वम् ।" §सा0 ।।/2§

§2§ "वाशा स्था "वशकान्तौ" । कामिता अभिलषिताः स्थ ।" ता हि सर्वं एव कामयन्ते अन्नहेतुत्वात् ।" §उ0§

§3§ "वश कान्तौ । उश्यन्ते जनैः काम्यन्ते ऽन्ननिष्पत्तिहेतु-

त्वाद्वाशा यूयं भवथ ।" {म०}

{4} "वाशाः य उशन्ति कामयन्ते ते" {द०}

10.4.5. शविष्ठा {आपः}

इदमपां विशेषणमस्ति ।

{1} "शैष्ठाः शविष्ठा विष्ठा आपः ।" {सा० 11/2}

अत्र सायणस्याभिप्रायः नास्ति विशदः ।

{2} "मधुशविष्ठा स्थ । शव इति बलनाम शविष्ठा बलिष्ठाः । बलिष्ठं हि मधु त्रिदोषशमनत्वात् । उक्तं च "त्रिदोषघ्नं मधु प्रोक्तं केचिदिच्छन्ति वातलम्" । इति ।" {सा०}

{3} "हे मधुरूपा आपः, यूयं शविष्ठाः । शव इति बलनाम । बलिष्ठाः बलदात्र्यो भवथ ।" {म०}

मन्त्रपाठे मधुपदं न दृश्यते । भाष्यकारैः मधुशब्दस्य पाठमाश्रित्य "मधुरूपा आपः" इति "मधुशविष्ठा" इति भाष्ये लिखितं प्रतीयते । अन्यथा मधुगुणस्य बलदायकत्वरूपस्योल्लेखो व्यर्थो भवेत् ।

{4} "शविष्ठाः अतिशयेन बलवन्तः ।" {द०}

10.4.6. शक्वरी {आपः}

इदं अपां विशेषणं शक्तिविशेषसूचकमस्ति ।

{1} "शक्वरीः शक्वर्यः शक्ता आपः ।" {सा० 11/2}

{2} "गोरुल्व्या गृह्णाति । शक्वरी स्थ । शक्लृ शक्तौ । आतो मनिन् क्वनिब्वनिपश्च ।" शक्नुवन्ति हि गावो जगद्धर्तुं वाहदोहादिभिः" {उ०}

{3} "उल्वं गर्भवेष्टनं तत्र भवा उल्व्याः प्रसूयमानधेनुगर्भवेष्टनोत्थ-

जलं पूर्वं गृहीतमस्ति यूपमुत्तरेण तत्र होमादाने । शक्वरीः । "शक्लृ शक्तौ, अन्येभ्यो ऽपि दृश्यन्ते" इति वनिप्प्रत्ययः "वनो र च" इति ङीप् रेफश्च ।"

{म०}

{4} "शक्वरीः शक्तिमत्यः" {द०}

10.4.7. जनभृत् {आपः, यज्ञाङ्गम्, पयः}

इदमपां विशेषणं जनजीवनोपयोगितां सूचयतीति सायणः ।

{1} "जनान् एता बिभ्रतीति जनभृतः ।" {सा० 1.1/2}

{2} "पयः जनभृतः । जनान् हि पयो बिभर्ति बालभावे ।"

{उ०}

{3} "पय इति" दुग्धस्य होमपूर्वं ग्रहणम् । हे आपः, यूयं जनभृतो भवथ बालभावे जनान् जन्तून् बिभ्रति पुष्णन्तीति जनभृतः ।" {म०}

उव्वटादिभिः दुग्धार्थे पदस्यास्य प्रयोगो निर्दिष्ट इति विशेषः ।

{4} "जनभृतः ये जनान् बिभ्रति ते ।" {द०}

10.4.8. विश्वभृत् {आपः}

इदमपां विशेषणं विश्वपालकत्वं तासां सूचयति ।

{1} "विश्वं बिभ्रतीति विश्वभृतः ।" {सा० 1.1/2}

{2} "विश्वभृतः विश्वं सर्वं देवाद्यपि घृतं बिभर्ति ।" {उ०}

{3} "हे घृतरूपा आपः, यूयं विश्वभृतः विश्वं सर्वं जगद्देवादिकं बिभ्रति विश्वभृतः ।" {म०}

{4} "विश्वभृतः ये विश्वं बिभ्रति ते ।" {द०}

10.5.1. अग्निः {देवता, अग्निः}

पार्थहोमे हविर्भागियं देवः ।

{1} "लिङ्गोक्तानि द्वादश यजूंषि अङ्गतीत्यग्निः ।" {म०}

{2} "अग्नये विद्युदादये ।" {द०}

10.9.1. आविर्मर्याः {यज्ञकर्तारः, ऋत्विजः}

सायणेनात्र आविः मर्याः इति द्वयोः पदयोः सन्धिः सूचितः । आविः पदस्य आविर्भावार्थकत्वं मर्यपदस्य च ऋत्विक्पर्यायकत्वमुक्तम् ।

{1} "हे मर्याः मनुष्या ऋत्विजः यूयमाविरभूत ।" {सा० 11/4}

{2} "मर्या इति मनुष्यनाम । हे मर्याः, आविः प्रकाशः प्रकटोयं यजमानो युष्मत्समक्षं कथ्यते । कथिते च श्रुतिः प्रयोजनं वदति । "सो स्मै सवमनुमन्यते" इत्याविर्मर्या इत्याद्येकवचनादिभिः ।" {उ०}

{3} "मर्या इति मनुष्यनामसु पठितम् । हे मर्या मनुष्या ऋत्विजः, यूयमाविः प्रकटा भवथेति शेषः । सम्यक् कर्मानुतिष्ठतेत्यर्थः । यद्वा हे मर्याः ऋत्विजः अयं यजमानः आविः प्रकटो युष्मत्समक्षं कथ्यते ।" {म०}

10.9.2. आवित्तः {यज्ञाङ्गम्, कर्मनिवेदनम्}

सायणभाष्ये इदं क्रियापदं लब्धिसूचकं प्रतीयते । अन्यभाष्येषु विज्ञापनवाचकं निर्दिष्टम् ।

{1} "आवित्तोपलब्धः ।" {सा० 11/4}

{2} "आवित्तो अग्निर्गृहपतिः । श्रुत्युक्तैर्विभक्तिव्यत्ययैर्व्याख्यायन्ते ।" {उ०}

{3} "आवितः आवेदितः ज्ञापितः ।" {म०}

{4} "आवित्तः प्राप्तपूर्णभोगो लब्धप्रतीतो वा । "वित्तो

भोगप्रत्ययो:" [अ0 8/5/58] अनेनायं निपातितः ।" [द0]

10.10.1. दन्दशूकाः [यज्ञबाधकाः]

सायणेन पदमिदं यज्ञबाधकानां राक्षसादीनां वाचकं निर्दिष्टम् ।

[1] "दन्दशूकाः सर्पसदृशा यज्ञविघ्नकारिणो राक्षसादयः ।" [सा0 11/5]

[2] "दन्दशूकाः अत्यर्थं दशनशीला मृत्यव इहाभिप्रेताः । "तद्यो मृत्युर्यो वधस्तमेवैतदतिनयति ।" इति श्रुतेः ।" [उ0]

[3] "दन्दशूका अत्यर्थं दशनशीला मृत्युहेतवः सर्पसदृशा यज्ञविघ्नकारिणो राक्षसादयः ।" [म0]

[4] "दन्दशूकाः परदुःखप्रदा ये दंशनशीलाः ।" [द0]

10.10.2. त्रिवृत् स्तोमः [यज्ञाङ्गम्, स्तुतिविशेषः]

इदं यज्ञे स्तोमविशेषवाचकं पदमस्ति । सायणेन सामब्राह्मणवाक्यं तत्स्वरूपावबोधाय भाष्ये प्रस्तुतमस्ति –

[1] "त्रिवृत्स्तोमस्य स्वरूपं सामब्राह्मणे समाम्नातम् । तिसृभ्यो हिङ्करोतीति सप्रथमया तिसृभ्यो हिङ्करोति समध्यमया तिसृभ्यो हिङ्करोति स उत्तमयोद्यतीति वृत्तो विष्टुतिरिति । अस्यायमर्थः । उपास्मै गायतेत्यादि त्र्यृचात्मकानि त्रीणि सूक्तानि सति तेषु तिसृभिऋग्भिर्हिङ्करोति गायेत् । काभिस्त्रिभिः, प्रथमया त्रिष्वपि सूक्तेषु या या प्रथमा तया उद्गाता गायेत् । तथा सति तिसृभिर्गीतं सो यं प्रथमपर्यायः । द्वितीये सूक्तत्रयगतया मध्यमया गायेत् । तृतीये पयो सूक्तत्रयगतयोत्तमया गायेत् । अनेन प्रकारेण त्रिवृत्स्तोमसम्बन्धिनी विशिष्टा स्तुतिः सम्पद्यते । सेयं स्तुतिरुद्यतीति नाम्ना अधीयते ।" [सा0 11/5]

[2] "त्रिभिर्मनोवाक्शरीरबलानां बोधकारकः ।" "स्तोमः

स्तूयमानः ।" {द०}

<u>10.6.1. गर्तम् {यज्ञाङ्गम्, रथभागः/आध्या०, पुरुषः}</u>

{1} "गर्तं रथस्योपरिभागं गर्तसदृशम् ।" "कर्मकरत्वादिभिराच्छादिते सति रथस्योपरि भागो गर्तसदृशो भवति ।" {सा० 1.1/5}

{2} "गर्तं पुरुषम् । "बाहू वै मित्रावरुणौ पुरुषो गर्तः" इति श्रुतिः । अध्यात्मविषयं व्याचष्टे । अधिदैवं तु गर्तो रथः ।" {उ०}

{3} "गर्तं पुरुषमारोहतम्, आरोहणं कुरुतम् । "बाहू वै मित्रावरुणौ पुरुषो गर्तः" इति श्रुतिरध्यात्मविषयं व्याचष्टे ।" {म०}

"रथो ऽपि गर्त उच्यते "गृणातेः स्तुतिकर्मणः" इति यास्कोक्तेर्गर्तो रथः ।" {म०}

अत्र उव्वटमहीधराभ्यां पदस्यास्य अध्यात्मपरकः पुरुष इति, अधिदैवं च रथ इति तात्पर्यद्वयं साधु निर्दिष्टम् ।

"गर्तं रथोपरिभागं गर्तसदृशम् । परबाणेभ्यो रक्षितुं चर्मकीलकादिभिराच्छादिते रथस्योपरिभागो गर्तसदृशो भवति ।" {म०}

अत्र महीधरस्य स्पष्टा व्याख्यानशैली प्रशंसामर्हति ।

{4} "गर्तम् उपदेशकगृहम् । गर्त इति गृहनाम ।" {द०}

<u>10.16.2. अदितिः {यज्ञविषयकम्}</u>

{1} "अदितिमखण्डितां स्वसेवाम् ।" {सा०}

{2} "अदितिम् अदीनम् स्वकर्मविहितानुष्ठातारम् ।" {उ०}

{3} "अदितिमखण्डितां स्वसेनाम् ।" "अदितिमदीनं विहितानुष्ठातारम् ।" {म०}

सायणेन अखण्डिता स्वसेना इति पदस्य तात्पर्यमुक्तम्, उव्वटेन अदीनमिति भेदः । महीधरेणोभयोः संग्रहः कृतः ।

(4) "अदितिं अविनाशिनं पदार्थम् ।" (द०)

10.16.3. दितिः (यज्ञविरुद्धम्)

(1) "दिति खण्डितां परसेवाम् ।" (सा० ।।/5)

(2) "दितिं दीनं नास्तिकवृत्तिम् ।" (उ०)

(3) "दितिः खण्डितां परसेनाम् ।" "दितिं दीनं नास्तिकवृत्तं च ।" (म०)

सायणभाष्ये दितिपदस्य खण्डिता परसेवा इत्यर्थः, उव्वटभाष्ये दीनो नास्तिकवृत्तिरित्यर्थ इति भेदः ।

(4) "दितिं नाशवन्तम् ।" (द०)

10.19.1. पर्वतः (अग्निः, मेघः)

(1) "पर्वतसदृशस्य मेघस्य" (सा० ।।/6)

(2) "पर्वतस्य पर्ववतोऽग्नेः पार्थिवस्य । स हि पर्ववान् पौर्णमास्यमावस्याचातुर्मास्यादिभिः पर्वभिः ।" (उ०) "अथवा आदित्यः पर्वतशब्देनोच्यते ।" (उ०)

(3) "पर्वतस्य पर्वाणि पौर्णमास्यमावास्याचातुर्मास्यादीनि विद्यन्ते यस्य स पर्वतस्तस्य "तप्पर्वमरुद्भ्यां" इति तप्प्रत्ययः ।" (म०)

अत्र सायणेन पर्वतशब्दस्य मेघ इत्यर्थो निर्दिष्टः, उव्वटादिभिरग्निरित्यर्थभेदः स्पष्टः । उव्वटभाष्ये अग्निः स्पष्टमुक्तो, न महीधरभाष्ये । व्युत्पत्तिनिर्देशो महीधरस्यैव विशिष्यते ।

(4) "पर्वतस्य मेघस्य । पर्वत इति मेघना०" (द०)

अत्र दयानन्दमतं सायणेन समानम् ।

10.24.1. हंसः {यज्ञाङ्गम्, रथः/देवता, आदित्यः}

सायणेन पदमिदं रथस्य विशेषतया व्याख्यातम् ।

{1} "हन्ति पृथिवीमिति हंसो रथः ।" {सा० 1.1/7}

उव्वटेन पदमिदं सूर्यस्य विशेषणतया व्याख्यातम् ।

{2} "हन्त्यध्वानमिति हंसो भगवानादित्यः ।" {उ०}

{3} "हन्त्यहङ्कारमिति हंसा भगवानादित्यः ।" "यद्वा हंसशब्देन रथ उच्यते ।" {म०}

उव्वटेन अध्वगमनं हेतुतयोक्तम्, महीधरेणाहङ्कारप्रशमनं तत्रोक्तमिति भेदः ।

{4} "हंसः संहन्ति सर्वान् पदार्थान् स जगदीश्वरः ।" {द०}

10.24.2. शुचिषत् {यज्ञाङ्गम्, रथः/देवता, आदित्यः}

सायणेन रथस्य विशेषणमिदं शुचिस्थानाश्रयत्वसूचकं निर्दिष्टम् ।

{1} "शुचौ देवयजने रथवाहने च सीदतीति शुचिषत्" {सा० 1.1/7}

{2} "शुचौ दीप्तौ सीदतीति शुचिषत् । य आदित्यरूपेण शुचिषत् ।" {उ०}

{3} "शुचिषत् । शुचौ दीप्तौ सीदतीति शुचिषत् आदित्यरूपेण।" {म०} "शुचिषत् शुचौ देवयजने रथवाहने वा सीदतीति ।" {म०}

{4} "यः शुचिषु पवित्रेषु पदार्थेषु सीदति सः ।" {द०}

10.24.3. वसुः {यज्ञाङ्गम्, रथः/देवता, आदित्यः}

सायणेन पदमिदं रथस्य यजमानवाहकत्वसूचकं विशेषणमिति निर्दिष्टम्।

{1} "स्वस्योपरि यजमानं वासयतीति वसुः ।" {सा० 1.1/7}

(2) "यश्च वसुर्वासयिता वायुरूपेणान्तरिक्षे सीदति ।" (उ०)

(3) "वसुर्वासयिता नराणां प्रवर्तकः ।" (म०)

उव्वटेन आदित्यमुद्दिश्य पदस्यास्य प्रयोगो निर्दिष्टः, वासयितृत्वं चोक्तम् । महीधरेण नराणां प्रवर्तक इत्यर्थ उक्तः ।

(4) "वसुः वस्ता वासयिता वा" (द०)

10.24.2. अन्तरिक्षसत् (यज्ञाङ्गम्, रथः/आदित्य०, परब्रह्म)

सायणेन पदमिदं रथस्यान्तरिक्षे गतिसूचकं विशेषणमिति निर्दिष्टम् ।

(1) "वृक्षगुल्माद्यनवस्थे न्तरिक्षे सीदतीत्यन्तरिक्षसत् ।" (सा० 11/7)

(2) "अन्तरिक्षे सीदतीत्यन्तरिक्षसद् वायुरूपेण ।" "अन्तरिक्षसत् वृक्षगुल्माद्यनवस्थे न्तरिक्षे सीदतीति ।" (म०)

अत्र उव्वटमहीधरादिव्याख्यानं पदस्यास्य परब्रह्मपरकं च प्रतीयते, अन्तरिक्षे वायुरूपेण स्थितेर्निर्देशात् । अन्यथा सूर्यप्रसङ्गे वायोः कथनं न युज्यते ।"

(3) "अन्तरिक्षसद् यो न्तरिक्षे वकाशे सीदति ।" (द०)

10.24.5. होता (यज्ञाङ्गम्, रथः)

(1) "होता होतृसमानस्तदेव कथमित्युच्यते ।" (सा० 11/7)

(2) "होता ह्वआह्वाता" (उ०)

(3) "होता आह्वाता देवानाम्" (म०)

सायणेन होतृसमान इति व्याख्याने होमप्रक्रियायाः साधकत्वं सूचितं रथस्य, उव्वटादिभिस्तु आह्वानकर्तृत्वं सूचितमिति भेदः ।

(4) "होता दाता ग्रहीता त्ता वा ।" (द०)

10.24.6. वेदिषत् {यज्ञाङ्गम्, रथः}

सायणेन रथविशेषणतया अन्यैर्भाष्यकारैरीश्वरविशेषणतया पदमिदं व्याख्यातम् ।

{1} "वेद्यां सीदतीति वेदिषत्" {सा० 1/7}

{2} "अग्निरूपेण वेदौ सीदति" {उ०}

{3} "वेदौ सीदतीति ~~वेदक~~ वेदिषत् अग्निरूपेण ।" {म०}

व्याख्याने साम्यमत्र दृश्यते ।

{4} "वेदिषत् वेद्यां पृथिव्यां सीदति ।" {द०}

10.24.7. अतिथिः {यज्ञाङ्गम्, रथः/आदित्यः, देवता}

{1} "अतिथिश्च शब्दश्च तदपि कथमित्युच्यते ।" {सा० 1/7}

{2} "यश्च अतिथिरूपेण" {उ०}

{3} "अतिथिः सर्वेषां पूज्यः ।" {म०}

अत्र सायणेन अतिथिशब्दस्याधिकाररूपेण प्रयोग उक्तः, उव्वटेन विशेषः कश्चिन्नोक्तः, महीधरेण सर्वपूज्यत्वयुक्तमिति विशेषः ।

{4} "अतिथिः अविद्यमाना तिथिर्यस्य तद्वन्मान्यः ।" {द०}

10.24.8. दुरोणसत् {यज्ञाङ्गम्, रथः/परब्रह्म, आध्या०}

{1} "दुरोणेषु सीदतीति दुरोणसत् । यो यस्तमारोढुं नयति तस्य तस्य गृहेषु सीदति इति दुरोणसत् ।" {सा० 1/7}

{2} "यश्च अतिथिरूपेण दुरोणे गृहे सीदति ।" {उ०}

{3} "दुरोणे यज्ञगृहे सीदतीति दुरोणसत् आहवनीयादिरूपेण ।" {म०}

अत्र सायणं विहायान्येषां व्याख्यानं समानम् । महीधरेण यज्ञगृहे केन रूपेणोपस्थितिरिति संशयस्यापनोद आहवनीयादिरूपनिर्देशद्वारा विहित इति विशेषः ।

§4§ "दुरोणसत् यो दुरोणे गृहे सीदति सः । दुरोण इति गृहनामसु ।" §द0§

10.24.9. नृषत् §यज्ञाङ्गम्, रथः/परब्रह्म, आध्या0§

§1§ "नृषु मनुष्येषूपकारं कर्तुं सीदतीति नृषत् ।" §सा0 1.1/7§

§2§ "यश्च नृषु मनुष्येषु प्राणभावेन सीदति ।" §उ0§

§3§ "नृषु मनुष्येषु प्राणभावेन सीदतीति नृषत् ।" §म0§

"नृषत् नृषु वाहकत्वेन सीदतीति ।" §म0§

सायणेन रथपक्षे मनुष्योपकारार्थं सदनमुक्तम्, उव्वटेन आध्यात्मिक-पक्षे प्राणभावेन सदनमुक्तमिति भेदः ।

§4§ "नृषत् यो नृषु सीदति सः ।" §द0§

10.24.10. वरसत् §यज्ञाङ्गम्, रथः/आध्या0, ब्रह्म§

§1§ "वरे श्रेष्ठं राजगृहे सीदतीति वरसत् ।" §सा0 1.1/7§

§ 2§ "यश्च वरेषूत्कृष्टेषु सीदति ।" §उ0§

§3§ "वरेषु उत्कृष्टेषु स्थानेषु सीदतीति वरसत् ।" §म0§

"वरसत् वरे श्रेष्ठे राजगृहे सीदतीति ।"

अत्र सायणेन राजगृहे वरे सदनमुक्तम् । उव्वटेन महीधरेण च उत्कृष्ट-स्थानमुक्तमिति भेदः ।

§4§ "यो वरेषूत्तमेषु पदार्थेषु सीदति सः ।" §द0§

10.24.11. ऋतसत् {यज्ञाङ्गम्, रथः/आध्या०, ब्रह्म}

{1} "ऋते यज्ञे वाजपेयादौ सीदतीति ऋतसत् ।" {सा० 11/7}

{2} "यश्च कृते सत्ये सीदति ।" {उ०}

{3} "ऋते यज्ञे सीदतीति ऋतसत् ।" {म०}

अत्र ऋतशब्दस्य यज्ञ इति तात्पर्यं सायणेनोक्तम् । उव्वटेन तस्य सत्यवाचकत्वं निर्दिष्टमिति भेदः ।

{4} "ऋतसत् य ऋतेषु सत्येषु प्रकृत्यादिषु सीदति सः ।" {द०}

10.24.12. अब्जाः {यज्ञाङ्गम्, रथः/आध्या०, ब्रह्म}

{1} "अप्सु योनिर्वा अश्व इति श्रुतेः । अद्भ्यो जातैरश्वैरस्यैतत्वादब्जाः ।" {सा० 11/7}

{2} "यश्च अब्जा अप्सु जायत इत्यब्जाः ।" {उ०}

{3} "यः अब्जाः अप्सु उदकेषु जायते मत्स्यादिरूपेणेत्यब्जाः ।" {म०}

अत्र सायणेन अद्भ्यो जातैरश्वैरस्यैत हेतुना रथस्य अब्जपदवाच्यत्वमुक्तम्, उव्वटेन अप्सु जन्म केवलमुक्तमिति भेदः ।

{4} "अब्जाः यो यो जनयति" {द०}

पूर्वाचार्यविपरीतो ऽत्र दयानन्दकृतो ऽर्थः प्रतीयते ।,

10.24.13. गोजा {यज्ञाङ्गम्, रथः/आध्या०, ब्रह्म}

{1} "गोशब्दवाच्याद्वज्राज्जायत इति गोजाः ।" {सा० 11/7}

"रथस्य वज्रजनकत्वं तैत्तिरीये समाम्नातम् । इन्द्रो वृत्राय वज्रं प्राहरत् स त्रेधा व्यभवत् । स्फ्यस्तृतीयं रथं तृतीयमिति ।" {सा० 11/7}

{2} "यश्च गवि पृथिव्यां चतुर्विधभूतग्रामरूपेण जायते ।" {उ0}

सायणेन यज्ञपक्षे गोजापदस्य रथविशेषणत्वं वज्रजन्यत्वं च ऐतिहासं निरूपितम् । उव्वटेन तु आध्यात्मिकपक्षे ब्रह्मविशेषणत्वं पृथिव्यां चतुर्विधभूतग्रामरूपेणोत्पत्तिश्च कथित इति भेदः ।

{3} "गोजाः यो गाः पृथिव्यादीन् जनयति ।" {द0}

10.24.14. अद्रिजा {यज्ञाङ्0गम्, रथः/आध्या0, ब्रह्म}

{1} "पाषाणसदृशेभ्यो दृढकाष्ठेभ्यो जातत्वादद्रिजाः ।"
{सा0 11/7}

{2} "यश्च अद्रौ पाषाणे अग्निरूपेण जायते, मेघो ह्यद्रिरुच्यते मेघे वा उदकरूपेण जायते ।" {उ0}

{3} "अद्रौ पाषाणे अग्निरूपेण जायत इत्यद्रिजाः । अद्रिर्मेघो वा अद्रौ मेघे जलरूपेण जायत इति वा ।" {म0}

सायणेन रथपक्षे व्याख्यानं कुर्वता रथमुद्दिश्य प्रयोगः दृढकाष्ठजन्यं चाद्रिपदसूच्यमुक्तम्, अन्यैस्तु व्यापकस्य ब्रह्मणो पाषाणादावाग्निरूपेण, मेघे जलरूपेण चोपस्थितिः पदाभिप्रायरूपेणोक्ता इति विशेषः ।

{4} "अद्रिजाः यो मेघपर्वतवृक्षादीन् जनयति सः ।" {द0}

10.24.15. ऋतम् {यज्ञाङ्0गम्, रथः/आध्या0, ब्रह्म}

उव्वटेन पदमिदं परब्रह्मवाचकं निर्दिष्टम्, महीधरेणास्यानुसरणं विहितम् ।

{1} "ऋतम् । "ऋ गतौ" । सर्वतो गतं परब्रह्म" {उ0}

{2} "ऋतम् । "ऋ गतौ" सर्वत्र गतम् ।" {म0}

{3} "ऋतम् सत्यस्वरूपम्" {द0}

10.25.1. युङ्0 [यज्ञाङ्0गम्, रुक्मविशेष:]

इदं रुक्मविशेषमुद्दिश्य प्रयुक्तं पदं तस्य धारयितुं योग्यत्वं सूचयतीति सायणेनोक्तम् ।

[1] "युङ्0उ0ति धारयितुं योग्यो भवसि ।" [सा0 11/7]

[2] "युनक्ति यज्ञं सम्भारनिवापेन दक्षिणादानेन वेति युङ्0।" [उ0]

[3] "युनक्ति यज्ञं सम्भारनिचयेन दक्षिणादानेन वेति युङ्0 ।" [म0]

सायणेन धारयितुं योग्यत्वं सुवर्णस्य युङ्0पदवाच्यमुक्तम्, हेतुस्तत्र कश्चिन्नोक्त: । उव्वटादिभि: सम्भारसंग्रहादिनिर्देशेन स विषय: प्रकाशित इति विशेष: ।

[4] "युङ्0 समाधाता" [द0]

10.28.1. अभिभू: [यज्ञाङ्0गम्, अक्षदेव:/यजमान:]

सायणेन पदमिदं अक्षदेवार्थे प्रयुक्तं तद्व्यापकत्वसूचकमिति व्याख्यातम्।

[1] "अभिभूरसि । अभितो व्याप्तो भवसि ।" [सा0 11/8]

[2] "अभिभूरसि । कृतत्रेताद्वापरकलयश्चत्वारो या: पञ्चमो रमण: । तत्र कलि: सर्वानन्यान् अभिभवति स उच्यते ।" [उ0]

[3] "चतुर्णामक्षाणां कृतसंज्ञा पञ्चमस्य कलिरिति । यदा पञ्चाप्यक्षा एकरूपा: पतन्ति उत्ताना अवाञ्चो वा तदा देवितुर्जय: । तत्र कलि: सर्वानक्षानभिभवति तं प्रत्युच्यते तत्सम्बन्धेन यजमानं प्रति वा । हे अक्ष, यद्वा हे यजमान, त्वमभिभूरसि अभिभविता अभितो व्याप्तो सि ।" [म0]

अत्र सायणादीनां व्याख्यानमुत्तरोत्तरं विशिष्यते ।

[4] "अभिभू: दुष्टानां तिरस्कर्ता ।" [द0]

11.3.1. बृहज्ज्योतिः {यज्ञाङ्गम्, अग्नेस्तेजः/देवता, सूर्यः}

सायणेन पदस्यास्य अग्नेस्तेज इत्यर्थः प्रतिपादितः ।

{1} "बृहज्ज्योतिः प्रौढं चीयमानस्याग्नेस्तेजः ।" {सा० 12/1}

उव्वटेन पदमिदं सूर्यवाचकमुक्तम् ।

{2} "बृहत् महज्ज्योतिरादित्यलक्षणम् ।" {उ०}

11.8.1. देवाव्यम् {यज्ञस्वरूपम्}

सायणेन पदमेतत् यज्ञस्य देवोपकारकत्वसूचकं विशेषणमिति निर्दिष्टम्।

{1} "देवानामवनार्हो देवाव्यस्तम् ।" {सा० 12/1}

{2} "देवा यस्मिन्नव्यन्ते तर्प्यन्ते स देवाव्यः ।" {उ०}

{3} "देवाव्य देवा अव्यन्ते तर्प्यन्ते यस्मिन्नसौ देवावीः तम् । "अव प्रीणनादौ" अस्मादौणादिक ईप्रत्ययः ।" {म०}

अत्र महीधरस्य प्रकृतिप्रत्ययनिर्देशाद्वैशिष्ट्यम् ।

11.10.1. नारी {यज्ञाङ्गम्, खननसाधनम्}

सायणेन पदमिदं खननसाधनं काष्ठविशेषमुद्दिश्य प्रयुक्तमिति निर्दिष्टम् । तस्यार्थः स्त्रीरूपा इति, शत्रुहीना इति उक्तः ।

{1} "अभ्रिरसि । उखां निर्मातुं खननीया खननहेतुः काष्ठ-विशेषो सि । नार्यसि । स्त्रीरूपा चासि । यद्वा न विद्यते अरिर्यस्याश्च सेयं नारीति छान्दसं रूपम् । खननकाले पाषाणादिना तव नास्ति कुण्ठीभावः ।" {सा० 12/1}

{2} "नारी स्त्री त्वमसि ।" {उ०}

{3} "नारी असि स्त्रीरूपा चासि । यद्वा न विद्यते अरिः शत्रुर्यस्याः सा नारी । ईप्छान्दसः । खननकाले अश्मादिना तव कुण्ठीभावो

नास्तीत्यर्थः ।" {म०}

महीधरभाष्ये पदार्थनिर्देशः सायणानुसारी, तथापि ईप्प्रत्यय-निर्देशे विशेषः ।

11.34.1. पाथ्यः {ऋषिविशेषः, यज्ञसम्बन्धी/आध्या०, मनः}

सायणेन पदमिदं कस्यचिदृषेः नाम इति निर्दिष्टम् ।

{1} "पाथ्यनामकः कश्चिद् ऋषिः ।" {सा० 12/3}

उव्वटेन महीधरेण च पदस्यास्य मनसि तात्पर्यं श्रुतिनिर्देशेन दृढमुक्तम् ।

{2} "मनो वै पाथ्यो वृषा" इति श्रुतिः । मनसा हि मुक्तेः पन्था उपलभ्यते । तदुक्तम् "मनसैवानुद्रष्टव्यम्" इति ।" {उ०}

{3} "पथि वर्तमानः पाथ्यः सन्मार्गवर्त्ती, यद्वा पाथसि अन्तरिक्षे हृदयाकाशे भवः पाथ्यः "पाथोनदीभ्यां ड्यण्" इति पाथः शब्दात् ड्यण्प्रत्ययः । टिलोपः ।" {म०}

"मनसा हि ब्रह्मपन्था उपलभ्यते अतः पाथ्यः । "मनसैवानु-द्रष्टव्यम्" इति श्रुतेः ।" {म०}

अत्र महीधरभाष्ये सर्वातिशयी, विषयस्य साधु प्रतिपादनात् ।

11.34.2. वृषा {ऋषिविशेषः, यज्ञ०/आध्या०, मनः}

सायणेन पदमिदं पाथ्यनाम्न ऋषेर्विशेषणं श्रेष्ठत्वप्रतिपादकमिति निर्दिष्टम् ।

{1} "कीदृशः पाथ्यः । वृषा श्रेष्ठः ।" {सा० 12/3}

{2} "मनसा श्लिष्य स्त्रियां रेतः सिञ्चति" इति वृषा मनः ।" {उ०}

§3§ "वृषा सेक्ता मनः ।" §म०§

"मनसैवाभिलक्ष्य स्त्रियां रेतः सिञ्चति" इति । वृषा हि मनः । "मनो वै पाथ्यो वृषा" इति श्रुतेः ।" §म०§

उव्वटेन महीधरेण च मन उद्दिश्य पदस्यास्य प्रयोगः श्रुति-प्रामाण्येन दर्शित इति विशेषः ।

11.44.1. वीड्वङ्गः §यज्ञाङ्गम्, रासभः§

इदं यज्ञे मृद्वाहकस्य रासभस्य दृढकायत्वाशंसायै प्रयुज्यमानं पद-मिति सायणभाष्ये निर्दिष्टम् ।

§1§ "वीड्वङ्गो दृढकायः ।" §सा० 12/4§

§2§ "वीड्वङ्गश्च दृढाङ्गः ।" §उ०§

§3§ "वीड्वङ्गः दृढकायो भव । वीडुशब्दो दृढार्थः । वीड्न्यङ्गानि यस्य सः ।" §म०§

11.74.1. उपजिह्विका §यज्ञाङ्गम्, अग्निज्वाला/जीवविशेषः§

पदमिदं वह्वेर्ज्वाला विशेषस्य वाचकं सायणेन निर्दिष्टम् ।

§1§ "प्रौढाप्रधाना ज्वाला जिह्वा । तत्समीपवर्तिनी क्षुद्र-ज्वालोपजिह्विका ।" §सा० 12/7§

महीधरेण पदमिदं जीवविशेषस्य नामेति स्वव्याख्याने निरूपितम् ।

§3§ "उपजिह्विका उपदीपिका पिपीलिकासदृशः क्षुद्रजीवः ।" §उ०§

11.75.1. प्रतिवेशा §यज्ञकर्तारः§

इदं यज्ञकर्तॄणामग्निसान्निध्यप्रतिपादकं पदमस्ति ।

(1) "प्रतिवेशाः प्रत्यासन्नाः" (सा० 12/7)

(2) "प्रतिवेशाः प्रातिवेशिकाः त्वदाश्रया इत्यर्थः ।" (उ०)

11.78.1. मलिम्लवः (यज्ञबाधकाः, चौराः)

इदं चोराणां विशेषणमस्ति । मन्त्रपाठे "मलिम्लून्, मलिम्लवः" इति पदद्वयं दृश्यते, परं सायणादिमहीधरपर्यन्तैर्मलिम्लुच" इति पदमत्र व्याख्यातमिति वर्तते शङ्काया अवकाशः ।

(1) "मलिम्लून् मलिम्लुचः उक्ताः (ग्र) गूढाः स्तेनतया म्लोचन्ति अदृश्या भवन्ति जने कक्षे च ये ।" (उ०)

(2) "गुप्ताः प्रकटाश्चेति द्विविधाश्चोराः । प्रकटा अपि पुनर्द्विविधाः । अरण्ये मार्गे च प्रहृत्य प्रत्यहमेव पलायमानाः प्रकटाः । ततो प्यतिप्रकटा निर्भया ग्रामेष्वेवागत्य वन्दीकाराः ते अत्र मलिम्लुच उच्यन्ते । मलं पापाधिक्यमेषामस्तीति मलिनाः, तथाविधा भूत्वा म्लोचन्ति जने वने वा अदृश्या भवन्तीति मलिम्लुचः ।" (म०)

11.79.1. स्तेनाः (यज्ञबाधकाः, चौराः)

चौराणां विशेषणमेतदस्ति ।

(1) "स्तेना गुप्तचौराः ।" (सा० 12/7)

(2) "स्तेनासः स्तेनाः "आज्जसेरसुक्" इत्यसुक् । गुप्तचोराः ।" (म०)

11.79.2. तस्कराः (यज्ञबाधकाः, चौराः)

इदं चौराणां विशेषणमस्ति ।

(1) "तस्कराः प्रकटचोराः" (म०)

11.79.3. अघायव: {यज्ञबाधका:, चौरा:}

{1} "अघं पापं हिंसनमिच्छन्तीत्यघायव: ।" {सा० 12/7}

{2} "अघायव: । "छन्दसि परेच्छायामिति वक्तव्यम्" इत्यघशब्दात् क्यच् । "क्याच्छन्दसि" इति उप्रत्यय: । अघं परस्मै इच्छन्तीत्यघायव: ।" {उ०}

{3} "अघायव: परेषां पापाभिलाषुका:" {म०}

11.81.1. ब्रह्म {यज्ञाङ्गम्, ब्राह्मणत्वम्}

{1} "ब्रह्म ब्राह्मण्यम्" {सा० 12/7}

12.1.1. रुक्म: {यज्ञाङ्गम्, आभरणम्}

सायणेन पदमेतदाभरणविशेषवाचकं निर्दिष्टम् ।

{1} "रुक्म आभरणविशेष: ।" {सा० 13/1}

उव्वटेन पदमिदं रुक्मस्य सौन्दर्यसूचकं विशेषणमिति निर्दिष्टम् ।

{2} "रुक्म: रोचन: ।" {उ०}

12.7.1. सन्या {यज्ञफलम्, लाभ:}

पदमिदं अभीष्टवस्तुनो लाभस्य वाचकमस्ति ।

{1} "सन्या लाभेन ।" {उ०}

{2} "सन्या इष्टलाभेन ।" {म०}

12.8.1. आवृत् {आवृत्ति:}

इदं आवृत्तिक्रियाया: प्रतिपादकं पदमस्ति ।

{1} "आवृत: शतं सन्तु । आवृत्तिशक्तय: शतसङ्ख्याका

भवन्तु ।" (सा0 13/1) "त्वस्यैवावर्तनमावृत्तः" (सा0)

(2) "आवृतः आवर्तनानि" (उ0)

12.8.2. उपावृत् (क्रियाविशेषः)

इदमपि क्रियाविशेषस्यावृत्तिरूपस्य वाचकं पदमस्ति ।

(1) "समीपवर्तिनां पुरुषाणां द्रव्यविशेषाणां वा वर्तमनुपावृत्।" (सा0 13/1)

(2) "त्वत्समीपवर्तिनां पुरुषाणां द्रव्यविशेषाणां चावर्तनमुपावृत्तिः । अस्मात्तु स्नेहातिशयेन त्वमपि पुनः पुनरावर्तस्व । त्वदीयाः पुरुषाः त्वदीयानि च द्रव्याणि पुनरावर्तन्तामित्यर्थः ।" (म0)

12.10.1. विश्वप्स्न्या (यज्ञफलम्, वृष्टिधारा)

इदमग्नेः स्तुतिप्रसङ्गे प्रार्थिताया वृष्टिधारायाः विश्वपोषणशक्तिसूचकं विशेषणमिति सायणभाष्यादवगम्यते ।

(1) "प्सा भक्षण इति धातुः । विश्वैः प्सायते भक्ष्यते पीयत इति विश्वप्स्नी । तादृश्या वृष्टिधारया ।" (सा0 13/1)

(2) "प्सा भक्षणे" सर्वजनोपभोग्यया" (उ0)

महीधरेण पदस्यास्य सम्बन्धो मन्त्रे धनधारया वृष्टिधारया च निर्दिष्टः ।

(3) "प्सा भक्षणे" विश्वैः प्सायते भक्ष्यते पीयत इति विश्वप्स्नी तया । यद्वा विश्वप्स्न्या सर्वजनोपभोग्यया धारया धनधारया ।" (म0)

12.18.1. स्वाधीः (यजमानः)

इदं यजमानस्य स्वायत्तबुद्धिसूचकं विशेषणमिति उव्वटभाष्यादवगम्यते ।

§1§ "स्वाधीः शोभना आहिता धीर्बुद्धिर्यस्य स स्वाधीः ।"
§उ० 12, 18§

§2§ "स्वाधीः स्वायत्तचित्तो यजमानः ।" §म०§

12.18.2. नृमणाः §यजमानः/देवता, अग्निः§

सायणेन पदमिदं अग्नेर्यजमानस्य च विशेषणतया व्याख्यातम् ।

§1§ "नृषु यजमानेषु मनो नुग्रहबुद्धिर्यस्यासौ नृमणाः" §सा० 13/2§
"कीदृशो यजमानः । नृमणाः नृषु मनुष्येषु कर्मानुष्ठानपरेष्वृत्तिमनो नुसन्धानकारणं चित्तं यस्यासौ नृमणाः ।" §सा० 13/2§

§2§ "नृषु मनो यस्येति नृमणाः प्रजापतिः । प्रजापतिर्वै नृमणा अग्निरजस्तः । इति श्रुतिः ।" §उ०§

अत्र नृमणाशब्दस्य प्रजापतिना सह सम्बन्धः सूचितः ।

§3§ "नृषु मनो यस्य स नृमणाः "पूर्वपदाच्च" इति णत्वम् ।"
§म०§

12.20.1. नृचक्षाः §यजमानः§

पदमिदं यजमानस्य मन्त्रपठनविषयैवैशिष्ट्यं सूचयतीति सायणेन निर्दिष्टम् ।

§1§ "नृषु पुरुषेषु वेदपारङ्गतेषु मध्ये चष्टे मन्त्रान् विस्पष्टं वक्तीति नृचक्षाः ।" §सा० 13/2§

~~§2§~~ उव्वटेन पदमिदं प्रजापतेर्वाचकमुक्तम् ।

§2§ "नृचक्षा प्रजापतिरेव" §उ०§

§3§ "नृषु पठत्सु पुरुषेषु चष्टे मन्त्रान् विस्पष्टं वक्तीति नृचक्षाः प्रजापतिः ।" §म०§

12.20.3. महिषाः (यज्ञकर्तारः, यजमानाः)

अत्र सायणेन पदमिदं यजमानवाचकं निर्दिष्टम् ।

(1) "महिषा महान्तो यजमानाः" (सा0 13/2)

उव्वटादिभिरस्य पदस्य प्राणवाचकत्वमत्र निर्दिष्टम् ।

(2) "महिषाः महान्तः प्राणाः ।" (उ0
"प्राणो वै महिषा" इत्यादिश्रुतिः ।")

12.23.1. पन्चजनाः (ऋत्विजः)

सायणेन पदमेतद्यज्ञे यजमानसहितानां ऋत्विजां वाचकं निर्दिष्टम्।

(1) "पन्च यजमानसहिता ऋत्विग्रूपाः पन्चसंख्याका जनाः ।" (सा0 13/2)

(2) "चत्वारो वर्णा निषादपन्चमाः पन्चजना उच्यन्ते ।" (उ0)

अत्र उव्वटस्य मतं सायणाद्भिन्नं दृश्यते । महीधरेणोभयोः संग्रहः कृतः ।

(3) "यमग्निं पन्च जना अयजन्त यजन्ते विप्राद्याश्चत्वारो निषादश्चेति पन्च । यद्वा चत्वारो महर्त्विजो यजमानश्च ।" (म0)

12.26.2. अपूपम् (पुरोडाशः)

उव्वटेन पदमिदं पुरोडाशस्य वाचकं निर्दिष्टम् ।

(1) "अपूपं पुरोडाशम् " (उ0)

12.27.1. सौश्रवसम् {यज्ञक्रतुः}

पदमिदं कर्मविशेषवाचकमिति सायणेन निर्दिष्टम् ।

{1} "शोभनं श्रवः कीर्त्तिः सुश्रवः, तस्य सम्बन्धीनि तत्तत्कारणानि सौश्रवसानि ।" {सा० 13/2}

{2} "सौश्रवसेषु साधुश्रवणीयेषु यज्ञक्रतुषु" {उ०}

{3} "शोभनं श्रवः कीर्त्तिः सुश्रवः, सुश्रवसः सम्बन्धीनि कीर्त्तिहेतुभूतानि कर्माणि सौश्रवसानि तेषु यज्ञकर्मसु ।" {म०}

12.28.1. उशिजः {यज्ञकर्तारः}

यजमानविशेषणमिदम् ।

{1} "उशिजः धनसाध्यानि कर्माणि कामयमानाः ।" {सा० 13/2}

{2} "उशिजो मेधाविनः ज्ञानकर्मसमुच्चयकारिणः ।" {उ०}

सायणेन धनसाध्यानां कर्मणां कर्तारं उशिक्पदवाच्यः उक्ताः, उव्वटेन ज्ञानकर्मसमुच्चयकारिणस्तद्वाच्या उक्ता इति भेदः ।

12.28.2. व्रजम् {आध्या०, देवयानमार्गः}

{1} "व्रजं गोनिवासस्थानम्" {सा० 13/2}

{2} "व्रजम् व्रजन्त्यनेन सुकृतिन इति व्रजो देवयानमार्गः ।" {उ०}

सायणेन पदमिदं गोनिवासस्थानस्य वाचकमुक्तम्, उव्वटेन तद्देवयानमार्गस्य वाचकं सप्रमाणं सूचितमिति विशेषः ।

12.34.1. भरतः {यजमानः/देवता, प्रजापतिः}

इदं पदं सायणेन यजमानस्य विशेषणात्मकं निर्दिष्टम् ।

{1} "भरतस्य हविर्भरणवतो यजमानस्य" {सा० 13/3}

(2) "भरतस्य प्रजापतेः" (उ०)

उव्वटेनात्र भरतशब्दस्य प्रजापतिरूपो र्थः प्रतिपादितः ।

(3) "अयमग्निः बिभर्ति हवींषि भरतस्तस्य भरतस्य यजमानस्य।"
(म०)

12.46. संज्ञानम् (उरवरः)

सायणेन पदमिदमूरवरस्वरूपस्य विशेषणतया निर्दिष्टम् ।

(1) "हे ऊरवरस्वरूप, त्वं संज्ञानं पशुसम्बन्धि सम्यग् ज्ञानमसि। पशवो ह्याघ्राणेन सम्यग् ज्ञात्वा तमूरवरप्रदेशं लिहन्ति ।" (सा० 13/3)

(2) "संज्ञानमसि । त्रीणि यजूंषि । समिति एकीभावमाचष्टे । यत एकं ज्ञानमसि उल्वसंस्तवात् । "तस्माद् समानोल्वाः समेत जानीते" इति श्रुतिः ।" (उ०)

(3) "ऊषदेवत्यं यजुः । हे उषस्वरूप, त्वं संज्ञानमसि पशूनां सम्यक् ज्ञानसाधनमसि । पशवो हि ऊषदेशं घ्रात्वा लिहन्ति ।" (म०)

12.46.2. कामधरणम् (ऊरवरस्वरूपम्)

सायणेन पदमिदमूरवरस्य विशेषणतया व्याख्यातम् । तन्मते नेन पदेन ~~कतुम~~ ऊरवरस्य कामदत्त्वं सूच्यते ।

(1) "कामधरणमसि । यदमुष्या यज्ञियमासीत् तदस्यामभ्यधत ऊरया अभवन्निति श्रुत्यन्तरे यज्ञियांशत्वेनोक्तत्वाद्यज्ञद्वारा कामानां धारकमसि ।" (सा० 13/3)

(2) "कामधरणं च कामान् धारयति सम्पादयति कामधरणम्, पशवो वा उरवाः पशवः कामधरणम्" (उ०)

(3) "कामान् मनोरथान् धरति सम्पादयतीति कामधरणं यज्ञ-

12.51.1. इडा (यजमानः)

पदमिदं यजमानस्य विशेषणमिव सायणेन निर्दिष्टम् ।

(1) "इडां सर्वैरीड्यम्" (सा० 13/3)

(2) "इडामन्नम्"

"यत्तु श्रुत्योक्तम् "पशवो वा इडा" इति, तद्बलीवर्दैरुत्पादयत इत्यनेन हेतुना ।" (उ०)

(3) "इडामन्नम् । शप आर्धधातुकष्टिलोपः । ह्वयति आह्वयति देवान् जुहोति वा हवमानः तस्मै । यत्तु श्रुत्योक्तम् "पशवो वा इडा" इति तद्बलीवर्दैरन्नस्योत्पद्यमानत्वात् ।" (म०)

12.51.2. पुरुदंसः (यजमानः)

पदमिदं यजमानस्य दर्शनीयत्वाशंसासूचकं विशेषणमिति सायणभाष्यादवगम्यते ।

(1) "पुरुदंसं बहुधा दर्शनीयम्" (सा० 13/3)

उव्वटादिभिः पदमेतदन्नस्य विशेषणमित्युक्तम् ।

(2) "पुरुदंसं बहुकर्मसाधनभूतम् ।" (उ०)

(3) "किंभूतामिडाम् । पुरुदंसं दंस इति कर्मनामसु पठितम् । पुरूणि बहूनि दंसांसि कर्माणि यया सा पुरुदंसा तां पुरुदंससमिति प्राप्ते टिलोपश्छान्दसः । बहुकर्मसाधनभूतमन्नं देहीत्यर्थः ।" (म०)

12.53.1. चित् (यज्ञोपकरणम् (इष्टका))

सायणेन पदमिदमिष्टकामुद्दिश्य प्रयुक्तमिति निर्दिष्टम् । अनेन पदेन तस्या इष्टकाया भोगसम्पादकत्वं सूच्यत इति तस्याशयः ।

(1) "भोगाश्चिनोति सम्पादयतीति चित् । हे इष्टके, त्वं चिदसि" (सा० 13/3)

§2§ "चिन् चयने चितासि ।" §उ0§

§3§ "इष्टकादेवत्ये द्वे यजुषी । चीयत इति चित् । हे इष्टके, त्वं चिता स्थापिता सि ।" "यद्वा चिनोति भोगान्समादयतीति चित् त्वं भोगसम्पादिका सि ।" §म0§

सायणेन भोगसम्पादकत्वमेवेष्टकाया उक्तम्, उव्वटेन चयनमेवोक्तम्. महीधरेणोभयमपि साधु व्याख्यातमिति विशेषः ।

12.55.1. सूददोहसः §यज्ञोपकरणम्, इष्टकाः§

सायणेन पदमिदमिष्टकानां विशेषणत्वेन व्याख्यातम् । तन्मते अनेन पदेन इष्टकानामन्नदत्वं सूच्यते ।

§1§ "सूददोहसो न्नस्य दोहयित्र्यस्ता इष्टकाः" §सा0 13/3§

§2§ "दिवः द्युलोकात् च्युताः सूददोहसः । आपो वै सूदो न्नं दोहः इति श्रुतिः । अन्नसहिता आपः ।" §उ0§

§3§ "दिवो द्युलोकसम्बन्धिनो दिवश्च्युता वा सूददोहसः । सूदाश्च दोहसश्च ते सूददोहसः । सूदेन जलेन सहिता दोहसो न्नानि अन्नयुक्ता आपः।" §म0§

उव्वटेन महीधरेण च सायणादभिन्नो न्नसहितजलरूपो थों निर्दिष्ट इति विशेषः ।

12.55.2. विशः §यज्ञोपकरणम्, इष्टका§

पदमिदमिष्टकाया विशेषणमिति सायणभाष्यादवगम्यते ।

§1§ "विशः प्रजारूपाः" §सा0 13/3§

§2§ "यज्ञो वै विश" इति श्रुतिः ।" §उ0§

उव्वटादिभिः पदस्यास्य यज्ञार्थत्वमुक्तमिति भेदः ।

12.55.3. पृश्नयः §यज्ञोपकरणम्, इष्टका/गावः§

सायणेन गवां वाचकमेतत् पदमत्रेष्टका उद्दिश्य प्रयुक्तमिति निर्दिष्टम् ।

§1§ "पृश्नयो ल्पगोसदृशाः" §सा0 13/3§

§2§ "उव्वटेन पदमेतदन्नविशेषणमित्युक्तम् । महीधरश्च तन्मतमवलम्बते- "पृश्नयः अन्नं वै पृश्निः इति श्रुतिः।" §उ0§ §3§ "पृश्नयः नानाविधाः । यद्वा अन्नं वै पृश्नी §8/7/3/2।§ इति श्रुतेरन्नरूपा अत्रागत्य व्रीह्यादिधान्यनिष्पादका इत्यर्थः।" §म0§

द्वारा कामसम्पादकत्वात् ।" §म०§

"कामधरणं पशवः"

महीधरेण पदमिदं पशूनामपि वाचकं निर्दिष्टम् ।

12.71.1. पवीरवत् §लाङ्गलम्§

सायणेन पदमेतदयज्ञप्रसङ्गे कर्षणाय प्रयुज्यमानस्य लाङ्गलस्य विशेषणमिति निर्दिष्टम् ।

§1§ "कीदृशं लाङ्गलम्, पवीरवत् वज्रवत्तीक्ष्णोपेतम् ।"
§सा० 13/5§

§2§ "पविर्धारोच्यते सो स्यास्तीति पवीरं फालः रो मत्वर्थे । तदस्य लाङ्गलस्यास्तीति पवीरवल्लाङ्गलं फालसंयुक्तमित्यर्थः ।" §उ०§

§3§ "कीदृशं लाङ्गलम् । पवीरवत् । पविर्धारास्यास्तीति पवीरं फालः रो मत्वर्थः । पवीरमस्यास्तीति पवीरवत् फालसंयुक्तम् ।" §म०§

12.71.2. सोमपित्सरु §लाङ्गलम्§

सायणेन पदमेतदपि यज्ञप्रसङ्गे प्रयुज्यमानस्य लाङ्गलस्य विशेषणमिति निर्दिष्टम् ।

§1§ "सोमं पिबतीति सोमपा यजमानः । यजमानस्यार्थं भूमौ सरणशीलम् ।" §सा०§ "अनेन कर्षणेन फलाधिक्ये सति गवादिकं यजमानः प्राप्नोत्विति शेषः ।"

उव्वटेन पदस्यास्याभिप्रायो बहुधा निर्दिष्टः ।

§2§ "सोमपित्सरु सोमं पिबतीति सोमपाः यजमानः तस्मिन् सोमपि यजमाने त्सरणशीलः त्सरुरुच्यते । भूतेः खननशीलम् । यद्वा त्सरुभूतं सोमपि यजमाने पापं त्सरयति नाशयतीति सोमपित्सरु ।

यद्वा सोमः पीयते येन चमसेन स सोमपिः तस्य सोमपेः त्सरु भूतं लाङ्गलम् । नहि लाङ्गलस्य कर्मान्तरेण सोमचमसाः स्युः ।" [उ०]

महीधरेण उव्वटस्याशय एव साधु विवृतः ।

[3] "सोमं पिबतीति सोमपाः यजमानः तस्मिन् सोमपि यजमाननिमित्तं त्सरति भूमिं खनतीति सोमपित्सरु । "त्सर छद्मगतौ" इति धातोर्स्स्प्रत्ययः शीलार्थः । "हलदन्तात्सप्तम्या" इति विभक्तेरलुक्" आतो-धातोः" इति आलोपो ~~हलः~~ हलन्तत्वात् । यद्वा सोमः पीयते नेनेति सोम-पिश्चमसः तस्य त्सरु निष्पादकम् । नहि लाङ्गलकर्म विना सोमचमसाः स्युः।"

[म०]

12.71.3. पृफर्व्यम् [यज्ञफलम्, कन्या]

काण्वसंहितायां प्रपूर्व्यमिति पदस्य पाठो दृश्यते, यस्यार्थः सायणेन कन्यारूप उक्तः ।

[1] "प्रपूर्व्यं प्रथमवयस्कां कन्याम्" [सा० 13/5]

उव्वटादिभिः पृफर्व्यमिति पदपाठ एव व्याख्यातः ।

[2] "फर्वतिर्गतिकर्मा । प्रकर्षेण फर्व्या गम्या पृफर्वी प्रथमयुवतिः।"

[उ०]

[3] "पृफर्व्यं फर्वतिर्गतिकर्मा । प्रकर्षेण फर्वति गच्छति पृफर्वी तां पृफर्व्यं "वा छन्दसि" इत्यमि पूर्वरूपभावे यणादेशः । युवतित्वादतिवेगवतीमित्यर्थः।"

[म०]

अत्र उव्वटेन पदार्थः प्रकर्षेण गम्यते कथितः, महीधरेण वेगवती इति निर्दिष्टः ।

12.71.4. प्रस्थावत् [अश्वारिकम्]

सायणेन पदमिदं रथवाहकस्याश्वादेः गमनक्रियासूचकं विशेषणमिति

निर्दिष्टम् ।

(1) "प्रस्थावत् प्रयाणसमर्थम्" (सा० 13/5)

(2) "प्रस्थानाद्रथवाहणम् । प्रस्थानसंयुक्तमुत्कृष्टजवोपेतं च ।"
(उ०)

(3) "कीदृशं रथवाहनम् । प्रस्थावत् प्रस्थान प्रस्थानं गतिरस्यास्तीति प्रस्थावत् प्रयाणसमर्थमुत्कृष्टजवोपेतमित्यर्थः ।" (म०)

12.73.1. अघ्न्याः (गावः)

सायणेन पदमिदं यज्ञप्रसङ्गे विमुच्यमानानां बलीवर्दानां विशेषणमिति निर्दिष्टम् । तथा चानेन तेषां वधायोग्यत्वं सूच्यते ।

(1) "हे अघ्न्याः, अहन्तव्या गावो बलीवर्दाः ।" (सा० 13/5)

(2) "हे अघ्न्या अहन्तव्याः" (उ०)

12.73.2. देवयानाः (गावः)

पदमिदं यज्ञप्रसङ्गे मुच्यमानानां बलीवर्दानां विशेषणमिति सायणभाष्यादवगम्यते ।

(1) "देवयाना देवतार्थं कर्मकारिणः" (सा० 13/5)

(2) "देवयानाः देवकर्मकारिणः । यद्वा देवयानमार्गनिमित्तभूताः ।" (उ०)

(3) "हे देवयानाः, देवतार्थकर्मकारिणः देवार्थं यानं कृष्याद्युद्यमो येषां ते । यद्वा देवयान मार्गहेतुभूताः कर्मद्वारा तत्प्रापकाः ।" (म०)

अत्राचार्याणां देवतार्थं कर्मकर्तृत्वमित्यर्थे साम्यमस्ति । महीधरभाष्ये विशेषश्च दृश्यते ।

12.73.3. ज्योतिः (आध्या०, परमात्मा)

सायणेन पदमिदं यज्ञस्य वाचकं निर्दिष्टम् ।

{1} "ज्योतिः सुखाभिव्यन्जकं यज्ञलक्षणम् ।" {सा० 13/5}

उव्वटेन देवरूपः परमात्मरूपो र्थश्चास्य पदस्योक्तः ।

{2} "ज्योतिः आपाम प्राप्तवन्तः । परमात्मलक्षणं यज्ञलक्षणं देवलक्षणं वा ।" {उ०}

{3} "ज्योतिरापाम परमात्मलक्षणं यज्ञरूपं वा तेजः प्राप्ताः ।" {म०}

12.74.4. इडा {अन्नम्}

सायणेन पदमिदं हविरूपेण प्रयुज्यमानस्यान्नस्य वाचकमुक्तम् ।

{1} "इडया अन्नरूपेण हविषा" {सा० 13/5}

उव्वटेन पदस्यास्य बहुविधो गवादिरूपो र्थो निर्दिष्टः ।

{2} "आग्नेयी पृथिवी अइडा पृथिवीस्थाना वा स्त्री तस्या अत्र ग्रहणं युक्तम् । गौर्वागन्नं च इडाशब्देनोच्यते ।" {उ०}

{3} "इडया पृथिव्या सजूः प्रीतः तदधिष्ठातृत्वात् । आग्नेयी हि पृथिवी । इडाशब्देन गौर्वागन्नं चोच्यते ।" {म०}

12.75.2. बभ्रूणाम् {ओषधयः}

सायणेन पदमिदं ओषधीनां स्वरूपक्रियादिसूचकं विशेषणमिति निर्दिष्टम् ।

{1} "बभ्रूणां प्राणिधारणसमर्थानां परिपाकेण पिङ्.गलवर्णानां वा ।" {सा० 13/6}

उव्वटेन पदमेतद्रासभवाचकमुक्तम् ।

{2} "बभ्रूणां बभ्रुवर्णानाम् । बभ्रु रासभः ।" {उ०}

महीधरेण सायणाशय एवानूदितः ।

12.79.2. अश्वत्थः [वृक्षः]

सायणेन पदमिदं ओषधिदेवताश्रयस्याश्वत्थवृक्षस्य वाचकं निर्दिष्टम्।

[1] "हे ओषधिदेवताः, वो युष्माकमश्वत्थे निषदनम् अश्वत्थ-वृक्षच्छायायामुपवेशनस्थानं भवति ।" [सा० 13/6]

[देवताधिष्ठितत्वादेव लोके श्वत्थवृक्षः प्रदक्षिणानमस्कारादिभिः पूज्यते ।" [सा० 13/6]

[2] "महीधरेण अश्वत्थकाष्ठनिर्मितायां उपभृतो निर्देशः पद-स्यास्य वाच्यत्वेन कृतः - "अश्वत्थे आश्वत्थ्यामुपभृति" [म०]

12.80.1. रक्षोहा [भिषक्]

पदमेतत् भिषजां विशेषणत्वेन प्रयुक्तमस्ति । अनेन तेषां रक्षो हन्तृत्वं सूच्यते ।

[1] "रक्षोहा पक्वाभिरेताभिरोषधीभिः पुरोगसं रक्षोघ्नं कृत्वा रक्षसां हन्ता तदुपद्रवरूपरोगं निवारयति ।" [सा० 13/6]

[2] "रक्षोहा रक्षांसि हन्तीति रक्षोघ्नं पुरोडाशं कृत्वा रक्षसां हन्ता रक्षः कृतोपद्रवनाशकः ।" [म०]

12.80.2. अमीवचातनः [भिषक्]

इदं भिषजो रोगशामकत्वसूचकं विशेषणमस्ति ।

[1] "ओषधीजन्यपथ्यादिभिरमीवान् रोगांश्चातयति नाशयती-त्यमीवचातनः ।" [सा० 13/6]

[2] "अमीवा व्याधिः । चातयतिर्नाशने । व्याधिनाशनः ।" [उ०]

{3} "अमीवान् रोगान् चातयति नाशयतीति अमीवचातनः ओषधदाने रोगनाशकः । चातयतिर्नाशनार्थः । धातूनामनेकार्थत्वात् ।" {म0}

12.83.2. निष्कृतिः {ओषध्यः}

सायणेन पदमिदमोषधीनां क्षुधादिशमनोपयुक्तस्य गुणस्य सूचकं विशेषणमिति निर्दिष्टम् ।

{1} "निष्कृतिः स्थ क्षुधादिविनाशका भवथ ।" {सा0 13/6}

{2} "उव्वटादिभिरस्य पदस्य व्याधिशामकवस्तुरूपो र्थो निर्दिष्टः ।

"निष्क्रमणं विनशनं व्याध्यादेः करोतीति निष्कृतिः ।" {उ0}

12.85.1. जीवगृभः {पश्वादिः/आध्या0, रोगस्योपमानम्}

सायणभाष्ये यद्यपि व्याख्यानान्मन्त्रगतो भावः समवगम्यते तथापि पदस्यास्य व्युत्पत्तिसम्मतो र्थो नावगम्यते । उव्वटादिना स्य हिंसार्थे गृह्यमाण-जीवरूपो र्थो निर्दिष्टः ।

{1} "जीवन्नेव हिंसार्थं यो गृह्यते पशुर्वा न्यो वा मनुष्यादिः स जीवगृप् तस्य जीवगृभः ।" {उ0}

{2} "जीवन् सन्नेव यो हिंसार्थं गृह्यते आघातस्थानं नीयते स जीवगृप्, तस्य जीवगृभः ।" {म0}

उव्वटादिभाष्यानुसारं पदमिदं नश्यमानस्य व्याधेरुपमानतया प्रयुक्तं प्रतीयते । तथा च ओषधीनां दाने सति रोगाणां बलक्षयस्तथैव भवति यथा वधार्थं नीयमानस्य पश्वादेरिति भावो त्र व्यज्यते ।

12.86.1. उग्रः {ओषध्यः}

ओषधीनां व्याधिशमननिरूपणप्रसङ्गे तासामुपमानत्वेन पदमत्र

प्रयुक्तमस्ति । सायणेन पदमिदं क्षत्रियविशेषणं तस्य बलसूचकं निर्दिष्टम् ।

{1} "उग्र उद्गूर्णबलः क्षत्रियः ।" {सा0 13/7}

{2} "उग्रः क्षत्रियो बद्धगोधाङ्गुलित्राणः ।" {उ0}

उव्वटेन पदस्यास्यान्यो रुद्र इत्यर्थश्चोक्तः ।

{3} "उग्र उत्कृष्टो बद्धगोधाङ्गुलित्राण उद्गूर्णशस्त्रः क्षत्रियः ।" "यद्वा उग्रो रुद्रः ।" {म0}

<u>12.92.1. सोमराज्ञीः {ओषधयः}</u>

सायणेन पदमेतदोषधीनां सोमाधिष्ठितत्वसूचकं विशेषणमिति निर्दिष्टम् ।

{1} "सोमो राजा यासां ताः सोमराज्ञीः ।" {सा0 13/6}

{2} "सोमो राजा यासामिति सोमराज्ञ्यः ।" {उ0}

<u>12.92.2. शतविचक्षणाः {ओषध्यः}</u>

इदमोषधीनां विशेषणमस्ति ।

{1} "शतं विचक्ष्यन्ते प्रोच्यन्ते इति शतविचक्षणाः ।" {सा0 13/6}

{2} "शतविचक्षणाः बहुवीर्याः । बहवो वा स्तोतारो विचक्षण । यासां बहुविचक्षणाः ।" {उ0}

{3} "शतविचक्षणाः शतमसङ्ख्यं विचक्षणाश्चतुराः बहुवीर्या वा शतं विचक्षणाः स्तोतारो यासामिति" {म0}

अत्र त्रयाणां भाष्यकाराणां व्याख्यानमुत्तरोत्तरं स्पष्टार्थतया विशिष्यते ।

12.100. शतवल्शा: {ओषधि:}

यज्ञप्रसङ्गे प्रयुज्यमानाया ओषधेः स्वरूपप्रतिपादकं विशेषणमेतदस्ति । अस्योव्वटेन बह्वङ्कुरा इत्यर्थ उक्तः ।

{1} "शतवल्शा । वल्शशब्दो इङ्कुरवचनः बह्वङ्कुरा" {उ०}

महीधरेणापि स एवार्थः प्रतिपादितः ।

{2} "वल्शशब्दो इङ्कुरवाची । शतं वल्शाः यस्याः सा शतवल्शा ।" {म०}

12.101. उपस्तयः {ओषधीनामवलम्बनम्}

सायणेन पदमिदं समीपस्थानेन रक्षकस्य वस्तुविशेषस्य वाचकमिति निर्दिष्टम् ।

{1} "चूतादयः उपस्तयः त्वदीयबाधापरिहारार्थं वृक्षास्तिष्ठन्तीति उपस्तयो भवन्तु ।" {सा० 13/6}

उव्वटेन सायणापेक्षया विशदतया शब्दार्थः प्रस्तुतः । तथा चानेन पदेन अवलम्बनरूपेण तिष्ठतां वृक्षाणां ग्रहणमवगम्यते ।

{2} "उपकाराय ओषधीनां तिष्ठन्तीत्युपस्तयः । तत्र हिताः ।" {उ०}

{3} "स्त्यै ष्ट्यै शब्दसङ्घातयोः "उपस्त्यायन्ति उपकारायोपद्रवनिराकरणाय च समीपे संहतास्तिष्ठन्तीत्युपस्तयः ।" {म०}

12.106.1. श्रवः {अन्नम्}

सायणेन पदमिदमन्नविशेषणमिति निर्दिष्टम् ।

{1} "श्रवः त्वदीयत्वेन श्रूयमाणम्" {सा० 13/7}

§2§ "श्रवोवयः अमुष्मिन् लोके श्रावयतीति श्रवः वयो न्नम् तस्याहुतिपरिणामद्वारेण निमित्तभूतत्वात् धूमो वय इत्युच्यते । धूमो वा अस्य श्रवो वयः स ह्येनममुष्मिन् लोके श्रावयतीति श्रुतिः ।" §उ0§

§3§ "श्रवः श्रावयति द्युलोके कृतं कर्मेति श्रवः धूमदर्शनाद्देवानां कर्मज्ञानम् ।" §म0§

<u>12.106.2. वयः §अन्नम्§</u>

सायणेन पदमिदमन्नवाचकमुक्तम् ।

§1§ "वयो न्नम्" §सा0 13/7§

उव्वटादिभिर्धूम इत्यर्थो पि निर्दिष्टः ।

§2§ "वयो न्नम्, तस्याहुतिपरिणामद्वारेण निमित्तभूतत्वाद् धूमो वय इत्युच्यते ।" §उ0§

§3§ "वीयते भक्ष्यते प्राणिभिरिति वयो न्नम् । "वी कान्त्यसनखादनव्याप्तिषु" धूमस्याहुतिपरिणामद्वारेणान्नहेतुत्वाद्वयो त्र धूम उच्यते ।" §म0§

<u>12.108.3. भूरिवर्पसः §यजमानः§</u>

सायणेन पदमिदं यजमानानां नानारूपवत्त्वसूचकं विशेषणमिति निर्दिष्टम् ।

§1§ "भूरिवर्पसः नानारूपयजमानाः ।" §सा0 13/7§

उव्वटेन महीधरेण च स एवार्थः स्पष्टतयोक्तः पदविभागेन ।

§2§ "वर्प इति रूपनाम । बहुरूपा यजमानाः जगदात्मत्वेनोपगताः ।" §उ0§

§3§ "वर्प इति रूपनाम । भूरीणि वर्पांसि येषां ते नानारूपाः ।" §म0§

12.108.4. चित्रोतयः {रक्षणम्}

पदमिदं यजमानानामग्निकृतरक्षासूचकं विशेषणमिति सायणेन निर्दिष्टम् ।

{1} "विचित्रास्त्वया कृता ऊतयो रक्षा येषां ते चित्रोतयः ।" {सा० 13/7}

उव्वटादिभिः समस्ते ऽस्मिन् पदे अन्नादिरूप ऊतिशब्दस्यार्थो ऽधिको निर्दिष्टः ।

{2} "चित्रोतयः चायनीयानि अवनानि तर्पणानि येषां ते चित्रोतयः ।" {उ०}

{3} "चित्रोतयः चित्रा विचित्रा नानाविधा ऊतयो रक्षा अवनानि अन्नानि तर्पणानि वा त्वत्कृतानि येषां ते ।" {म०}

12.108.5. वामजाताः {यजमानः}

सायणेन पदमिदं यजमानानां जन्मनि विशेषसूचकं विशेषणमिति निर्दिष्टम् ।

{1} "वामजाताः वननीये सम्भजनीये देशे कुले चोत्पन्नाः ।" {सा० 13/7}

उव्वटादिभिरपि स एवार्थ उक्तः ।

{2} "वामजाताः वननीयजन्मनाः विशिष्टदेशजातिकुलोत्पन्नाः ।" {उ०}

{3} "वामजाताः वामं वननीयं संभजनीयं जातं जन्म येषान्ते" {म०}

विशिष्टदेशजातिकुलोत्पन्ना इत्यर्थः ।

12.113.1. अमृतम् (देवत्वम्)

सायणेन पदमिदं देवत्वरूपस्य फलस्य वाचकं निर्दिष्टम् ।

(1) "अमृताय यजमानस्यामृतत्वाय देवभावाय" (सा० 13/7)

उव्वटादिभिः पदस्यास्य प्रजातिरमरणधर्मेत्यर्थ उक्तः ।

(2) "अमृताय भव । प्रजात्यै अमरणधर्मिण्यै भव । "प्रजात्यां तदमृतं दधाति तस्मात्प्रजातिरमृता" इति श्रुतिः ।" (उ०)

12.115.1. वत्सः (यजमानः)

सायणेन पदमिदं यजमानस्य वाचकं निर्दिष्टम् ।

(1) "वत्सः प्रियभूतो यजमानः" (सा० 13/6)

(2) "वत्सः पयोजीवनसामान्याद्यजमानो वत्स उक्तः । स हि पयोव्रतो भवति ।" (उ०)

(3) "वत्सः पयोव्रतत्वाद्वत्ससमः त्वत्प्रियो यजमानः ।" (म०)

उव्वटेन महीधरेण च यजमानस्य वत्सपदेन निर्देशे बीजं पयोव्रतमुक्तमिति विशेषः ।

13.3.1. ब्रह्म (यज्ञाङ्गम्, रुक्म/आदित्य०)

यज्ञप्रक्रियामनुसन्दधता सायणेन यज्ञप्रसङ्गे प्रयुज्यमानस्य रुक्मस्य (सुवर्णस्य) विशेषणमिदं निर्दिष्टम् ।

(1) "ब्रह्म परिवृढं अत्यन्तं महदित्यर्थः ।" (सा० 14/1)

~~(2)~~ उव्वटादिभिरस्यादित्यरूपोऽर्थः प्रकाशितः ।

(2) "ब्रह्मलक्षण आदित्यः ।" (उ०)

(3) "ब्रह्म बृहत् रुक्मरूपोऽयमादित्यः ।" (म०)

13.3.2. वेनः §यज्ञसाधनम्, रुक्म/देवता, सूर्यः§

भाष्यकर्त्रा सायणेन सूर्यसाम्येन स्तूयमानस्य रुक्मस्य कमनीयत्ववाचकं विशेषणमेतन्निर्दिष्टम् ।

§1§ "वेनः कमनीयः सूर्य" §सा० 14/1§

§2§ "वेनः कान्तो मेधावी वा आदित्यः ।" §उ०§

उव्वटभाष्ये मेधावी इत्यर्थोऽधिकः ।

13.3.3. बुध्न्याः §यज्ञसाधनम्, रुक्मः§

सायणेन सूर्यसाम्येन स्तूयमानस्य रुक्मस्य भूमिसम्बन्धसूचकं विशेषणमेतन्निर्दिष्टम् ।

§1§ "बुध्न्याः बुध्न्ये मूले पृथिवीरूपे भवाः यदा ये सन्ति तान् ।" §सा० 14/1§

उव्वटादिभिरस्य दिग्विशेषणत्वमुक्तम् ।

§2§ "बुध्नमन्तरिक्षं तत्र भवा दिशो बुध्न्याः ।" §उ०§

13.5.1. द्रप्सः §यज्ञद्रव्यम्, रुक्मः§

सायणेन पदमेतद् हिरण्यपुरुषावयववाचकमुक्तम् ।

§1§ "द्रव्यान्तरसङ्घटनेन स्फुरितो हिरण्यपुरुषावयवलेशो द्रप्सः।" §सा० 14/1§

उव्वटादयः पदमेतदादित्यवाचकमाहुः ।

§2§ "य आहुतिपरिणामरसनिधानभूतो द्रप्स आदित्यः ।" §उ०§

§3§ "द्रप्स आदित्यः ।" §म०§

13.9.2. अमवान् {फलम्}

पदमिदं मन्त्रे पठितस्य राजपदस्य विशेषणमस्ति । अत्र शत्रूननुधावतो राज्ञः अमात्यादिसहितत्वमनेन पदेन सूच्यते ।

{1} "अमवान् शत्रून्" {सा० 14/1}

{2} "अमवान् अमात्यवान् भूत्वा अभ्यमनवान् वा ।" {उ०}

{3} "अमवान् सहायवान्" "अम् गतौ भजने शब्दे" अमन्ति भजन्ति स्वामिन इत्यमा सेवकास्ते स्य सन्तीत्यमवान् । पचाद्यजन्तादमशब्दान्मतुप्-प्रत्ययः ।" {म०}

अत्र महीधरस्य व्याख्यानं सर्वतो धिकं विस्पष्टन्चास्ति ।

13.11.2. अघशंसः {अनिष्टवस्तु}

वधायाभीष्टस्य शत्रुविशेषस्य विशेषणमेतदस्ति ।

{1} "अघं पापं शंसति गच्छति अघशंसः ।" {सा० 14/1}

{2} "अघशंसः पापस्योत्कीर्तको दुर्जनः ।" {उ०}

{3} "अघं पापं शंसतीच्छतीति अघशंसः अस्मद्द्रोही ।" {म०}

13.11.3. व्यथिः {अनिष्टः शत्रुः}

इदं शत्रुविशेषणं शत्रोर्दुःखजनकत्वं शंसति ।

{1} "व्यथयतीति व्यथिर्व्यथकः शत्रुः ।" {सा०}

{2} "व्यथिः व्यथयिता शत्रुः ।" {उ०}

13.13.1. यातुजूनाम् {यज्ञबाधकाः, रक्षांसि}

सायणेन पदमिदं रक्षसां वाचकं निर्दिष्टम् ।

{1} "यातुजूनां यातुधानानाम्" {सा० 14/1}

§2§ "यातुजूनां यातुधानानां जवनप्रधानानाम् ।" §उ0§

13.15.1. रजः §उदकम्§

सायणेन पदमिदं यज्ञपरिणामत्वपस्योदकस्य वाचकमुक्तम् ।

§1§ "रजसो यज्ञपरिणामत्वपोदकस्य" §सा0 ।4/1§

उव्वटेन च स एवार्थ उक्तः ।

§2§ "रजसश्चोदकस्य च यज्ञपरिणामभूतस्य।" §उ0§

13.20.1. काण्डम् §वनस्पत्यवयवः§

सायणेन पदमिदं दूर्वायाः स्तम्बवाचकं निर्दिष्टम् ।

§1§ "काण्डशब्दः स्तम्बवाची । यावन्तः काण्डाः स्तम्बाः सन्ति तत्रैकैकस्मात् प्रकर्षेण दूर्वोत्पद्यते ।" §सा0 ।4/1§

उव्वटेन पदस्यास्य परिभाषा स्पष्टमुक्ता । तदनुसारं पदमिदं भूसम्बद्धस्य काण्डस्य वाचकमवगम्यते ।

§2§ "भूमौ सम्बद्धं जटाभिः पर्व काण्डमुच्यते ।" §उ0§

§3§ "मूलैर्भूसम्बद्धं पर्व काण्डम् ।" §म0§

13.20.2. परु §वनस्पत्यवयवः§

सायणेन पदमिदं पर्ववाचकमुक्तम् । तेनास्य काण्डाद्भेदः कश्चिन्नोक्तः । उव्वटादिभिः पदस्यास्य भूम्यसम्बद्धपर्ववाचकत्वं स्पष्टमुक्तम् ।

§1§ "असम्बद्धं परुः ।" §उ0§

§2§ "भूम्यसम्बद्धं परुः ।" §म0§

13.25.2. अषाढा {यज्ञसाधनम्, इष्टका}

सायणेन पदमिदमिष्टकाया विशेषणं विरोधिनां परिभवसामर्थ्य-सूचकं निर्दिष्टम् ।

{1} "हे इष्टके, त्वम् अषाढा केनाप्यपरिभूता सहमाना विरोधिनः परिभवशीला भवसि ।" {सा० 14/1}

{2} "अषाढासि नाम्ना । यदसहन्त तस्मादषाढेत्येतच्छ्रुत्य-भिप्रायं नाम कथनम् ।" {उ०}

{3} "अशत्रून्न सहते इत्यषाढा । तथा च श्रुति - "ते देवा एतामिष्टकामपश्यन्निमामेव तामुपादधत तामुपधायासुरान् सपत्नान् भ्रातृव्यान् अस्मात् सर्वस्मादसहन्त तस्मादषाढेति ।" {म०}

13.30.1. प्रजाः {यज्ञसाधनम्, इष्टकाः}

अत्र इष्टकानां प्रजारूपत्वं निर्दिष्टमस्ति ।

{1} "प्रजाख्या इष्टकाः" {सा० 14/3}

{2} "प्रजा इष्टका उच्यन्ते ।" {उ०}

{3} "प्रजा इष्टकाख्याः ।" {म०}

13.30.2. अच्छिन्नपत्राः {इष्टकाः}

इदमिष्टकानां विशेषणमस्ति ।

{1} "अच्छिन्नपत्रा अनवखण्डितपक्षाः ।" {सा० 14/3}

{2} "अच्छिन्नपत्राः अच्छिन्नान्यनवखण्डितानि पत्राणि अवयवा यासां ताः ।" {म०}

13.35.3. सारस्वतौ उत्सौ {यज्ञाङ्गम्, वेदौ/अध्या०, वाङ्मनसी}

सायणेन पदमेतदृग्वेदसामवेदयोर्वाचकं निर्दिष्टम् ।

{1} "उत्सौ अत्युत्सुकौ सारस्वतौ सरस्वतीसम्बन्धिनौ ऋग्वेद-सामवेदौ ।" {सा० 14/3}

उव्वटेन महीधरेण पदस्यास्य मनोवाङ्निरूपकत्वमुक्तम्, सोऽर्थः श्रुतिवाक्योपन्यासेन च प्रमाणितः ।

{2} "सारस्वतौ च सरस्वतीसम्बन्धिनौ च त्वामुत्सौ उत्स्यन्दनौ कूपौ । मनश्च वाक् च । मनस्तावत् सर्वशास्त्रपरिज्ञानं कूप इवोत्स्यन्दति। वागपि तत्प्रतिपादनं कुर्वती । मनो वै सरस्वान् वाक्सरस्वत्येतौ सारस्वतावुत्सौ" इति श्रुतिः ।" {उ०}

{3} "सारस्वतौ सरस्वतीसम्बन्धिनौ उत्सौ उत्स्यन्दनौ कूपौ प्रवाहौ वा" {म०}

"तौ चोत्सौ मनोवाचौ । सामज्ञानाय कूप इवोत्स्यन्दतीति मनः कूप=: तत्प्रतिपादनं कुर्वन्ती वागपि कूपः ।"

"यद्वा सारस्वतौ उत्सौ ऋग्वेदसामवेदौ । तथा च तित्तिरि-श्रुतिः "ऋक् साम वै सारस्वतावुत्सौ ।""

महीधरेण ऋग्वेदसामवेदरूपस्यार्थस्य च तित्तिरिश्रुतिनिर्देशेन पुष्टिः कृतेति विशेषः ।

13.36.1. मन्युः {यज्ञः}

सायणेन पदमिदं यज्ञवाचकं निर्दिष्टम् ।

{1} "मन्यवे स ~~मख~~ यज्ञार्थम् ।" {सा० 14/3}

उव्वटेन दीप्तिः क्रोधो वा पदस्यास्य वाच्यत्वेनोक्तः ।

§2§ "मन्यवे दीप्तये क्रोधाय वा ।" §उ०§

महीधरेण सायणवद्यज्ञ एव मन्युपादवाच्य उक्तः ।

13.38.1. धेना §अन्नम्§

सायणेन पदमिदं श्रुतिप्रामाण्योपन्यासेनान्नवाचकं निर्दिष्टम् ।

§1§ "धेना अन्नलक्षणाः । अन्नं वै धेना इति श्रुतेः ।" §सा० 14/4§

§2§ "अव्वटाद्या अपि एनमर्थं गिरन्ति –
"धेना अन्नानि" §उ०§

13.39.1. वाजिनम् §अन्नम्/आध्या०, श्रोत्रम्§

सायणेन पदमिदं वीर्यरूपस्यान्नस्य वाचकं निर्दिष्टम् ।

§1§ "वाजिनम् अन्नं वीर्यरूपम् । "इन्द्रियं वै वीर्य" वाजिनमिति श्रुत्यन्तरात् ।" §सा० 14/4§

§2§ उव्वटेन महीधरेण च पदमिदं श्रोत्रस्य विशेषणत्वेन व्याख्यातम्। अस्य वाचो ज्ञातृ इत्यर्थश्चोक्तः ।

"इदं श्रोत्रं विश्वस्य भुवनस्य भूतजातस्य वाजिनम् वाग्ज्ञं वाचो ज्ञातारम् । श्रोत्रेण हि शब्दा ज्ञायन्ते ।" §उ०§

§3§ "वाजिनं वाचो ज्ञातृ अभूत्, सर्वप्राशब्दा वह्नेश्च शब्दो पि श्रोत्रेणैव ज्ञायते ।"

"वाचमेति जानाति वाजिनम् । वाच्युपवादितोरौस्णादिको नक्प्रत्ययः । छान्दसः कुत्वाभावः । झलां जशो न्ते इति जश्त्वम् ।"

"वाजिनं वीर्यं तेजोजनकम् ।"

महीधरेण उव्वटसम्मतो र्थो व्युत्पत्तिनिर्देशेन विशदीकृतः सायणोक्तो र्थश्च सूचित इति विशेषः ।

13.40.1. ज्योतिः ॥स्वर्णकान्तिः॥

महीधरेण सामान्यतया तेजोवाचकस्य पदस्यास्य यज्ञे पशुश्रोत्र-स्थहिरण्यतेजः सूचकत्वमुक्तम् ।

॥1॥ "ज्योतिषा पशुश्रोत्रस्थितहिरण्यतेजसा" ॥म0॥

उव्वटादिभिः पदमिदं चित्याग्निविशेषणं निर्दिष्टम् ।

॥2॥ "आदत्ते पशूनिति आदित्यः । आदित्य इव वा ईष्टे स सर्वेषां पशूनामिति आदित्यः ।" ॥उ0॥

॥3॥ "आदित्यं चित्याग्निम्"

"आदत्ते पशूनादित्यवदीष्टे वा सर्वपशूनामित्यादित्य-श्चित्यो ग्निः ।" ॥म0॥

13.41.2. गर्भः ॥सुवर्णप्रतिमा॥

इदं पदमत्र सुवर्णप्रतिमामुद्दिश्य प्रयुज्यमानं सायणेनोक्तम् ।

॥1॥ "गर्भस्तद्वशमिमं पुरुषम्" ॥सा0 14/4॥

उव्वटाद्याः पदमिदं चित्याग्नेर्विशेषणमाहुः ।

॥2॥ "गृह्णाति पशूनिति गर्भः चित्यो ग्निरुच्यते ।" ॥उ0॥

॥3॥ "गृह्णाति पशूनिति गर्भः पचाद्यच् । "हृद्ग्रहोर्भश्छन्दसि तम् ।" ॥म0॥

13.42.1. अद्रिबुध्नम् ॥अश्वः॥

अस्यार्थः सायणेनाश्वसम्बद्धो निर्दिष्टः ।

§1§ "अद्रिबुध्नम् अद्रिबुद्धम् । नकारोपजनश्छान्दसः । मार्गमध्ये खुरैश्चूर्णीकृता ये द्रिभाक्षुद्रपाषाणास्तैर्बुद्धम् । तादृशान् पाषाणान् दृष्ट्वा मार्गे - स्मिन्नश्वो गत इति बोद्धुं शक्यते ।" §सा० ।4/4§

उव्वटादिभिरपि पदस्यास्य अश्ववाचकत्वमुक्तम् ।

§2§ "अद्रिः पर्वतः तस्य बुध्नमादिः तत्र भवा आपः अद्रिबुध्नाः इह तु अद्भ्यो जातो भवो पत्यप्रत्ययलोपादद्रिबुध्नशब्देनोच्यते ।" §उ०§

§3§ "अद्रिर्गिरिः बुध्नं मूलं कारणं यासां ता अद्रिबुध्ना आप-स्ताज्जातमद्रिबुध्नम् । अपत्यप्रत्ययलोपः । यद्वा बुध्नपदे नकार उपजनश्छान्दसः। अद्रिबुध्नमद्रिभिर्बुद्धं ज्ञातं पथि तत्खुरैः क्षुण्णानद्रीन् पाषाणान् दृष्ट्वा नरैर्ज्ञातं यदत्राश्वो गत इति उत्कृष्टमित्यर्थः ।" §म०§

13.44.1. त्वष्टुः वरुत्री §यज्ञाङ्गम्, पशुविशेषः§

सायणेन पदमिदमविविशेषणमुक्तम् । अस्यार्थश्च त्वष्टुरनुग्रहात् सौन्दर्ययुक्त इत्युक्तः ।

§1§ "रूपाणां निर्माता यस्त्वष्टा तस्यानुग्रहात् वरणीयरूपयुक्ताम्"
§सा० ।4/4§

उव्वटादिभिरर्थनिर्देशः पृथगेव कृतः -

§2§ "वरान् वृणोति वा कम्बलादिना आच्छादयति ।" §उ०§

§3§ "त्वष्टुः रूपाणां निर्मातुर्देवस्यानुग्रहाद्वरुत्रीम्, वृणोति कम्लादिना छादयति लोकानिति वरुत्री ताम् ।" §म०§

13.47.2. द्विपात् पशुः §यज्ञाङ्गम्, पशुविशेषः§

सायणेन पदमिदं पशुविशेषस्य पुरुषरूपस्य वाचकमुक्तम् ।

§1§ "द्विपादं पादद्वयोपेतं पुरुषरूपं ग्राम्यं पशुम्" §सा० ।4/5§

उव्वटादिभिरपि न स्वार्थ उक्तः ।

{2} "द्विपादं पशुम् । "द्विपाद्वा एष पशुर्यत्पुरुषः ।" {उ0}

13.47.3. मयुः {यज्ञाङ्गम्, पशुविशेषः मृगः}

सायणेन पदमिदं कृष्णमृगरूपस्य पशोर्वाचकं निर्दिष्टम् ।

{1} "मयुं कृष्णमृगरूपम्" {सा0 14/5}

उव्वटेन पदस्यास्य किंपुरुषरूपो र्थ उक्तः । महीधरेण तस्य कृष्णमृगस्य च निर्देशः कृतः ।

{2} "किंपुरुषो वै मयुः ।" {उ0}

{3} "मयुं पशुं तुरङ्गवदनं किंपुरुषम्" {म0}

"मयुं कृष्णमृगं वा" {म0}

13.48.1. एकशफः पशुः {यज्ञाङ्गम्, अश्वः}

इदमश्वस्य विशेषणमस्ति ।

{1} "इममेकशफयुक्तमश्वरूपं पशुम् ।" {सा0 14/5}

{2} "एकशफु पशुं" एकशफो वा एष पशुर्यदश्वः ।" {उ0}

{3} "एकशफमेकखुरं पशुमश्वम् ।" {म0}

13.50.1. ऊर्णायुः {यज्ञाङ्गम्, अविः पशुः}

इदमविरूपस्य पशोः विशेषणमस्ति ।

{1} "ऊर्णायुं ऊर्णावन्तम्" {उ0}

{2} "अविं मा हिंसीः । कीदृशमूर्णायुम् । ऊर्णावन्तम् । ऊर्णाया युस् ।" {म0}

13.51.1. शरभः {यज्ञाङ्गम्, पशुः}

सायणेन पदमिदं क्रूरस्य मृगविशेषस्य वाचकमुक्तम् ।

{1} "शरभः सिंहघाती क्रूरमृगः ।" {सा० 14/5}

{2} महीधरेण सायणापेक्षया अष्टापद इति विशेषणेनाधिकेन शरभस्य निर्देशः कृतः ।

"शरभो ष्टापदो मृगविशेषः सिंहघाती ।" {म०}

13.55.4. अन्तर्यामः {यज्ञाङ्गम्, ग्रहविशेषः}

महीधरेण पदमिदं ग्रहविशेषवाचकं सूचितम् ।

{1} "स्वारात्साम्न उत्पन्नो यो न्तर्यामो ग्रहः" {म०}

13.55.5. पञ्चदशः स्तोमः {यज्ञाङ्गम्}

महीधरभाष्यादस्य स्तोमस्य अन्तर्यामग्रहात्प्रवृत्तिः, बृहत्पृष्ठोत्पादकत्वं चावगम्यते ।

{1} "अन्तर्यामाद्ग्रहात् पञ्चदशं स्तोमं निरमिमीत इति श्रुतेः । पञ्चदशात् स्तोमादुत्पन्नं यद्बृहत् पृष्ठं तद्रूपां सादयामि ।" {म०}

13.56.2. जगतीछन्दः {छन्दोविशेषः}

महीधरेण छन्दोविशेषवाचकं पदमिदमुक्तम् । तेनास्य छन्दसो वर्षात उत्पत्तिश्चोक्ताः ।

{1} "वर्षाभ्य उत्पन्नं जगतीछन्दः" {म०}

13.56.3. ऋक्समम् {सामविशेषः}

सायणेन पदमिदं सामविशेषवाचकमुक्तम् ।

{1} "ऋक्षममिति सामविशेषः ।" {सा० 14/7}

महीधरेण सामविशेषस्यास्य जगतीच्छन्दादुत्पत्तिः, शुक्रग्रहस्योत्पादकत्वं चोक्तम् ।

{2} "जगतीच्छन्दस उत्पन्नं ऋक्षमसंज्ञं यत्साम" "ऋक्षमादुत्पन्नो यः शुक्रग्रहः" {म०}

<u>13.56.4. शुक्रः {यज्ञाङ्गम्, ग्रहः}</u>

महीधरेण पदमिदं ग्रहविशेषस्य वाचकमुक्तम् । अस्य ग्रहस्य ऋक्षमनाम्न उत्पत्तिः, तस्मात् सप्तदशस्तोमस्योत्पत्तिश्च निर्दिष्टा ।

{1} "ऋक्षमादुत्पन्नो यः शुक्रग्रहस्तद्रूपाम्"
"शुक्राद्धुत्पन्नो यः सप्तदशस्तोमः" {म०}

<u>13.56.5. सप्तदशस्तोमः {यज्ञाङ्गम्, स्तोमः}</u>

महीधरेण स्तोमस्यास्य शुक्रग्रहादुत्पत्तिः, वैरूप्यपृष्ठस्योत्पादकत्वं च निर्दिष्टम् ।

"शुक्राद् ग्रहात् सप्तदशं स्तोमं निरमि । सप्तदशात्स्तोमादुत्पन्नं यद्वैरूप्यं पृष्ठं तद्रूपाम् ।" {म०}

<u>13.57.2. ऐडम् {सामविशेषः}</u>

इदं सामविशेषवाचकमिति सायणभाष्यादवगम्यते ।

"ऐडमिति सामविशेषः ।" {सा० 14/7}

<u>13.57.3. मन्थी {यज्ञाङ्गम्, ग्रहविशेषः}</u>

महीधरेण पदमिदं ग्रहविशेषवाचकमुक्तम् ।

§।§ "ऐडात्साम्न उत्पन्नो यो मन्थी ग्रहः" §म०§

13.57.4. एकविंशस्तोमः §यज्ञाङ्गम्, स्तोमः§

महीधरेण पदमिदं स्तोमविशेषाभिधायकं निर्दिष्टम् । अस्य स्तोमस्य मन्थिग्रहादुत्पत्तिः, वैराजपृष्ठोत्पादकत्वं चोक्तम् ।

§।§ "मन्थिनो ग्रहादेकविंशं स्तोमं निरमि०"
"एकविंशस्तोमादुत्पन्नं यद्वैराजं पृष्ठं तद्रूपाम्" §म०§

13.57.5. वैराजम् §पृष्ठविशेषः§

महीधरेण पदमिदं एकविंशस्तोमादुत्पन्नस्य पृष्ठविशेषस्य वाचकमुक्तम् ।

§।§ "एकविंशात्स्तोमाद्वैराजं पृष्ठं निरमि०" §म०§

13.58.2. निधनवत् §सामविशेषः, यज्ञाङ्गम्§

इदं सामविशेषवाचकं सायणभाष्यादवगम्यते ।

§।§ "पङ्क्तेरुत्पन्नं यन्निधनवत्संज्ञं साम" §म०§

13.58.3. आग्रयणः §यज्ञाङ्गम्, ग्रहविशेषः§

महीधरेण स्वभाष्ये पदमिदं ग्रहविशेषवाचकं सूचितम् ।

§।§ "निधनवतः साम्न उत्पन्नो य आग्रयणो ग्रहः" §म०§

13.58.4. त्रिणव: §यज्ञाङ्गम्, स्तोमः§

महीधरेण पदमिदं स्तोमविशेषवाचकमुक्तम् ।

§।§ "आग्रयणादुत्पन्नौ यौ त्रिणवत्रयस्त्रिंशौ द्वौ स्तोमौ तद्रूपाम् ।" §म०§

13.58.5. त्रयस्त्रिंशः {यज्ञाङ्गम्, स्तोमः}

महीधरेण स्तोमविशेषस्य वाचकमेतत्पदं सूचितम् ।

{1} "आग्रयणाद्ग्रहात्त्रिणवत्रयस्त्रिंशौ स्तोमौ निरमि० ।" {म०}

13.58.6. शाक्वरः {यज्ञाङ्गम्, पृष्ठम्}

इदं पृष्ठविशेषवाचकं पदमस्ति ।

{1} "त्रिणवत्रयस्त्रिंशाभ्यामुत्पन्ने ये द्वे शाक्वररैवते पृष्ठे ।" {म०}

13.58.7. रैवतः {यज्ञाङ्गम्, पृष्ठम्}

इदं पृष्ठविशेषस्य वाचकं पदमस्ति ।

{1} "त्रिणवत्रयस्त्रिंशाभ्यां स्तोमाभ्यां शाक्वररैवते पृष्ठे" {म०}

14.1.1. ध्रुवक्षितिः {यज्ञाङ्गम्, इष्टका}

इदं यज्ञे प्रयुज्यमानाया इष्टकायाः पृथिव्याश्रयसूचकं विशेषणमस्ति ।

{1} "क्षितिर्निवासभूमिर्यस्या इष्टकायाः सा ध्रुवक्षितिः ।" {सा० 15/1}

यस्यां भूमौ इष्टका निवसति तस्या भूमेश्चान्चल्याभावात् स्थैर्य द्रष्टव्यम् ।" {सा० 15/1}

{2} "ध्रुवक्षितिः स्थिरनिवासा" {उ०}

{3} "ध्रुवक्षितिः ध्रुवा स्थिरा क्षितिर्निवासो यस्याः सा" {म०}

14.1.2. ध्रुवयोनिः {यज्ञाङ्गम्, इष्टका}

सायणेनेदमिष्टकाया विशेषणं निर्दिष्टम् ।

§1§ "ध्रुवा विनाशरहिता योनिरुत्पत्तिहेतुर्मृद्रूपा यस्या इष्टकायाः सा ध्रुवयोनिः ।" §सा० 15/1§

§2§ "ध्रुवयोनिश्च अनश्वरस्थाना च" §उ०§

§3§ "ध्रुवा अचला योनिः कारणं यस्याः सा" §म०§

<u>14.1.3. उख्यस्य केतुः §अग्निः§</u>

सायणेन पदमिदं उखास्थितस्याग्नेः सूचकविशेषपरं विशेषणमुक्तम् ।

§1§ "उख्यस्य उखायां स्थितस्याग्नेः केतुं प्रज्ञापकम्" §सा० 15/1§

§2§ "अख्यस्याग्नेः केतुं प्रज्ञानम्" §उ०§

§3§ "उख्यस्याग्नेः प्रथममाद्यं केतुं स्थानम्" §म०§

<u>14.2.1. कुलायिनी §यज्ञाङ्गम्, इष्टका§</u>

इदमिष्टकाया विशेषणं निवासस्थानवत्त्वसूचकमस्ति ।

§1§ "कुलायिनी निवासस्थानवती" §सा० 15/1§

§2§ "कुलायं गृहं तदाकारा कुलायिनी । सा हि रेतः सिग्वेलायामिष्टकाभिरुपहिताभिर्गृहाकारा भवति ।" §उ०§

§3§ "कुलायिनी कुलायो नीडमस्त्रियाम्" कुलायो नीडं गृहमस्या अस्तीति गृहाकारा । रेतः सिग्वेलायामिष्टकोपचिता सा गृहाकारा भवति ।" §म०§

<u>14.2.2. पुरन्धिः §यज्ञाङ्गम्, इष्टका§</u>

इदमिष्टकाया बहुधा स्थापनसूचकं विशेषणमस्ति ।

§1§ "पुरु बहुधा धीयते सम्यगवस्थाप्यत इति पुरन्धिः ।" §सा० 15/1§

§2§ "पुरंधिः । बहु हि इष्टकाजातमियं धारयति चिति-

सम्बद्धम् ।" (उ०)

(3) "पुरन्धिः पुरं बहु इष्टकाजातं दधातीति पुरु बहुधा धीयते स्थाप्यत इति वा ।" (म०)

14.3.1. दक्षपिता (यज्ञाङ्गम्, इष्टका)

सायणेन पदमिदं बलपालनरूपकर्मसूचकमिष्टकाया विशेषणमिति निर्दिष्टम् ।

(1) "दक्षपिता बलस्य पालयित्री हे इष्टके" (सा० 15/1)

(2) "दक्षपिता दक्षं वीर्यं पातीति वीर्यस्य पालयित्री" (म०)

14.4.1. पृथिव्याः पुरीषम् (यज्ञाङ्गम्, इष्टका)

सायणेन पदमिदमिष्टकायाः पृथिवीपूरकत्वसूचकं विशेषणं निर्दिष्टम्।

(1) "हे इष्टके, त्वं पृथिव्याः प्रथमचितिभूतायाः भूमेः पुरीषं पूरकमसि ।" (सा० 15/1)

(2) "या त्वं पृथिव्याः प्रथमायाश्चितेः पुरीषमिवासि । "पृथिवी वै प्रथमा चितिः तस्या एतत् पुरीषमिव यद्द्वितीया" इति श्रुतिः।" (उ०)

(3) ""हे इष्टके, त्वं पृथिव्याः प्रथमचितेः पुरीषं पूरकं वस्त्वसि ।" (म०) "किंच कित्त्वात् "उदोष्ठ्यपूर्वस्य" इत्युदादेशो रपरत्वं च । नित्त्वादाद्युदात्तः ।" (म०)

14.4.2. अप्सः (रसविशेषः)

सायणेन पदमिदं रसविशेषवाचकं निर्दिष्टम् ।

(1) "अपः सनोतीत्यप्सो रसः ।" (सा० 15/1)

(2) "अप्सो नाम रसो नाम । अप्स इति रसपर्यायं दर्शयति । अपः सनोतीत्यप्सः । अपां हि रसो गुणः । "तस्य वा एतस्य यजुषो रस एवो-

पनिषत्" इत्येतच्छ्रुतिर्दर्शयति ।" [उ0]

[3] "अपः सनोति ददातीत्यप्सो नामापां कारणीभूतो रसः।" [म0]

अत्र महीधरस्य व्याख्यानं स्पष्टतया विशिष्यते ।

14.4.4. स्तोमपृष्ठा [यज्ञाङ्गम्, इष्टका]

इदमिष्टकाया विशेषणमस्ति ।

[1] "स्तोमपृष्ठा सप्तदशादिस्तोमभिर्युक्तानि पृष्ठस्तोत्राणि यस्याः सा स्तोमपृष्ठा ।" [सा0 15/1]

[2] "यां स्तोमस्यानूंस्य [?] मानो भवति तैरेषा स्तोमपृष्ठा।" [उ0]

[3] "स्तोमपृष्ठाः स्तोमास्त्रिवृदादयः पृष्ठानि रथन्तरादीनि पठिष्यमाणानि यस्यां सा तादृशी स्तोमपृष्ठवती ।" [म0]

14.5.1. आदित्याः पृष्ठम् [भूमेरुपरिभागः]

सायणेन पदमिदं प्रथमचितिभूतायाः भूमेरुपरिभागस्य वाचकमुक्तम् ।

[1] "अदित्याः पृष्ठे प्रथमचितिभूताया भूमेरुपरि" [सा0 15/1]

14.9.4. मयन्दः [छन्दोविशेषः]

इदं छन्दोविशेषसूचकं नाम वर्तते । अस्य सायणेन व्युत्पत्तिबलात् सुखदायकत्वमुक्तम् ।

[1] "मयः सुखं ददातीति मयन्दं तादृशं छन्दश्चाभवत् ।" [सा0 15/3]

14.9.9. वस्तः [पशुविशेषः]

पदमिदं पशुवाचकमस्ति ।

[1] "वयसा शरीरावस्थया निर्गतं वस्ताख्यं पशुं पर्यगृह्णात् ।"
[सा० 15/3]

[2] "बस्तः अजः ।" [म०]

14.9.10. विवलम् [छन्दो विशेषः]

इदं छन्दो विशेषवाचकं पदमस्ति ।

[1] "एकपदा वै विवलं छन्द इति श्रुतेः ।" [सा० 15/3]

[2] "विवलं वरमुत्कृष्टं छन्दः" [म०]

14.9.11. वृष्णिः [मेघः]

सायणेन पदमिदं मेघवाचकं निर्दिष्टम् ।

[1] "वृष्णिः सेचनसमर्थो मेघः ।" [सा० 15/3]

उव्वटभाष्ये अस्य मेष इत्यर्थ उक्तः ।

[2] "वृष्णिं मेषम्" [उ०]

14.9.12. विशालम् [छन्दो विशेषः]

इदं छन्दो विशेषवाचकं नाम वतति ।

[1] "विशालाख्यं छन्दः । द्विपदा वै विशालं छन्द इति श्रुतेः।"
[सा० 15/3]

14.9.13. तन्द्रम् [छन्दो विशेषः]

पदमिदं पङ्क्तिनाम्नश्छन्दसो वाचकं प्रतीयते ।

§1§ "तन्द्रं छन्दः पङ्क्तिः ।" §उ०§

14.9.14. अनाधृष्टम् §छन्दोविशेषः§

इदं छन्दोविशेषविषयकं पदं प्रतीयते ।

§1§ "अनाधृष्टाख्यं विराट्छन्दो विराट् ।" §सा० 15/3§

§2§ "विराड् वा अनाधृष्टं छन्दः ।" §उ०§

14.9.15. छदिः §छन्दोविशेषः§

इदं छन्दोविषयकं पदं प्रतीयते ।

§1§ "सर्वाणि छन्दांसि छादयतीति छदिः ।" §सा० 15/3§

§2§ "अतिच्छन्दा वै छदिश्छन्दः ।" §उ०§

§3§ "छादयतीति छदिरतिच्छन्दाच्छन्दो भूत्वोत्क्रान्तं सिंहं पशुं वयसा गृहीत् ।" §म०§

14.9.16. पृष्ठवाट् §यज्ञाङ्गम्, पशुः§

इदं पदं पशुविशेषवाचकमस्ति ।

§1§ "पृष्ठे पृष्ठभागे वहतीति पृष्ठवाट् पन्चवर्षः पशुः ।" §सा० 15/3§

§2§ महीधरभाष्ये "षष्ठवाड्" इति पदस्य पाठो दृश्यते –

"षष्ठे पृष्ठभागे वहतीति षष्ठवाट् पन्चवर्षः पशुः ।" §म०§

14.9.17. बृहती §छन्दोविशेषः§

पदमिदं छन्दोविशेषनाम वर्तते ।

§1§ "प्रथमतृतीयौ पादौ द्वादशाक्षरौ सासतो बृहती ।" §सा० 15/3§

<u>14.9.18. ककुप् [छन्दो विशेषः]</u>

इदं छन्दो विशेषाभिधायकं पदमस्ति ।

[1] "अन्तिमौ द्वावष्टाक्षरौ पादौ मध्यपादो द्वादशाक्षरश्चेत् सा ककुप् ।" [सा० 15/3]

[2] "आद्यन्तावष्टाक्षरौ पादौ मध्यमो द्वादशाक्षरः ककुप् ।" [म०]

अत्र महीधरव्याख्यानं विस्पष्टार्थतया विशिष्यते ।

<u>14.10.2. त्र्यविः [पशुविशेषः]</u>

सायणेन पदमिदं सवत्साया गोः, अष्टादशमासस्य पशोर्वा वाचकमिति निर्दिष्टम् ।

[1] "सवत्सा गौस्त्रिधा भवतीति त्र्यविः । यद्वा त्र्यविशब्देन क्षीरादिकमन्नं लक्षयित्वा तत्प्राशनाय विहितः षण्मासात्मकः कालो लक्ष्यते । तथा च तिस्रो अवयो स्य सन्जाता इति त्र्यविरष्टादशमासः पशुरिति।" [सा० 15/3]

[2] "षण्मासात्मकः कालो विः, तिस्रो वयो स्य त्र्यविः अष्टादशमासः पशुः ।" [म०]

<u>14.10.3. दित्यवाट् [पशुविशेषः]</u>

पदमिदं पशुविशेषवाचकमिति सायणभाष्यादवगम्यते ।

[1] "दित्यार्हं खण्डनार्हं वहतीति दित्यवाट् । यद्वा द्विवर्षः पशुर्दित्यवाडुच्यते ।" [सा० 15/3]

[2] "दो वखण्डने" क्तिन्प्रत्ययः । दितिं खण्डनमर्हति दित्यं धान्यं वहति दित्यवाट् । यद्वा द्विवर्षः पशुर्दित्यवाट्" [म०]

अत्र धातुप्रत्ययनिर्देशो महीधरेण विशिष्यते ।

14.10.4. पन्चाविः [पशुविशेषः]

सायणभाष्ये पदमिदं पशुविशेषसमूहवाचकं निर्दिष्टम् ।

[1] "पन्चपशुः पन्चाविः ।" [सा० 15/3]

[2] "पन्चावयो यस्य सः सार्धद्विवर्षः पशुः ।" [म०]

14.10.5. त्रिवत्सः [पशुविशेषः]

इदं पशुविशेषस्य त्रिवत्ससान्निध्यसूचकं कालगतविशेषसूचकं वा पदमस्ति ।

[1] "त्रयो वत्सा यस्यासौ त्रिवत्सः । यद्वा त्रिवत्सरः पशुस्त्रिवत्सः ।" [सा० 15/3]

[2] "त्रयो वत्सा वत्सराः यस्य सः त्रिवत्सः पशुः ।" [म०]

14.10.6. तुर्यवाट् [पशुविशेषः]

इदं पशुविशेषस्य विशेषणात्मकं पदमस्ति ।

[1] "तुर्यं चतुर्थं वहतीति तुर्यवाट् ।" [सा० 15/3]

[2] "तुर्यवाट् तुर्यं चतुर्थं वर्षं वहतीति चतुर्वर्षः पशुः ।" [म०]

14.18.1. मच्छन्दः [छन्दोविशेषः]

इदं छन्दोविशेषवाचकं पदं अ मन्त्रे ऽस्मिन् इष्टकायास्तद्रूपकल्पनायै प्रयुक्तमिति सायणेन निर्दिष्टम् ।

[1] "हे इष्टके, त्वं मानामच्छन्दोरूपासि ।" [सा० 15/5]

उव्वटेन पदस्यास्य पृथिवीलोकवाचकत्वं सूचितम् ।

{2} "अयं लोको मित इव मा छन्दः छादनात् ।" {उ0}

महीधरेण उव्वटोक्त एवार्थो विवृतः ।

{3} "मीयत इति मा मितश्छादनाच्छन्दो यं लोकः । हे इष्टके, त्वं तद्रूपासि । "अयं वै लोको मायं लोको मित इव" इति श्रुतेः ।"

{म0}

14.18.2. प्रमा {छन्दोविशेषः}

छन्दोविशेषवाचकं पदमेतत् ।

{1} "प्रमानामछन्दोरूपासि ।" {ला0 15/5}

उव्वटेन पदमिदम् अन्तरिक्षवाचकं निर्दिष्टम् ।

{2} "अन्तरिक्षलोको वै प्रमा । अन्तरिक्षलोकः अस्माल्लोकात् प्रमित एइव दृश्यते ।" {उ0}

{3} "अस्माल्लोकात् प्रमीयत इति प्रमान्तरिक्षलोकरूपा सि ।"

{म0}

14.18.3. प्रतिमा {छन्दोविशेषः/द्युलोकः}

छन्दोविशेषस्य नामेदम् ।

{1} "प्रमाप्रतिमादिशब्दाभिधेयाश्छन्दोविशेषाः केचिद्वेदेष्वेव प्रसिद्धाः, केचिल्लोकेष्वपि प्रसिद्धाः ।" {ला0 15/5}

उव्वटादिभिः पदमिदं द्युलोकवाचकं निर्दिष्टम् ।

{2} "प्रतिमा छन्दः द्यौः प्रतिमा सा हि अन्तरिक्षलोके प्रतिमिता ।" {उ0}

{3} "प्रतिमा द्यौः सा ह्यन्तरिक्षे प्रतिमिता ।" {म0}

14.18.4. अस्रीवयः (छन्दोविशेषः)

उव्वटेन पदमिदं छन्दोविशेषस्यान्नस्य च वाचकं निर्दिष्टम् ।

(1) "अस्रीवयः छन्दः अन्नमस्रीवयः । यदेभ्यो लोकेभ्य आहुति-परिणामभूतमन्नं स्रवति तदस्रीवयः ।" (उ0)

(2) "महीधरेण स एवार्थो विग्रहादिनिर्देशेन विशदीकृतः ।

"(अस्यते क्षिप्यत इत्यस्ति अस्रि पतनशीलं वयो न्नं यस्मात्तद-स्रिवयः । दीर्घश्छान्दसः । अस्रीवयः लोकत्रयरूपं छादनाच्छन्दस्तद्रूपासि । यदेषु लोकेष्वन्नं तदस्रीवयो थो यदेभ्यो लोकेभ्यो न्नं स्रवति तदस्रीवय" इति श्रुतेः()।"

(म0)

14.22.1. यन्त्री (यज्ञाङ्गम्, इष्टका)

इदमिष्टकाया विशेषणं वर्तते ।

(1) "हे इष्टके, त्वं यन्त्री नियमोपेता" (सा0 15/6)

14.22.2. यमनी (यज्ञाङ्गम्, इष्टका)

इदमिष्टकायाः सर्वनियमनशक्तिसूचकं विशेषणमिति सायणेनोक्तम् ।

(1) "यमनी सर्वेषां नियमकारिणी चासि ।" (सा0 15/6)

14.23.1. आशुः (स्तोमविशेषः/वायुः, देवता)

स्तोमविशेषणमिदं गुणवाचकं प्रसङ्गे स्मिन् तद्रूपतामिष्टकायामुप-चारेण दर्शयितुं प्रयुक्तमिति सायणः ।

(1) "आशुः शैघ्र्यगुणोपेतो यस्त्रिवृत्स्तोमः हे इष्टके त्वं तद्रूपासि"

(सा0 15/7)

उव्वटेन पदस्यास्य सम्बन्धो वायुना निर्दिष्टः ।

§2§ "वायुर्वा आशुः शीघ्रः त्रिवृत् त्रिलोकसंचारी।" §उ0§

महीधरेण त्रिवृत्स्तोमस्य वायोश्च सूचकमेतत्पदमिति स्वभाष्ये विशदीकृतम् ।

§3§ "कीदृशस्त्रिवृत् । आशुः । अशू व्याप्तौ । अश्नुते व्याप्नोति सर्वान् स्तोमान् इत्याशुः । तद्रूपां त्वामुपदधामीति सर्वत्र शेषः । स्तोमानुपदधाति प्राणा वै स्तोमाः प्राणा उ वै ब्रह्म ब्रह्मैवैतदुपदधातीति । श्रुतेः । यद्वा आशुः वायुः त्रिवृत् त्रिषु लोकेषु वर्तत इति त्रिवृत्, क्विप् । सर्वभूतव्यापकत्वादाशुर्वायुस्तद्रूपासि । एवं श्रुत्यनुसारेण सर्वत्र व्याख्यायते । तथा च श्रुतिः "स पुरस्तादुपदधात्याशुस्त्रिवृदिति य एव त्रिवृत् स्तोमस्तमुपदधाति तद्यत्तमाहाशुरित्येष हि स्तोमानामाशिष्टो थो वायुर्वा आशुस्त्रिवृत् स एषु त्रिषु लोकेषु वर्तते तद्यत्तमाहाशुरित्येष हि सर्वेषां भूतानामाशिष्टो वायुर्ह * भूत्वा पुरस्तात्तस्थौ तदेव तद्रूपमुपदधातीति ।" §म0§

<u>14.23.2. भान्तः §स्तोमविशेषः/देवता, चन्द्रः§</u>

इदं गुणवाचकं स्तोमविशेषणमस्ति ।

§1§ "भान्तो भासमानः व्योमेति प्रसिद्धं द्रव्यव्यत्ययेन पुल्लिङ्गता ।" §सा0 15/7§

उव्वटादिभिः पदस्यास्य चन्द्रमसा सम्बन्धो पि निर्दिष्टः ।

§2§ "भान्तः पञ्चदशः । चन्द्रमा उच्यते । स हि भाति च पञ्चदशाहान्यापूर्यते च अपक्षीयते च ।" §उ0§

महीधरेण पदस्यास्य चन्द्रेण वज्रेण च सम्बन्ध उक्तः ।

§3§ "भान्तः वज्ररूपो यः पञ्चदशः स्तोमः । यद्वा भान्तश्चन्द्रः पञ्चदशाहानि पूर्यमाणत्वात् पञ्चदशाहं क्षीयमाणत्वात् पञ्चदशः 2 भाकान्तिरेवान्तः स्वरूपं यस्य तद्रूपा सि ।" §म0§

"य एव पन्चदशः स्तोमस्तं तदुपदधाति तद्यत्तमाह भान्त इति वज्रो वै भान्तो वज्रः पन्चदशो थो चन्द्रमा वै भान्तः पन्चदशः स पन्चदशाहान्यापूर्यति पन्चदशापक्षीयते तद्यत्तमाह भान्त इति भाति हि चन्द्रमाश्चन्द्रमा ह भूत्वा दक्षिणतस्तस्थौ तदेव तद्रूपमुपदधातीति ।" श्रुतेः ।" {म0}

14.23.3. व्योमा {स्तोमविशेषः/संवत्सरः}

उव्वटेन पदमिदं संवत्सरविषयकं निर्दिष्टम् ।

{1} "व्योमा सप्तदशः । संवत्सर उक्तः । स हि विविधमवति प्राणिनः सप्तदशावयवश्च ।" {उ0}

महीधरेण पदस्यास्य सम्बन्धः प्रजापतिना संवत्सरेण चोक्तः ।

{2} "विविधमवतीति व्योमा प्रजापतिः सप्तदशः स्तोमः । संवत्सरो वा व्योमा सप्तदशः द्वादशमासपन्चर्तुरूपसप्तदशावयवत्वात् तद्रूपासि। य एव सप्तदशःस्तोमस्तं तदुपदधाति तद्यत्तमाह व्योमेति प्रजापतिर्वै व्योमा प्रजापतिः सप्तदशो थो संवत्सरो वा व्योमा सप्तदशस्तस्य द्वादशमासाः पन्चर्तवस्तद्यत्तमाह व्योमेति, व्योमा हि संवत्सरः संवत्सरो ह भूत्वोत्तरतस्तस्थौ तदेव तद्रूपमुपदधातीति ।" श्रुतेः " {म0}

14.23.4. धरुणः {स्तोमविशेषः/आदित्यः, देवता}

इदं स्तोमविशेषस्य धारणगुणवाचकं विशेषणमस्ति ।

{1} धरुणो धारकः ।" {सा0 15/7}

उव्वटेन पदस्यास्यादित्येन च सम्बन्ध उक्तः ।

{2} "धरुण एकविंशः । आदित्यः स्तोमो वोच्यते । "प्रतिष्ठा वै धरुणः प्रतिष्ठैकविंशः स्तोमः । आदित्या वा प्रतिष्ठा । मासादिभिः एकविंशावयवं च ।" {उ0}

§3§ "धरुणो धारकः प्रतिष्ठाभूत एकविंशः स्तोमः । यद्वा धरुण आदित्यः स एकविंशावयवत्वादेकविंशः । द्वादश मासाः पन्चर्तवः त्रयो लोका आदित्य इत्यवयवास्तद्रूपासि ।" §म0§

अत्र के पन्च ऋतवो ऽभिप्रेता इति निर्देशो न कृतः, एतत् न्यूनत्वम् ।

14.23.5. प्रतूर्तिः §स्तोमविशेषः/संवत्सरः§

इदं स्तोमविशेषस्य शैघ्र्यगुणसूचकं विशेषणमस्ति ।

§1§ "प्रकृष्टा तूर्तिस्त्वरा यस्यासौ सप्रतूर्तिः शीघ्रकारीत्यर्थः ।" §सा0 15/7§

उव्वटेन पदस्यास्य संवत्सरेण सम्बन्ध उक्तः ।

§2§ "प्रतूर्तिः संवत्सरः । स हि सर्वाणि भूतानि प्रतिरति प्रवर्धयति ।" §उ0§

महीधरेण आद्ययोराचार्ययोर्द्वयोर्मतं विकल्पादीकृतम् ।

§3§ "प्रकृष्टा तूर्तिस्त्वरा यस्य स प्रतूर्तिः अष्टादशः स्तोमः। यद्वा संवत्सरः प्रतूर्तिरष्टादशावयवः द्वादशमासाः पन्चर्तवः संवत्सरश्चेत्यवयवाः ।" §म0§

14.23.6. अभीवर्तः §स्तोमविशेषः/संवत्सरः§

उव्वटेन पदस्यास्य संवत्सराभिप्रायत्वं निर्दिष्टम् ।

§1§ "अभीवर्तः । संवत्सरो हि सर्वाणि भूतान्यभिवर्तते । तेन हि अभिवृत्तेन ऋतुलिङ्गानि भूतेषु दृश्यन्ते ।" §उ0§

§2§ "महीधरेण पदमिदं स्तोमेन सह संवत्सरस्यापि वाचकमुक्तम् ।

"अभिवर्त्यते आवर्त्यत इत्यभीवर्तः समावृत्तिरूपः स विंशः स्तोमः ।

यद्वा अभिवर्तयत्यावर्तयति सर्वाणि भूतानीत्यभीवर्तः संसारः । "उपसर्गस्य घञ्यमनुष्ये बहुलम्" इति दीर्घः । द्वादशमाससप्तर्तुसंवत्सररूपविंशतिसंख्यया सहितः सविंशः ।" [म०]

14.23.7. वर्चः [स्तोमविशेषः]

इदं गुणवाचकं स्तोमविशेषणम्

[1] "वर्चो बलविशेषः ।" [सा० 15/7]

उव्वटेन संवत्सरमुद्दिश्य प्रयुक्तं पदमिदमुक्तम् ।

[2] "वर्चः । संवत्सरो हि सर्वेषां भूतानां वर्चस्वितमः ।" इति श्रुतिर्ब्रुवन्ती मतुब्लोपं दर्शयति । वर्चस्वी महाभाग्यवान् ।" [उ०]

महीधरेण द्वाविंशः स्तोमः संवत्सरश्च पदार्थतया निर्दिष्टौ ।

[3] "वर्चः बलविशेषप्रदो द्वाविंशः स्तोमः । यद्वा वर्चः संवत्सरः वर्चस्वितमः द्वादश मासाः सप्तर्तवः द्वे अहोरात्रे संवत्सरश्चेति द्वाविंशतिसङ्ख्योपेतत्वात् द्वाविंशः, तद्रूपासि ।" [म०]

14.23.8. संभरणः [स्तोमविशेषः/संवत्सरः]

इदं गुणवाचकं स्तोमविशेषणम् ।

[1] "सम्भरणः सम्यक् पोषकः ।" [सा० 15/7]

उव्वटेन पदमिदं संवत्सरवाचकं विशेषणं निर्दिष्टम् ।

[2] "संभरणः । संवत्सरो हि सर्वाणि भूतानि संभरति उत्पादयति संहरति वा विनाशयति ।" [उ०]

[3] "महीधरेण पदमिदं त्रयोविंशस्तोमस्य संवत्सरस्य च विशेषणमिति निर्दिष्टम् ।

"संबिभर्ति संभरणः सम्यक् पोषकस्त्रयोविंशः स्तोमस्त्वमसि । यद्वा संभरत्युत्पादयति संहरति विनाशयति वा संभरणः संवत्सरः त्रयोदश मासाः सप्तर्तवो द्वे अहोरात्रे एकः संवत्सर इति त्रयोविंशावयवः, तद्रूपासि।"

{म०}

अत्र के त्रयोदश मासाः, सप्त ऋतवो वेति नोक्तम् ।

<u>14.23.9. योनिः {स्तोमविशेष:/संवत्सर:}</u>

इदं स्तोमविशेषणमस्ति ।

{1} "योनिः प्रजोत्पादकः" {सा० 15/7}

अस्य संवत्सरविशेषणत्वमुव्वटेन निर्दिष्टम् ।

{2} "योनिः स्थानम् ।" {उ०}

{3} "योनिः प्रजोत्पादकश्चतुर्विंशः स्तोमो सि । यद्वा योनिः सर्वस्थानभूतः संवत्सरश्चतुर्विंशतिपक्षात्मकस्तद्रूपासि ।" {म०}

<u>14.23.11. गर्भः{स्तोमविशेष:/संवत्सर:}</u>

इदं स्तोमविशेषणमस्ति ।

{1} "गर्भः प्रसिद्धः" {सा० 15/7}

उव्वटेन संवत्सरविशेषणत्वमस्योपपादितम् ।

{2} "गर्भः संवत्सरः त्रयोदशमास इहोच्यते । स च गर्भो भूत्वा ऋतून् प्रविशति । कथं पुनस्त्रयोदशो मासः ऋतून् प्रविशति । उच्यते । एकोनषण्मासाहोरात्रैश्चन्द्रो द्वादश राशीन् विक्रमति । स चान्द्र ऋतुर्भवति । आदित्यस्त्वेकषण्मासदिवसैः राशिद्वयमतिक्रामति स सौर ऋतुर्भवति । तैश्च सौरैर्ऋतुभिः संवत्सरो भवति । ततश्चैकस्मिन् ऋतौ सौरचान्द्रौ ऋतुर्भवतः तिथिद्वयं च । एवं षड्ऋतुषु द्वादश तिथयः प्रविशन्ति अपरेषु षट्स्वपरा द्वादश

अपरेषु षट् तिथयः । स एषो र्धतृतीयेषु संवत्सरेषु चान्द्रो मासः प्रविशति । स एवाधिमासः स एव त्रयोदशो मासः सौरान् ऋतून् द्वाभ्यां तिथिभ्यां प्रविशति।" {उ०}

14.23.12. ओजः {आध्या०, धातुः/स्तोमवि०/संवत्सरः}

सायणकृत्या – अष्टमधातोरिदं नाम स्तोमविशेषणमत्र विहितम् ।

{1} "ओजो ष्टमो धातुः ।" {सा० 15/7}

उव्वटेन पदस्यास्य संवत्सरविशेषणत्वमुक्तम् ।

{2} "ओजः । अत्रापि मतुब्लोपः । ओजस्वी संवत्सर ऋतुः । संवत्सरो हि सर्वाणि भूतानि करोति ।" इति श्रुतिः ।" {उ०}

महीधरेण वज्रेण चास्य सम्बन्धो निर्दिष्टः ।

{3} "ओजः, मतुब्लोपः । ओजस्वी तेजस्वी वज्रो वा ओज-तद्रूपस्त्रिणवः स्तोमो सि । यद्वा ओजः संवत्सरश्चतुर्विंशतिपक्षाहोरात्रसंव-त्सरात्मकत्वात् त्रिणवः त्रिगुणा नव यत्र ।" {म०}

14.23.13. क्रतुः {यज्ञः}

इदं यज्ञस्य प्रसिद्धं नामान्तरम् ।

{1} "क्रतुर्ज्योतिष्टोमादिः ।" {सा० 15/7}

महीधरेण संवत्सरे प्यस्य पदस्य वाच्यता निर्दिष्टा ।

{2} "क्रतुर्यज्ञोपयोगी एकत्रिंशः स्तोमो सि । यद्वा संवत्सर एव करोतीति क्रतुः सप्तर्तुसंवत्सरात्मकत्वादेकत्रिंशः ।" {म०}

14.23.14. प्रतिष्ठा {स्तोमविशेषः}

इदं स्तोमविशेषस्य गुणवाचकं विशेषणमस्ति ।

§1§ "प्रतिष्ठा स्थितिहेतुः ।" §सा० 15/7§

§2§ "प्रतिष्ठा धिष्टानम् ।" §उ०§

महीधरेण पदस्यास्य संवत्सरे ऽपि संगतिरुक्ता ।

§3§ "प्रतिष्ठा स्थितिहेतुस्त्रयस्त्रिंशः स्तोमो ऽसि । यद्वा संवत्सरः प्रतिष्ठा संवत्सरे सर्वस्य प्रतिष्ठितत्वात् पञ्चर्त्वहोरात्रसंवत्सरात्मकत्वात् त्रयस्त्रिंशः ।" §म०§

14.23.15. ब्रध्नस्य विष्टपम् §स्तोमविशेषः§

इदं स्तोमविशेषणमस्ति । अनेन सूर्यसम्बन्धः सूच्यते ।

§1§ "ब्रध्नस्यादित्यस्य विष्टपं निवासस्थानम् । असौ वा आदित्यस्य विष्टपं निवासस्थानम् । असौ वा आदित्यो ब्रध्न इति श्रुत्यन्तरात्।" §सा० 15/7§

उव्वटेन पदस्यास्य सम्बन्धः स्वाराज्येन सह सूचितः ।

§2§ "ब्रध्नस्य विष्टपम् । स्वाराज्यं वै ब्रध्नस्य विष्टपम् । स्वाराज्यं स्वतन्त्रता ।" §उ०§

महीधरेण सायणाशयो ऽनुसृत एव, संवत्सररूपो ऽर्थश्चोक्तः ।

§3§ "ब्रध्नः सूर्यः । "असौ वा आदित्यो ब्रध्नः" इति श्रुतेः । विष्टपं निवासस्थानं "भुवनं विष्टपं लोकः" इति कोशात् ब्रध्नस्य विष्टपं स्वाराज्यं स्वतन्त्रत्वं तद्रूपस्तत्तत्प्रदो यश्चतुस्त्रिंशः स्तोमस्तद्रूपासि । यद्वा संवत्सरो ब्रध्नस्य विष्टपं रविणैव कालनिर्माणत्वात् चतुर्विंशतिपक्षसप्तर्त्वहोरात्रसंवत्सरात्मकत्वाच्चतुस्त्रिंशः ।" §म०§

14.23.16. नाकः §स्तोमविशेषः§

इदं स्वर्गवाचकं पदमत्र स्तोमविशेषणमस्ति ।

{1} "नाकः स्वर्गाख्यो भोगभूमिः ।" {शा० 15/7}

{2} "काम्यत इति कं सुखं तद्विपरीतमकं दुःखं नास्त्यकमसुखमस्मिन्निति नाकः ।" {उ०}

{3} "नाकः स्वर्गप्रदः षट्त्रिंशः स्तोमो सि संवत्सरो वा नामः काम्यत इति कं सुखं नकमकं दुःखं तन्नास्ति यत्र स नाकः षट्त्रिंशः पक्षमासात्मकत्वात् ।" {म०}

14.23.17. विवर्तः {स्तोमविशेषः/पितृमार्गः/संवत्सरः}

स्तोमविशेषस्य विशेषणमिदमस्ति ।

{1} "विपरीतत्वेन वर्तनमस्यासौ विवर्तः ।" {शा० 15/7}

उव्वटेन पदमिदं पितृमार्गवाचकं निर्दिष्टम् ।

{2} "विवर्तः । विविधं वर्तन्ते तत्र गतानि भूतानीति विवर्तः पितृयाणः ।" {उ०}

महीधरेण पदस्यास्य स्तोमेन संवत्सरेण च सम्बन्धः सूचितः ।

{3} "विवर्त्यन्ते आवर्त्यन्ते सामानि यत्रेति विवर्तः अष्टाचत्वारिंशः स्तोमस्तद्रूपासि । यद्वा विविधं वर्तन्ते भूतानि यत्रेति विवर्तः संवत्सरः अधिमासत्वेन षड्विंशतिः पक्षाः सप्तर्तवः त्रयोदशमासाः द्वे अहोरात्रे इत्यष्टाचत्वारिंशः ।" {म०}

14.23.18. धर्त्रम् {स्तोमविशेषः}

उव्वटेन धारणाख्यकर्मसूकं विशेषणमित्येव सूचितम् । महीधरेण सुविशदं चतुष्टोमस्तोमस्य विशेषणत्वमुक्तम् ।

{1} "धर्त्रं धारणम् ।" {उ०}

{2} "धर्त्रं धारकश्चतुरुत्तरः स्तोमश्चतुष्टोमः । मध्यमपदलोपी समासः ।" {म०}

14.23.19. चतुष्टोम: {स्तोमविशेष:}

इदं स्तोमविशेषस्य नाम वर्तते ।

{1} "चतुरुत्तर: स्तोम: चतुष्टोम: । उत्तरपदलोपी समास: ।" {उ0}

महीधरेण वायोश्च पदेनानेन सम्बन्ध: सूचित: ।

{2} "त्रिवृत्पन्चदशसप्तदशैकविंशानां समूहस्तद्रूपासि । वायुर्वा धर्म जगदाधारत्वाच्चतुर्दिग्भि: स्तूयमानत्वात् चतुष्टोम: ।" {म0}

15.1.1. त्रिवरूथ: {यज्ञाङ्गम्, यज्ञगृहम्}

पदमिदं वहेराश्रयविशेषवाचकमिति सायणादिभाष्येभ्यो वगम्यते ।

{1} "त्रिवरूथे. . . .सदोहविर्धानरूपे यज्ञगृहे ।" {सा0 16/1}

{2} "त्रिवरूथे । वरूथं गृहम् त्रिगृहे त्रिपुरे ।"

"यद्वा त्रिवरूथे यज्ञगृहे स्याम । त्रीणि हि यज्ञगृहाणि सदोहविर्धानाग्नीध्राणि ।" {उ0}

{3} "त्रिवरूथे वरूथं गृहं त्रयाणां वरूथानां समाहारे यज्ञगृहे त्र सदो हविर्धानाग्नीध्ररूपे ।" {म0}

15.1.2. उद्भि: {रूपज्ञाङ्गम्, वह्न्याश्रय:}

पदमिदमग्नेराश्रयस्य कस्यचिद्विशेषणमस्ति ।

{1} "उद्भौ, भादीप्तौ, पशुधनधान्यादिभिरुद्भिद्यत इत्युद्भि: ।" {सा0 16/1}

{2} "उद्भौ उद्भेत्तरि । अन्येषां यज्ञक्रतूनाम् ।" {उ0}

{3} "उद्भौ द्विपदचतुष्पदधनधान्यादिभिरुद्भवति समृध्यत इत्युद्भि: । तस्मिन् भवतेर्डिप्रत्यय: ।" {म0}

15.3.1. षोडशीस्तोमः {स्तोमविशेषः/देवता, आदित्यः}

पदमिदं स्तोमविशेषविशेषणमस्ति ।

{1} "षोडशभिरावृत्तिभिरुपेतः षोडशीयः तादृशः स्तोमः ।"
{सा० 16/1}

{2} "षोडशी आदित्यः पन्चदशकलस्य पक्षस्य भर्ता स्तोमभूतः।"
{उ०}

{3} "पन्चदशकलस्य पक्षस्य भर्ता य आदित्यरूपः स्तोमः षोडशावृत्त्युपेतो वा यः स्तोमः ।" {म०}

15.3.2. चतुश्चत्वारिंशः स्तोमः {स्तोमविशेषः}

पदमेतच्च स्तोमविशेषस्य वाचकमस्ति ।

{1} "यो यं स्तोमश्चतुश्चत्वारिंशदावृत्त्या सम्पन्नः ।"
{सा० 16/1}

{2} "चतुश्चत्वारिंशः त्रिष्टुप्वज्राक्षरसम्मितः स्तोमः ।" {उ०}

{3} "चतुश्चत्वारिंशदावृत्त्या संपन्नो यः स्तोमस्त्रिष्टुब्रूपो वा"
{म०}

15.3.3. अग्नेः पुरीषम् {यज्ञाङ्गम्, इष्टका}

सायणेन पदस्यास्य अग्निपूरकत्वरूपो र्थो निर्दिष्टः । इदमिष्टकामुद्दिश्य पदं प्रयुक्तम् ।

{1} "हे इष्टके, त्वं अग्नेः पुरीषमसि पूरयित्री भवसि ।"
{सा० 16/1}

{2} "अग्नेः पन्चदशकरूपस्य पूरयित्री ।" {उ०}

{3} "तस्याग्नेश्चन्द्ररूपस्य पन्चदशकलस्य पूरयित्री ।" {म०}

.4. 15.3.4. अप्सः (देवता, अग्निः)

पदमिदमग्नेर्नामविशेषणमस्ति ।

(1) "अप्स इति भक्षयति विनाशयतीति सः । न भातीत्यभः। यो ऽग्निः तादृशनामास्ति तस्याग्नेरित्यर्थः ।" (सा० 16/1)

(2) "प्सा भक्षणे । न प्साति भक्षयति विनाशयतीत्यप्सो रक्षको नाम यो ऽग्निः" (म०)

15.3.5. स्तोमपृष्ठा (यज्ञाङ्गम्, इष्टका)

इदमिष्टकायाः स्तोमपृष्ठसंयोगसूचकं विशेषणमस्ति ।

(1) "स्तोमैः पृष्ठैश्च युता" (म०)

15.4.13. काव्यं छन्दः (वेदः, त्रयी)

सायणादिभिः पदमिदं त्रयी विद्यावाचकं निर्दिष्टम् ।

(1) "त्रय्यात्मकः शब्दः काव्यम् ।" (सा० 16/1)

(2) "त्रयी वै काव्यं छन्दः ।" (उ०)

(3) "कवेः परमात्मन इदं काव्यं वेदत्रयीरूपः छन्दः ।" (म०)

15.6.3. प्रेतिः (अन्नम्, यज्ञफलम्)

सायणेन पदमिदमन्नवाचकं निर्दिष्टम् ।

(1) "प्रेतिना प्रकर्षेण देहमेति गच्छतीति प्रेतिरन्नम्"
"प्रेतिरन्नमिति श्रुतेः ।" (सा० 16/2)

(2) "प्रेतिना अन्नेन" (उ०)

(3) "प्रकर्षेण देहे ईतिर्गतिर्यस्येति प्रेतिरन्नम्" (म०)

15.6.4. अन्विति: {यज्ञफलम्, अन्नम्}

मन्त्रे इष्टकायाः प्रार्थनाप्रसङ्गे पठितमिदं पदं सायणेनान्न-वाचकमिति सूचितम् ।

{1} "अन्वित्या अन्नेन । अन्वितिरामति इति श्रुतेः ।" {सा० 16/2}

{2} "अन्वेति देहमनुगच्छतीत्यन्वितिरन्नम् ।" {म०}

अत्र महीधरस्य व्युत्पत्तिः स्पष्टार्था ।

15.6.5. सन्धि: {अन्नम्}

सायणेन पदमिदं चान्नवाचकं निर्दिष्टम् ।

{1} "सम्यक् बलादिकं धीयते स्मिति सधिरन्नम् ।" {सा० 16/2}

{2} "सम्यग्बलादिकं धीयते स्मिन्निति सधिरन्नम् ।" {म०}

अत्रोभयो-व्याख्यानं समानम् ।

15.6.6. प्रतिधि: {अन्नम्}

सायणेन पदमिदमन्नवाचकमुक्तम् ।

{1} "प्रतिधीयते स्मिन्निति प्रतिधिरन्नम् ।" {सा० 16/2}

महीधरेण स एवार्थ उक्तः ।

15.6.7. विष्टम्भ: {अन्नम्}

इदमन्नवाचकं सायणेनोक्तम् ।

{1} "देहादिविष्टम्भनिमित्तत्वात् विष्टम्भो न्नम् ।" {सा० 16/2}

{2} "विष्टम्भेन देहं विष्टम्भयतीति विष्टम्भो न्नम् ।" {म०}

15.6.8. प्रवा {अन्नम्}

पदमिदं सायणेनान्नवाचकमुक्तम् ।

{1} "प्रवाप्यत इति प्रवान्नम् ।" {सा० 16/2}

{2} "प्रकर्षेण वाति देहं गच्छतीति प्रवान्नम् ।" {म०}

अत्र महीधरस्य व्याख्यानं स्पष्टार्थतया विशिष्टम् ।

15.6.9. अनुया {अन्नम्}

इदं पदं सायणेनान्नवाचकं सूचितम् ।

{1} "देहान्तर्गतद्वारा प्रतिनाडीरन्वीयते नुगच्छती ।" {सा० 16/2}

{2} "देहान्तर्गतद्वासप्ततिनाडीभिरनुयाति आप्नोति देहमित्यनुयान्नम् तया । तृतीयैकवचने "आतो धातोः" इत्यालोपः ।" {म०}

15.6.10. उशिक् {अन्नम्}

इदमन्नवाचकं पदमिति सायणः ।

{1} "सर्वैः काम्यमानत्वादुशमन्नं तेन ।" {सा०}

{2} "उश्यते सर्वैः काम्यत इत्युशिगन्नम् ।" {उ०}

15.6.11. प्रकेतः {अन्नम्}

सायणेन पदमेतदन्नवाचकमुक्तम् ।

{1} "प्रकर्षेण कं सुखयते अन्नेनेति केतमन्नम् ।" {सा० 16/2}

{2} "प्रकेतेन प्रकर्षेण कं सुखमीयते अनेनेति प्रकेतमन्नम्।" {म०}

15.7.1. तन्तुः {अन्नम्}

इदमन्नवाचकं पदं सायणादया आहुः ।

(1) "तन्यते विस्तार्यते इति तन्तुरन्नम् ।" (सा० 16/2)

15.7.2. संसर्पः (अन्नम्)

इदमन्नवाचकं पदमस्ति ।

(1) "संसृप्यते गम्यते इतस्ततो पदार्थसंसर्पो ऽन्नज्जेन ।"
(सा० 16/2)

(2) "सम्यक् सर्पति प्रसरति इदेहे इति संसर्पो ऽन्नम् ।" (उ०)

15.7.3. उत्तमम् (अन्नम्)

अन्नगुणवाचकं विशेषणम् ।

(1) "उत्तमेनोत्कृष्टेनान्नेन" (सा० 16/2)

(2) "उत्तमेन उद्गतं तमो यस्माद्यद्वोत्तमेनोत्कृष्टान्नेन)
(म०)

15.7.4. वयोधा (अन्नम्)

इदमन्नवाचकं पदमस्ति ।

(1) "वयः शरीरावस्था मेधते पोषयतीति वयोधो ऽन्नम् ।"
(सा० 16/2)

(2) "वयो दधाति पुष्णातीति वयोधा अन्नम् ।" (म०)

15.7.5. अभिजित् (अन्नम्)

(1) "सर्वजयहेतुरन्नमभिजित् ।" (सा० 16/2)

(2) "अभि सर्वतो जीयते येनेत्यभिजित् सर्वजयहेतुरन्नम्" (म०)

15.8.1. प्रतिपत् {अन्नम्}

अन्नवाचकं पदम् ।

{1} "येन जीवनं प्रतिपद्यत इति प्रतिपदन्नम् ।" {सा० 16/2}

{2} "प्रतिपद्यते जीवनमनेनेति प्रतिपदन्नम् ।" {म०}

15.8.2. अनुपत् {अनुपत्}

अन्नवाचकं पदम् ।

{1} "प्रतिदिवसमनुपद्यत इति अनुपदन्नम् ।" {सा० 16/2}

{2} "प्रतिदिनमनुपद्यते नुपदन्नमसि ।" {म०}

15.8.3. संपत् {अन्नम्}

इदमन्नवाचकं पदम् ।

{1} "अन्नं वै सम्पदिति श्रुतिः ।" {सा० 16/2}

{2} "संपदन्नमसि" {म०}

15.9.1. त्रिवृत् {अन्नम्}

अन्नवाचकं पदम् ।

{1} "त्रिधा वर्तत इति त्रिवृत् अन्नम् ।" {सा० 16/2}

{2} "त्रिवृदसि त्रिगुणासि । अन्नं हि त्रिगुणम् ।" {उ०}

{3} "कृषिवृष्टिबीजरूपेण त्रिगुणत्वात् त्रिधा वर्तत इति त्रिवृदन्नम् ।" {म०}

महीधरभाष्ये अन्नस्य त्रिगुणत्वं स्पष्टं निर्दिष्टमिति विशेषः-।

15.9.2. प्रवृत् (अन्नम्)

अन्नवाचकं पदम् ।

(1) "प्रकर्षेण प्रवर्तत इति प्रवृत् अन्नम् ।" (सा० 16/2)

(2) "प्रवृणोति भूतानीति प्रवृदन्नम् ।" (उ०)

15.9.3. विवृत् (अन्नम्)

अन्नवाचकं पदम् ।

(1) "विशेषेण वर्तत इति विवृदन्नम् ।" (सा० 16/2)

(2) "विशेषेण वर्तते भूतेषु इति विवृदन्नम् ।" (क्रम०)

15.9.4. सवृत् (अन्नम्)

अन्नवाचकं पदम् ।

(1) "समेन वर्तत इति सवृत् अन्नम् ।" (सा० 16/2)

(2) "सह वर्तति सवृदसि सवृते न्नाय।" (म०)

15.9.5. आक्रमः (अन्नम्)

अन्नवाचकं पदम् ।

(1) "क्षुधमाक्रामतीति आक्रमो न्नम् ।" (सा० 16/2)

(2) "आक्रामति पराभवति क्षुधामित्याक्रमो न्नम् ।" (म०)

15.9.6. संक्रमः (अन्नम्)

अन्नवाचकं पदम् ।

(1) "देहस्य सर्वावयवत्वात् संक्रमत् इति संक्रमो न्नम् ।"
(सा० 16/2)

{2} "देहे संक्रामतीति संक्रमो न्नं त्वं संक्रमो सि ।" {म0}

15.9.7. उत्क्रमः {अन्नम्}

अन्नवाचकं पदम् ।

{1} "अपत्योत्पत्त्यर्थन्च तादृग्रूपेणोत्क्रामन्तीत्युत्क्रमो न्नम् ।" {सा0 16/2}

{2} "सन्तानोत्पत्यै बीजरूपेण परिणम्योत्क्रामतीत्युत्क्रमो न्नम्।" {म0}

15.9.8. उत्क्रान्तिः {अन्नम्}

अन्नवाचकं पदम् ।

{1} "उत्क्रान्तिरुत्कृष्टं गमनं यस्यान्नस्य ।" {सा0 16/2}

{2} "उत्कृष्टा क्रान्तिर्गमनं यस्येत्युत्क्रान्तिरन्नम् ।" {म0}

15.10.1. राज्ञी {प्राची दिक्}

सायणभाष्ये राजी इति पाठो वगम्यते यस्यार्थः प्राची दिक् इति सायणेनोक्तः ।

{1} "हे इष्टके, राजी राजमाना या प्राची दिक् त्वं तद्रूपासि ।" {सा0 16/3}

उव्वटेन ईश्वरी इत्यर्थश्चोक्तः ।

{2} "राजृ दीप्तौ" ईश्वरी असि । प्राची च दिक् ।" {उ0}

{2} "हे इष्टके, राज्ञी राजमाना प्राची पूर्वादिक् ।" {म0}

15.11.1. विराट् {दिक्}

दक्षिणाया दिशो विशेषणतया मन्त्रे पदमिदं प्रयुक्तं दृश्यते ।

15.11.6. उक्थम् {सामानि}

पदमिदं सामविशेषवाचकमिति उव्वटाद्यैर्निर्दिष्टम् ।

{1} "उक्थानि सामानि" {उ0}

15.13.4. निष्केवल्यम् {शस्त्रम्}

भाष्यकारैः सायणाद्यैः पदमिदं शस्त्रवाचकं निर्दिष्टम् ।

{1} "अभित्वशूरनोनुमत्यादिकं ~~शस्त्र~~शस्त्रं निष्केवल्यम् ।" {उ0}

{2} "निष्केवल्यं शस्त्रम् ।" {म0}

15.14.2. त्रिणवत्रयस्त्रिंशौ स्तोमौ {मन्त्रप्रकारः}

पदमिदं स्तोमविशेषवाचकम् ।

15.14.3. शाक्वरं साम {मन्त्रविशेषः}

इदं सामविशेषवाचकं पदमस्ति ।

15.14.4. रैवतं साम {मन्त्रविशेषः}

सामविशेषो यम् ।

15.15.1. हरिकेशः {इष्टकाः/देवता, अग्निः}

पदमिदमग्निवाचकमत्र शिखास्थानीयानामिष्टकानां कृते प्रयुक्त-मिति सायणभाष्यादवगम्यते । पदेनानेनाग्नेर्ज्वालाविशेषः सूच्यते ।

{1} "हिरण्यवर्णा केशमाना ज्वाला यस्यासौ हरिकेशः ।"
{सा0 16/5}

{2} "हरिकेशश्च हरितज्वालः सुवर्णवर्णार्चिरिति यावत् ।" {उ0}

§3§ "हरिकेशः हरयो हरितवर्णाः कनकवर्णाः केशाः केशतमा ज्वाला यस्य ।" §म0§

15.15.2. सूर्यरश्मिः §इष्टका:देवता, अग्निः§

इदमपि पदं वह्नेः दीप्तिविशेषसूचकमिष्टकासु प्रयुक्तमिति सायणेनोक्तम् ।

§1§ "सूर्यरश्मय इव रश्मयो यस्यासौ सूर्यरश्मिः । एवम्भूतो यो यमिष्टकाख्यो ग्निः ।" §सा0 16/4§

§2§ "सूर्यरश्मिश्च सूर्यस्यैवाग्नेः रश्मयः ।" §उ0§

§3§ "सूर्यस्येव रश्मयः किरणा यस्य "सूर्यस्येव लग्ने रश्मयः" इति श्रुतेः ।" §म0§

15.15.3. रथगृत्सः §इष्टका§

इष्टकार्थे प्रयुक्तमिदं पदं कमपि रथयुद्धकुशलं सूचयति ।

§1§ "रथगृत्सो मेधावी रथयुद्धकुशल इत्यर्थः ।" §सा0 16/4§

§2§ "रथगृत्सश्च रथे वस्थितो गृत्सः मेधावी । गृणतेः स्तुतिकर्मणः रथयुद्धकुशल इत्यर्थः ।" §उ0§

§3§ "रथे गृत्सो मेधावी कुशलो रथगृत्सः "गृत्सो मेधावी गृणातेः स्तुतिकर्मणः ।" इति यास्कोक्तेः ।" §म0§

15.15.4. रथौजाः §इष्टका§

इष्टकार्थे प्रयुक्तं पदमिदं कस्यापि रथिनो विशेषं सूचयति ।

§1§ "रथे ओजो बलं यस्य स रथौजाः ।" §सा0§

§2§ "रथे ओजो स्यास्ति रथौजाः ।" §उ0§

§3§ "रथे ओजस्तेजो यस्य स रथौजाः । रथयुद्धकुशल इत्यर्थः ।" §म0§

15.15.11 दङ्क्ष्णवः पशवः (व्याघ्रादयः, देवतासं०)

पुरोवर्तिवह्नेर्हेतिविशेषरूपाणां पशूनां वाचकम् ।

(1) "दंक्ष्णवः पशवः दंशनशीला व्याघ्रादयः ।" (सा० 16/4)

(2) "दंक्ष्णवः दशनशीलाः पशवः ।" (उ०)

15.16.6. यातुधाना: (यज्ञबाधकाः)

सायणेन पदमिदं रक्षोजातिविशेषवाचकं निर्दिष्टम् ।

(1) "यातुधाना रक्षांसि चेत्यवान्तरजातिभेदो वगन्तव्यः ।"

(सा० 16/4)

"यातुधाराः क्रूराः"

(2) "क्रूरा यातुधारास्तीक्ष्णहेतिरूपाः ।" (म०)

15,16.7 रक्षांसि (यज्ञबाधकाः)

"रक्षांस्यतिक्रूराणि" इति वाक्येन सायणो रक्षःस्वरूपं निर्दिशति ।

(1) "अतिक्रूराणि रक्षांस्यतितीक्ष्णहेतिस्वरूपाणि ।" (म०)

15.27.4. भरतः (ऋत्विक्)

सायणादिभिरस्य पदस्य ऋत्विगादिवाचकत्वमुक्तम् ।

(1) "भारतेभ्यः यज्ञभरणकुशलयजमानेभ्यः ।" (सा० 11/5)

(2) "भरतेभ्यः ऋत्विग्भ्यो र्थाय ।" (उ०)

"भरतेभ्यः ऋषिभ्यःसकाशात् । ऋत्विग्यजमानेभ्यो वा ।"

(उ०)

(3) "भरता इति ऋत्विङ्नामसु पठितम् ।" (म०)

15.30.3. इडस्पदम् (अग्निस्थानम्)

इदमग्नेः स्थानसूचकं पदमस्ति ।

(1) "इलस्य पदे पृथिव्याः यथावद्या स्थाने" (सा० 16/5)

(2) "यजमानानां इडायाश्च पदे कर्मार्थं समिध्यसे ।"
"यद्वा इडायाः पृथिव्याः पदे उत्तरवेदौ ।" (उ०)

(3) "इडः इडायाः गोः पृथिव्या वा पदे स्थाने उत्तर-वेद्याम् ।" (म०)

15.34.1. सुब्रह्मा

इदं यज्ञस्य ब्रह्मोपेतत्वेन पूर्णत्वसूचकं विशेषणमस्ति ।

(1) "शोभन ऋत्विग्रूपो ब्रह्मा यस्यासौ शोभनमन्त्रो वा ।" (सा० 16/5)

(2) "सुब्रह्मग्रहणं सर्वर्त्विगुपलक्षणार्थम् । शोभनर्त्विग्यज्ञः ।" (म०उ०)

(3) "सुब्रह्मा ब्रह्मपदं सर्वर्त्विगुपलक्षणम् । शोभनो ब्रह्मा ऋत्विग्यत्र शुभर्त्विग्युक्तः ।" (म०)

अत्र कश्चर्त्विगर्थे ब्रह्मपदस्य प्रयोगः सर्वैः स्वीकृत इति साम्यम् । सायणेन मन्त्रस्यापि ग्रहणं कल्पितमिति विशेषः ।

15.34.2. सुशमी (कर्म, यज्ञः)

(1) "सुशोभी शोभनकर्मवान् ।" (सा० 16/5)

(2) "शमीति कर्मनाम । शोभनानि कर्माणि यस्मिन् यज्ञे स सुशमी ।" (उ०)

15.44.1. ओहः (स्तोमः)

इदं स्तोमविशेषवाचकं पदमस्ति ।

(1) "ओहैः फलप्रापकस्तोमैः ।" (सा० 16/5)

15.45.1. दक्षः {यज्ञः}

इदं यज्ञस्य फलदत्वसूचकं विशेषणमस्ति ।

{1} "दक्षस्य स्वफलप्रदानसमर्थस्य ।" {सा० 16/5}

{2} "दक्षस्य तस्यैव समृद्धस्य । समृद्धः संकल्पो दक्ष उच्यते ।" {उ०}

{3} "दक्षस्य समृद्धस्य स्वफलदानसमर्थस्येति वा ।" {म०}

15.49.3. तीर्णबर्हिः {अग्निः}

अग्नेर्विशेषणम् ।

{1} "तीर्णबर्हिषः प्रसारितयज्ञम् ।" {सा० 16/5}

{2} "तीर्णबर्हिषम् सर्वैर्यज्ञसाधनैः सम्पादितसुखमित्यर्थः ।" {उ०}

{3} "यमग्निं स्तीर्णबर्हिषमाहुर्वदन्ति स्तीर्णमाच्छादितं बर्हिर्यत्रतम् बर्हिर्यज्ञसाधनोपलक्षकम् ।" {म०}

"यज्ञसाधनसहितमित्यर्थः ।

15.51.4. पृतन्यवः {यज्ञबाधकाः}

युद्धकामानां दुष्टानां पदमेतदवाचकमित्युव्वटादया आहुः ।

{1} "पृतन्यवः पाप्मानः ।" {उ०}

{2} "ये पृतन्यवः युद्धेप्सवः पाप्मानः ।" {म०}

"पृतनां सेनां युद्धं वा इच्छन्ति पृतन्यन्ति "सुप आत्मनः क्यच्" {पा० 3/1/8} "कव्यध्वा०" {पा० 7/4/39} इत्यादिना पृतनायाष्टिलोपः "ततः क्यांच्छन्दसि" {पा० 3/2/170} इत्युप्रत्ययः ।" {म०}

15.54.1. इष्टापूर्ते {यज्ञकर्म}

यज्ञसम्बद्धकर्मवाचकं पदम् ।

(1) "इष्टापूर्ते श्रौतस्मार्ते कर्मणि ।" (सा० 16/6)

15.62.1. संवरणम् (अरणिकाष्ठम्)

पदमिदमरणिकाष्ठवाचकं सायणेन निर्दिष्टम् ।

(1) "संध्रियते अस्मिन्नग्निरिति संवरणमग्निकाष्ठमुच्यते ।"
(सा० 16/6)

अन्येषामपि भाष्यकाराणां स एवार्थः सम्मतः ।

द्वितीयाध्यायः

देवतासम्बद्धपदविमर्शः

देवतासम्बद्धपदविमर्शः

1.1.4. देवः {इन्द्रः}

"देव" इत्यस्य पदस्योव्वटेन दानादिगुणयुक्त इत्यर्थो दर्शितः । परमत्र कमभिलक्ष्य पदं प्रयुक्तमिति नोट्टङ्कितम् । महीधरेणास्य इन्द्रार्थे प्रयोगः सूचितः ।

{1} "देवो दानादिगुणयुक्तः "देवो दानाद्द्योतनाद्दीपनाद्वा" इति यास्कः ।" {उ०}

{2} "गोसम्बन्धि दधिरूपं हविरैन्द्रं माहेन्द्रं वा भवतीति देवो व इति मन्त्रस्येन्द्रो देवता । - - - - -

देः द्योतमानः परमेश्वरः । {म०}

{3} "देवः सर्वेषां सुखानां दाता सर्वविद्याद्योतकः । देवो दानाद्वा दीपनाद्वा द्योतनाद्वा द्युस्थाने भवतीति वा यो देवः सा देवता।" {दयानन्दः}

{4} "द्योतनार्थस्य दीव्यतिधातोर्देव इति रूपम् ।" {सा०}

1.1.5. सविता {इन्द्रः}

पदमिदं मन्त्रे देवशब्दमनुवर्तते । अस्य व्युत्पत्तिरस्य एवार्थ उव्वटेन निर्दिष्टः । महीधरेणास्य व्युत्पत्तिरप्यस्ति निर्दिष्टा । पदमिदं इन्द्रमभिलक्ष्य प्रयुक्तमस्ति इति देवशब्दव्याख्यानात्पूर्वं तेन सूचितम् ।

{1} "सविता सर्वस्य प्रसविता ।" {उ०}

{2} "षू प्रेरणे । सुवति स्वस्वव्यापारे प्रेरयतीति सविता ।" {म०}

उव्वटकृते व्याख्याने सवितृपदस्य सर्वप्रसवहेतुत्वं महीधरकृते तु प्रेरकत्वं निर्दिष्टमिति भेदः । दयानन्देनास्य सर्वजगदुत्पादकः सकलैश्वर्यवान् जगदीश्वरः इत्यर्थो निर्दिष्टः ।

§3§ "षू प्रेरण इति धातोः सवितेति । सो यं सविता देवः स्वव्यापारे प्रेरकः परमेश्वरः ।" §सायणः§

<u>1.8.1. धूः §अग्निः§</u>

"धूरसी"ति मन्त्रान्तर्गतं पदमिदं धुरमुद्दिश्य तत्र स्थितस्याग्नेः स्तवाय प्रयुज्यते । अनेन च तस्याग्नेयज्ञबाधकशमनशक्तिः प्रस्तूयत इति भाष्यकृताभाशयः ।

§1§ "हविर्ग्रहीष्यन् धुर्यमग्निं ब्रवीति । धूरसि । धूर्वतिर्वधकर्मणः । धूर्वणक्रियानिमित्तं हि ते नाम ।" §उ0§

§2§ "व्रीहिरूपहविर्धारकशकटसम्बन्धिनो युगस्य बलीवर्दवहनप्रदेशो कश्चिद् हिंसको ग्निः शास्त्रदृष्टो स्ति तं प्रार्थयते । "अग्निर्वा एष धुर्यस्तमेतदत्येष्यन्भवति" । इति श्रुतेः । हे वह्ने, त्वं धूरसि हिंसको सि ।" §म0§

दयानन्देनास्य सर्वदोषनाशको न्धकारनाशको वा इत्यर्थो निरूपितः ।

<u>1.8.2. वह्नितमः §अग्निः§</u>

इदं पदम् अनस उपस्तम्भनमुद्दिश्य मन्त्रे प्रयुक्तमस्ति । अस्यार्थ उव्वटेनातीव वोढा इति निर्दिष्टः । महीधरेणापि स एवार्थः व्युत्पत्तिपूर्वं दर्शितः ।

§1§ "देवानामसि । अन उच्यते । देवानामग्न्यादीनां त्वं भवसि। वह्नितमं वह्निर्वोढा । "वह प्रापणे" इत्यस्य रूपम् । वोढृतमम् ।" §उ0§

﴾2﴿ "हे शकट, त्वं देवानां सम्बन्धि असि भवसि । किंभूतं वह्नितमम् "वह प्रापणे" । वहतीति वह्नि अतिशयेन वह्नि वह्नितमम् । व्रीहिरूपस्य हविषो ऽतिशयेन प्रापकम् ।" ﴾म०﴿

﴾3﴿ दयानन्दस्त्वस्य सुखप्रापकत्वमर्थं दर्शयति – "वहति प्रापयति यथायोग्यं सुखानि स वह्निः सो ऽतिशयितस्तम् ।" ﴾द०﴿

1.10.1. अश्विनौ ﴾देवभिषजौ﴿

"देवस्य त्वा सवितु॰" रित्यादिमन्त्रे प्रयुक्तं "अश्विनोः" इति पदं यज्ञक्रियायां देवानां सम्बन्धं सूचयति । तथा चोव्वटेनास्य देवानामध्वर्यू इत्यर्थो ऽस्ति दर्शितः । स एवार्थो महीधरेणाप्यस्ति निर्दिष्टः । तत्र बाह्वो-रश्विभ्यां सम्बन्धोपादाने बीजं च युक्तिपूर्वं दर्शितमिति विशेषः ।

﴾1﴿ "अश्विनोर्बाहुभ्याम्, न स्वाभ्याम् । अश्विनौ हि देवानाम-ध्वर्यू ।" ﴾उ०﴿

﴾2﴿ "अश्विनौ हि देवानामध्वर्यू । पूषा हि देवानां भागधुक् । अतो ग्रहणसाधनयोः स्वबाह्वोरश्विबाहुभावना कार्या । --- सर्वात्मकस्या-ग्नेर्हविस्ताद्दृशं मनुष्येण कथं गृहीतुं शक्यमिति सवित्रानुज्ञातो ऽश्विबाहुभ्यां पूष्णो हस्ताभ्यां गृह्णामीत्यर्थः ।" ﴾म०﴿

﴾3﴿ दयानन्देनास्य सूर्याचन्द्रमसोरित्यर्थो ऽप्यस्ति दर्शितः – "सूर्याचन्द्रमसोरध्वर्योर्वा सूर्याचन्द्रमसावित्येके ।"

1.10.2. पूषा ﴾देवता﴿

अत्र मन्त्रे "पूष्णो हस्ताभ्या"मित्यशे पूषन्शब्दो वर्तते । तस्योभा-भ्यामेव भाष्यकाराभ्यां देवभागपूरकः कश्चिद्देवविशेष इत्यर्थः सूचितः ।

﴾1﴿ "पूष्णो हस्ताभ्यां न स्वाभ्याम् । पूषा हि देवानां भागधुक् भागपूरकः ।" ﴾उ०﴿

दयानन्देनास्य "पुष्टिकर्तुः प्राणस्य" इत्यर्थो दर्शितः ।

§2§ "पूषा वै देवानां भाग उ भूषणं पाणिभ्यामभिनिदधाति तस्मादाह पूष्णो हस्ताभ्यामितीति । तदिदं तृतीयभागव्याख्यानम् । पूषाख्यो देवः स्वकीयपाणिभ्यां देवानामाभरणं धारणोचिते तत्र तत्र शरीरभागे भूषणं स्थापयति ।" §सायणः§

1.12.1. अच्छिद्रं पवित्रम् §वायुः§

"उत्पुनामि अच्छिद्रेण पवित्रेण" इत्यस्मिन् मन्त्रभागे प्रयुक्तो यं पद-द्वयसमूहः कस्यापि शुद्धिहेतोः पदार्थस्य संकेतं करोति । स च वायुरिति भाष्य-कृतामभिमतम् ।

§1§ "अच्छिद्रेण पवित्रेण । "यो वा अयं पवत एषो च्छिद्रं पवित्रम्" इति श्रुतिः । वायोः सर्वगतत्वादच्छिद्रत्वम् ।

§2§ "अच्छिद्रेण छिद्रहीनेन पवित्रेण शोधकेन वायुरूपेण ।" §म०§

उव्वटेन अच्छिद्रत्वस्य बीजोपस्थापनाय यत्नो विहित इति विशेषः।

एतद्व्याख्याने दयानन्दभाष्ये प्रमाद एव दृश्यते ।

1.12.2. अग्रेगुवः §आपः§

देवीत्वेन भावितानामपां विशेषणत्वेन पदमिदं मन्त्रे दृश्यते । "देवी-रापो अग्रेगुवः" इति । तस्य उव्वटेन महीधरेण च अग्रे गमनशीला इत्यर्थो व्यु-त्पत्तिमार्गेण दर्शितः ।

§1§ "अग्रे याः समुद्रं गच्छन्तीत्यग्रेगुवः ।" §उ०§

§2§ "अग्रे गच्छन्ति इत्यग्रेगुवः पुरतो निम्नदेशं प्रति गमनशीलाः ।" §म०§

दयानन्देन अस्य पदस्य "अग्रे समुद्रे अन्तरिक्षे गच्छन्तीति ताः" इत्यर्थो

निरूपितः । अत्र "अन्तरिक्षे" इत्यर्थो ~~नीकन~~ नवीनः प्रतीयते ।

1.12.3. अग्रेपुवः ‖जलम्‖

अपां विशेषणत्वेन प्रयुक्तस्यास्य पदस्य उव्वटेन अग्रे सोमस्य पानकर्त्र्यः इत्यर्थः सूचितः । महीधरेण एतेन सहान्यो प्यर्थः प्रदर्शितः शोधकरूपः ।

‖1‖ "अग्रे प्रथमं सोमस्य राज्ञो भक्षयन्तीत्यग्रेपुवः ।" ‖उ0‖

‖2‖ "अग्रे पुनन्तीत्यग्रेपुवः । अग्रे यस्मिन् पूर्वभागे गच्छन्ति तस्मिन्नपहतिवारणेन शोधनशीलाः । यद्वा अग्रे पिबन्तीत्यग्रेपुवः । प्रथमं सोमरसस्य पानकर्त्र्यः ।" ‖म0‖

दयानन्देन "प्रथमां पृथिवीस्थसोमौषधिं सेविकाः" इत्यर्थो दर्शितः । तत्र महीधरोक्तार्थसाम्यं दृश्यते ।

1.16.2. हिरण्यपाणिः ‖सविता‖

सवितृपदस्य विशेषणत्वेन मन्त्रे पदमिदं प्रयुक्तमस्ति । अस्य पदस्य प्रयोगबीजतया बह्वृचश्रुतिरुव्वटेन अस्त्युद्धृता । महीधरेण एतद्भिन्नो प्यर्थः प्रदर्शितः ।

‖1‖ "हिरण्यपाणिः । तत् सवित्रे प्राशित्रं प्रजह्रुः । तस्य पाणी परिचिच्छेद । तस्मै हिरण्मयौ प्रतिदधुः । तस्माद्धिरण्यपाणिरित्युच्यते" इति बह्वृचानां श्रुतिः ।" ‖उ0‖

‖2‖ "पात्रीप्रक्षेपसमये भूमौ पतनं माभूदिति सवितुर्ग्रहणं प्रार्थ्यते । किं भूतः सविता । हिरण्यपाणिर्हिरण्ययुक्तावङ्गुलीयाद्याभरणयुक्तौ पाणी यस्य स हिरण्यपाणिः । यद्वा दैत्यैः प्राशित्रप्रहारेण छिन्नौ सवितुः पाणी देवैर्हिरण्मयौ कृताविति सवितुर्हिरण्यपाणित्वमिति बह्वृचश्रुतौ कथा ।" ‖म0‖

‖3‖ दयानन्दस्तु हिरण्यपाणिरित्यस्य ज्योतिः प्रसारक इत्यर्थमाह- "हिरण्यं ज्योतिः पाणिर्हस्तः हिरण्यव्यवहारो वा यस्य सः ।"

1.17.2. आमात् ‖अग्निः‖

मन्त्रे प्रयुक्तेषु अग्निभेदसूचकेषु पदेष्वेकमिदं पदमस्ति । मन्त्रेऽस्मिन् अग्नेः आमात्, क्रव्यात्, देवयद् इत्येतानि त्रीणि रूपाणि सन्ति दर्शितानि । तत्रामस्य अन्नाद्यस्य पाकद्वारा संस्कारमापाद्यो सेव्यत्वं यः करोति स आमादित्यवगम्यते ।

‖1‖ "अग्निमामादं आममत्तीत्यामात् तम् । येनेदं मनुष्याः अपक्वमन्नमश्नन्ति स उच्यते ।" ‖उ0‖

‖2‖ "तत्र त्रयो ग्नयः सन्ति । एकः आमात् आममपक्वमत्तीत्यामाल्लौकिको ग्निः ।" ‖म0‖

1.17.3. क्रव्यात् ‖अग्निः‖

अग्नेस्त्रिषु रूपेषु एकस्य रूपस्य पदमेतत् सूचकमस्ति । अनेन यागयोग्यताहीनः शवदाहोपयुक्तो ग्निः कथ्यते ।

‖1‖ "येन पुरुषं दहन्ति स क्रव्यात् ।" ‖उ0‖

‖2‖ "द्वितीयः क्रव्यात् शवदाहे क्रव्यं मांसं अत्तीति क्रव्यात् चिताग्निः ।" ‖म0‖

‖3‖ "क्रव्यं पक्वमांसमत्ति तस्मान्निर्गतस्तम् ।" ‖दया0‖

1.17.4. देवयद् ‖अग्निः‖

अग्निभेदेषु त्रिष्वेकं यागयोग्यं अग्निरूपं पदमेतत् सूचयति ।

‖1‖ "देवा यस्मिन्निज्यन्ते स देवयद् ।" ‖उ0‖

‖2‖ "देवयज्ञं देवान् विदुषो दिव्यगुणान् यजति संगतान् करोति येन यज्ञेन स देवयद् तम् ।" ‖दया0‖

1.21.2. सविता {यज्ञः}

अस्य पदस्योव्वटेन सवितृत्यदेवतार्थे संस्तरार्थे च प्रयोगः सूचितः । महीधरेण तु देवतार्थ एवास्य प्रयोगो दर्शितः ।

{1} "देवः सविता त्वां श्रपयतु । सविता वा नाके स्थितः । सविता नः संस्तर एव । स इत्याधियज्ञिको यज्ञमधिकृत्य प्रवक्ति ।" {उ0}

{2} "अन्तः प्रेरको वृष्टिहेतुर्वा ।" {दया0}

1.23.1. त्रितः, द्वितः, एकतः {अग्निः}

एतानि पदानि आप्तदेवानां पात्र्यङ्0गुलिप्रक्षालनजलभागवतां नामानि सन्तीति भाष्याभ्यामवगम्यते ।

{1} "पात्र्यङ्0गुलिप्रक्षालनमाप्तेभ्यो निनयति । त्रितायत्वा द्वितायत्वा एकतायत्वा ।" {उ0}

{2} "हे पात्र्यङ्0गुलिप्रक्षालनोदक, त्रिताय त्रितनाम्ने देवाय त्वां निनयामीति शेषः ।" {म0} तथा द्वितायत्वा निनयामि । तथा एकताय त्वा निनयामि । पूर्वं कुतश्चिद्धेतोः भीतो ऽग्निरपः प्राविशत् ततो देवास्तं ज्ञात्वा जगृहुस्तदाऽग्निना वीर्यमप्सु युक्तं तत आप्त्या उत्पन्नास्त्रितद्वितैकतसंज्ञास्ते देवैः सह चरन्तो यज्ञे पात्रीप्रक्षालनजललक्षणं भागं लेभिरे ।" इति श्रुतिकथानुसंधातव्या ।" {म0}

{3} दयानन्दस्तेषां पदानामर्थमन्यप्रकारेण दर्शयति "त्रिताय त्रयाणामग्निकर्महविषां भावाय । - - - - द्विताय द्वयोर्वायुवृष्टिजलशुद्धयोर्भावाय। एकताय एकस्य सुखस्य भावाय ।"

1.27.1. सुक्ष्मा {पृथिवी}

स्फ्येन रेखात्रयनिर्मितादवारा परिगृह्यमाणां वेदरूपां भूमिमुद्दिश्य

पदमिदं प्रयुक्तमस्ति । तस्यार्थश्च पृथिव्याः शोभनत्वमिति भाष्यकृद्भ्यां निर्दिष्टम् । तत् शोभनत्वं कीदृशमित्युव्वटेन नोक्तम्, महीधरेण तु अश्मादिदोषनिवृत्तिरूपं तन्निर्दिष्टमिति ज्ञेयम् । अत्र अश्मादीनां स्थितिवशात्स्वरूपस्य गुणस्य च या हानिः वेदिरूपायाः पृथिव्याः सम्भवति तस्या निवृत्त्या जायमाना स्वरूपस्य गुणस्य च समृद्धिः शोभनत्वमिति भावो व्यज्यते ।

(1) "सुक्ष्मा इति पृथिवीनाम । शोभना पृथिवी त्वमसि ।" (उ०)

(2) "क्ष्मा शोभना भूमिः सुक्ष्मा । अननेनाश्मादिदोषनिवर्तनं भूमेः शोभनत्वम् ।" (म०)

1.27.2. स्योना (पृथिवी)

इदं वेदिरूपां भूमिमुद्दिश्य मन्त्रे प्रयुक्तं पदं पृथिव्याः सुखरूपतां सूचयतीति भाष्यकारावाहतुः ।

(1) "स्योनमिति सुखनाम । सुखनामरूपा च त्वमसि ।" (उ०)

(2) "स्योना सुखरूपासि । स्योनमिति सुखनाम् ।" (म०)

1.28.1. विरप्शिन् (विष्णुः)

सम्बोधनात्मकं पदमिदं विष्णुमुद्दिश्य प्रयुक्तमस्तीति भाष्यकृतावाहुः।

(1) "विरप्शिन् इति आमन्त्रितं महन्नाम । स च विष्णुर्यज्ञवेदित्वमापन्नः स हि त्रिभिर्वेदैर्निर्वर्त्यमानो विविधं रप्सति शब्दं करोति ।" (उ०)

(2) "विरप्शीति महन्नाम । विविधं रपति वेदत्रयरूपेण शब्दं करोतीति विरप्शी । यज्ञो वेदित्वं प्राप्तो विष्णुः संबोध्यते । हे विरप्शिन् विष्णो परमेश्वर त्वं शृणु ।" (म०)

(3) दयानन्देनास्य पदस्याभिधेयतया ईश्वरः मनुष्यश्चैतौ दर्शितौ – "विरप्शिन् महागुणविशिष्टेश्वर वा महैश्वर्यमिच्छुकमनुष्य ।"

2.2.2. भुवपतये[8], भुवनपतये[9], भूतानां पतये[10] [अग्निः]

अग्नेः भ्रातृणां एतानि त्रीणि नामानि भुवपतिः, भुवनपतिः, भूतानां पतिरिति कथानिर्देशपूर्वकं उव्वट-महीधराभ्यां निर्दिष्टानि । तत्र भुव-भुवन-भूत-पदानाम् उव्वटेनैवार्थो निर्दिष्टो न महीधरेणेति विशेषः ।

[1] "भुवपतये स्वाहा । अस्याग्नेर्ये भ्रातरः पूर्वे त्रयो बभूवुः ते वषट्कारभयादिमां पृथिवीं प्राविशन् पृथिवीं प्रविष्टाः । अयं चाग्निः प्रपला-य्याप्सु प्राविविक्षत प्रवेष्टुमैच्छत् । स देवैरानीय स्वाधिकारे नियुज्यमान एवमु-वाच । एतैरग्निभिर्मां परिधत्त त एते परिधयः तेषां चायं भागः क्लृप्तो ग्नी-नाम् । भुवशब्देन मध्यमा व्याहृतिरुच्यते । भुवनशब्देन जगदुच्यते, भूतानामिति शब्देन भूतान्येवोच्यन्ते, तेषां ये धिपतयो ग्नयस्तेभ्यः स्वाहेति सम्बन्धः ।"

[उ०]

[2] "भुवपत्यादयस्त्रयो ग्नेर्भ्रातरः ।" [म०]

[3] "भुवपतये भवन्त्युत्पद्यन्ते । भूतानि यस्मिन् संसारे तस्य पतिस्तस्मै जगदीश्वराय । आहवनीयाख्याग्नये वा ।" "भुवनपतये भुवनानां सर्वेषां लोकानां पतिः पालक ईश्वरः । पालनहेतुर्भौतिको वा तस्मै ।" "भूतानां पतये भूतान्युत्पन्नानि यावन्ति वस्तूनि सन्ति तेषां यः पतिः स्वा-मीश्वर ऐश्वर्यहेतुर्भौतिको वा तस्मै ।" [दया०]

2.3.1. विश्वावसुः[12] गन्धर्वः[13] [गन्धर्वः]

परिधेः रक्षकतया निर्दिष्टो स्त्यत्रायं विश्वावसुनामा गन्धर्वः । तद्-विषये उव्वटेन विशेषतः किञ्चिन्नोक्तम्, महीधरेण व्युत्पत्तिः दर्शिता कथा च संक्षेपतः सूचिते ति विशेषः ।

[1] "गन्धर्वस्त्वा परिधिरुच्यते । गन्धर्वो विश्वावसुस्त्वाम् ।"

[उ०]

{2} "आदौ पश्चात् हे परिधे, विश्वावसुनामा गन्धर्वः त्वां परिदधातु आहवनीयस्य पश्चात् सर्वतः स्थापयतु । विश्वस्मिन् सर्वस्मिन् प्रदेशो वसतीति विश्वावसुः द्युलोकस्थं सोमं रक्षितुं तत्पार्श्वे सर्वत्र गन्धर्वो वसदिति श्रुत्यन्तरकथा ।" {म०}

{3} "गन्धर्वः यो गां पृथिवीं वाणीं वा धरति धारयति वा स गन्धर्वः सूर्यलोकः । विश्वावसुः विश्वं वासयति यः सः ।" {दया०}

2.4.1. वीतिहोत्रः {अग्निः}

अग्निमुद्दिश्य तद्विशेषणतया पदमिदं मन्त्रे ऽत्र दृश्यते । अस्योव्वटेन महीधरेण बहुधा व्युत्पत्तिर्निर्दिष्टा ऽस्ति ।

{1} "वीतिहोत्रम् । वीगतिप्रजननकान्त्यसनखादनेषु । वीतिः अभिलाषः होतृकर्माणि यस्य स वीतिहोत्रः । अथवा विविधा ईतिर्गतिर्होतृप्रशास्त्रादिषु होत्रासु यस्य स वीतिहोत्रः ।" {उ०}

{2} "वीतिहोत्रम् । इण्गतौ "ईतिर्गतिः व्याप्तिः पुत्रपौत्रपशुधनादिभिः समृद्धिरित्यर्थः । वीतये समृद्धये होत्रं होमो यस्य स वीतिहोत्रस्तं यत्र होमे कृते समृद्धिप्राप्तिः स्यादित्यर्थः । यद्वा वीतिरभिलाषो होत्रे होतृकर्मणि यस्य तम् ।" {म०}

महीधरेणाग्नेः समृद्धिमूलत्वं दर्शितमत्रेति विशेषः ।

{3} "वीतिहोत्रम् वीतयो विज्ञापिता होत्राख्या यज्ञा येनेश्वरेण । यद्वा वीतयः प्राप्तिहेतवो होत्राख्या यज्ञक्रिया भवन्ति यस्मात्तं परमेश्वरं भौतिकं वा ।" {दया०}

2.4.2. कविः {अग्निः}

अत्र पदमिदम् अग्निमुद्दिश्य तद्विशेषणतया प्रयुक्तमस्ति । उव्वटेनास्य क्रान्तदर्शन इत्यर्थः साभिप्रायो दर्शितः । महीधरेणापि स एवार्थः पदभेदेन निर्दिष्ट

इति साम्यमस्ति ।

{1} "कवे क्रान्तदर्शन । अतीतानागतविप्रकृष्टविषयं युगपद्दर्शनं यस्य स क्रान्तदर्शनः ।" {उ0}

{2} "अतीतानागत दूरवर्तिपदार्थानां यस्य युगपज्ज्ञानं स कविः ।" {म0}

2.7.1. वाजजित् {अग्निः}

{1} "वाजजित् वाजस्यान्नस्य जेतः ।" {उ0}

अग्निमुद्दिश्य तद्विशेषतया ~~वाजजित्~~ + प्रयुक्तःशब्दः ।

{2} "वाजमन्नं जयतीति वातजित् ।" "वाजजितमन्नमुद्दिश्य जयोपेतम् । अन्नप्रतिबन्धनिवारकमित्यर्थः ।" {म0}

{3} "वाजजित् वाजमन्नं जयति येन सः ।" "वाजजितम् वाजं युद्धं जयति येन तम् ।" {दया0}

दयानन्देन प्रथमम् अन्नादिप्रापक इति, पश्चाच्च युद्धजयसाधनमिति पदस्यार्थौ दर्शितः ।

2.7.2. पितरः {ऋतवः}

{1} "पितरः पालकाः ।" {म0}

{2} "पितृभ्यः पालनहेतुभ्य ऋतुभ्यः ।" {दया0}

2.9.3. द्यावापृथिवी {लोकद्वयदेवते}

{1} "द्यावापृथिवी लोकद्वयदेवते" {म0}

{2} "द्यावापृथिवी अस्मत्प्राप्ते न्यायप्रकाशराज्ये ।" {दया0}

2.9.4. स्विष्टकृत् [देवविशेष:]

[1] "साधु इष्टं करोतीति स्विष्टकृत् ।" [उ0]

[2] "सुष्ठु इष्टं करोतीति स्विष्टकृत् तादृशो भवतु । अडभाव-श्छान्दसः । यद्यस्माभिरिज्यते तत्रदिष्टं सर्वं वैकल्यरहितं करोत्वित्यर्थः ।" [म0]

[3] "स्विष्टकृत् यः शोभनमिष्टं करोति सः ।" [दया0]

2.10.1. इन्द्रः [परमेश्वर:]

[1] "इन्द्रः परमेश्वरः ।" [म0]

[2] "इन्द्रः भौतिकः सूर्यो वायुर्वा ।" [दया0 2/9]

"इन्द्रः परमेश्वरः ।" [दया0 2/10]

2.12.1. सविता [सूर्य:]

[1] "सवितः प्रसवितः ।" [उ0]

[2] "सवितः सकलैश्वर्यविधातर्जगदीश्वर ।" [म0]

2.12.2. बृहस्पतिः [देवानां ब्रह्मा]

[1] "बृहत्या वेदवाण्याः पालकाय" [दयानन्दः]

2.12.3. ब्रह्मा [यज्ञाधिष्ठाता]

[1] "ब्रह्मणे चतुर्वेदाध्ययनेन ब्रह्मत्वाधिकारं प्राप्ताय ।" [दया0]

2.15.1. अग्नीषोमौ [पुरोडाशदेवौ]।

[1] "अग्नीषोमयोः प्रधानदेवतयोः ।" [उ0]

"अग्नीषोमौ प्रधानहविर्भाजौ ।" [उ0]

(2) "अग्नीषोमयोर्द्वितीयपुरोडाशदेवतयोः ।" (म०)

(3) "अग्नीषोमयोः अग्निश्च सोमश्च तयोः प्रसिद्धाग्नि-चन्द्रलोकयोः ।" (दयानन्दः)

उव्वटमहीधराभ्यां अग्निषोमशब्दयोः देवतासूचकत्वं निर्दिष्टम् । दयानन्देन तयोः लोकविशेषवाचकत्वमुक्तमिति वैषम्यं दृश्यते ।

2.16.3. मरुतः (देवविशेषाः)

(1) "अन्तरिक्षस्थाना मरुतः ।" (उ०)

(2) "मरुन्नामकानां देवानाम्" (म०)

(3) "मरुतां वायूनाम् ।" (दयानन्दः)

2.16.6. चक्षुष्पा (अग्निः)

(1) "चक्षुष्पा भवसि स्वरसप्रवृत्त्या ।" (उ०)

(2) "चक्षुः पातीति चक्षुष्पाः । ज्वालयान्धकारं निवर्त्य चक्षुः पालकः ।" (म०)

(3) "चक्षुष्पा चक्षुर्दर्शनं रक्षतीति सः ।" (दया०)

2.18.1. संस्रवभागाः (विश्वेदेवाः)

(1) "संस्रवः भागो येषां ते संस्रवभागा विश्वेदेवाः ।" (उ०)

(2) "विलीनमाज्यं संस्रवः स एव भागो येषां ते संस्रवभागाः ।" (म०)

(3) "विलीनमाज्यं सम्यक् स्रवतीति व्युत्पत्त्या संस्रव इत्युच्यते, स एव भागो येषां विश्वेषां देवानां ते संस्रवभागाः ।" (सा० 2/4/6. पृ० 77)

"ननु विश्वेषां देवानां नास्ति संस्रवभागत्वं किन्तु वस्वादीनामेव । तथा तित्तिरिणोक्तम् - वसवो वै रुद्रा आदित्याः संस्रवभागा इति । नायं

दोषः । विश्वशब्देन वस्वादीनामपि विवक्षितत्वात् । वस्वादीन् प्रकृत्य विश्व-शब्दवाच्यत्वमपि तित्तिरिणोक्तम् । एते हि विश्वेदेवा इति ।" {सायणः - 2/4/4, पृ० 78}

{4} "संप्लवभागाः सम्यक् स्तूयन्ते ये ते संप्लवाः । भज्यन्ते ये ते भागाः । संप्लवाः भागाः येषां ते ।" {दयानन्दः}

दयानन्दीये व्याख्याने वाच्यार्थः स्पष्टं नोदीरितः ।

<u>2.18.2. प्रस्तरेष्ठाः {देवविशेषाः}</u>

{1} "प्रस्तरेष्ठाः प्रस्तरस्थायिनः ।" {उ०}

{2} "प्रस्तरे तिष्ठन्तीति प्रस्तरेष्ठाः प्रस्तरस्थायिनः ।" {म०}

{3} "प्रस्तरेष्ठाः शुभे न्यायविद्यासने तिष्ठन्ति ते ।" {दया०}

दयानन्देन कृतो न्यायविद्यासनरूपो र्थो त्र विशिष्यते, परमेतदर्थस्य प्रामाण्यं कुत इति विमर्शमर्हति ।

<u>2.18.3. परिधेया देवाः {परिधिस्था देवाः}</u>

{1} "परिधेयाः परिधिभवा देवाः ।" {उ०}

{2} "परिधेयाः परितः सर्वतो धातुं धापयितुमर्हाः ।" {दया०}

<u>2.20.1. अदब्धायुः {अग्निः}</u>

{1} "अदब्धायो । दभ्नोतिर्हिंसाकर्मा । आयुरिति मनुष्यनाम । अदब्धः अनवखण्डित आयुर्मनुष्यो यजमानो यस्य स तथोक्तः । तस्य सम्बोधनम् अदब्धायो । यद्वा अग्निरेव अनवखण्डितायुः ।" {उ०}

{2} "अदब्धो नुपहिंसित आयुर्मनुष्यो यजमानो यस्य सो दब्धायुः" {म०}

{3} "दभ्नोतिर्हिंसाकर्मा । आयुरिति मनुष्यनाम । अदब्धमायुरनु-

हिंसितो मनुष्यो यजमानरूपो यस्याग्नेः सो यमदब्धायुः ।" {सायणः 2/5/1, पृ० 78}

{4} "अदब्धायो अदब्धमहिंसितमायुर्यस्मात् तत्सम्बुद्धौ अदब्धा-युर्वा ।" {दया०}

2.20.2. अशीतमः {अग्निः}

{1} "अशीतम, "अश भोजने" । "अशू व्याप्तौ" । एतौ धातू सन्दिह्येते । अशीतम, अतिशयेन भोक्तः । अतिशयेन व्यापक ।" {उ०}

{2} "अश भोजन इति धातुः । अशितम भोक्तृतम । यद्वा अशूङ० व्याप्ताविति धातुः । व्यापकतम ।" {सायणः 2/5/1, पृ० 79}

सायणेन "अशूङ० व्याप्तौ" इति, अन्याभ्याम् "अशू व्याप्तौ" इति पठितम् । इदं वैषम्यरूपम् ।

{4} "अशीतम अश्नुते व्याप्नोति चराचरं यज्ञं सो तिशयितस्तत्-सम्बुद्धौ वा ।" {दयनन्दः}

2.20.7. संवेशपतिः {अग्निः}

{1} "स्त्रीपुंसयोरभिलाषपूर्वकमेकत्र शयनं संवेशः । तस्य पतिः संवेशपतिः तस्मै ।" {उ०}

{2} "स्त्रीपुंसयोरभिलाषपूर्वकमेकत्र शयनं संवेशः । तस्य पतिर्यो-ग्निः तस्मै स्वाहा हविर्दत्तम् ।" {म०}

{3} "संवेशपतये सम्यक् विशन्ति ये ते पृथिव्यादयः पदार्थाः तेषां पतिः पालकस्तस्मै ।" {दयानन्दः}

2.20.8. यशोभगिनी {सरस्वती}

{1} "जीवतः प्रशंसा यशः । भगिनीति सम्बन्धिशब्दः स्व-

सेत्युच्यते ।" [उ0]

[2] "जीवतः पुरुषस्य प्रशंसा यशः तस्य शसो भगिनी वाग्रूपा सरस्वती ।" [म0]

[3] "यशांसि सत्यवचनादीनि कर्माणि भजितुं शीलं यस्यास्तस्यै ।" [दया0]

<u>2.21.2. गातुविदः [देवताः]</u>

[1] "गातुरिति यज्ञनाम । यज्ञविदः ।" [उ0]

[2] "गै शब्दे । गीयते । नानाविधैर्वैदिकशब्दैः प्रतिपाद्यते इति गातुर्यज्ञः तं विदन्ति जानन्तीति गातुविदः । हे गातुविदः यज्ञवेत्तारो देवाः।" [म0]

[3] "गातुविदः गीयते स्तूयते नया सा गातुः स्तुतिस्तस्या विदो वक्तारः ।" [दया0]

<u>2.21.4. मनसस्पतिः [चन्द्रमा]</u>

[1] "हे मनसस्पते, मनसो धिपतिश्चन्द्रमाः ।" [उ0]

[2] "एवं देवान् विसृज्य चन्द्रं प्रत्याह । हे मनसस्पते, मनोधिपश्चन्द्रः । यद्वा देवान् यष्टुं मनसः प्रवर्तकः परमेश्वरः तं प्रत्युच्यते । हे मनसस्पते परमेश्वर ।" [म0]

[3] "हे मनसस्पते देवान् यष्टुमस्मदीयस्य मनसः प्रेरणेन पालक-परमेश्वरः ।" [सायणः 2/5/4, पृ0 80]

उव्वटमहीधराणां मनसस्पतिशब्देन चन्द्रमसो निर्देशः कृतः सायणेन परमेश्वरस्येति वैषम्यम् ।

[4] "मनसः विज्ञानस्य पते पालक ।" [दया0]

2.22.1. दिव्यं नभः (आदित्यः)

(1) "यद्दिव्यं दिवि भवं नभः । नभ इत्यादित्यनाम ।" (उ०)

(2) "दिव्यं नभो आदित्यलक्षणं ज्योतिः तद् गच्छतु आदित्यं प्राप्नोतु ।" (म०)

(3) "नभ इत्यादित्यनामसु पठ्यते । तदुक्तं बर्हिर्दिव्यं द्युलोके वर्तमानं नभो गच्छतु । आदित्यं प्राप्नोतु ।" (सायणः 2/5/5, पृ० 81)

(4) "नभः जलम् । नभ इत्युदकनामसु पठितम् ।" (दया०)

2.24.1. त्वष्टा (देवविशेषः)

(1) "त्वष्टानामको देवः" (सायणः 2/6/1, पृ० 82)

(2) "त्वष्टा त्वक्षति तनूकरोति दुःखानि प्रलये सर्वान् पदार्थान् छिनत्ति वा स जगदीश्वरः ।" (दयानन्दः)

2.26.1. स्वयम्भूः (सूर्यः)

इदं सूर्यस्याकृतकत्वख्यापकं विशेषणमस्ति ।

(1) "स्वयम्भूरसि । अकृतकस्त्वं भवसि ।" (उ०)

(2) "स्वयम्भूरकृतकः स्वयं सिद्धो सि ।" (म०)

(3) "स्वयम्भूः स्वयंभवत्यनादिस्वरूपः ।" (दया०)

2.26.2. श्रेष्ठो रश्मिः (सूर्यः)

(1) "श्रेष्ठः प्रशस्ततमः रश्मिः । सप्त रश्मय आदित्यस्य । तत्र चतसृषु दिक्षु चत्वारो रश्मयः । एको धस्तादेक उपरिष्टात्, मण्डलशरीराहंमानी। हिरण्यगर्भाख्यः पुरुषः सप्तमः श्रेष्ठो रश्मिरिति ।" (उ०)

(2) "श्रेष्ठः प्रशस्यतमो रश्मिः मण्डलशरीराभिमानी हिरण्यगर्भा-

ख्यो सि । सूर्यस्य सप्त रश्मयः सन्ति । चतुर्दिक्षु चत्वारः । एक उपर्येको ध-स्तात् + सप्तमो अण्डलाभिमानी हिरण्यगर्भः पुरुषः स श्रेष्ठः स त्वमसि ।"
§म0§

§3§ "श्रेष्ठः अतिशयेन प्रशस्तः । रश्मिः प्रकाशकः प्रकाशमयो वा ।" §दया0§

2.26.3. वर्चोदाः §सूर्यः§

§1§ "वर्चोदा असि । ब्रह्मवर्चसस्य स्वरसेनैव स्वभावेनैव दातासि।"
§उ0§

§2§ "वर्चोदा असि । तेजसो दाता सि ।" §म0§

§3§ "तेजोवाचिना वर्चः शब्देनापेक्षितः कामः सर्वो प्युपलक्ष्यते । हे सूर्य, त्वं वर्चोदा अपेक्षितफलप्रदो सि ।" §सायण: 2/6/5§

§4§ "वर्चोदाः वर्चो विद्यां दीप्तिं वा ददातीति ।" §दया0§

2.27.1. गृहपतिः §अग्निः§

§1§ "अग्ने गृहपते हे भगवन्नग्ने ।" §उ0§

§2§ "हे गृहपते अस्मदीयगृहस्य पालक, हे अग्ने ।" §म0§

§3§ "गृह्णन्ति स्थापयन्ति पदार्थान् यस्मिन् ब्रह्माण्डे शरीरे निवासार्थे वा गृहे तस्य यः पतिः पालयिता तत्सम्बुद्धौ ।" §दयानन्दः§

2.28.1. व्रतपतिः §अग्निः§

§1§ "अग्ने व्रतपते हे अग्ने व्रतपते ।" §उ0§

§2§ "हे व्रतपते, कर्मपालक ।" §म0§

§3§ "व्रतपते, व्रतस्य कर्मणः पालक ।" §सायण: 2/6/10§

§4§ "व्रतं नियतं यन्न्याय्यं कर्म तत्पतिस्तत्सम्बुद्धौ ।" §दया0§

2.29.1. कव्यवाहनः ‖अग्निः‖

‖1‖ "कवयः क्रान्तदर्शिनाः पितरः तेषां सम्बन्धि हविः कव्यम् । तद्वोढव्यं यस्यायमधिकारः स कव्यवाहनः ।" ‖उ0‖

‖2‖ "कवयः क्रान्तदर्शिनः पितरस्तेषां सम्बन्धि कव्यं हविः । तद्वोढुमधिकारो यस्यास्ति स कव्यवाहनः ।" ‖म0‖

‖3‖ "कुवन्ति शब्दयन्ति सर्वा विद्या ये ते कवयः क्रान्तदर्शिनाः क्रान्तप्रज्ञान्च तेभ्यो हितानि कर्माणि कव्यानि तानि यो वहति प्रापयति तस्मै ।" ‖दया0‖

2.29.2. सोमः ‖देवविशेषः‖

‖1‖ "सोमाय पितृमते स्वाहा ।" ‖उ0‖

अत्र नास्ति सोमशब्दार्थो निर्दिष्टः ।

‖2‖ "तस्मै सोमनामकाय देवाय ।" ‖म0‖

‖3‖ "सोमाय सुवन्त्यैश्वर्याणि प्राप्नुवन्ति यस्मिन् संसारे ।" ‖दया0‖

2.33.1. पुष्करस्रक् ‖कुमारः, अश्विनौ च‖

स्तुतिरूपस्य मन्त्रस्य पितृदैवत्यस्यान्तर्गतं पदमिदं कुमारपदस्य विशेषणमस्ति । एतत्पदं इष्टस्य कुमारस्य रोगहीनत्वं सौन्दर्यं चाश्विनोः समानं सूचयति इति उव्वट-महीधरयोरभिप्रायः । तत्र स्रक्शब्दस्योव्वटेन मुण्डमाला इत्यर्थो दर्शितः ।

‖1‖ "स्रक्शब्देन मुण्डमालोच्यते । पुष्करशब्देन पद्मानि । अश्विनौ पुष्करस्रजौ । अश्विभ्यां पुत्रोपमानं क्रियते ।" ‖उ0‖

‖2‖ "पुष्कराणां पद्मानां स्रग्माला ययोस्तौ पुष्करस्रजौ । अश्विनौ अश्विनीकुमारौ । पुष्करस्रजौ पद्ममालिनौ देवानां भिषजौ तत्तुल्यः कुमारः

पुष्करस्रक् तुम् ।" अश्विसाम्यकथनेन रोगहीनं सुन्दरं च पुत्रमाधत्तोति सूचितम् ।"
§म0§

3.1. अतिथि: §अग्नि:§

अग्नेर्विशेषणतया प्रयुक्तमिदं पदमस्ति ।

§1§ "अतिथिं अतिथिधर्माणम् ।" §उ0§

§2§ "अतिथिं आतिथ्यकर्मणा पूजनीयमग्निम् ।" §म0§

3.2. शोचिष: §अग्नि:§

§1§ "शोचिषे शोचिष्मते दीप्तिमते ज्वलिताय ।" §उ0§

§2§ "शोचिषे शोचिष्मते दीप्तिमते ज्वलिताय ।" §म0§

3.2. जातवेदा: §अग्नि:§

§1§ "अग्नये जातवेदसे जातप्रज्ञानाय ।" §उ0§

§2§ "जातवेदसे जातं वेत्ति वेदयति वा जातवेदास्तस्मै । जातप्रज्ञानाय वा ।" §म0§

3.3. अङ्गिरा: §अग्नि:§

§1§ "हे अङ्गिरः । अङ्गतिर्गत्यर्थः । रो मत्वर्थीयः गमनवत् ।"
§उ0§

§2§ "हे अङ्गिरः, अङ्गतिर्गत्यर्थः । ~~अङ्गिरः~~ अङ्गिगर्गतिरस्यास्तीति अङ्गिरा: ।" §म0§

3.3. यविष्ठ्य: §अग्नि:§

§1§ "यविष्ठ्य युवतम ।" §उ0§

§2§ "हे यविष्ठ्य युवतम,कदाचिदपि स्थविरतारहितेत्यर्थः।" §म0§

3.4. हर्यत §अग्निः§

§1§ "हर्यत । हर्यकान्तौ । हर्यतिः प्रेप्साकर्मा । प्रेप्सावन् ।" §उ0§

§2§ "हे हर्यत, प्रेप्सावन् ।" §म0§

3.5. देवयजनी §पृथिवी§

पृथिव्या विशेषणमिदं पृथिव्याः देवयजनोपयुक्ततां व्यनक्ति ।

§1§ "देवा यस्याभिज्यन्ते इति देवयजनी तस्याः सम्बोधनं क्रियते" §उ0§

§2§ "देवा इज्यन्ते यस्यां पृथिव्यां सा देवयजनी तथाविधे हे पृथिवि ।" §म0§

3.6. गौः §अग्निः§

एतदग्नेर्विशेषणभूतं पदं तस्य व्यापकत्वं गतिमत्त्वं च सूचयति ।

§1§ "अयमग्निः गौः गन्ता ।" §उ0§

§2§ "गच्छतीति गौः यज्ञनिष्पत्तये तत्तद्यजमानगृहेषु गन्ता ।" §म0§

3.6. पृश्निः §अग्निः§

§1§ "पृश्निर्नानारूपः ।" §

§2§ "पृश्निश्चित्रवर्णः । लोहितशुक्लादिबहुविधज्वालोपेतः।" §म0§

3.7. महिषः §अग्निः§

अग्निः पदेनानेन सूच्यते ।

§1§ "महिषः । अग्निर्वै महिषः स हीदं जातो महान् ।" §उ0§

[2] "महि माहात्म्यं यागकर्तृत्वरूपं सनोति ददाति स महिषः ।"
[म०]

3.9.1. ज्योतिः [अग्निः]

[1] "योयमग्निर्देवः स एव ज्योतिर्दृश्यमानज्योतिः स्वरूपम् । यच्चेदं दृश्यमानं ज्योतिः तदेवाग्निर्देवः । देवस्य ज्योतिषश्च कदाचिदप्यवियोगादेकत्वेन प्रतिपादनम् ।" [म०]

3.8.2. पतङ्गः [अग्निः]

[1] "पतङ्गाय पतन् गच्छतीति पतङ्गो ग्निः स ह्यरण्याः पतन् गार्हपत्यभावं गच्छति गार्हपत्यादाहवनीयमित्यादिना तादर्थ्ये चतुर्थी । पतङ्गार्थं धीयते अग्न्यर्थमुच्चार्यत इत्यर्थः ।"एतदुक्तं भवति । सर्वदेवतासम्बन्धिनीभिः स्तुतिभिरग्निरेव स्तूयते । स हि सर्वात्मा ।" [उ०]

[2] "पतन् गच्छतीति पतङ्गः अग्निः । स ह्यरण्योः पतन् गार्हपत्यभावं गच्छति गार्हपत्यात् पतन्नाहवनीयतामित्यादि । सर्वदेवसम्बन्धिनीभिः स्तुतिभिरग्निरेव सर्वात्मत्वात् स्तूयते ।" [म०]

अनेनाग्नेः व्यापकत्वं व्यज्यते ।

3.12.1. दिवः मूर्धा [अग्निः]

[1] "परापररूपेण व्यवस्थितो स्यामृच्यग्निः स्तूयते । अभिनयेन दर्शयति । योयं "अग्निर्मूर्धा दिवः" अहनि आदित्यात्मा द्युलोकस्य मूर्धा भवति।"
[उ०]

[2] "दिवो मूर्धा द्युलोकस्य शिरः समानः । यथा शिरः शरीरस्योपरि वर्तते तथायमग्निरहनि स्वतेजसा आदित्ये प्रविष्टत्वादादित्यरूपेण द्युलोकस्योपरि वर्तते ।" [म०]

3.12. पृथिव्याः पतिः §अग्निः§

§1§ "अयमेव पृथिव्याः पतिः । तापपाकप्रकाशादिभिरयमग्निः सर्वाः प्रजा अनुगृह्णातीत्यभिप्रायः ।" §उ0§

§2§ "तथा पृथिव्याः पतिः पालकः । दाहपाकप्रकाशैर्भूलोकस्थानामुपकारकत्वात् ।" §म0§

3.17.§क§ तनूपाः §अग्निः§

§1§ "हे भगवन्नग्ने यस्त्वं स्वभावत एव अग्निहोत्रिणां तनूपा असि तनूः शरीरं तस्य गोपायिता भवसि ।" §उ0§

§2§ "तनूं पाति पालयतीति तनूपाः । उदराग्नौ सत्यन्ने जीर्णे शरीरपालनम् ।" §म0§

§3§ "यस्तनूः सर्वपदार्थदेहान् पाति रक्षति स जगदीश्वरः । पालनहेतुर्भौतिको वा ।" §य0 भा0§

3.22.§ग§ दोषावस्तः §अग्निः§

§1§ "दोषेति रात्रिनाम । वस निवासे "रात्र्यां वसनशीलो दोषावस्ता तस्य संबोधनं हे दोषावस्तः । अग्नौ ह वै देवा" इत्युपक्रम्य "तौ संगृह्य रात्रिं" प्रविवेश" इति यदनेनेतिहासेनोच्यते तदयं मन्त्रो दृष्टाह दोषावस्तरिति ।"
§उ0§

§2§ "हे दोषावस्तः, हे अग्ने दोषा रात्रिस्तस्यामपि वसति अजस्रं धार्यमाणत्वान्नोपशाम्यतीति दोषावस्ता । यद्वा अग्नौ हे देवाः इत्युपक्रम्य तैः संगृह्य रात्रिं प्रविवेशेतीतिहासेन अग्ने रात्रौ प्रवेश उक्तस्तमयं मन्त्र आह ।"
§म0§

{3} "दोषां रात्रिं वस्ते स्वतेजसाच्छादय निवारयति सो ऽग्निः । दोषेति रात्रिनामसु पठितम् ।" {य० भा०}

3.23. {क} दीदिविम् {अग्निः}

{1} "ऋतस्य दीदिविं सत्यस्य दीपयितारम् ।" {उ०}

{2} "देवयतीति दीदिविः ।" {म०}

{3} "दीदिविम् व्यवहारयन्तम् ।" {य० भा०}

3.24. {ख} सूपायनः {अग्निः}

अग्निं प्रति प्रयुक्तं पदम् ।

{1} "सूपायनः सुखोपगमनो भव ।" {उ०}

{2} "सुखेनोपैतुं शक्यः सूपायनः । सुखेनोपप्राप्तुं शक्यो भव ।" {म०}

{3} "सुष्ठूपगतमयनं ज्ञापापणं यस्मात् सः" {य० भा०}

3.25. {क} {अन्तमः {अग्निः}

इदम् अग्नेर्विशेषणत्वेन प्रयुक्तं पदमस्ति ।

{1} "त्वं नो अन्तमः त्वमस्माकं निकटतमः । अन्तिकशब्दस्य तमप्येतद्रूपम् । ब्रह्मचर्यप्रभृति अग्निमुपासते तदभिप्रायमेतत् । देशविवक्षया वा । संनिकृष्टो ह्यग्निर्विप्रकृष्टा अन्या देवताः ।" {उ०}

{2} "अन्तमः अन्तिकतमः सर्वदा समीपवर्ती भव । "अम् गतौ" भजने शब्दे अमति समीपं प्राप्नोतीत्यम् क्विप् अतिशयितो ऽम् अन्तमः । अम्-शब्दात्तमप् । यद्वान्तिकशब्दात्तमपि पृषोदरादित्वेन साधुः ।" {म०}

{3} "य आत्मा ऽन्तःस्थो निति जीवयति सो ऽतिशयितः ।" {य० भा०}

3.25.§ब§ वरूथ्यः §अग्निः§

इदमग्नेः गृहस्थत्वसूचकं विशेषणमस्ति ।

§1§ "वरूथमिति गृहनाम । वरूथाय हितो वरूथ्यः ।" §उ0§

§2§ "वरूथाय हितो वरूथ्यः तादृशश्च भव । पुत्रादिसमूहो वरूथः। यद्वा वरूथं गृहम् ।" §म0§

§3§ "वरूथ्यः - यो वरूथेषु श्रेष्ठेषु गुणकर्मस्वभावेषु भवः ।" §द0भा0§

3.25.§ग§ वसुः §अग्निः§

अग्नेर्विशेषणमिदमस्ति ।

§1§ "वसुः वासयिता जनानाम् । यद्वा वसु धनम् । तापपाकप्रकाशैरुपकुर्वन्नुपस्कर इव भवसि ।" §उ0§

§2§ "वासयतीति वसुः । जनानां वासयिता ।" §म0§

§3§ "वसन्ति सर्वाणि भूतानि यस्मिन् यो वा सर्वेषु भूतेषु वसति सः ।" §द0 भा0§

3.25.§घ§ वसुश्रवाः §अग्निः§

इदमग्नेर्धनदाने सामर्थ्यसूचकं विशेषणमस्ति ।

§1§ "वसुना धनदानेन यः श्रूयते स वसुश्रवाः । धनदानैरित्यर्थः ।" §उ0§

§2§ "वसुना धनेन श्रवः कीर्तिर्यस्यासौ वसुश्रवाः । धनप्रदो यमिति यस्य कीर्तिरित्यर्थः ।" §म0§

§3§ "वसूनि सर्वाणि श्रवांसि श्रवणानि यस्य सः ।" §द0 भा0§

3.26. {क} शोचिष्ठ {अग्निः}

{1} "शोचिष्ठ शोचिष्मत्तमः शोचिरिति ज्वालानामसु पठितम् ।"
{उ०}

{2} "शोचिरिति ज्वालानाम । शोचिरस्यास्तीति शोचिष्मान् मतुप् । अतिशयेन शोचिष्मान् शोचिष्ठः ।" {म०}

{3} "शोचिष्ठ ~~मिल~~ पवित्रतम ।" {य० भा०}

3.27. {क} इडा {पृथिवी}

{1} "इडा मनोर्दुहिता" {उ०}

{2} "इडा पृथिवी । इडेति पृथिवीनामसु पठितम् ।" {य० भा०}

3.27. {ख} काम्याः {गावः}

{1} "काम्या एतेत्यालभते।इति गामालभते । मनुष्याणां ह्येतासु कामाः प्रविष्टा इति काम्याः ।" {म०}

{2} "काम्याः । काम्यन्त इष्यन्ते ये पदार्थास्ते ।" {य०भा०}

3.27. {ग} कामधरणम् {यज्ञफलम्}

{1} "कामा यस्मिन् ध्रियन्ते तत् कामधरणम् । श्रुतिर्व्याचष्टे अहं वः प्रियो भूयासमिति ।" {उ०}

{2} "कामानां धरणमपेक्षितफलधारकत्वं यदस्ति तत् मपि अनुष्ठातरि भूयात् । युष्मत्प्रसादादहमभीष्टफलस्य धारयिता ~~मे~~ भूयासमित्यर्थः ।" {म०}

{3} "कामधरणं कामानां धरणं स्थानम् ।" {य० भा०}

3.28. {क} सोमानम् {अभिषवणकर्ता}

{1} "सोमानं सोतारं पातारमिति पर्यायाः । केषां सोतारम् ।

सामर्थ्यात् सोमानाम् ।" [उ०]

[2] "सोमानं सोमानामभिषोतारम् ।" [म०]

[3] "सुनोति निष्पादयत्योषधिसारान् विद्यासिद्धीश्च येन तम्।"
[य० भा०]

3.28.[ख] स्वरणम् [यजमानः]

[1] "स्वरणं । स्वृ शब्दोपतापयोः, शब्दयितारम् ।" [उ०]

[2] "स्वरतीति स्वरणः । नन्द्यादित्वात् ल्युः । सोमयागकर्तारं स्तुतिरूपशब्दयुक्तं च धनप्रदानैर्मां कुर्वित्यर्थः ।" [म०]

[3] "स्वरणं सर्वविद्याप्रवक्तारम् ।" [य० भा०]

3.30.[घ] ब्रह्मणस्पते [अग्निः]

[1] "हे ब्रह्मणस्पते, वेदस्य पालकाग्ने" [म०]

[2] "ब्रह्मणस्पते जगदीश्वर ।" [य० भा०]

3.35.[क] सवितुः [आदित्यः]

"तस्य सवितुः सर्वस्य प्रसवदातुः । आदित्यान्तरपुरुषस्य देवस्य हिरण्यगर्भोपाध्यवच्छिन्नस्य वा विज्ञानानन्दस्वभावस्य वा ब्रह्मणः ।" [उ०]

3.35.[ख] भर्गः [तेजोविशेषः]

[1] "भर्गशब्दो वीर्यवचनः । "वरुणाद्ध वा अभिषिषिचानाद्भर्गोऽपचक्राम वीर्यं वै भर्गः" इति श्रुतिः । तेन हि पापं भृज्जति दहति । "भृजी भर्जने" । अथवा भर्गस्तेजोवचनः । यद्वा मण्डलं पुरुषो रश्मय इत्येतत्त्रितयमभिधीयते ।" [उ०]

[2] "भर्गः सर्वपापानां सर्वसंसारस्य च भर्जनसमर्थं तेजः सत्यज्ञाना-

नन्दादिवेदान्तप्रतिपाद्यम् ।" {म०}

{3} "भ्रज्जन्ति पापानि दुःखमूलानि येन तत् ।" {य० भा०}

<u>3.36.{क} दूडभः {रथविशेषणम्}</u>

{1} "दूडभः दुर्दभः । दुरुपसर्गः प्रतिषेधार्थीयः । दभ्नोति-र्वधकर्मा । अवध्यः ।" {उ०}

{2} "दुःखेन दभ्यते दुर्दभः । केनापि सहसा हिंसितुमशक्यः ।" {म०}

<u>3.37.{क} भूर्भुवः स्वः {महाव्याहृतयः}</u>

{1} "हे भगवन्नग्ने, यस्त्वं महाव्याहृत्यात्मकस्तं त्वां याचे ।" {उ०}

{2} "हे अग्ने, भूर्भुवः स्वः त्वं व्याहृत्यादित्रयात्मकः तदर्थभूत-लोकत्रयात्मको वा ।" {म०}

{3} "भूः प्रियस्त्वस्थः प्राणः । भुवः बलनिमित्त उदानः । स्वः सर्वचेष्टानिमित्तो व्यानश्च तैः सह ।" {य० भा०}

<u>3.37.{ख} नर्य {अग्निः,गार्हपत्यः}</u>

{1} "प्रवसन् यजमानः गार्हपत्यमुपतिष्ठते । नर्य, प्रजां मे पाहि । नरेभ्यो हितो नर्यः ।" {उ०}

{2} "नर्य नरेभ्यो हित गार्हपत्य, मे प्रजां पाहि ।" {म०}

<u>3.37.{ग} शंस्य: {अग्निः}</u>

{1} "आहवनीयमुपतिष्ठते । शंस्य "शंसु स्तुतौ" । हे स्तुत्य, पशून्मे पाहि गोपाय ।" {उ०}

§2§ "अनुष्ठातृभिः शंसितुं योग्याहवनीय, मे मम प्रजां पाहि रक्ष।"
§म0§

3.37.§छ§ अथर्य §अग्निः§

§1§ "अक्षिणाग्निमुपतिष्ठते । अथर्य । अतनवान् अथर्यः । "अत सातत्यगमने" । सततं हि दक्षिणाग्निर्गार्हपत्यस्य स्थानं गच्छति ।" §उ0§

§2§ "सततं गार्हपत्यात् स्वस्थानं दक्षिणाग्निर्गच्छति तेनाथर्यः । निपातो यम् ।" §म0§

3.38.§क§ विश्ववेदसम् §अग्निः§

§1§ "सर्वतो धनम् ।" §उ0§

§2§ "विश्ववेदसम् विश्वं वेत्ति वेदयतीति वा विश्ववेदास्तम् । विश्वं वेदो धनं यस्येति वा । सर्वज्ञं सर्वधनं वा ।" §म0§

वि0 – अत्र उव्वटापेक्षया महीधरेण विशेषः पदार्थदर्शनि प्रस्तुतः ।

3.38.§ख§ वसुवित्तमम् §अग्निः§

§1§ "अतिशयेन धनस्य वेदितारम् ।" §उ0§

§2§ "वसुवित्तममस्मदर्थमतिशयेन वसुनो धनस्य वेदितारम् लब्धारम्।"
§म0§

3.40.§क§ पुरीष्यः §अग्निः§

§1§ "यो यमग्निः । पुरीष्यः पशव्यः । पशवो वै पुरीषम्" इति श्रुतेः ।" §उ0§

3.44.§क§ प्रघासिनः §मरुतः§

§1§ "प्रघास्युपलक्षिता मरुतः प्रघासिनः ।" §उ0§

{2} "प्रघासिनः "घस्लृ" अदने प्रकर्षेण घस्यते भक्ष्यते इति प्रघासो हविर्विशेषः । स एषामस्तीति तान् प्रघासिनः एतन्नामकान् ।" {म०}

{3} "प्रघस्तुमत्तुं शीलमेषां तान् ।" {दयानन्दः}

अत्र दयानन्दकृतो र्थो न समीचीनः ।

<u>3.44. {ख} रिशादसः {मरुतः}</u>

{1} "रिशतिर्हिंसार्थः । "दसु उपक्षये" । ब्राह्मणान् रेशयन्त उपक्षयन्तीति रिशद्दासिनः सन्तो रिशादस इत्युच्यन्ते ।" {उ०}

{2} "रिशादसः रिशतिर्हिंसार्थः । रिशां वैरिकृतां हिंसां दस्यन्ति उपक्षयन्तीति रिशादसः । "दसु उपक्षये" क्विप् । यद्वा रिशन्ति हिंसन्तीति रिशाः । - - - - - - रिशान् हिंसकान् दस्यन्तीति । रशादसः । यद्वा रिशन्तीति रिशन्तः । शतरि दीर्घश्छान्दसः । रिशतो स्यन्ति क्षिपन्ति ते रिशादसः ।" {म०}

{3} "रिशान् दोषान् शत्रूंश्चादन्ति हिंसन्ति तान् ।" {दया०}

अत्र उव्वटेन कृतो र्थो न स्पष्टतया वगम्यते । महीधरेणास्य हिंसकानां निवारक इत्यर्थो दर्शितः स च दयानन्देकृतेनार्थेनांशतः समान एव । दोषाणां नाशकत्वमित्यर्थस्तु दयानन्दस्य नवीनः प्रतीयते ।

<u>3.46. {क} शुष्मिन् {इन्द्रः}</u>

{1} "शुष्म इति बलनाम । हे बलवन् ।" {उ०}

इन्द्रस्य विशेषणार्थे पदमेतत् प्रयुक्तमस्ति । अस्यार्थो दयानन्देन अनन्तबलवान्, पूर्णबलवान् इति वा निर्दिष्टः । अत्र उव्वटकृतार्थतो मात्राभेद एव न स्वल्प भेद इति विशेषः ।

3.48.§ग§ निचेरुः §अवभृथयज्ञः§

§1§ "यद्यपि त्वं निचेरुरसि तथा प्यत्र निगुम्फुणो भव । मन्द-गमनो भव ।" §म0§

§2§ "निचेरुः यो नितरां चिनोति सः" §दयानन्दः§

अत्र दयानन्दकृतो महीधरकृतश्चार्थः स्पष्टं नावगम्यते । पदव्युत्पत्ति-स्तु दयानन्दस्य साधु प्रतीयते परमभिधेयं किमिति नावगम्यते ।

4.1.4. ओषधिः §ओषधिः§

§1§ "ओषधे, सोमाद्योषधिगणः ।" §दया0§

सायणेन ओषधिशब्दस्य कुशरूपो र्थो निर्दिष्टः ; तत्र आपस्तम्बवाक्यं च प्रमाणत्वेन निर्दिष्टम् ।

4.1.5. घृतप्वः §जलदेवता/यज्ञसाधनम्, जलम्§

§1§ "घृतेन क्षरणोपेतेन जलेन पुनन्तीति घृतप्वो जलदेवताश्च ।"
§सायणः§

अत्र सायणेन कृता क्षरणरूपक्रियासाम्यप्रयुक्ता जले घृतशब्दप्रयोगकल्पना चिन्त्या ।

§2§ "घृतप्वः घृतेन पुनन्तीति घृतप्वः । घृतं हि अपां परमं तेजः पवित्रं च ।" §उ0§

4.4.1. चित्पतिः §देवः, ईश्वरः/आध्या0§

§1§ "चित्पतिः चेतयति येन विज्ञानेन तस्य पतिः पालयिता धिष्ठातेश्वरो भवान् ।" §दया0§

§2§ "चिच्छब्दो ज्ञानवाची । ज्ञानानां पतिश्चित्पतिर्मनोभिमानी

देवः । मनो वै चित्पतिरिति तित्तिरिणोक्तत्वात् । यद्वा प्रजापतिर्वै चित्पतिरिति श्रुतेः, स वा भवतु ।" (सायणः)

दयानन्देन चित्पतिपदस्येश्वररूपो र्थो निर्दिष्टः, सायणेन तु मनोभिमानी देवः, प्रजापतिः इत्यर्थद्वयं विकल्पेन दर्शितमिति विशेषः ।

4.4.2. वाक्पतिः (बृहस्पतिः)

(1) "वाचस्पतिः, यो वाचो वेदविद्यायाः पतिः स्वामी पालयिता ।" (दयानन्दः)

(2) "वाक्पतिर्बृहस्पतिः ।" (सायणः)

(3) "वाक्पतिर्वाचां पतिर्बृहस्पतिः" (म०)

अत्र दयानन्देन ईश्वररूपो र्थो निर्दिष्ट इति विशेषः ।

4.4.3. पवित्रपतिः (सूर्यः)

(1) "पवित्रपते पवित्रस्य पालयितः ।" (दया०)

(2) "पवित्रपते शुद्धिपालक ।" (सायणः)

अत्र भाष्ये किं नाम पवित्रम्, को वा तस्य पतिरिति स्पष्टं नास्ति । अत्र पवित्रपतिपदस्योद्देश्यं किमिति सायणेनापि नोक्तम् । तथापि पवित्रपदेन सूर्यमण्डलस्य निर्देशात् पवित्रपतिः सूर्यो पि कल्पयितुं शक्यते ।

(3) "हे पवित्रपते, पवित्रान् शुद्धान् पातीति पवित्रपतिस्तत्सम्बुद्धौ हे पवित्रपते शुद्धपालक ।" (म०)

महीधरेण पदस्य विग्रहः साभिप्रायो दर्शित इति विशेषः ।

4.7.2. प्रयुक् {प्रयुजे, अग्निः}

{1} "या धर्मक्रिया प्रकृष्टैर्गुणैर्युनक्ति योजयति वा ।" {दया0}

{2} "तस्यै आकूत्यै तत्सम्पूर्त्यर्थं प्रयुजे निर्विघ्नेन मां प्रेरयते अग्नये बह्निदेवाय स्वाहा ।" {सायणः}

अत्र सायणेन बह्नेः विशेषणतया स्य प्रयुक्शब्दस्य प्रयोगो निर्दिष्टः, स च वह्निः हुतभुक्तया देवरूपो ऽस्ति । दयानन्देन तु पदस्यास्य धर्मक्रियाया निर्देशकत्वेन प्रयोगो निरूपितः, तथात्वे तस्य यज्ञरूपता व्यज्यते । परं सन्निधावग्निपदपाठात् सायणोक्त एवार्थः साधुः न दयानन्दोक्त इति विचारयामः ।

{3} "प्रयुजे प्रयुङ्क्ते सौ प्रयुक् तस्मै । सङ्कल्पसिद्ध्यै निर्विघ्नं प्रेरयते इत्यर्थः ।" {म0}

4.7.4. मनः {अग्निः/यज्ञफलम्}

अत्रेदं मनः पदमग्नेः विशेषणत्वेन पठितमस्ति ।

{1} "मनसे विज्ञानवृद्ध्यै ।" {दया0}

{2} "तत्सिद्ध्यर्थं मनसे मनो ऽभिमानिने ऽग्नये ।" {सायणः}

अत्र सायणेन मनःशब्दस्य मनोऽभिमानिदेवतारूपो ऽग्निरित्यर्थः कृतः स च हुतभुक्, यज्ञाश्रयो ऽवगम्यते । दयानन्देन तु विज्ञानवृद्धिः इत्यर्थं प्रदर्शयता तस्य यज्ञफलत्वेनाशीष्टा बुद्धिशक्तिविशेषकाम्या इति भावो व्यक्त इति विशेषः ।

4.7.6. तपः {तपो ऽभिमानीदेवः/यज्ञफलम्}

अग्नेः विशेषणम् -

{1} "तपसे प्रतापाय ।" {दया0}

{2} "तत्सिद्ध्यर्थं मदीयशारीरतपोऽभिमानिने ऽग्न्ये ।" {सायणः}

अत्र सायणेन तपोभिमानिदेवतात्वेनाग्निर्निर्दिष्टः, दयानन्देन यज्ञ-फलत्वेनाभीष्टः प्रतापो निरूपित इति विशेषः ।

4.7.7. विश्वशम्भुवः {आपः}

अपां विशेषणमेतत् ।

{1} "विश्वशम्भुवः या विश्वस्मै शं सुखं भावयन्ति ताः ।"
{दया0}

{2} "विश्वशम्भुवः विश्वं सुखेन भावयित्र्यः । एतानि विशेषणानि वृष्टिजन्यास्वप्सु युज्यन्ते । तदाह तित्तिरिः या वै वर्षास्ताः आपो देवीर्बृहतीर्विश्वशम्भुव इति ।" {सायणः}

{3} "विश्वशम्भुवः सर्वस्य जगतः सुखेन भावयित्र्यः ।" {उ0}

{4} "विश्वशम्भुवः विश्वस्य जगतः शं सुखं भावयन्ति जनयन्ति वा।"

4.7.8. बृहस्पतिः {जगदीश्वरः}

{1} "बृहस्पतये बृहत्या वाचो बृहतामाकाशादीनां च पतिः स्वामी तस्मै जगदीश्वराय ।" {दया0}

अत्र हविषः प्रदानायाभिप्रेतो यं देव इति ज्ञायते । तस्मादस्य देवत्वम् ।

4.7.10. पूषा {अग्निः}

{1} "पूष्णे पुष्टिकरणाय ।" {दया0}

{2} "तत्सिद्ध्यर्थं वागिन्द्रियाय पोषकाय" {सायणः}

{3} "सरस्वत्यै पूष्णे ।"वाग्वै सरस्वती पशवो वै पूषा" इति श्रुतिः । वाग्लक्षणाय पशुलक्षणाय च अग्नये ।" {उ0}

{4} "पूष्णे पुष्णातीति पूषा तस्मै वागिन्द्रियपोषकायाग्नये ।" {म0}

सायणेनास्य पदस्य वागिन्द्रियम्, उव्वटेन पशुलक्षणो ऽग्निः, महीधरेण वागिन्द्रियपोषको ऽग्निः, दयानन्देन पुष्टिकर्ता ईश्वर इत्येते ऽर्थाः सन्ति निर्दिष्टाः ।

<u>4.17.1. भ्राट् {दीप्तिः, सोमः/प्रभाविशेषः}</u>

{1} "भ्राजं गच्छ हिरण्यगन्ता दीप्तिं प्राप्नुहि ।" {सा0 4/6/1}

{2} "भ्राजम् प्रकाशम्" {दया0}

{3} "भ्राजं सोमं गच्छ ।" {उ0}

सायणदयानन्दाभ्यामस्य पदस्य प्रभारूपो ऽर्थो निर्दिष्टः । सायणेन आज्यगतस्य सुवर्णस्य प्रभाप्राप्तये पदस्यास्य प्रयोगः कथितः । दयानन्देन तस्मिन् विशेषः को ऽपि न निरूपितः । उव्वटेन अस्य पदस्य "सोम" इत्यर्थो दर्शितः । महीधरेण एतदुभयमपि सूचितम् । तेन "सोम"रूपार्थस्य पुष्टये श्रुतिवाक्यं च "सोमो वै भ्राट्" इत्यपि उद्धृतमिति विशेषः ।

<u>4.19.6. अध्यक्षः {इन्द्रः}</u>

एतत्पदमत्र इन्द्रविशेषणमस्ति । अनेन इन्द्रस्य द्रष्टृत्वं सूच्यते ।

{1} "इन्द्रायाध्यक्षाय । चतुर्थ्याः षष्ठ्या विपरिणामः । अधि उपरि अक्षिणी यस्य सो ऽध्यक्षः ।" {उ0}

{2} "अधि उपरि अक्षिणी यस्य सो ऽध्यक्षस्तस्मै द्रष्ट्रे । यज्ञस्वामिने इत्यर्थः ।" {म0}

{3} "अध्यक्षाय अधिरुपरिभावे न्वेक्षणेक्षणाक्षिणी वा यस्य यस्माद्वा तस्मै ।" {द0}

<u>4.27.3. स्वानः {सोमरक्षकाः}</u>

{1} "सोमक्रयणाननुदिशति । स्वान भ्राज ।" {उ0}

(2) "स्वानादयः सप्त सोमरक्षका देवविशेषाः । स्वनतीति स्वानः ।" (म०)

महीधरेण पदव्युत्पत्तिः पदार्थश्चेति द्वयं साधु निर्दिष्टमिति विशेषः ।

(3) "स्वान, स्वनत्युपदिशति यस्तत्सम्बुद्धौ ।" (द०)

4.27.4. भ्राजः (सोमरक्षकः)

(1) "भ्राजते शोभते सौ भ्राजः ।" (म०)

एषा पदव्युत्पत्तिः देवविशेषस्य तेजस्वित्वं दर्शयति ।

(2) "भ्राजः, यो भ्राजते प्रकाशते तत्सम्बुद्धौ ।" (द०)

4.27.5. अङ्घारिः (सोमरक्षकः)

(1) "अङ्घस्य पापस्यारिरङ्घारिः ।" (म०)

अनेन व्याख्यानेन एतत्पदवाच्यस्य सोमरक्षकदेवविशेषस्य पापनाशकत्वं सूच्यते ।

(2) "अङ्घारे, अंघस्य छलस्यारिः शत्रुस्तत्सम्बुद्धौ ।" (द०)

4.27.6. बम्भारिः (सोमरक्षकः)

सोमरक्षकं देवविशेषमुद्दिश्य प्रयुक्तं पदमेतत् तस्य देवस्य पोषकशक्ति-विशिष्टत्वं सूचयति ।

(1) "बिभर्ति पुष्णाति विश्वमिति बम्भारिः ।" (म०)

(2) "बम्भारे, बन्धनां सुविचारनिरोधकानां शत्रुस्तत्सम्बुद्धौ ।" (द०)

अत्र दयानन्दमतं भिन्नं दृश्यते ।

4.27.7. हस्तः §सोमरक्षकः§

एतत् सोमरक्षकदेवताभिप्रायम् ।

§1§ "हसति हस्तः सर्वदा हृष्टरूपः ।" §म0§

§2§ "हस्त हसन्ति प्रसन्ना भवन्ति यस्मात्तत्सम्बुद्धौ ।" §द0§

अत्र दयानन्देन निर्दिष्टो वाच्यार्थो भिन्नः प्रतीयते ।

4.27.8. सुहस्तः §सोमरक्षकः§

सोमरक्षकदेवताभिप्रायमेतत् पदम् ।

§1§ "शोभनौ हस्तौ यस्य सुहस्तः ।" §म0§

§2§ "सुहस्त, शोभना हस्तक्रिया यस्य तत्सम्बुद्धौ ।" §द0§

महीधरे वाक्ये हस्तस्य स्वरूपगतं शोभनत्वं प्रतीयते, दयानन्दभाष्ये क्रियावैशिष्ट्यमिति भेदः ।

4.27.9. कृशानुः §सोमरक्षकः§

एतदपि पदं सोमरक्षकदेवतानिरूपकमस्ति ।

§1§ "कृशं दुर्बलमनिति पोषयतीति कृशानुः ।" §म0§

§2§ "कृशानो, दुष्टान् कृशति तत्सम्बुद्धौ ।" §द0§

महीधरदृष्ट्या पदस्यास्य दुर्बलपोषकत्वे भिप्रायो दृश्यते, दयानन्दभाष्ये तु दुष्टनाशकत्वे तात्पर्यात् तयोर्भेदः स्पष्टः ।

4.28.1. अमृताः §सोमादयः§

एतत्पदं सोमादिदेवानुद्दिश्य प्रयुक्तमस्तीति भाष्यकाराणामाशयः प्रतीयते ।

§1§ "अमृतशब्देनात्र बहुवचनान्तेन सोमोऽभिधीयते ।" §उ0§

§2§ "अमृताननु सोमादिदेवाननुसृत्य" §म0§

§3§ "अमृतान् प्राप्तमोक्षान् सदेहान् विगतदेहान् वा विदुषो मुक्त्यानन्दानुत्तमान् भोगान् वा ।" §द0§

दयानन्देन जीवन्मुक्तानामनेन पदेन निर्देशः सूचित इति भेदः ।

4.30.1. वृषभः §वरुणः§

मन्त्रवाक्ये वृषभो यं द्युलोकस्य स्तम्भयिता इत्यवगम्यते । महीधरेण वरुणमुद्दिश्य ब्रह्मरूपेण तत्स्तुतये पदस्य प्रयोगो निर्दिष्टः ।

§1§ "यो यं वृषभः वर्षिता" §उ0§

§2§ "वरुणदेवते त्रिष्टुभौ । क्रीतसोमस्य वरुणदेवतत्वात् वरुणो ब्रह्मरूपेण सू स्तूयते ।" §म0§

उव्वटेन वृषभशब्दस्य वर्षणरूपक्रियाहेतुत्वं "वर्षिता" इति पर्यायशब्देन दर्शितमिति विशेषः । महीधरेण । च वरुणरूपे ऽर्थे प्रयोगमूलं निर्दिष्टमिति ज्ञेयम् ।

§3§ "वृषभः श्रेष्ठः ।" §द0§

4.30.2. सम्राट् §वरुणः§

इदं पदमत्र वरुणमुद्दिश्य तद्विशेषणतया प्रयुक्तमस्ति । अनेन वरुणस्याधिपत्यं सूच्यते ।

§1§ "यश्च सम्राट् देवताविशेषः" §उ0§

§2§ "सम्राट् सम्यग्राजमानो वरुणः" §म0§

§3§ "सम्राट्, यः सम्यग् राजते सः ।" §द0§

4.31.1. उस्रियाः §गावः§

इदं पदं गामुद्दिश्य प्रयुक्तमस्ति ।

§1§ "उस्रियासु गोषु" §उ0§

§2§ "उस्रियाशब्दो गोनामसु पठितः ।" §म0§

§3§ "उस्रियासु गोषु ।" §द0§

4.34.1. भद्रः §सोमः§

सोममुद्दिश्य तद्विशेषणतया प्रयुक्तं पदमिदं सोमस्य कल्याणरूपत्वं निर्दिशति ।

§1§ "भदि कल्याणे सुखे च । सोम उच्यते । भन्दनीयः स्तुत्यः ।" §उ0§

§2§ "हे सोम, मे मह्यं यजमानाय मदुपकारार्थं त्वं भद्रो सि कल्याणरूपो सि ।" §म0§

§3§ "भद्रः सुखकारी ।" §द0§

4.34.2. भुवस्पतिः §सोमः§

सोमविशेषणतया प्रयुक्तमेतत् पदं सोमस्य भूतानां पालकत्वरूपं सामर्थ्यं सूचयति ।

§1§ "भुवस्पते, भूताजतस्य पते ।" §उ0§

§2§ "हे भुवः पते, भूशब्देन भूमौ स्थितानि भूतानि यजमानाध्वर्युप्रभृतीन्युच्यन्ते । तेषां भूतानां पालकत्वात् पतिः सोमः ।" §म0§

अत्र महीधरीयं व्याख्यानं सूपपन्नमस्ति ।

§3§ "भुवः पृथिव्याः पते स्वामिन् ।" §द0§

4.35.1. मित्र/:वरुण: §आदित्यः/वरुणः/लोकद्वयम्§

अत्र महीधरेण-सूर्यरूपेण सोमस्य स्तुतिविषये पदस्य प्रयोगो निर्दिष्टः, तस्यार्थ द्विधा व्याख्यातः । उव्वटेनाप्यर्थद्वयं सूचितम् –

(1) "मित्र आदित्यो वरुणश्च । उपलक्षणार्थं चैतत् । सर्वद्यावापृथिवीनिवासिलोकग्रहणार्थं वा तथैव श्रुतिः "अयं वै लोको मित्रो सौ वरुणः" इति ।" (उ०)

(2) "मित्राय वरुणाय मित्रवरुणदेवतारूपेण वर्तमानाय । जगतां हितकारिणे । वृणोतीति वरुणः स्वरश्मिभिर्जगदावृण्वते ।"

"मित्रस्य वरुणस्य चक्षसे सर्वजगतो द्रष्ट्रे । मित्रावरुणशब्देन सर्वं जगल्लक्ष्यते ।" (म०)

(3) "मित्रस्य सर्वजगत्सुहृदः । प्रकाशस्य वा ।" (द०)

वरुणस्य श्रेष्ठस्य ।

<u>4.35.2. दूरेदृक् (सूर्यः)</u>

सूर्यमुद्दिश्य प्रयुक्तमेतत्पदमुव्वटोक्त्या ज्ञायते ।

(1) "दूरे स्थितो दृश्यत इति दूरेदृक् । यद्वा अतीतानागतवर्तमानकालसम्बन्धान् प्राणिनो दूरे वस्थितान् पश्यतीति दूरेदृक् ।" (उ०)

(2) "दूरेदृशे दूरे वर्तमानैः प्राणिभिर्दृश्यत इति दूरेदृक् तस्मै । यद्वा दूरे पश्यतीति दूरेदृक् ।" (म०)

(3) "दूरेदृशे यो दूरे स्थितान् दर्शयति तस्मै" (द०)

<u>4.35.3. केतुः (सूर्यः/देवता)</u>

एतत्पदमत्र सूर्यमुद्दिश्य प्रयुक्तम् तद्विशेषणरूपम् । अनेन सूर्यस्य चेतनत्वं सूच्यते ।

(1) "केतुरिति प्रज्ञानामसु पठितम् । प्रज्ञानत्वाय । विज्ञानघनानन्दस्वभावायेत्यर्थः ।" (उ०)

(2) "केतवे प्रज्ञारूपाय विज्ञानघनाय ।" (म०)

§3§ "केतवे विज्ञानस्वरूपाय ज्ञापकाय वा ।" §द0§

4.35.4. दिवस्पुत्रः §सूर्यः§

सूर्यमुद्दिश्य तद्विशेषणत्वेन प्रयुक्तं पदमिदं सूर्यस्य द्युलोकसम्बन्धं सूचयति ।

§1§ "दिवस्पुत्राय द्युलोकाद्धि सूर्यो विजायते द्युलोकं वा बहुधा त्रायत इति दिवस्पुत्रः सूर्यः ।" §उ0§

§2§ "दिवस्पुत्राय द्युलोकस्य पुत्रवत् प्रियाय द्युलोकाद्धि सूर्यो जायते । दिवः पुरु त्रायते इति दिवस्पुत्रः । दिवः पालकायेति वा ।" §म0§

§3§ "दिवः प्रकाशस्वरूपस्य पुत्राय पवित्रकारकाय अग्निपुत्राय ।" §द0§

5.2. गायत्रं छन्दः §गायत्रीसम्बन्धी/देवता विशेषः§

मन्थने सहायकतया गायत्रस्य छन्दसः प्रयोगो मन्त्रांशे दृश्यते । तत्र गायत्रं छन्दः इति छन्दो विशेषो वा अन्यद्वस्तु वा इति संशयः । उव्वटेन तद्-विषये किमपि नोक्तम् । महीधरेण गायत्रीछन्दोभिमानिना देवेन इत्यर्थः कृतः ।

5.3. समनसौ §अग्निः§

अत्र आहवनीयं निर्मथ्यं चाग्निमुद्दिश्य पदमेतत् प्रयुक्तमस्ति । तयोः स्वानुकूलत्वभावनमनेन पदेनाभिप्रेतमिति भाष्यकाराबाहुः –

§1§ "समनस्कौ समानमनस्कौ ।" §उ0§

§2§ "समनस्कौ मनसा सहितौ ।" §म0§

"अन्यविषयं मनः परिहृत्या मदनुग्रहाभिमुखत्वं समनस्त्वम् ।" §म0§

अत्र महीधरेण समनस्त्वं साधु निर्दिष्टमिति विशेषः ।

5.3. सचेतसौ [अग्नी]

आहवनीयनिर्मथ्यावग्नी उद्दिश्य प्रयुक्तं पदमेतत् तयोः स्वानुकूलत्व-भावनां कर्तुः प्रस्तौति ।

[1] "सचेतसौ समानप्रज्ञौ ।" [उ०]

[2] "सचेतसौ समानं चेतो ययोस्तौ परस्परं समानचित्तयुक्तौ ।"
"अनुग्रहे परस्परविप्रतिपत्तिराहित्यं सचेतस्त्वम् ।"

अत्र महीधरेण पदस्य विग्रहः पदार्थस्य साधु व्याख्यात इति विशेषः।

5.3. अरेपसौ [अग्नी]

अत्र पदमिदम् आहवनीयं निर्मथ्यं चाग्निमुद्दिश्य प्रयुक्तमस्ति । अनेन तयोः यज्ञकर्तारं प्रति सानुकम्पत्वमभिप्रेतमिति यज्यते ।

[1] "रेप इति पापनाम । अपापौ ।" [उ०]

[2] "अरेपसौ पापरहितौ प्रमादादस्माभिः कृते पि पापे कोपाभावः पापराहित्यम् ।" [म०]

अत्र महीधरकृता व्याख्या पदार्थं साधु प्रस्तौति ।

5.4. ऋषीणां पुत्रः [अग्निः]

आहवनीयेनाग्निना समन्वितं निर्मथ्यमग्निमुद्दिश्यं पदमेतत्प्रयुक्त-मस्ति । अनेनाग्नेः अग्निहोत्रिप्रयासेनोत्पत्तिः सूच्यते -

[1] "ऋषीणां विदुषामग्निहोत्रिणां पुत्रः । स यदग्नी आधत्ते तदेतं जनयति" इति श्रुतिः ।" [उ०]

[2] "ऋषीणां पुत्रः ऋत्विजो वेदविदो ऋषयः तैरुत्पादितत्वात् तेषां पुत्रवद् पुत्रः ।" [म०]

5.4. अभिशस्तिपावा (अग्निः)

अत्रेदं पदमग्निमुद्दिश्याहवनीयं प्रयुक्तमस्ति । अनेनाग्नेः दोष-निवारकत्वं सूच्यत इति महीधरभाष्यादवगम्यते ।

(1) "अभिशस्तिपावा अभिशंसनमभिशस्तिः अभिशस्तेः पाति गोपायति यः सो ऽभिशस्तिपावा ।" (उ०)

(2) "अभिशस्तिपावा अभिशस्तिर्वैकल्यनिमित्तो ऽभिशापस्तस्मात् पाति रक्षतीत्यभिशस्तिपावा ।" (म०)

उव्वटकृते भाष्ये अभिशस्तिशब्दस्यार्थो न स्पष्टतया वगम्यते, मही= धरीये भाष्ये तु स वैकल्यनिमित्ताभिशापरूप इति ज्ञायते ।

5.5. आपतिः (वायुः/प्राणः, आज्या०)

इदं पदं वायुमुद्दिश्य प्रयुक्तमस्ति । अनेन वायोः गमने सामर्थ्य-मवगम्यते ।

(1) "आपतृतीत्यापतिः ।" (उ०)

(2) "आसमन्तात् पतति गच्छतीत्यापतिः सततगतिर्वायुः ।" (म०)

अत्र महीधरीयं व्याख्यानं स्पष्टमस्ति । वायोः सततगतिरनेन सूच्यते पदेनेति महीधरोक्तिः विशिष्टत्वं प्रस्तौति ।

महीधरेण अस्य प्राण इत्यर्थो ऽपि तित्तिरिवाक्योपन्यासपूर्वकं निर्दिष्टः -

"हे आज्य, त्वामापतये प्राणदेवताप्रीतये गृह्णाम्यत्र पात्रे स्वीकरोमि। आसमन्तात् पाति देहं रक्षतीत्यापतिः प्राणः । तदाह तित्तिरिः प्राणो वा आपतिः प्राणमेव प्रीणातीति ।"

5.5. परिपतिः (वायुः/मनः, आध्या०)

इदं पदं वायुमुद्दिश्य मन्त्रे प्रयुक्तमस्ति । अत्र वायुः आज्यरूपस्य हविषः प्रदानायाभिप्रेतो ऽस्ति । अनेन पदेन वायोः सर्वत्र गमने सामर्थ्यं सूच्यते ।

(1) "परिसर्वतः पततीति परिपतिः ।" (उ०)

(2) "परिपतये परितः पततीति परिपतिस्तस्मै सर्वव्यापिने ।" (म०)

अत्र उभयोर्भाष्ययोः व्युत्पत्तिसाम्ये सत्यपि महीधरेण वायोः सर्वगतत्वमनेन व्यज्यत इति निर्दिश्य स्ववैशिष्ट्यं सूचितमिति विशेषः । अपि च महीधरेणास्य मन इत्यन्यो ऽप्यर्थः सप्रमाणं निर्दिष्टः -

"इष्टप्राप्त्युपायमनिष्टपरिहारोपायं च चिन्तयित्वा परितः पाति पालयतीति परिपतिर्मनस्तत्प्रीत्यै गृह्णामि । तदाह तित्तिरिः मनो वै परिपतिर्मन एव प्रीणातीति ।" (म०)

5.5. तनूनप्ता (वायुः/जाठरो ऽग्निः, आध्या०)

वायुमुद्दिश्य प्रयुक्तमेतत्पदं तस्यात्मना सह सम्बन्धविशेषं सूचयतीति महीधरेण उव्वटेन च निर्दिष्टमस्ति ।

(1) "तनूशब्देनात्मा ऽभिप्रेतः । तन्यते हि तस्मादाकाशः । ततो वायुर्भवति तस्मादाकाशो जायते शब्दनामा । आकाशाद्वायुः । एतदभिप्रेत्योक्तं ब्रह्मणः पौत्रायेत्यर्थः ।" (उ०)

(2) "तनूनप्त्रे तनोति विस्तारयति विश्वमिति तनूरात्मा तस्य नप्त्रे पौत्राय ।" (म०)

उव्वटकृते भाष्ये शब्दार्थव्याख्यानाय प्रयुक्तमुदाहरणं चारु वर्तते । महीधरीये तनुशब्दस्य व्युत्पत्तिरेव रम्या, तत्र वायोः तनूनप्तृत्वं कथमिति प्रसङ्गः सहैव नोक्तः, पश्चात्तु दर्शित एवेति विशेषः । किञ्च महीधरेणास्यार्थः

नर

जाठरो ऽग्निरित्यपि निर्दिष्ट इत्यपरो विशेषः ।

§3§ "तनूं शरीरं न पातयति न विनाशयतीति तनूनप्ता जाठरोऽग्निः ।" §म0§

5.5. शाक्वरः §वायुः/शक्तिस्वरूपाभिमानीदेवः§

एतत्पदमपि वायुमुद्दिश्य प्रयुक्तमस्ति । अनेन वायोराकाशेन सह जन्यजनकभावसम्बन्धः सूच्यत इति उव्वटकृतात् महीधरकृताच्च व्याख्यानादवगम्यते।

§1§ "शक्नुवन्त्याकाशे भूतानि स्थातुमिति शक्वर आकाशस्तस्यापत्यं शाक्वरो वायुः ।" §उ0§

§2§ "शाक्वराय शक्नुवन्ति स्थातुं भूतानि यत्र स शक्वर आकाशः तस्यापत्यं शाक्वरस्तस्मै ।" §म0§

महीधरेणास्य शक्तिस्वरूपाभिमानी देवविशेष इत्यर्थोऽपि निर्दिष्टः-

§3§ "शाक्वराय शकनशीलः शक्वरः शक्तिमान् पुरुषस्तस्येदं शाक्वरं शक्तिस्वरूपं तस्मै शक्तिस्वरूपाभिमानिदेवताप्रीत्यै" §म0§

5.5. शक्वा §वायुः§

इदमपि वायुमुद्दिश्य प्रयुक्तं पदमस्ति । अनेन वायोः शक्तिमत्त्वं सूच्यत इति भाष्यकारौ निर्दिशतः ।

§1§ "शक्वने । शक्लृ शक्तौ" । अन्येभ्योऽपि दृश्यन्ते इति वनिप् । शक्ताय ।" §उ0§

§2§ "शक्वने शक्नोति सर्वं कर्तुमिति शक्वा तस्मै । अन्येभ्योऽपि दृश्यन्ते" इति वनिप् ।" §म0§

5.5. ओजिष्ठः (वायुः/ओजः साराभिमानी देवः)

वायुमुद्दिश्य प्रयुक्तेषु पदेषु पठितं पदमेतत् वायोः बलवत्त्वं दर्शयतीति भाष्यकृद्भ्यां निर्दिष्टम् -

(1) "ओजिष्ठाय बलिष्ठाय" (उ0)

(2) "ओजिष्ठाय । ओजो बलमस्यास्तीत्योजस्वि ।" (म0)

महीधरेणास्य पदस्यान्यो ऽपि ओजः साराभिमानी देवो वाच्यतया निर्दिष्टः -

(3) "शक्वनि शक्तिमति पुरुषे यदोजिष्ठं सारं तस्मै । ओजो नामाष्टमो धातुस्तत्सारमोजिष्ठं तदवष्टम्भेनैव शरीरे शक्तिरवतिष्ठते । ओजः साराभिमानिदेवताप्रीत्यै त्वां गृह्णामीत्यर्थः ।" (म0)

5.6.1. व्रतपतिः (अग्निः)

अग्निमुद्दिश्य पदस्यास्य प्रयोगं सायण आह ।

(1) "व्रतपते पालकाग्ने ।" (सा0 5/2/4)

(2) "व्रतपते व्रतपालकाग्ने ।" (म0)

(3) "व्रतपते व्रतानां वेदादिविद्यानां पालयितः पालननिमित्ता वत ।" (द0)

अत्र दयानन्देन व्रतशब्दस्य वेदादिविद्या रूपो ऽर्थः कृत इति विशेषः ।

5.6.2. दीक्षापतिः (सोमः)

सोममुद्दिश्य मन्त्रे ऽस्मिन् दीक्षापतिपदस्य प्रयोगं वदति सायणः ।

(1) "दीक्षापतिः दीक्षायाः पालकः सोमः ।" (सा0 5/2/4)

(2) "दीक्षापतिः सोमः ।" (उ0)

(3) "दीक्षापतिर्दीक्षायाः पालकः सोमः ।" (म0)

{4} "दीक्षापतिः व्रतादेशानामुपदेशपालकः रक्षणनिमित्ता वा ।"
{द०}

5.6.3. तपस्पतिः {सोमः}

सोममुद्दिश्य तद्विशेषणतया प्रयुक्तमेतत् पदं सोमस्य तपः पालकत्वं सूचयति ।

{1} "तपस्पतिः उपसद्रूपस्य तपसः पालकः सोमः ।" {सा० 5/2/4}

{2} "तपस्पतिः सोमः ।" {उ०}

{3} "तपस्पतिः उपसद्रूपस्य तपसः पालकः ।" {म०}

{4} "तपस्पतिः तपसः पालयिता ।" {द०}

5.7.2. एकधनवित् {इन्द्रः}

एतत् पदमिन्द्रस्य विशेषणमस्ति । अनेनेन्द्रस्य सोममात्रधनत्वं सूच्यत इति सायण आह -

{1} "यावन्तः सोमयागाः सन्ति तेषु सर्वेषु सोमरूपमिदं द्रव्यमेकमेव धनं तद्विन्दते लभते इत्येकधनवित् ।" {सा० 5/2/5}

{2} "एकधनान् वेत्ति एकधनवित् तस्मै एकधनविदे । कथंभूतान् वेत्ति । "एकैकोंशुः सोमस्य देवान् प्रति भक्षत्वेन गच्छन् शतमेकधनानाप्यायति दश दश वा सोमस्य ईदृशी शक्तिः" इति श्रुतिः ।" {उ०}

{3} "एकधनविदे एकं मुख्यं धनं सोमरूपं विन्दते लभते स एकधनवित्। यद्वा सोमकण्डनाय यैर्जलमानीयते ते कुम्भा एकधनाः । एकं धनं सोमरूपं यत्रेति तान्वेत्ति जानातीति । सोमकण्डनाय जलकुम्भा अनीता इति जानातीत्यर्थः ।"
{म०}

{4} "एकधनविदे, य एकेन धर्मेण विज्ञानेन वा धनं विन्दति तस्मै।"
{द०}

5.8.1. अयः शया तनूः [अग्निस्वरूपम्]

सायणेन एतत्पदस्य प्रयोगमूलमन्विषता तैत्तिरीयशाखान्तर्गता कथोपन्यस्ता, तदनुसारमग्नेः अयस्मयः स्वरूपविशेष इति पदार्थश्च दर्शितः ।

[1] "अत्र कथा चिदाख्यायिकया कण्वो सुराणां लोकत्रये तिस्रःपुर इदमुवाच । ततो सुरा एषु लोकेषु पुरश्चक्रिरे । अयस्मयीमेवास्मिंल्लोके राजतीमन्तरिक्षे हरिणीं दिवीति । एतमेवार्थं तित्तिरिरप्याह । तेषामसुराणां तिस्रः पुर आसन्नयस्मय्यवमथ राजती हरिणीति । ता एतास्तिस्रः पुरो दग्धुपसद्देवतारूपो ग्निर्यदा तासु पूर्षु प्रविश्य व्याप्नोति तदानीमेतास्तिस्रः पुरो ग्नेस्तनवो भवन्ति । तदेतदभिप्रेत्यायं मन्त्रः प्रवक्ति । अयसि शेत इत्ययः शया लोहमयीत्यर्थः"

[सा० 5/2/8]

[2] "अयसि शेते इत्ययःशयातनूः शरीरम् ।" [उ०]

[3] "देवैः पराजिता असुरा तपस्तप्त्वा त्रैलोक्ये त्रीणि पुराणि चक्रुर्लोहमयीं भूमौ राजतीमन्तरिक्षे हैमीं दिवि । तदा देवैस्ता दग्धुमुपसदाग्निराराधितः । तत उपसद्देवतारूपो ग्निर्यदा तासु पूर्षु प्रविश्य ता ददाह तदा तिस्रः पुरो ग्नेस्तनवो भूवन् । तदभिप्रेत्यायं मन्त्रः । हे अग्ने, या ते तवायः शया तनूः अयसि शेते इत्ययः शया । लोहमयीत्यर्थः । लोहमयपुरव्यापित्वेन तद्रूपा सती ।" [म०]

[4] "अयः शया या यस्सु सुवर्णादिषु शेते सा । अय इति हिरण्यनामसु पठितम् ।" [द०]

5.8.2. वर्षिष्ठा [अग्निस्वरूपम्]

अग्नेरयः शयायाः तन्वा विशेषणम् ।

[1] "वर्षिष्ठा देवीमतिशयेनाभिमतफलवर्षिणी ।" [सा० 5/2/8]

[2] "वर्षिष्ठा उरुतमा विस्तीर्णतमा ।" [उ०]

§3§ "वर्षिष्ठा देवानामतिशयेनाभिमतफलवर्षिणी ।" §म०§

§4§ "वर्षिष्ठा अतिशयेन वृद्धा ।" §द०§

5.8.3. गह्वरेष्ठा §अग्निस्वरूपम्§

अग्नेः स्थानविशेषेण स्वरूपविशेषपरिचायकं विशेषणम् ।

§1§ "असुरसम्बन्धितया गह्णने विषमे देशे तिष्ठतीति गह्णरेष्ठा" §सा० 5/2/8§

§2§ "गह्णरेष्ठा निगूढदेशस्थायिनी ।" §उ०§

§3§ "गह्णरे असुराणां विषमे देशे तिष्ठतीति गह्णरेष्ठा ।" §म०§

§4§ "गह्णरेष्ठा गह्णरे गहने गभीर आभ्यन्तरे तिष्ठतीति ।" §द०§

5.8.4. रजः शया तनुः §अग्निस्वरूपम्§

अग्निस्वरूपपरिचायकं विशेषणम् ।

§1§ "रजः शया रजतमयी ।" §सा० 5/2/8§

§2§ "रजःशया रजतशायिनी ।" §उ०§

§3§ "रजः शया या रजःसु सूर्यादिलोकेषु शेते सा" §द०§

अत्र दयानन्दस्य सूर्यादिलोकरूपो र्थो नवीनः ।

5.8.5. हरिशया तनुः §अग्निस्वरूपम्§

अग्निस्वरूपपरिचायकं विशेषणम् ।

§1§ "हरीशया हिरण्मयी ।" §सा० 5/2/8§

§2§ "हरिशया हरितसुवर्णशायिनी ।" §उ०§

5.9.1. तप्तायनी {पृथिवी}

पृथिवीमुद्दिश्य प्रयुक्तं पदमिति सायणः ।

{1} "तप्तं पुरुषमयति प्राप्नोतीति तप्तायनी । यो हि दरिद्रः धनरहितो हमिति सन्तप्यते तं पुरुषं तापोपशान्त्यर्थं प्राप्नोतीत्यर्थः ।"

{सा० 5/3/1}

{2} "तप्त इव वृत्त्यर्थं पुरुषो स्यामेतीति तप्तायनी पृथिवी ।"

{उ०}

{3} महीधरेण सायणस्य उव्वटस्य च मतं यथोक्तं दर्शितम् ।

{4} "तप्तायनी तप्तानि स्थापनीयानि वस्तून्ययनं यस्या विद्युतः सा ।" {द०}

पूर्वाचार्यैरस्य पदस्य पृथिव्यर्थे प्रयोगः कृतः, दयानन्देन विद्युदर्थे प्रयोग इति भेदः ।

5.9.2. वित्तायनी {पृथिवी}

इदं पृथिव्या विशेषणमस्ति ।

{1} "धनरहितस्य वित्तार्थं तं पुरुषं प्राप्नोतीति वित्तायनी ।"

{सा० ~~5/22~~ 5/3/1}

{2} "अस्यां हि विविदानो धर्ममुपलभमानः पुरुष एतीति वित्ता-यनी । वित्तवान् वा भवतीति वित्तायनी ।" {उ०}

{3} "वित्तार्थं नरो यस्यामेतीति वित्तायनी । यद्वा वित्तार्थं निर्धनं पुरुषमयतीति वित्तायनी । पृथिव्यां हि प्राप्तायां सस्यनिष्पत्तिद्वारा महद्धनं लभ्यते ।" {म०}

{4} "वित्तायनी या वित्तानां भोगानां प्रतीतानांपदार्थानामयनी प्रापिका सा ।" {द०}

5.11.1. द्युघोषः (इन्द्रः)

(1) "इन्द्र इत्यनेन शब्देन द्युष्यते विस्पष्टं कथ्यते यो देवः सो यमिन्द्रो देवः ।" (सा0 5/4/1)

(2) "द्युघोष इति वाङ्नामसु पठितम् ।" (उ0)

(3) "इन्द्र इति शब्देन द्युष्यते विस्पष्टं कथ्यते यो देवः सो - यमिन्द्रद्युघोषः ।" (म0)

(4) "इन्द्रद्युघोषः इन्द्रस्य परमेश्वरस्य वेदाख्याया विद्युतो वा घोषो विविधशब्दार्थसम्बन्धो यस्य यया वा स सा वा वाक् । द्युघोष इति वाङ्नामसु पठितम् ।" (द0)

सायणादिभिरस्य पदस्य इन्द्रमुद्दिश्य प्रयोगो निर्दिष्टः, दयानन्देन तु परमेश्वरमुद्दिश्य प्रयोगः सूचित इति भेदः ।

5.11.2. वसवः (देवविशेषः)

(1) "वसुभिः अष्टसङ्ख्याकैर्गणदेवैः ।" (सा0 5/4/1)

अत्र महीधरेणाप्ययमेवार्थो निर्दिष्टः ।

(2) "वसुभिः अग्न्यादिभिः कृतचतुर्विंशतिवर्षब्रह्मचर्यैर्वा ।" (द0)

अत्र दयानन्देन वसुशब्दस्यान्यो वैकल्पिको र्थः कृतचतुर्विंशतिवर्ष-ब्रह्मचर्यैरिति निर्दिष्टः, तत्र मूलं तु किमपि नोक्तमिति विशेषः ।

5.11.3. प्रचेताः (वरुणः)

(1) "प्रचेताः प्रकृष्टयज्ञो वरुणः ।" (सा0 5/4/1)

(2) "प्रचेताः प्रकृष्टज्ञानो वरुणः ।" (उ0)

(3) "प्रचेताः प्रकृष्टप्रज्ञो वरुणः ।" (म0)

सायणेन यज्ञविषये वरुणस्य प्रकृष्टत्वं "प्रकृष्टयज्ञ" इति पदेन निर्दिष्टम्, उव्वटेन महीधरेण च ज्ञाने प्रकृष्टत्वं "प्रकृष्टज्ञान" इति, "प्रकृष्टप्रज्ञ" इति पदाभ्यां सूचितमेष एवात्र विशेषः ।

{4} "प्रचेताः या प्रकृष्टविज्ञाना यया प्रकृष्टतया चेतन्ति संजानन्ति सा ।" {द०}

दयानन्देन पदस्यास्य वाग्विशेषणत्वमभिप्रेत्य व्याख्यानं कृतमत्रेति विशेषः ।

5.11.4. रुद्राः {देवताः}

{1} "रुद्रैरेकादशसङ्ख्याकैर्गणदेवैः ।" {सा० 5/4/1}

अत्र महीधरस्यापि व्याख्यानं समानम् ।

{2} "या प्राणैः कृतचतुश्चत्वारिंशद्वर्षब्रह्मचर्यैर्वा सह वर्तमाना ।" {द०}

अत्र दयानन्देन प्राणान्, कृतचतुश्चत्वारिंशद्वर्षब्रह्मचर्यान् वा जनानुद्दिश्य पदस्यास्य प्रयोगोऽत्र निर्दिष्ट इति पूर्वापेक्षया नवीनत्वरूपं वैशिष्ट्यम् ।

5.11.5. मनोजवाः {यमः}

{1} "मनोजवा मनोवदत्यन्तवेगयुक्तो यमो देवः ।" {सा० 5/4/1}
{2} "मनोजवा मनोगतिर्यमः ।" {उ०}
{3} "मनोजवा मनोवद्वेगयुक्तो यमो देवः ।" {म०}

अत्र त्रयाणामपि तात्पर्यं यमे समानमिति स्पष्टम् ।

{4} "मनोजवा मनोवज्जवो वेगो यस्य यस्याः स सा वा ।" {द०}

पूर्वाचार्यैः पदस्योद्देश्यतया यमस्य निर्देशः स्पष्टं विहितः, दयानन्देन तु वागर्थे प्रयोगः सूचित इति वैषम्यम् ।

5.11.6. पितर: ‖देवताविशेषा:‖

‖1‖ "पितृभि: स्वर्लोकवासिदेवताविशेषै ।" ‖सा० 5/4/1‖

अत्र महीधरीयमपि व्याख्यानम् अक्षरश: समानम् ।

‖2‖ "पितृभि: ज्ञानिभिर्ऋतुभिर्वा । "ते वा एत ऋतव:" शत० 2/1/3/2 अनेन पितृशब्दादृतवो पि गृह्यन्ते । पितर इति पदनामसु पठितम् । निघं० 5/5 अनेन ज्ञानवन्तो मनुष्या गृह्यन्ते ।" ‖द०‖

अत्र दयानन्देन पितृशब्दस्य ऋतुरूपार्थसूचकत्वं सप्रमाणं निर्दिष्टम्, सहैव ज्ञानवन्तो मनुष्या इत्यन्यार्थश्च दर्शित: । पूर्वाचार्यकृतो र्थ: स्वर्लोकवासि देवता-रूपो वर्तत इत्यस्ति वैषम्यम् ।

5.11.7. विश्वकर्मा ‖परमेश्वर:‖

‖1‖ "विश्वानि सर्वाणि जगदुत्पत्त्यादिविषयकर्माणि यस्यासौ विश्वकर्मा ।" ‖सा० 5/4/1‖

‖2‖ "विश्वकर्म, विश्वकर्मेति निगदव्याख्यातो मन्त्र: ।" ‖उ०‖

‖3‖ "विश्वानि कर्माणि जगदुत्पत्त्यादीनि यस्य स विश्वकर्मा ।" ‖म०‖

अत्र सायणमहीधरयोर्व्याख्यानं स्पष्टार्थम्, नोव्वटस्य ।

‖4‖ "विश्वकर्मा, विश्वानि सर्वाणि कर्माणि यस्या यस्य वा सा वाक् स विद्वान् वा ।" ‖द०‖

सायणादिभि: पदस्य व्युत्पत्ति: कृता परमुद्देश्यभूतं वस्तु न निर्दिष्टम्। तेषां व्युत्पत्त्या तु जगदुत्पत्त्यादिकर्तृत्वसूचनात्परमेश्वरे तात्पर्यमनुमीयते । दया-नन्देन वाग्रूप:, विद्वद्रूपश्चार्थ: सव्युत्पत्तिको निर्दिष्ट इति विशेष: ।

5.12.1. सिंही {उत्तरवेदिदेवता}

इदमुत्तरवेदिमुद्दिश्य प्रयुक्तमिति सायणः ।

{1} "पुरा कदाचिदुत्तरवेदिदेवता केनापि निमित्तेन देवेभ्यो नुपक्रम्य तदानीमसुरान् प्राप्य देवासुरसेनयोरुभयोर्मध्ये सिंहरूपं धृत्वा तस्थौ । तदाह देवासुरसेनयोरुभयोर्मध्ये सिंहरूपं धृत्वा तस्थौ । तदाह तित्तिरिः । तेभ्य उत्तरवेदिः सिंहीरूपं कृत्वोभयानन्तरापक्रम्यातिष्ठदिति । तदेतदभिप्रेत्यास्मिन् मन्त्रे सिंहीत्युच्यते । हे उत्तरवेदे, त्वं सिंह्यसि । सिंहरूपा भवसि ।" {सा० 5/4/2}

{2} "सा यदेवाद: सिंही भूत्वा शान्तेवाचचारेत्यादि निदानोद्घाटनं श्रौतम् ।" {उ०}

महीधरेण सायणोक्त एव इतिहासांशः प्रस्तुतः, तदुद्देश्यं च उत्तरवेदिरूपं निर्दिष्टम् । उव्वटेनात्र प्रस्तुतः श्रौतवाक्यांशो भिन्नः प्रतीयते. स कुत उद्धृत इति न ज्ञायते ।

{3} "सिंही अविद्याहन्त्री ।" "सिंही क्रूरत्वादिदोषनाशिका ।" "सिंही बलेन जाड्यत्वविनाशिनी" "सिंही चोरदस्व्यन्यायप्रलयकारिणी" "सिंही सर्वदुःखप्रणाशिका" {द०}

दयानन्देन मन्त्रे पन्चवारं पठितस्यास्य सिंहीपदस्य पन्चधा र्थो निर्दिष्टोऽत्रेति नवीनत्वम् ।

5.15.1. पांसुरः {विष्णुः}

{1} "पांसवो भूम्यादिलोकरूपा यस्य पदस्य सन्ति तत्पांसुरम् ।" {सा० 5/5/2}

{2} "पांसवो भूम्यादिलोकरूपा विद्यन्ते यस्य तत् पांसुरम् ।" "पांसुरे इव लुप्तोपमानम् । पांसुले रजस्वले प्रदेशे निहितं यथा न ज्ञायते तद्वत् ।" {म०}

{3} "पांसुरे । लुप्तोपममेतत् । पांसुल इव प्रदेशे निहितं न दृश्यते तत्समूढम् ।" {उ0}

अत्र सायणोक्तो र्थः विष्णोः पदस्य विशेषणत्वं सूचयति, उव्वटोक्तो-र्थश्चोपमानत्वम् । महीधरेणोभयोरपि निर्देशो विहितः ।

{4} "पांसुरे पांसवो रेणवो रजांसि रमन्ते यस्मिन्नन्तरिक्षे तस्मिन्" अत्र दयानन्देन अन्तरिक्षोद्देश्यकत्वं निर्दिष्टमिति विशेषः ।

5.17.1. देवश्रुतौ {अक्षधुरौ, यज्ञाङ्गम्}

{1} "हे देवश्रुतौ देवसभायां प्रसिद्धावक्षाग्रभागौ युवाम् ।" {सा0 5/5/4}

{2} "देवा एते धुरौ शृण्वन्ति इति देवश्रुतौ ।" {उ0}

{3} "अक्षधुरौ देवते । देवेषु श्रूयते देवश्रुतौ । शृणोतेः क्विप् तुगागमश्च । हे देवश्रुतौ देवसभायां प्रसिद्धे अक्षधुरौ अक्षाग्रभागौ ।" {म0}

{4} "देवश्रुतौ यथा दिव्यविद्याश्रुतौ विद्वांसौ ।" {द0}

पूर्वाचार्यैरक्षाग्रभागमुद्दिश्यपदस्यास्य प्रयोगो निर्दिष्टः, दयानन्देन विद्वांसौ इत्यर्थः सूचित इति भेदः ।

5.18.2. उरुगायः {विष्णुः}

{1} "उरुगायः उरुभिर्महात्मभिर्गीयते च ।" {सा0}

{2} "उरुगायः उरुगमनः ।" {उ0}

{3} "उरुगायः उरुर्गायो गमने यस्य उरुभिर्महात्मभिर्गीयत इति वा ।" {म0}

सायणव्याख्याने विष्णोः यशस्वितया भगवत्तया वा गेयत्वं सूच्यते पदेन । उव्वटादिभिस्तु तस्य गमनार्थग्रहणात् सर्वव्यापकत्वे र्थे भिप्रायो दर्शित इति भेदः ।

§4§ "उरुगायः यो बहूनर्थान् वेदद्वारा गायत्युपदिशति सः ।"
§द0§

अत्र दयानन्देन पदस्य तात्पर्यं विष्णोरुपदेशकत्वे निर्दिष्टमिति भेदः ।

5.27.1. द्युतानः §वायुः§

वायुमुद्दिश्य पदस्यास्य तद्विशेषणतया प्रयोगो ऽत्र वर्तते ।

§1§ "द्युतानः दीप्यमानो मारुतो वायुः ।" §सा0 5/7/3§

§2§ "द्युतानो दीप्यमानः ।" §उ0§

§3§ "द्युतानः यथा दिवं सद्विद्यागुणं विस्तारयति तथा ।"
§द0§

दयानन्देन सद्विद्यागुणविस्तारकर्तृत्वरूपो ऽर्थो दर्शित इति नवीनत्वम् ।

5.29.1. गिर्वणः §इन्द्रः§

इन्द्रमुद्दिश्य पदस्यास्य मन्त्रे प्रयोगः सायणभाष्यादवगम्यते ।

§1§ "इन्द्रः सदो ऽभिमानी गिर्वणाः।" "हे गिर्वणः ।"
§सा0 5/7/5§

§2§ "हे गिर्वणः,"इन्द्रो वै गिर्वा" इति श्रुतिः ।" §उ0§

§3§ "गीर्भिः स्तुतिभिर्वननीयो भजनीयो गिर्वण इन्द्रः सदो ऽभिमानी ।" §वम0§

§4§ "गिर्वणः गीर्भिः स्तोतुमर्हम्" §द0§

5.29.2. वृद्धायुः §इन्द्रः§

इन्द्रमिन्द्रस्य विशेषणमस्ति । अनेनेन्द्रस्य बहुविधं सामर्थ्यं व्यज्यते ।

§1§ "वृद्धायुम् वृद्धा आयवो मनुष्या उरुलक्षणा यस्य स तथोक्तः । यद्वा वृद्धायुरिति समानाधिकरणः । वृद्धश्चायुश्च महामनुष्य इत्यर्थः ।" §उ0§

(2) "वृद्धायुं वृद्धा आयवो मनुष्या यजमानादयो मरुतो वा यस्य तम् । यद्वा वृद्धः श्रेष्ठश्चासावायुश्च तं महामनुष्यम् ।" (म०)

(3) "वृद्धायुम् वृद्ध इव आचरन्तम्" (द०)

क्याच्छन्दसीत्युः ।

5.33.7. अध्वपतिः (सूर्यः)

उव्वटेन सूर्यमुद्दिश्य पदस्यास्य प्रयोगः सूचितः ।

(1) "हे सूर्य, अध्वपते, मार्गपते ।" (उ०)

(2) "अध्वपते मार्गपालक रवे ।" (म०)

(3) "अध्वपते, धर्मव्यवहारमार्गपालयितः ।" (द०)

दयानन्देन ईश्वरमुद्दिश्य पदस्य प्रयोगः सूचित इति विशेषः ।

5.42.1. वनस्पतिः (वनस्पतिः)

यूपवृक्षमुद्दिश्य पदस्यास्य प्रयोगः सायणाद्यैरुक्तः ।

(1) "हे वनस्पते, हे देव, तस्य पालक, दीप्यमानवृक्ष ।"

(सा० 5/9/2)

(2) "हे वनस्पते वनस्य पते, हे देव दीप्यमान वृक्षः" (म०)

(3) "वनस्पते, वनानां रक्षक ।" (द०)

5.42.2. ओषधिः (देवविशेषः)

उव्वटेन कुशतरूणमुद्दिश्य पदस्य प्रयोगः प्रतीयते ।

(1) "ओषधे, यथा सोमादिगणस्त्रायते ।" (द०)

6.5.1. परमं पदम् (विष्णुः/यज्ञप्रक्रिया, यूपकटकम्)

पदमिदं वस्तुतः विष्णोः स्वरूपवाचकमत्र यज्ञे यूपकटकमुद्दिश्य प्रयुज्यत

सायणभाष्यादवगम्यते ।

§1§ "विष्णोस्तत् परमं पदं स्वरूपम्" §सा० 6/1/6§

§2§ "विष्णोः सम्बन्धि परममुत्कृष्टं पदमादित्यमण्डलाख्यम् ।"
§उ० 5/3§

§3§ "विष्णोः व्यापकस्य ब्रह्मणः तत् परममुत्कृष्टं पदं भूरि महत् आदित्यमण्डललक्षणम् ।" §म० 5/3§

महीधरेण विष्णुशब्दस्य व्यापकब्रह्मरूपो र्थो निर्दिष्टः । स प्रसङ्गे- स्मिन् विशिष्यते । एषो र्थः पञ्चममन्त्रे उव्वटेनाप्येवं निर्दिष्टः -

"यद्विज्ञानघनबहुलमानन्दस्वभावं च तद् विष्णोः परमं पदम् ।"
§6/5§

§4§ "विष्णोः पूर्वमन्त्रप्रतिपादितस्य जगदुत्पत्तिस्थितिसंहतिविधातुः परमेश्वरस्य परमम् सर्वोत्कृष्टं पदं प्राप्तुमर्हम् ।" §द०§

<u>6.6.1. दैवीर्विशः §मरुतः§</u>

§1§ "दैवीर्विशः देवसम्बन्धिनीः प्रजा मरुद्गणादयः ।"
§सा० 6/1/7§

§2§ "दैवीर्विशः"दैव्यो वा एता विशो यत्पशवः" इति श्रुतिः ।"
§उ०§

सायणेन पदस्यास्य देवसम्बन्धिनीः प्रजा इति, उव्वटेन पशव इत्यर्थो निर्दिष्टः । महीधरेणोभयोः संग्रहः कृतः । मन्त्रप्रसङ्गात्, श्रुतिप्रामाण्यनिर्देशा- च्चात्र पशुरूपो र्थः साधुर्भवितुमर्हति ।

§3§ "दैवीः देवानां विदुषामिमाः प्रजाः ।" §द०§

<u>6.25.3. द्यौः §द्युलोकस्थदेवः§</u>

§1§ "दिवे द्युलोकवासिभ्यो देवेभ्यः ।" §सा० 6/7/2§

(2) "दिवे त्वा । हे सोम, देवलोकप्राप्तये" (उ०)

(3) "दिवे द्युलोकप्राप्तये"

"दिवे द्युलोकवासिभ्यो देवेभ्यः ।" (म०)

(4) "दिवे सर्वसुखद्योतनाय" (द०)

अत्र सायणेन पदस्य द्युलोकवासिदेवतारूपो र्थः उव्वटेन, देवलोकरूपो-र्थो निर्दिष्टः । महीधरेण उभयं निर्दिष्टम् । दयानन्देन सर्वसुखद्योतनमित्यर्थ उक्त इति भेदः ।

<u>6.25.4. सूर्यः (सविता)</u>

(1) "सूर्याय सूर्यप्रमुखेभ्यो देवेभ्यः ।" (उ०)

(2) "सूर्याय सूर्यमुखेभ्यो देवेभ्यः ।" (म०)

(3) "सूर्याय सूर्यगुणाय" (द०)

अत्र दयानन्दकृतः सूर्यगुणाय इत्यर्थो नवीनः ।

<u>6.27.1. अपांनपात् (आपः)</u>

(1) "अपांनपात् अपत्यरूपः" (सा० 6/7/4,5)

(2) "हे देव्यः आपः, अपान्नपात् ।" (उ०)

सायणेनास्य पदस्य अपत्यरूपो र्थो निर्दिष्टः, उव्वटेन तु संज्ञामात्र-त्वमुक्तमिति विशेषः ।

(3) "अपांनपात् अविनश्वरः ।" (द०)

<u>6.27.3. शुक्रपाः (सोमपा देवताः)</u>

सायणेन पदस्यास्य वाच्यत्वेन सोमपा देवाः सूचिताः -

(1) "शुक्रं दीप्तं सोमं पिबन्तीति शुक्रपाः ।" (सा० 6/7/5)

{2} "शुक्रशब्दः उपलक्षणार्थः । शुक्रादिसोमग्रहपातृभ्यो देवेभ्यः ।"
{उ०}

{3} "शुक्रपेभ्यः शुक्र इत्युपलक्षणम् । शुक्रादीन् सोमग्रहान् पिबन्तीति शुक्रपाः तेभ्यः । यद्वा शुक्रं दीप्तं सोमं पिबन्तीति ।" {म०}

{4} "शुक्रं वीर्यं रक्षन्ति तेभ्यः ।" {द०}

दयानन्दकृतो विग्रहः साधु प्रतीयमानो ऽपि प्रसङ्गे ऽस्मिन् न रोचते ।

<u>6.34.1. राधोगूर्ताः {आपः}</u>

अत्र एतत्पदमपां विशेषणमिति सायणेन निर्दिष्टम् ।

{1} "राधो धनमुद्गिरन्तीति राधोगूर्ता धनाभिवर्षिण्यः ।"
{सा० 6/8/5}

{2} "राधो धनमुद्गिरन्तीति राधोगूर्ताः ।" {उ०}

{3} "राधो धनं गुरन्ते उद्यच्छन्ति ददति ता राधोगूर्ताः । "गुरी उद्यमे" अस्मात् "असत्तनिषत्तः इत्यादिना कर्तरि क्तो नत्वाभावश्च निपात्यते ।" {म०}

अत्र महीधरस्य व्याख्यानं विग्रह-प्रकृति-प्रत्ययनिर्देशनादिना विशिष्यते।

{4} "राधोगूर्ताः धनवर्द्धिन्य एव" {द०}

<u>7.7.1. नियुतः {वायुः}</u>

{1} "नियुत इति वायोरश्वस्य नाम ।" {सा० 7/3/1}

{2} "नियुतो विश्ववार । बहवः ते नियुद्गुणयुक्ता अश्वा विद्यन्ते"
{उ०}

{3} "नियुतो वायो" "इत्युक्तेर्नियुच्छब्देन, वायुवाहनभूता मृगा उच्यन्ते ।" {म०}

अत्र नियुच्छब्दस्य सायणेन वायुवाहनभूतवो तात्पर्यतया निर्दिष्टः, उव्वटेन गुणविशिष्टवाचकत्वमुक्तम्, महीधरेण वायुवाहनतया मृगाणां निर्देशः कृत इति वैलक्षण्यम् ।

§4§ "नियुज्यन्ते ये तान् निश्चितान् शमादिगुणान् अत्र कर्मणि क्विप् ।" §द0§

7.7.2. विश्ववारः §वायुः§

वायोर्विशेषणात्मकं पदमिदम् ।

§1§ "हे विश्ववारः, विश्वव्यापक ।" §सा0 7/3/1§

§2§ "विश्वं सर्वं वृणोति विश्वैः सर्वैर्वा व्रियते प्राणिभिरिति विश्ववारः ।" §उ0§

§3§ "विश्वं सर्वं वृणोति व्याप्नोति विश्वैर्वा व्रियते प्रार्थ्यते इति विश्ववारः ।" §म0§

अनेन विश्ववारपदस्य भाष्यव्याख्यानेन वायोः व्यापकत्वं सर्वैः प्रार्थनीयत्वं च सूच्यते ।

§5§ "विश्वान् सर्वानानन्दान् वृणोति तत्सम्बुद्धौ ।" §द0§

7.11.2. माध्वी §अश्विनौ§

इदमश्विनोर्विशेषणमिति सायणः ।

§1§ "माध्वीभ्यां मधुब्राह्मणं यावश्विनावधीयेते ताभ्यामश्विभ्याम्" §सा0 7/5/1§

§2§ "दध्यङ् ह वा आभ्यामाथर्वणो मधुनाम ब्राह्मणमुवाच इत्युपक्रम्य तस्मान्मधुमत्यर्वाक् गृह्णाति माध्वीभ्यां त्वेति सादयति" इत्याह श्रुतिः ।" §उ0§

"मधु ब्राह्मणं यावधीयाते तौ माध्वी इत्युच्येते ।"

अनेन भाष्यव्याख्यानेन पदमेतत् अश्विनोः मधुब्राह्मणाध्ययनकृतं वैशिष्ट्यं सूचयतीति ज्ञायते ।

{3} "माध्वीभ्यां मुनीतियोगरीतिभ्याम्" {द०}

<u>7.12.1. ज्येष्ठतातिम् {इन्द्रः}</u>

इदमिन्द्रस्य विशेषणम् । अनेन तस्यातीव प्रशस्यत्वं अग्रपूज्यत्वं वा सूच्यते ।

{1} "कीदृशमिन्द्रं ज्येष्ठतातिम् । स्वार्थे तातिप्रत्ययः ।" {सा० 7/6/1}

{2} "ज्येष्ठतातिं उत्कृष्टतातिं उत्कृष्टविस्तारम् । अथवा "वृकज्येष्ठाभ्यां तिल्तातिलौ च छन्दसि" इति तद्धितः प्रशंसायाम् । ज्येष्ठतातिं ज्येष्ठप्रशस्यम् ।" {उ०}

{3} "ज्येष्ठतातिं ततनं तातिः विस्तारः ज्येष्ठा उत्कृष्टा तातिर्विस्तारो यस्य तम् । अथवा "वृकज्येष्ठाभ्यां०} इत्यादिना प्रशंसायां तातिल्-प्रत्ययः । प्रशस्तो ज्येष्ठो ज्येष्ठेषु प्रशस्यो वा ज्येष्ठतातिः ।" {म०}

{4} "ज्येष्ठतातिं प्रशस्तं ज्येष्ठम्" {द०}

<u>7.12.2. बर्हिषदम् {इन्द्रः}</u>

इदमिन्द्रस्य विशेषणमस्ति । अनेन तस्य यागे सन्निहितत्वमवगम्यते ।

{1} "बर्हिषदं यागे सन्निहितत्वेन तिष्ठन्तम् ।" {सा० 7/6/1}

{2} "बर्हिषदम् यज्ञेषु बर्हिषि सीदतीति बर्हिषदम् ।" {उ०}

{3} "यो बहिरन्तरिक्षे सीदति तम् ।" {द०}

दयानन्देन पदस्यास्य प्रयोगः योगिनशुद्धिज्ञस्य कृत इति विशेषः ।

7.12.3. स्वर्विदम् (इन्द्रः)

इदमिन्द्रस्य विशेषणमस्ति । अनेनेन्द्रस्य स्वर्गाधिकारो व्यज्यते ।

(1) "स्वर्विदं यजमानाय दातव्यं स्वर्गं वेत्तीति स्वर्वित् ।" (सा० 7/6/1)

(2) "स्वशब्देन द्युलोको ऽभिधीयते । द्युलाकं जानाति तत्र हि निवासः ।" (उ०)

(3) "स्वः द्युलोकं वेत्ति जानातीति स्वर्वित्तम् । तत्र हि तस्य निवासः ।" (म०)

सायणेन यजमानाय देयतया स्वर्गस्य ज्ञानं इन्द्रे निर्दिष्टम्, उव्वटाभिस्तु निवासभूमिरूपेण ज्ञानमुक्तमिति भेदः ।

(4) "स्वर्विदं स्वः सुखं वेदयति तम् ।" (द०)

7.15.1. होत्राः (यष्टव्याः, देवताः)

सायणेन पदस्यास्य यष्टव्या देवता इत्यर्थो ऽत्र निर्दिष्टः ।

(1) "होत्रा यष्टव्या देवताः ।" (सा० 7/6/7)

(2) "होत्राशब्देन होतृकयाज्याछन्दांस्यभिधीयन्ते ।" (उ०)

(3) "होत्राः छन्दो ऽभिमानिन्यो देवताः ।"
"होत्राशब्देन याज्याछन्दांस्युच्यन्ते ।" (म०)

उव्वटादिना याज्याछन्दरूपस्य पदार्थस्य निर्देशः सायणापेक्षया भिन्नः प्रतीयते ।

(4) "होत्राः स्वीकर्तुमर्हाः ।" (द०)

7.16.1. वेनः (चन्द्रः/इन्द्र/(यज्ञाङ्गम्, सोमः)

सायणेन पदमिदम् इन्द्रस्य विशेषणमिति निर्दिश्य अस्यार्थः कान्त

इति कथितम् ।

§1§ "अयमितीन्द्रो निर्दिश्यते । वेनः कान्तो श्रीष्टः । विनि कान्तावित्यस्माद्धातोरुत्पन्नत्वात् ।" §सा0-7/7/1§

§2§ "सोम्यानया त्रिष्टुभा धिदैवमधियज्ञं वा वस्थितः स्तूयते । अधिदैवं तावच्चन्द्रात्मना स्तूयते ।" §उ0§

"वेनः वेनतेः कान्तिकर्मणः । अयं चन्द्रमा वेनः कान्तः ।" §उ0§

§3§ "वेनो वेनतेः कान्तिकर्मण इति यास्कः । विनि कान्तौ इत्यस्य रूपम् । अयं वेनः कान्तश्चन्द्रः ।" §म0§

सायणेन इदमिन्द्रमुद्दिश्य प्रयुक्तमिति निर्दिष्टम् । उव्वटादिभिस्तु चन्द्रस्येति भेदः ।

§4§ "वेनः कमनीयश्चन्द्रः" §द0§

<u>7.16.3. ज्योतिर्जरायुः §चन्द्रः, इन्द्रः§</u>

§1§ "ज्योतिर्जरायुः विद्युल्लक्षणं तेजो जरायुवद्वेष्टनं यस्यासौ ज्योतिर्जरायुः ।" §सा0 7/7/1§

§2§ "ज्योतिर्जरायू । ज्योतिरस्य जरायुस्थानीयं भवति चन्द्रमसः।" §उ0§

अत्र सायणेन स्वयमुद्दिष्टस्य इन्द्रस्य विशेषणतया व्याख्यानं कुर्वता विद्युल्लक्षणतेजोवेष्टनं तस्योक्तम्, उव्वटेन तथा किमपि स्पष्टं नोक्तम् । तथापि चन्द्रमसः जरायुस्थानीयत्वं ज्योतिषि निर्दिष्टम् । महीधरेण सायणाशय एवोक्तः । परं स्वयमङ्गीकृतस्य चन्द्ररूपोद्देशस्य विचारः तेन कृतो न वेति सन्देहास्थानमस्ति ।

§3§ "ज्योतिर्जरायुः ज्योतिषां जरायुरिवाच्छादकः ।" §द0§

7.22.1. उक्थाव्यम् {इन्द्रः, देवः}

काण्वसंहितायाम् अस्य पदस्य पाठो भिन्नतया दृश्यते । तत्र पदमिदं "उक्थायुवम्" इति दृश्यते । इन्द्रमुद्दिश्य पदमेतत् प्रयुक्तमस्ति ।

{1} "उक्थायुवं शस्त्रं कामयत इत्युक्थायुश्छान्दसो दीर्घः ।"
{सा० 7/9/1}

{2} "उक्थानि मैत्रावरुणब्राह्मणाच्छंस्यावाकसम्बन्धीनि अवति गोपायतीत्युक्थाव्यम् ।" {उ०}

{3} "उक्थानि मित्रावरुणब्राह्मणाच्छंस्यावाक सम्बन्धीनि शस्त्राणि अवति रक्षतीत्युक्थावीः तम् ।" {म०}

{4} "उक्थाव्यम् प्रशंसार्हाणि स्तोत्राणि शस्त्रविशेषकाणि वा तस्य तमिव सेनापतिम् ।" {द०}

7.24.1. दिवः मूर्धा {अग्निः, सूर्यरूपः}

इदमग्निवाचकं पदमिति सायणेनोक्तम् । अनेन तद्व्याख्यानेनायं व्यापकः तेजः पदार्थ इत्यवगम्यते, केवलं भौतिको ग्निर्नास्ति पार्थिवः ।

{1} "कीदृशमग्निं दिवो मूर्धानं शिरोवदुन्नतप्रदेशे सूर्यरूपेणावस्थाय द्युलोकस्य भासकम् ।" {सा० 7/10/1}

{2} "वैश्वानरस्त्वत्र सर्वात्मा स्तूयते ।" "मूर्धानं दिवः द्युलोकस्य सूर्यात्मना वस्थितं मूर्धानं शिरः आहुब्रह्मविदः ।" {उ०}

{3} "मूर्धानं शिरोवद् वर्तमानम्, दिवः द्योतमानस्य सूर्यस्य ।"
{द०}

7.24.2. पृथिव्या अरतिः {अग्निः}

इदमग्नेर्विशेषणं पदमस्ति । अनेन तस्य उपरभाभावः सूच्यत इति सायणः ।

§1§ 6"अरतिं पृथिव्याः । रतिरूपरतिस्तद्रहितम् । न हि पृथिव्या उपरि कदाचिदप्यग्निस्सरमते । किन्तु दाहकपालकप्रकाशैः सर्वाननुगृह्णन् सर्वदा वर्तते ।" §ऋ० 7/10/1§

§2§ "यं चारतिं पृथिव्याः । पृथिवीशब्देनान्तरिक्षमभिधीयते । पठितं चैतदन्तरिक्षनामसु । एतद् अन्तरिक्षम्, आकाशम्, पृथिवीति । अरतिं अलमतिं पर्याप्तमतिं पृथिव्या अन्तरिक्षलोकस्याहुः । तत्र ह्यसौ स्थितो यथाकालं वृष्ट्या पुष्णाति भूतानि ।" §उ०§

महीधरेण पूर्वाचार्याभ्यां निर्दिष्ट स्वार्थ उपस्थापितो नान्यः । सायणभाष्ये"दाहपाकप्रकाशैः" इत्यस्य स्थाने प्रमादः सम्भाव्यते । तत्र अग्नेस्सर-णाभावः प्रोक्तः, उव्वटभाष्ये तु अन्तरिक्षस्य पूरकत्वमुक्तमिति भेदः ।

§4§ "अरतिम् गच्छति प्राप्नोति तम्" §द०§

7.24.3. वैश्वानरः §अग्निः§

इदमग्नेर्नामास्ति । अनेन जाठराग्निः बोध्यत इति महीधरेण निर्दि-ष्टम् । श्रीमद्भगवद्गीतायामपि तथा श्रूयते । "अहं वैश्वानरो भूत्वा०" इति ।

§1§ "विश्वेभ्यः सर्वेभ्यो नरेभ्यो हितो वैश्वानरस्तम् । जठराग्नि-रूपेणान्नपाचकत्वात् ।" §म०§

§2§ "वैश्वानरम् यो विश्वान् नरानानन्दान्नयति तम् । वैश्वानरः कस्माद् विश्वान् नरान् नयति विश्व एनं नरा नयन्तीति वा पि वा विश्वानर एव स्यात् ।" §द०§

अत्र निरुक्तवाक्यप्रामाण्योपन्याससहितं दयानन्दस्य व्याख्यानं विशि-ष्यते ।

7.24.4. कविः §अग्निः§

इदमग्नेर्विशेषणं पदमस्ति । अनेनाग्नेः भक्तानुग्रहसामर्थ्यं सूच्यत इति

सायणः ।

{1} "कविं स्वभक्ताननुग्रहीतुमभिज्ञम् ।" {सा० 7/10/1}

{2} "कविं क्रान्तदर्शनम् ।" {उ०}

{3} "कविं क्रान्तदर्शनं स्वभक्ताननुग्रहीतुमभिज्ञमित्यर्थः ।" {म०}

{4} "कविं क्रान्तदर्शनम् ।" {द०}

अत्र सर्वेषां साम्यं स्पष्टम् ।

7.24.5. सम्राट् {अग्निः}

इदमग्नेर्विशेषणम् । अनेनाग्नेर्दीप्यमानं स्वरूपं सूच्यत इति सायणः ।

{1} "सम्राजं सम्यग् दीप्यमानम् ।" {सा० 7/10/1}

{2} "सम्राजं सम्यगैश्वर्येण युक्तम् ।" {उ०}

{3} "सम्राजं सम्यग्दीप्यमानमैश्वर्येण युक्तमित्यर्थः ।" {म०}

{4} "सम्राजं चक्रवर्तिनमिव" {द०}

7.24.6. अतिथिः {अग्निः}

इदमग्नेर्विशेषणम् । अनेनाग्नेः सत्कारयोग्यत्वमभ्यागतस्येव सूच्यत इति सायणः ।

{1} "अतिथिं हविर्भिः सत्कारयोग्यम्" {सा० 7/10/1}

{2} "विज्ञायते हि अग्निरतिथिरूपेण गृहान् प्रविशति तस्मात्-तस्योदकमाहरन्ति ।" {उ०}

{3} "अतिथिं अतिथिवत् पूज्यम् ।" {द०}

7.33.1. ओमासः {विश्वेदेवाः}

इदं विश्वेदेवानां विशेषणमस्ति । अनेन तेषां रक्षकत्वं सूच्यत इति सायणः ।

{1} "ओमासो रक्षितारः" {सा० 7/15}

{2} "ओमासः अवितारः तर्पयितारः तर्पणीया वा ।" {उ०}

{3} "ओमासः ऊमाः "अवन्तीत्योमा रक्षितारः अवितारो वावनीया वा" इति यास्कोक्तेः । तर्पयितारस्तर्पणीया वा । अवतेर्मक्प्रत्ययः सम्प्रसारणं च ।" {म०}

अत्र महीधरेण यास्कवाक्योपन्यासेन प्रकृतिप्रत्ययनिर्देशेन च पूर्वाचार्यकृतो थों विशदीकृत इति विशेषः ।

{4} "ओमासः अवन्ति सद्गुणे रक्षन्ति ते ।" {द०}

दयानन्देन पूर्वाचार्यानुकूलः रक्षिता इत्यर्थस्तु निर्दिष्ट एव, किन्च तत्साधनत्वेन सद्गुणानामप्युल्लेखः कृत इति तद्भाष्यमत्र विशिष्यते ।

7.33.2. चर्षणीधृत् {विश्वेदेवाः}

इदं विश्वेदेवानां विशेषणं तेषां मनुष्यपोषणशक्तिं सूचयतीति सायणः।

{1} "चर्षणीधृतो मनुष्यपोषकाः । अनिष्टं निवार्णं, रक्षणम् । इष्टं प्राणपोषणम् ।" {सा० 7/15}

{2} "चर्षणयो मनुष्यास्तान् धारयन्ति तैर्वा ध्रियन्ते चर्षणीधृतः ।" {उ०}

{3} "चर्षणयो मनुष्यास्तान् धरन्ति पुष्णन्ति तैर्वा ध्रियन्ते ते चर्षणीधृतः । चर्षणिशब्दस्य संहितायां दीर्घः । अनिष्टनिरसनं रक्षणम्, इष्टप्रापणं पोषणमित्यवनधरणयोर्भेदः ।" {म०}

अत्र महीधरस्य व्याख्यानं स्पष्टार्थतया विशिष्यते ।

{4} "चर्षणीधृतः चर्षणयो मनुष्याः तान् धरन्ति पोषयन्ति ते ।" {द०}

"अन्येषामपि दृश्यत इति दीर्घः ।" {द०}

7.36.1. अकवारिम् {इन्द्रः}

इदमिन्द्रस्य विशेषणमस्ति ।

{1} "अकवारिम् अकुत्सितारिम् । शत्रवो पि यस्याकुत्सिता वृत्रादयः । अथवा अकुत्सितदानं अकुत्सितैश्वर्यम् ।" {उ0}

{2} "कुत्सिता अरयो यस्य स कवारिः न कवारिरकवारिस्तं यस्य शत्रवो प्यकुत्सिता वृत्रादयः । यद्वा अकुत्सितमियर्ति ऐश्वर्यं प्राप्नोतीत्यकवारिस्तम् उत्कृष्टैश्वर्यम् ।" {म0}

एतद्व्याख्यानद्वयानुसार अनेन पदेन अकवारिणा इन्द्रस्य अकुत्सितारित्वं उत्कृष्टैश्वर्यवत्त्वं च ज्ञायते । अत्र विग्रहपूर्वकव्याख्यानेन महीधरो विशिष्यते ।

{3} "अकवारिम्, कौति धर्ममुपदिशतीति कवः । न कवो अकवो धर्मात्मा तस्यारिः शत्रुस्तम् ।" {द0}

अत्र दयानन्दकृतो विग्रहः, अधर्मात्मनां शत्रुरिति पदार्थनिर्देशश्च पूर्वाचार्यतो भिन्नः प्रतीयते ।

7.36.2. विश्वासाट् {इन्द्रः}

इदमिन्द्रस्य विशेषणमस्ति । अनेनेन्द्रस्य विश्वपालने शक्तिः सूच्यत इति सायणः ।

{1} "विश्वासाहं विश्वं पालयितुं सहिष्णुम् । अनलसमित्यर्थः ।" {सा0 7/18}

{2} "विश्वासहम् । सहतिरभिभवार्थः । स्वधर्मच्युतस्य सर्वस्याभिभवितारम् ।" {उ0}

{3} "विश्वासाहं विश्वं पालयितुं सहते स विश्वासाट् । अनलस-

मित्यर्थः । "भजसहवहाम्" इति विण् । यद्वा सहतिरभिभवार्थः । स्वधर्मच्युतस्य विश्वस्य सर्वस्याभिभवितारम् ।" [म0]

महीधरेण पूर्वाचार्यानुसरणमात्रं न कृतम्, तत्र विशेषश्च कश्चिदाहितः प्रकृतिप्रत्ययादिनिर्देशेन । अत्र तस्य "विण्" प्रत्ययस्य तद्विधायकसूत्रस्य निर्देशाद वैशिष्ट्यम् ।

[4] "विश्वासहम् विश्वान् सर्वान् सहते तम् । अत्र विश्वपूर्वात् सहधातोः "छन्दसि सहः" [अ0 3/2/63] इति ण्विः ।"अन्येषामपि दृश्यते" इति दीर्घश्च ।" [द0]

<u>7.36.3. शासः [इन्द्रः]</u>

इदमिन्द्रस्य विशेषणं तस्य देवस्य शासनशक्तिं सूचयति ।

[1] "शासं प्रशासनवन्तं शासितारं वा ।" [उ0]

[2] "शासं शास्तीति शासः पचाद्यच् । शासितारं दुष्टानाम् । यद्वा शासनं शासस्तद्वन्तम् । अर्श आदित्वादच् । प्रशासनवन्तम् ।" [म0]

अत्र उव्वटोक्त एवार्थो महीधरेण विग्रह-प्रत्ययनिर्देशपूर्वकं विशदीकृत इति स्पष्टमवगम्यते ।

[3] "शासम् शासितारम् ।" [द0]

<u>7.39.1. आचर्षणिप्राः [महेन्द्रः]</u>

इदं महेन्द्रस्य विशेषणमस्ति । अनेनेन्द्रस्य मनुष्यमनोरथपूरणशक्तिः सूच्यत इति सायणः ।

[1] "चर्षणयो मनुष्यास्तान् प्राति तदभीष्टभोग्यैः पूरयतीति चर्षणिप्राः । यथा राजामात्यादिमनुष्यः सेवकानभीष्टभोगैरापूरयति तद्वत् ।" [सा0 7/21]

{2} "चर्षणयो मनुष्याः । "प्रा पूरणे" । आगत्य च चर्षणीनां मनुष्याणां पूरयिता कामैः ।" {उ0}

{3} "आसमन्तात् चर्षणीन् मनुष्यान् प्राति अभीष्टकामैः पूरयतीत्याचर्षणिप्राः । प्रा पूरणे इति क्विप् । यथा राजा अमात्यादिर्मनुष्यः सेवकानभीष्टकामैः पूरयति तद्वत् ।" {म0}

अत्र त्रयाणामर्थसाम्ये पि व्याख्यानं महीधरस्य विशिष्यते, स्पष्टव्याख्यानात्, क्विप्प्रत्ययनिर्देशाच्च ।

{4} "आचर्षणिप्राः चर्षणीन् मनुष्यान् प्राति सुखैः प्रपूरयति सः ।" {द0}

7.39.2. द्विबर्हाः {महेन्द्रः}

इदं महेन्द्रनाम्नो देवविशेषस्य विशेषणमस्ति ।

{1} "द्वयोः प्रकृतिविकृतिरूपयोः सोमयागयोर्वृद्धिर्यस्येति द्विबर्हा ।" {सा0 7/21}

{2} "द्वयोः स्थानयोः परिवृढः मध्यमे च स्थाने उत्तमे च परिवृढः प्रभुः ।" {उ0}

{3} "द्विबर्हाः "बृहि वृद्धौ बर्हणं बर्हः वृद्धिः असुन्प्रत्ययः । द्वयोः प्रकृतिविकृतिरूपयोः सोमयागयोर्बर्हो यस्य स द्विबर्हाः ।" {म0}

"यद्वा द्वयोः स्थानयोर्बर्हाः वृद्धः परिवृढः प्रभुः मध्यमे स्थाने उत्तमे च ।" {म0}

अत्र प्रकृतिविकृतिरूपसोमयागयोर्वृद्धिमत्त्वमिति सायणाशयः, उव्वटस्य मध्यमोत्तमस्थानप्रभुत्वरूपदर्थादभिन्नः । महीधरेण द्वयोर्मतं प्रकृतिप्रत्ययविग्रहनिर्देशपुरस्सरमुपस्थापितम् ।

§4§ "द्वे बर्हसी व्यावहारिकपारमार्थिकवृद्धिकरे विज्ञाने यस्य सः । द्विबर्हा इति पदनामसु पठितम् ।" §द0§

अत्र दयानन्दस्य विग्रहः, पदार्थनिर्देशश्च नवीनतया भिद्यते ।

7.39.3. अमिनः §सहोभिः, महेन्द्रः§

अमितपरिमाणे र्थे पदमेतत् प्रयुक्तमवेति सायणेन निर्दिष्टम् । अनेन सहोभिरिति अन्यपदयुतेन इन्द्रस्य अमितबलसम्पन्नत्वं सूच्यत इति तस्यास्त्यभिप्रायः ।

§1§ "अमिनः सहोभिः बलैरमित उपायारहितः ।" §सा0 7/21§

§2§ "अमिनो मितमात्रः सहोभिर्बलैः अप्राक्तोलितबलः । यद्वा अनुपहिंसितः शत्रुतलैः ।" §उ0§

§3§ "सहोभिः बलैः अमिनः अमितः उपमारहितः अतोलितबल इत्यर्थः । "अमिनो मितमात्रो महान् भवत्यभ्यमितो वा । इति यास्कोक्तेः । यद्वा सहोभिः शतबलैरमितः अप्रक्षिप्तः । अनुपहिंसित इत्यर्थः । "डुमिन् प्रक्षेपे" "मीन् हिंसायाम्" इत्यस्य वा प्रयोगः । पूर्वपक्षे माने सर्वत्र निष्ठा नत्त्वमार्षम् ।" §म0§

§4§ "अमिनः अनुपमो तुलपराक्रमः ।" §द0§

7.41.1. जातवेदाः §सूर्यः§

इदं सूर्यस्य विशेषणं तस्य ज्ञानसम्पन्नत्वं सूचयति ।

§1§ "जातवेदसम् जातप्रज्ञानम्" §उ0§

§2§ "जातवेदसं जातं वेदो ज्ञानं धनं वा यस्मात्तम् ।"

अत्र महीधरेण विग्रहेण सह धनस्यापि निर्देशः कृतः ।

§3§ "जातवेदसम् जातानि भूतानि सर्वाणि वेदजातान् मूर्तिमतः पदार्थान् विन्दत इति वा तम् । §4/1§

इमं मन्त्रं यास्कमुनिरेवं निर्ववित्त-जातवेदाः कस्माज्जातानि वेद जातानि वैनं विदुर्जाते जाते विद्यत इति वा जातवित्तो वा जातप्रज्ञानो यत्तज्जातः पशून् विन्दतेति तज्जातवेदसो जातवेदस्त्वमिति ।" ‖द०‖

7.41.2. केतवः ‖सूर्य-रश्मयः‖

इदं रश्मिवाचकं पदमत्र भाष्यादवगम्यते ।

‖1‖ "केतवो रश्मयः ।" ‖उ०‖

‖2‖ "केतवः प्रज्ञानानि । केतुरिति प्रज्ञानामसु पठितम् ।" ‖द०‖

अत्र दयानन्देन कृतः प्रज्ञानरूपो र्थो विभिद्यते ।

7.45.1. तुथः ‖ब्रह्मा, प्रजापतिः‖

इदं ब्रह्मणो नामेति भाष्यादवगम्यते ।

‖1‖ "तुथो ब्रह्मा प्रजापतिः ।" ‖उ०‖

‖2‖ "तुथो ब्रह्मरूपः प्रजापतिः"

"ब्रह्म वै तुर्थः" इति श्रुतेः ।" ‖म०‖

‖3‖ "तुथः ज्ञानवृद्धः । अत्र तु गतिवृद्धिहिंसाभिवत्यस्मादौणादिकः स्थक्-प्रत्ययः ।" ‖द०‖

अत्र दयानन्दकृतो ज्ञानवृद्ध इत्यर्थो नवीनः । धातु-प्रत्यय-सूत्रनिर्देशाद विशिष्टश्च ।

7.45.2. विश्ववेदाः ‖ब्रह्मा‖

इदमत्र तुथसंज्ञया भिहितस्य ब्रह्मणो विशेषणमस्ति । अनेन तस्य विशिष्टं ज्ञानं सूच्यते ।

‖1‖ "विश्ववेदाः सर्वज्ञः ।" ‖उ०‖

{2} "वेदनं वेदो ज्ञानम् । विश्वं सर्वं वेदो यस्य स विश्ववेदाः सर्वज्ञः ।" {म०}

{3} "विश्ववेदाः यः परमात्मा विश्वं सर्वं वेत्ति तद्वद् वर्तमानः ।" {द०}

8.1.1. उरुगायः {विष्णुः}

इदं विष्णोर्विशेषणं तस्य यशोवैभवं सूचयति । उव्वटेन इदम् उरुग-शब्दस्य चतुर्थ्यन्तं पदमित्यभिप्रायेण व्याख्यातम् ।

{1} "उरुगाय । हे विष्णो उरुगमनाय ।" {उ०}

{2} "उरुभिर्बहुभिर्गीयते स्तूयत इत्युरुगायस्तत्सम्बोधनम् ।" {म०}

{3} "उरुगाय, उरूणि बहूनि शास्त्राणि गायति पठति तत्सम्बुद्धौ।"

दयानन्देन कुमारं ब्रह्मचारिणमुद्दिश्य पदस्यास्य प्रयोगः, बहुशास्त्र-विदित्यर्थश्च निर्दिष्ट इति भेदः ।

8.2.1. स्तरीः {इन्द्रः/पतिविशेषणम्}

इदं पदं हिंसकवाचकमिति सायणः ।

{1} "स्तरीर्हिंसकः" {सा०}

{2} "स्वभावाच्छादकः संकुचितः ।" {द०}

दयानन्देन पदमिदं स्त्रिया स्वपतिमुद्दिश्य कथ्यमानं कल्पयित्वा स्वभावाच्छादक इत्यर्थो निर्दिष्ट इति भेदः ।

8.5.1. विवस्वान् {आदित्यः}

इदमादित्यस्य नाम सम्बोधनायात्र मन्त्रे प्रयुक्तमस्ति । सायणेना-स्यार्थद्वयं निर्दिष्टम् ।

§1§ "तमांसि विवासयतीति विवस्वान्, विशिष्टधनवान् वा ।"
§सा० 8/1§

§2§ "तमांसि विवासयतीति विवस्वान् आदित्य उच्यते ।" §उ०§

§3§ "तमांसि विवासयति नाशयतीति विवस्वान् ।" "यद्वा विशिष्टं वसु धनमस्येति विवस्वान् । मतौ टिलोपश्छान्दसः ।" §म०§

§4§ "विवस्वान् विविधे स्थाने वसति तत्सम्बुद्धौ ।" §द०§

अत्र दयानन्दस्य विविधस्थानवासित्वरूपो र्थः भिद्यते । अन्यैरन्धकारनाशस्योक्तत्वात् ।

8.7.2. भगः §आदित्यः/यज्ञफलम्§

इदमादित्यस्य संज्ञार्थे प्रयुक्तं पदं तस्यैश्वर्यवत्त्वं सूचयति ।

§1§ "भगाय ऐश्वर्यगुणयुक्ताय । ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इतीर्यति ।" §सा० 8/4§

§2§ "भगाय यज्ञफलाय ।" §उ०§

§3§ "भगाय ऐश्वर्यादिगुणयुक्ताय" "भगमस्यास्तीति भगः । अर्श आदित्वादच् । "ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा ।" §म०§

अत्र पदविग्रहस्य, अच्प्रत्ययस्य च निर्देशाद महीधरस्याधिक्यम् । उव्वटस्य यज्ञफलस्यार्थप्रकाशनाद भेदश्च प्रतीयते ।

§4§ "भगाय धनाद्याय सेवनीयायैश्वर्याय ।" §द०§

8.8.3. बृहद्भाः §विश्वेदेवाः§

इदं विश्वदेवात्मकस्य प्रजापतेर्विशेषणमिति सायणेन निर्दिष्टम् । अनेन तस्य देवस्य सृष्टौ शक्तिविशेषः सूच्यते ।

{1} "बृहदुक्षाय बृहन्महाँश्चासौ उक्षः सेक्ता चेति बृहदुक्षः । प्रजापतिर्वै बृहदुक्ष इति श्रुतेः । तादृशाय जगदुत्पादमित्रे विश्वदेवात्मकाय प्रजापतये ।"

{सा० 8/5}

{2} "बृहदुक्षाय नमः महासेचनाय जगदुत्पत्तिबीजाय प्रजापतये"

{उ०}

{3} "बृहदुक्षाय बृहन्महाँश्चासौ उक्षा सेक्ता च बृहदुक्षः तस्मै महते सेक्त्रे जगदुत्पादमित्रे प्रजापतये ।" "प्रजापतिर्वै बृहदुक्षः" इति श्रुतेः बृहदुक्षशब्देन प्रजापतिः ।" {म०}

{4} "बृहदुक्षाय बृहद् वीर्यमुक्षति सिन्चति तस्मै । बृहदिति महन्नामसु पठितम् ।" {द०}

दयानन्देन पदमिदं पुरुषविशेषस्य पतिरूपस्य विशेषणतया व्याख्यातमिति विशेषः ।

8.12.3. स्तुतस्तोमः {सोमः}

इदं सोमस्य विशेषणं तस्य स्तुतियोग्यत्वमाचष्टे ।

{1} "स्तुतस्तोमस्य उद्गातृभिस्तुतानि स्तोत्राणि यस्य स तथोक्तः।"

{सा० 8/7}

{2} "उद्गातृभिः स्तुताः स्तोमाः स्तोत्राणि यस्य स स्तुतस्तोमस्तस्य ।" {म०}

{3} "उद्गातृभिःस्तुताः स्तोमाः स्तोत्राणि यस्य स स्तुतस्तोमस्तस्य ।" {म०}

{4} "स्तुतस्तोमस्य स्तुतः स्तोमः सामवेदगान विशेषो येन सः ।"

{द०}

अत्र दयानन्देन स्तोमशब्दस्य सामवेदगानविशेष इत्यर्थो निर्दिष्ट इति विशेषः ।

8.12.4. शस्तोक्थः (सोमः)

इदं सोमस्य विशेषणत्वेन प्रयुक्तं पदं तस्य सोमस्य शस्त्रविशेषसम्पन्नत्वं सूचयतीति सायणभाष्यादवगम्यते ।

(1) "होतृभिः शस्तानि उक्थानि शस्त्राणि यस्य स तथोक्तः ।" (सा० 8/7)

(2) "शस्तोक्थस्य । शस्तानि ह्युक्थानि भवन्ति ।" (उ०)

(3) "शस्तोक्थस्य होतृभिः शस्तानि उक्थानि शस्त्राणि यस्य स शस्तोक्थस्तस्य ।" (म०)

(4) "शस्तोक्थस्य शस्तानि प्रशंसितानि उक्थानि ऋक्सूक्तानि येन तस्य ।" (द०)

पूर्वाचार्यैरुक्थशब्दस्य शस्त्ररूपो र्थो निर्दिष्टः, दयानन्देन ऋक्सूक्तरूप इति भेदः ।

8.19.2. घर्मः (आदित्यः/लोकविशेषः, द्यौः)

इदम् आदित्यस्याभिधायकं पदमस्ति ।

(1) "घर्मं चादित्यम् ।" (उ०)

(2) "घर्ममादित्यमण्डलम् ।" (म०)

(3) "घर्मम् अन्नं यज्ञं वा घर्म इत्यन्ननामसु पठितम् ।" (द०)

8.31.1. दिवो विमहसः (मरुतः)

इदं मरुतां विशेषणत्वेन प्रयुक्तं पदं तेषां तेजो विशेषं सूचयति ।

(1) "हे दिवो विमहसः, द्युलोकस्य महयितारः पूजयितारः ।" (उ०)

(2) "हे दिवो विमहसः विशिष्टं महो येषां ते द्युलोकसम्बन्धिना

विशिष्टेन महसा तेजसा युक्ताः । यद्वा विशिष्टं महन्ति पूजयन्ति ते विमहसः द्युलोकस्य पूजयितारो हे मरुतः ।" {म०}

{3} "दिवः दिव्या गुणाः स्वभावाः क्रिया वा । विमहसः विविधतया पूजनीयाः ।" {द०}

8.33.2. षोडशी {इन्द्रः}

सायणेनेदं पदं इन्द्रस्य विशेषणमिति निर्दिष्टम् । अनेन तस्य षोडश-ग्रहवत्त्वं प्रकाश्यते ।

{1} "षोडशिने षोडशो ग्रहो स्यास्तीति षोडशी तादृशेन्द्राय ।"
{सा० 8/8}

{2} "षोडशिस्ने। षोडशं स्तोत्रमस्यास्तीति षोडशी, तस्मै इन्द्राय।"
{म०}

{3} "षोडशिने प्रशस्ताः षोडशकलाः विद्यन्ते यस्मिंस्तस्मै ।" {द०}

8.34.1. कक्ष्यप्रा {इन्द्रसम्बद्धाश्वौ}

सायणेन इन्द्रस्याश्वयोः विशेषणतया पदस्यास्य व्याख्यानं विहितम् ।

{1} "कक्ष्यप्रा कक्षे भवः कक्ष्यः अश्वसन्नाहरज्जुस्तस्य पूर्ति, सम्बध्यत इति इति कक्ष्यप्री ।" {सा० 8/8}

{2} "कक्ष्यप्रा क.या अश्वस्य संनाहरज्जुः । प्रा पूरते । कक्ष्यां यावापूरयतः तावेवमुच्येते ।" {उ०}

{3} "कक्ष्यप्रा कक्षे भवः कक्ष्यः अश्वसन्नाहरज्जुः कक्षं मध्यबन्धनं प्रातः पूरयतस्तौ कक्ष्यप्री स्थूलावयवावित्यर्थः ।" {म०}

अत्र महीधरस्य व्याख्यानं विशिष्यते ।

{4} "कक्ष्यप्रा कक्ष्यं प्रातः पिपूर्तः" {द०}

8.35.1. अप्रतिधृष्टसवः (इन्द्रः)

इदमिन्द्रस्य विशेषणं अतिशयबलसम्पन्नत्वं प्रकाशयतीति सायणेन निर्दिष्टम् ।

(1) "प्रतिधर्षयितुं शक्यं प्रतिधृष्टम् ।" (सा०)

"न प्रतिधृष्टमप्रतिधृष्टं तादृशं शवो बलं यस्य सः । तमिन्द्रमिन्द्रमेवम् ।" (सा०)

(2) "न प्रतिधर्षयितुं शक्यते शवो बलं यस्य स अप्रतिधृष्टसवाः । तमप्रतिधृष्टसवसम् ।" (उ०)

(3) "अप्रतिधृष्टसवसम् प्रतिधर्षयितुं पराभवितुं शक्यं शक्यं प्रतिधृष्टं न प्रतिधृष्टमप्रतिधृष्टम्, शवो बलं यस्य सो प्रतिधृष्टसवास्तम् ।" (म०)

(4) "अप्रतिधृष्टसवसम् धृष्टम्प्रगल्भं शवो बलं येन तं प्रति ।" (द०)

8.38.1. स्वपा (अग्निः)

इदमग्निमुद्दिश्य प्रयुक्तं विशेषणपदं तस्य शोभनकर्मवत्त्वं प्रकाशयतीति सायणेनोक्तम् ।

(1) "स्वपाः, अप इति कर्मनाम शोभनकर्मा त्वम् ।" (सा० 8/14)

(2) "स्वपा सुकर्मा अप इति कर्मनामसु पठितम् ।" (उ०)

(3) "अप इति कर्मनाम, शोभनान्यपांसि यस्य स स्वपाः सुकर्मा ।" (म०)

महीधरेण पदविग्रहश्चोक्त इति विशेषः ।

(4) "स्वपाः शोभनान्यपांसि कर्माणि यस्य तद्वत् ।" (द०)

8.40.1. केतुः (सूर्यरश्मयः)

सायणेन इदं सूर्यरश्मीनां वाचकं पदं निर्दिष्टम् ।

§1§ "केतवः प्रज्ञापकाः रश्मयः ।" §शा0 8/17§

"केतवः प्रज्ञालक्षणरश्मयः ।" §शा0 8/16§

§2§ "दृश्यन्ते अस्य सूर्यस्य प्रज्ञानकृतत्वात् केतवो रश्मयः ।" §उ0§

"केतुरिति प्रज्ञानामसु पठितम् ।" §उ0§

§3§ "केतुरिति प्रज्ञानामसु पठितम् । अस्य सूर्यस्य केतवः प्रज्ञाहेतवः सर्वपदार्थज्ञानकृतो रश्मयः ।" §म0§

§4§ "केतवः ज्ञापकाः" §द0§

8.43.1. इडा §इडा/गौः, यज्ञाङ्गम्§

उव्वटेन मूलतो मनोर्दुहितृनामिदमत्र धेनावुपचर्यत इति निर्दिष्टम् ।

§1§ "इडा नाम मनोर्दुहिता तया गौस्त्वमीयते । इडेव त्वमसि ।" §उ0§

§2§ "ईड्यते स्तूयत इति इडा मनोर्दुहिता तत्तुल्या ।" §म0§

महीधरेण विग्रहनिर्देशे मनोर्दुहितुः यथा स्तुतिर्भवति तथा स्तूयमानत्वं गवि तुल्यमिति सूचितम् ।

दयानन्देन स्त्रीणां विशेषणमिदं निर्दिष्टम् ।

§3§ "इडे स्तोतुमर्हे ।" §द0§

8.45.1. वाचस्पतिः §इन्द्रः§

अत्र पदमिदमिन्द्रस्य विशेषणतया वर्तत इति सायणभाष्यादवगम्यते ।

§1§ "वाचस्पतिं वाचां पालयितारम् ।" §शा0 8/20§

§2§ "यं वाचो धिपतिं प्राणरूपेण इन्द्ररूपेण वा विवक्षते । तस्मादाहुरिन्द्रो वाग् इति श्रुतिः ।" §उ0§

§3§ "वाचस्पतिं वाचां पालयितारं वाचो धिपतिम् ।" §म0§

§4§ "वाचः देववाण्याः पतिं त्वामिनं पालकं वा ।" §द0§

<u>8.45.2. विश्वकर्मा §इन्द्रः§</u>

इदमिन्द्रस्य बहुविधकर्मशक्तिप्रकाशकं विशेषणमस्ति ।

§1§ "विश्वकर्माणि विश्वानि समस्तजगदुत्पत्त्यादिकर्माणि यस्य स तथोक्तः ।" §सा0 8/20§

§2§ "विश्वकर्माणं सर्वस्य कर्तारम् ।" §उ0§

§3§ "विश्वकर्माणं विश्वानि समस्तानि जगदुत्पत्त्यादीनि कर्माणि यस्य तम् ।" §म0§

§4§ "विश्वकर्माणं विश्वानि सर्वाणि धर्माणि कर्माणि यस्य तम् ।" §द0§

<u>8.45.3. मनोजूः §इन्द्रः§</u>

इदमिन्द्रस्यातिशयवेगवत्त्वप्रकाशकं विशेषणमस्ति ।

§1§ "मनसो जुरिव जव इव जवो यस्य स तथोक्तः ।" §सा0 8/20§

§2§ "मनस इव यस्य जुवः मनोजुवः स एवमुच्यते ।§उ0§
"मनोगतिरित्यर्थः ।"

§3§ "मनोजुवम् मनोगतिम् ।" §द0§

<u>8.45.4. विश्वशम्भूः §इन्द्रः§</u>

इदमिन्द्रस्य विश्वहिततपरत्वसूचकं विशेषणमस्ति ।

§1§ "विश्वस्य शं सुखमस्माद् भवतीति विश्वशम्भूः ।" §सा0 8/20§

§2§ "विश्वशम्भूः । शमिति सुखनाम । सर्वस्य सुखेन भावयिता ।" §उ0§

§3§ "विश्वशम्भुः विश्वं सर्वं शं सुखं भावयति ।" §द0§

8.45.5. साधुकर्मा §इन्द्रः§

इदमिन्द्रस्य शोभनकर्मसूचकं विशेषणमपिदमस्ति ।

§1§ "साधुकर्मा समीचीनकर्मा ।" §सा0§

§2§ "अस्माकमन्नदानाय साधुकर्मा ।" §उ0§

§3§ "साधुकर्मा शोभनकर्मकर्ता" §म0§

उव्वटेन शोभनकर्म अन्नदानात्मकं निर्दिष्टमिति विशिष्यते ।

§4§ "साधुकर्मा साधूनि श्रेष्ठानि कर्माणि यस्य ।" §द0§

8.49.1. ककुभम् §सोमस्य रूपम्§

इदं सोमस्य रूपविशेषसूचकं विशेषणमिति सायणभाष्ये निर्दिष्टम् । तत्र ककुहमिति पाठो दृश्यते ।

§1§ "ककुहं ककुभं छान्दसो हकारः । ककुभमिति महन्नामसु पठितम्। बृहद्रूपम् । यद्वा ककुभो दिशो व्यापि ।" §सा0 8/23§

§2§ "ककुभमिति महन्नामसु पठितम् ।" "ककुभमादित्यलक्षणं रूपम्।" §उ0§

§3§ "ककुभं महत आदित्यलक्षणं रूपम् ।" §म0§

§4§ "ककुभं दिग्वच्छुद्धम् ।" §द0§

8.49.2. वृषभः §सोमः§

इदं सोमस्य श्रेष्ठत्वसूचकं विशेषणमिति सायणः ।

§1§ "वृषभस्य श्रेष्ठस्य" §सा0 8/23§

§2§ "सोमलक्षणस्य वृषभस्य" §उ0§

{3} "वृषभस्य सुखाभिवर्षकस्य प्रजापतेः ।" {द0}

8.49.3. शुक्रः {आदित्यः}

मन्त्रे "शुक्रः शुक्रस्य पुरोगाः" इति द्विधा पठितस्य अस्य शुक्रपदस्य सायणेन शुद्धमिति, आदित्य इति चार्थद्वयं क्रमेणोक्तम् ।

{1} "शुक्रस्य शुद्धस्य सोमस्य" {सा0}

"शुक्रस्तेजस्वी आदित्यः ।" {सा0 8/23}

{2} "शुक्र आदित्यः ।" {उ0}

सायणेन यथार्थद्वयं शुक्रपदस्यात्र निर्दिष्टम् न तथा उव्वटेनेति विशेषः।

{3} "शुक्रः शुद्धः" "शुक्रस्य शुद्धस्य धर्मस्य" {द0}

8.50.1. उशिक् {सोमः}

अत्र इदं सोमस्य विशेषणमस्ति ।

{1} "हे दीप्यमान सोम, उशिक् कामयमानस्त्वम् ।" {सा0 8/23}

{2} "उशिक् कान्तः वल्लभः" {उ0}

{3} "उशिक् कामयमानः" {द0}

8.53.1. दर्मा {इन्द्रस्य वज्रः/सम्बद्धम्}

इदं वज्रस्य नाम वर्तते ।

{1} "दर्मा दारणशीलो वज्रः ।" {सा0 9/6}

{2} "दर्मा विदारणशीलः" {उ0}

{3} "दारयतीति दर्मा "दृ विदारणे" "अन्येभ्यो पि दृश्यन्ते" इति मनिन् प्रत्ययः ।" {म0}

{4} "दर्मा शत्रुविदारयिता" {द0}

8.54.1. परमेष्ठी ﴾सोमः﴿

इदमत्र सोमस्य नामेति सायणभाष्यादवगम्यते ।

﴾1﴿ "यदा सोमो यजमानेनाभिधीतः परमेष्ठीति नाम्नाभिधीयते ।" ﴾सा0 9/7﴿

﴾2﴿ "परमेष्ठ्यादिश्रुतिः चतुस्त्रिंशत्सु सोमावस्थासु चतुस्त्रिंशद्देवताभिधायिनी यज्वर्था ।" ﴾उ0﴿

﴾3﴿ "यदा सोमो यजमानेनाभिधीतः संकल्पितो भवति । मनसा - भिध्यातस्तदा परमेष्ठी भवति ।" ﴾म0﴿

अत्र महीधरोव्वटयोः व्याख्यानं यज्ञशरीराभिप्रायेण नामविशेषस्य सम्यङ्निरूपणादविशिष्यते ।

﴾4﴿ "परमेष्ठी परमे प्रकृष्टे स्वरूपे तिष्ठतीति" ﴾द0﴿

8.54.2. प्रजापतिः ﴾सोमः﴿

अत्र पदमिदं सोमस्य नामेति निर्दिष्टम् ।

﴾1﴿ "सोमेन यक्ष्ये इति वचस्युच्चारिते सति सोमः प्रजापतिनामको भवति ।" ﴾सा0 9/7﴿

﴾2﴿ "वाचि व्याहृतायां सोमेन यक्ष्ये इति वचस्युच्चारिते सति सोमः प्रजापतिनामको भवति तदा प्रायश्चित्तापत्तौ प्रजापतये स्वाहेति जुहुयादित्यर्थः ।" ﴾म0﴿

﴾3﴿ "प्रजापतिः प्रजायाः स्वामी ।" ﴾द0﴿

8.54.3. अन्धः ﴾सोमः﴿

इदं पदमत्र सोममुद्दिश्य प्रयुक्तमस्ति ।

{1} "यदा सोमः अच्छम् आभिमुख्यम् इतः प्राप्तः तदा अन्धो भवति ।" {सा० 9/7}

{2} "यदा सोमः अच्छाभिमुख्येन इतः प्राप्तः ।" {स्क०}
"तदा अन्धो भवति ।"

{3} "अद्यते यत्तदन्धो न्नम् । अदेर्नुम् धौ च "अनेनादधातो-रसुनि नुम् धश्च । अन्ध इत्यन्ननामसु पठितम् । उपलक्षणं चान्येषां पदार्थानाम् ।"
{दु०}

8.54.4. अच्छेतः {सोमः}

इदं सोमस्य विशेषणत्वेन प्रयुक्तं पदमस्ति ।

{1} "अच्छम् आभिमुख्यम् इतः प्राप्तः ।" {सा० 9/7}

{2} "अच्छेतः । अच्छाभेराप्तुमिति शाकपूणिः ।" {उ०}

{3} "अच्छं निर्मलं स्वरूपमितः प्राप्तः ।" {दु०}

8.54.5. सविता {सोमः}

अत्र पदमेतत् सोमस्य नामत्वेन निर्दिष्टम् ।

{1} "सन्यां सोमस्य सम्भक्तौ सत्यां सोमः सवितृनामको भवति ।"
{सा० 9/7}

{2} "सविता सन्याम् । सनोति संभजनार्थः सोमसंभक्तौ सत्यम् ।"
{उ०}

{3} "सविता जगदुत्पादकः" {दु०}

8.54.6. विश्वकर्मा {सोमः}

अत्रैतत् पदं सोमस्य संज्ञाविशेषरूपं पठ्यते ।

{1} "विश्वकर्मा दीक्षायामिति । दीक्षायां सत्यां विश्वकर्मेत्युच्यते"
{सा०}

{2} "विश्वकर्मा सर्वोत्तमकर्मा सभापतिः ।" {द०}

8.54.7. पूषा {सोमः}

इदं पदमत्र सोमस्य संज्ञा विशेषरूपं वतति ।

{1} "पूषा सोमक्रयण्यामिति । सोमक्रये सति पूषेत्यभिधीयते ।"
{सा० 9/7}

{2} "सोमः क्रीयते नया सा सोमक्रयणी गौस्तस्यामानीतायां सत्यां सोमः पूषा भवति ।" {उ०}

{3} "पूषो पोषको वैद्यः ।" {द०}

8.55.1. शिपिविष्टः {सोमः}

अत्र ~~क~~ इदं पदं सोमस्य नामसु पठितमस्ति ।

{1} "विष्णुः शिपिविष्टः । शिपिर्यज्ञः तत्र प्रविष्टः ।"
{सा० 89/7}

{2} "उरौ यजमानोत्सङ्गे आसन्नः स्थितः सोमः शिपिविष्टो विष्णुर्भवति । शिपिषु प्राणिषु यज्ञेषु वा विष्टः प्रविष्ट एतद्गुणको विष्णुरित्यर्थः ।" {म०}

अत्र शिपिविष्टपदस्य विग्रहनिर्देशेन महीधरभाष्यं विशिष्यते ।

{3} "शिपिविष्टः शिपिषु पदार्थेषु प्रविष्टः ।" {द०}

8.55.2. नरन्धिषः {सोमः}

इदमत्र सोमस्य नामेति पठितं पदमस्ति ।

{1} "उरा आसन्नो विष्णुर्नरन्धिष इति । उरौ उत्सङ्गे आसन्न उत्सङ्गं प्राप्तः सोमो विष्णुर्नरन्धिषो भवति ।" {सा० 9/7}

{2} "प्रोह्यमाणः शकटेनोह्यमानः सोमो विष्णुर्नरन्धिषो भवति । नरो धीयन्ते आरोप्यन्ते यस्मिन् स नरन्धि-संसारः । तं स्यति नाशयति नरन्धिषः, जगत्संहर्तृविशिष्टो विष्णुः । अथवा "रध हिंसायाम्" रध्यति हिनस्ति रन्धिषः हन्ता न रन्धिषः नरन्धिषः जगत्पालको वा विष्णुः ।"

{म0}

सायणभाष्ये उरौ आसन्नस्य विष्णोः षरन्धिष इति नाम निर्दिष्टम्, महीधरभाष्ये तु शकटेनोह्यमाणस्येति भेदः । महीधरेण नरन्धिषशब्दस्य विग्रह-सहिता व्युत्पत्तिः साधु समुपस्थापिता ।

{3} "नरन्धिषः नरान्दिधेष्टि शब्द इति ।" {द0}

8.56.1. सोमः {सोमः}

इदं सोमस्य प्रसिद्धं नाम वर्तते ।

{1} "प्रोह्यमाणः सोम आगत इति । यदा आगतः सोमः प्रोह्यते तदा सोमनामा भवति ।" {सा0 9/7}

{2} "शकटादागतो वृद्धः सोमनामको भवति ।" {म0}

{3} "सोम ऐश्वर्यसमूहः ।" {द0}

8.56.2. वरुणः {सोमः/यज्ञाङ्गम्}

इदं सोमस्यावस्थाविशेषप्रयुक्तं नामेति सायणेनोक्तम् ।

{1} "वरुण आसन्धामासन्न इति । यदा सोम आसन्धामासन्नस्तदा वरुणो भवति ।" {सा0 9/7}

{2} "आसन्धां मञ्चिकायामुपविष्टः सोमो वरुणो भवति ।"

{म0}

{3} "वरुणः जलसमूहः, आसन्धाम् यानासनविशेषे, आसन्नः समीपस्थः ।" {द0}

8.56.3. अग्निः ‖सोमः/यज्ञाङ्गम्‖

आग्नीध्रे सदसि सोमस्य विशिष्टं नामेदमिति सायणः ।

‖1‖ "अग्निराग्नीध्र इति । सोमो यदाग्नीध्रे वसति तदा ग्नि-रित्यभिधीयते ।" ‖सा० 9/7‖

‖2‖ "आग्नीध्रे वर्तमानः सोमो ग्निर्भवति ।" ‖म०‖

8.56.4. इन्द्रः ‖सोमः/यज्ञाङ्गद्रव्यम्‖

इदं हविर्धाने विशिष्टं सोमस्य नामेति सायणः ।

‖1‖ "इन्द्रो हविर्धाने इति । हविर्धाने वर्तमानः सोम इन्द्रो भवति ।" ‖सा०‖

‖2‖ "हविर्धाने वर्तमानः सोम इन्द्रो भवति ।" ‖उ०‖

‖3‖ "इन्द्रः विद्युत्" ‖द०‖

8.56.5. अथर्वा ‖सोमः/यज्ञाङ्गद्रव्यम्‖

इदं सोमस्य उपावहरणप्रयुक्तं नामेति सायणः ।

‖1‖ "अथर्वो पावह्रियमाण इति । यदा सोम उपावह्रियते तदा -थर्वो भवति ।" ‖सा० 9/7‖

‖2‖ "सहृदे त्वा मनसेत्येति मन्त्रेण कण्डनार्थमुपावह्रियमाण आनीय-मानः सोमो थर्वनामको भवति ।" ‖म०‖

‖3‖ "सअथर्वा अहिंसनीयः ।" ‖द०‖

8.57.2. आप्रीतपाः ‖सोमः‖

इदं सोमस्य विशेषणमस्ति ।

(1) "अंशुरंशुष्ट" इत्यादिमन्त्रेण आप्यायमानः वर्धमानः सोम आप्रीतया विष्णुर्भवति । आसमन्तात् प्रीतान् स्वस्मिन् प्रीतिमतो भक्तान् पाति रक्षतीत्याप्रीतपाः सद्गुणविशिष्टः ।" (म०)

(2) "आप्रीतपाः समन्तात् प्रीतान् कमनीयान् पदार्थान् पाति रक्षति ।" (द०)

8.57.3. क्षीरश्रीः (सोमः/यज्ञद्रव्यम्)

इदं सोमस्य विशेषणमस्ति । अनेन तस्य क्षीरेण मिश्रणमवगम्यते ।

(1) "शुक्रः क्षीरश्रीरिति । क्षीरेण संमिश्रितः सोमः ।" (सा० 9/7)

(2) "क्षीरेण दुग्धेन श्रीयते मिश्रीक्रियत इति क्षीरश्रीः ।" (म०)

(3) "क्षीरश्रीः यः क्षीरादीनि श्रृणाति ।" (द०)

8.57.4. मन्थी (सोमः/यज्ञद्रव्यम्)

इदं सोमस्य विशिष्टं नाम ।

(1) "मन्थी सक्तुश्रीरिति । सक्तुभिः संमिश्रितः सोमो मन्थी भवति ।" (सा० 9/7)

(2) "सक्तुभिर्मिश्रितः सोमो मन्थी भवति ।" (म०)

(3) "मन्थी मथ्नातीति ।" (द०)

8.57.5. सक्तुश्रीः (सोमः/यज्ञद्रव्यम्)

इदं सोमस्य सक्तुभिः संमिश्रणमाश्रित्य निष्पन्नं विशेषणमस्ति ।

(1) "सक्तुश्रीरिति । सक्तुभिः संमिश्रितः ।" (सा०)

(2) "सक्तुश्रीः यः सक्तूनि समवेत्तानि द्रव्याणि श्रयति ।" (द०)

8.58.1. विश्वेदेवा: §सोम:/यज्ञद्रव्यम्§

अत्रेदं सोमस्य विशिष्टं नाम वर्तते ।

§1§ "यमतेभून्नीत: सोमो विश्वेदेवा इति भवति ।" §शा० 9/7§

§2§ "यमतेषु ग्रहपात्रेभून्नीतो गृहीत: सोमो विश्वदेवसंज्ञो भवति ।" §म०§

§3§ "विश्वे सर्वे देवा विद्वांस: ।" §द०§

8.58.2. असु: §सोम:/यज्ञद्रव्यम्§

अत्र इदं सोमस्य विशिष्टं नाम वर्तते ।

§1§ "असुर्होमायोद्यत इति । यदा सोमाय निष्कासितस्तदा असुर्भवति ।" §शा०§

§2§ "होमार्थमुद्यत: सोमो सुसंज्ञो भवति ।" §म०§

§3§ "असु: प्राण:" §द०§

8.58.3. रुद्र: §सोम:/यज्ञद्रव्यम्§

अत्र इदं सोमस्य विशिष्टं नाम वर्तते ।

§1§ "रुद्रो हूयमान इति । यदा सोमो हूयते तदा रुद्रो भवति ।" §शा० 9/7§

§2§ "हूयमान: सोमो रुद्रो भवति ।" §म०§

§3§ "रुद्र: जीव:" §द०§

8.58.4. वात: §यज्ञद्रव्यम्§

इदमभ्यावृत्तस्य सोमस्य विशिष्टं नाम ।

(1) "वातो भ्यावृत्त इति । यजमानेनाभ्यावृत्तः सोमो वातनामा भवति ।" (सा० 9/7)

(2) "अभ्यावृत्तः होमशेषीभूतः सदः प्रति भक्षणार्थमानीतः सोमो वातो भवति ।" (म०)

(3) "वातः बाह्यो वायुः" (द०)

<u>9.1.1. गन्धर्वः (सूर्यः)</u>

इदं सूर्यस्य विशेषणं रश्मिधारणं तस्य सूचयति ।

(1) "गन्धर्वो गवां रश्मीनां धारयिता ।" (सा० 10/1)

(2) "गन्धर्वो गवां वाचां रश्मीनां वा धारयिता ।" (उ०)

अत्र गोशब्देन वाचश्च निर्देशो विहितः ।

(3) "गन्धर्वः गां पृथिवीं धरतीति । पृषोदरदिना गोशब्दस्य गम्भावः ।" (द०)

दयानन्देन पृथिव्या धारणमत्रोक्तमिति भेदः ।

<u>9.1.2. केतपूः (सूर्यः)</u>

इदं सूर्यस्य अन्नपालकत्वसूचकं विशेषणपदमस्ति ।

(1) "केतशब्देनात्रान्नमुच्यते । अन्नस्य पालयिता ।" (सा० 10/1)

(2) "केतशब्देनान्नमुच्यते । अन्नस्य पविता ।" (उ०)

(3) "केतशब्देनान्नमुच्यते । केतमन्नं पुनातीति केतपूः । अन्नस्य पावयिता सूर्यमण्डलरूपो देवः ।" (म०)

सायणेन अन्नपालकत्वं अन्याभ्यां अन्नपावकत्वमुक्तमत्रेति भेदः । महीधरेण व्युत्पत्तिश्चोक्ता स्वविशेषख्यापिका ।

(4) "केतपूः यः केतं प्रज्ञां पुनाति पवित्रीकरोति सः ।" (द०)

पूर्वाचार्यैः पदस्यास्य अन्नपालक इति, अन्नपावयिता इत्येतावर्थौ निर्दिष्टौ । दयानन्देन पुनः प्रजायाः पावयिता निर्दिष्ट इति भेदः ।

9.20.1. आपिः ‖संवत्सराभिमानीदेवः‖

इदं संवत्सराभिमानिनो देवस्य बहुषु नामस्वेकमस्ति ।

‖1‖ "आप्नोतीत्यापिः ।" ‖सा० 10/4‖

‖2‖ "आपये सकलविद्याव्याप्तये" ‖द०‖

अत्र दयानन्देन यज्ञफलत्वेनाभीष्टस्य सकलविद्याप्राप्तेः आपिपद-वाच्यत्वं निर्दिष्टमिति विशेषः ।

9.20.2. ‖संवत्सराभिमानीदेवः/यज्ञफलम्‖

इदं संवत्सराभिमानिनो देवविशेषस्य वाचकं विशेषणपदमस्ति ।

‖1‖ "सुशोभनमाप्नोतीति स्वापिः ।" ‖सा०‖

‖2‖ "शोभनमाप्नोतीति स्वापिः ।" ‖उ०‖

‖3‖ "स्वापये सुखानां सुष्ठु प्राप्तये ।" ‖म०‖

9.20.3. अपिजः ‖संवत्सराभिमानीदेवः‖

इदं संवत्सराभिमानिनो देवस्य पुनः पुनर्जन्मसूचकं विशेषणमस्ति ।

‖1‖ "अप्सु पुनः पुनर्जायत इत्यपिजः ।" ‖सा० 10/4‖

‖2‖ "अपि जायत इत्यपिजः ।" ‖उ०‖

‖3‖ "अपि जायते पुनः पुनरुत्पद्यत इत्यपिजः ।" ‖म०‖

‖4‖ "अपिजाय निश्चयेन जायमानाय ।" ‖द०‖

9.20.4. क्रतुः ‖संवत्सराभिमानीदेवः/यज्ञः‖

संवत्सराभिमानिनो प्रजापतेर्देवस्य वाचकं पदमिदम् ।

§1§ "क्रतुः सङ्कल्पो भोगादिविषयो यज्ञो वा ।" §सा0 10/4§

§2§ "क्रतुः सङ्कल्पो यज्ञो वा ।" §उ0§

§3§ "कृतये प्रज्ञायै" §द0§

9.20.5. विनंशिनः §संवत्सराभिमानीदेवः§

इदं संवत्सराभिमानिनो देवस्य विशेषणमस्ति ।

§1§ "विनंशिने नाशयुक्ताय ।" §सा0 10/4§

§2§ "विनंशिने विनाशशीलाय" §म0§

§3§ "विनंशिने विनष्टुं शीलाय" §द0§

9.20.6. वैनंशिनः §संवत्सराभिमानी-देवः§

इदं संवत्सराभिमानिनो देवस्य विशेषणमस्ति ।

§1§ "वैनंशिनाय विनाशसंयुक्तेषु वसतीति वैनंशिनः ।" §सा0 10/4§

§2§ "विनाशसंयुक्तेषु वसतीति वैनंशिनः ।" §उ0§

§3§ "विनश्यतीति विनंशिनः विनाशशीलाः पदार्थाः । "मस्जिनशोर्झलि" इति छान्दसत्वा दझल्यपि नुमागमः । विनंशिषु भवो वैनंशिनस्तस्मै ।" §म0§

§4§ "वैनंशिनाय विनाशशीलेषु कर्मसु भवाय ।" §द0§

10.5.2. सोमः §देवताविशेषः§

अयं पार्थहोमे हविर्भाग देवः ।

§1§ "सुनोति सोमः ।" §म0§

§2§ "सोमाय औषधविज्ञानाय ।" §द0§

10.5.3. सविता {सूर्यः}

पार्थहोमे हविर्भागार्थं देवो वक्ति ।

{1} "सूते सुवति प्रेरयति वा सविता ।" {म0}

{2} "सवित्रे सूर्यविज्ञानाय" {द0}

10.5.4. सरस्वती {वाग्देवता}

पार्थहोमे हविर्भाजो देवतस्येदं संज्ञापदमस्ति ।

{1} "सरः शब्दप्रवाहो यस्याः सा सरस्वती ।" {म0}

{2} "सरस्वत्यै वेदार्थसुशिक्षाविज्ञापिकायै वाचे।" {द0}

10.5.5. पूषा {पोषकदेवता}

पार्थहोमे हविर्भाजो देवतस्येदं नाम वक्ति । महीधरेणास्य पोषण-सामर्थ्यं व्युत्पत्तिबीजं निर्दिष्टम् ।

{1} "पुष्णाति पूषा" {म0}

{2} "पूष्णे प्राणपशुपालनाय ।" {द0}

10.5.6. बृहस्पतिः {वागधिपतिः}

पार्थहोमे हविर्भाजो देवस्य नामेदं वक्ति । अस्य महीधरेण साम्नां पतिरिति वैशिष्ट्यं निर्दिष्टम् ।

{1} "बृहतां साम्नां पतिर्बृहस्पतिः ।" {म0}

{2} "बृहस्पतये बृहतां प्रकृत्यादीनां पत्युरीश्वरस्य विज्ञानाय" {द0}

10.5.7. इन्द्रः [देवताविशेषः]

पार्थहोमे हविर्भाजो देवस्येदं नाम विद्यते । अनेन पदेन तस्य शक्ति-विशेषः सूच्यते ।

[1] "इन्दति ईष्टे इन्द्रः ।" [म0]

[2] "इन्द्राय इन्द्रियाधिष्ठातुर्जीवस्य बोधाय ।" [द0]

10.5.8. घोषः [वाग्देवता]

पार्थहोमे हविर्भाजो दैवतस्येदं नाम विद्यते ।

[1] "घुष्यति शब्दं करोति घोषः ।" [म0]

[2] "घोषाय सत्प्रियभाषणादियुक्तायै वाण्यै ।" [द0]

10.5.9. श्लोकः [कीर्तिदेवता]

पार्थहोमे हविर्भाजो देवविशेषस्येदं यथो विशेषसूचकं नाम वर्तते ।

[1] "श्लोक्यते कीर्त्यते जनैरिति श्लोकः ।" [म0]

[2] "श्लोकाय तत्त्वसंघातसत्काव्यगद्यपद्यछन्दोनिर्माणादि-विज्ञानाय" [द0]

10.5.10. अंशः [देवताविशेषः]

इदं पार्थहोमे हविर्भाजो देवविशेषस्य पुण्यपापफलदायकत्वसूचकं नाम वर्तते ।

[1] "अंशयति विभाजयति पुण्यपापे तत्फलदानेनेति अंशः ।" [म0]

[2] "अंशाय परमाण्वावगमाय" [द0]

10.5.11. भगः [यज्ञफलम्, ऐश्वर्यम्]

पार्थहोमे हविर्भाजो देवस्येदं सेव्यत्वसूचकं नामेति महीधरः ।

[1] "भज्यते सेव्यते स भगः ।" [म0]

[2] "भगाय ऐश्वर्याय" [द0]

दयानन्देन इष्टस्य ऐश्वर्यस्य वाचकमेतत्पदमुक्तमिति भेदः ।

10.5.12. अर्यमा [देवताविशेषः]

पार्थहोमे हविर्भाजो देवविशेषस्य व्यापकत्वसूचकमिदं नामेति महीधरः।

[1] "इयर्ति व्याप्नोति विश्वमित्यर्यमा ।" [म0]

[2] "अर्यम्णे न्यायाधीशत्वाय" [द0]

अत्र न्यायाधीश इत्यर्थस्य का सङ्गतिरिति दयानन्द एव जानाति ।

10.7.1. अपस्यः [वरुणः]

इदं पदं वरुणस्य अपां पुत्रत्वसूचकं विशेषणमस्तीति सायणेन निर्दिष्टम् ।

[1] "अपस्यः कर्मयोग्याः वसाना आच्छादयन्त्यो मातृस्थानीयानामपां पुत्रस्थानीयो वरुणः ।" [सा0 11/4]

[2] "अप इति कर्मनाम तत्र साधुः अपस्यः ।" [उ0]

[3] "अप इति कर्मनाम । अपसि कर्मणि साध्व्यः अपस्यः ।"तत्र साधुः" इति यत् "सुपां सुलुक्" इति जसः सुरादेशः ।" [म0]

[4] "अपस्यः अपःसु कर्मसु साध्व्यः । अत्र सुपां सुलुगिति शसः स्थाने सुः ।" [द0]

अत्र व्याख्यानशैली सर्वेषां समाना । उद्देश्यं तु दयानन्दनिर्दिष्टं राजकर्मरूपं भिन्नम् ।

10.7.2. अपां शिशुः {वरुणः}

इदं वरुणस्य विशेषणमिति उव्वटभाष्यादवगम्यते ।

{1} "कथंभूतो वरुणः । अपां शिशुः । "अपां वा एष शिशुर्भवति यो राजा राजसूयेन यजति ।" {इति श्रुतिः ।" {उ०}

{2} "किंभूतो वरुणः । अपां शिशुः बालकः । अपां वा एष शिशुर्भवति यो राजसूयेन यजते" इति श्रुतेः वरुणो राजसूययाजित्वादपां शिशुः ।"
{म०}

अत्र महीधरेण स्पष्टतया राजसूययाजित्वाद्वरुणस्य कृते अपां शिशुरिति पदस्य प्रयोग इति निर्दिष्टम् ।

{3} "अपां व्याप्तविद्यानां स्त्रीणां शिशुः बालकः ।" {द०}

अत्र दयानन्दकृतो लौकिकबालकरूपो र्थो नवीनः ।

11.14.1. तवस्तरम् {इन्द्रः/अजः}

इदमिन्द्रस्य बलसूचकं विशेषणमिति सायणभाष्यादवगम्यते ।

{1} "तवस्तरं बलवत्तरम् ।" {सा० 12/2}

उव्वटेन अजदैवत्ये मन्त्रे पठितस्यास्य पदस्याजविशेषणत्वमुक्तम् ।

{2} "अजमभिमन्त्रयते – "तव इति बलनाम । कर्मणि कर्मणि बलिनमुत्साहवन्तमेतमजम् ।" {उ०}

{3} "तत्तत्कर्मणि तवस्तरं बलवत्तरमुत्साहवन्तम् । तव इति बलनाम। तवो बलमस्यास्तीति तवस्वी । "अस्मायाः०} इत्यादिना विन् । अत्यन्तं तवस्वि तवस्तरस्तम् । "अतिशये तरप्" विन्मतोर्लुक् इति तरपि विनो लुक् ।" {म०}

अत्र शब्दव्युत्पत्तिनिर्देशे महीधरस्यातीव महत्त्वं स्पष्टम् ।

11.24.1. मर्यश्रीः (अग्निः)

इदमग्नेर्विशेषणमस्ति । अनेन तस्य मनुष्यैरुपासनीयत्वं सूच्यते ।

(1) "अयमग्निः मर्यश्रीः । मर्यैर्मनुष्यैराश्रयणीया श्रीर्यस्य सः ।"
(सा० 12/2)

(2) "मर्यश्रीः मर्यैर्मनुष्यैराश्रयणीयः ।" (उ०)

(3) "कीदृशोऽग्निः । मर्यश्रीः मर्यैर्मनुष्यैःश्रीयते आश्रीयते सेव्यते इति मर्यश्रीः मनुष्यैराश्रयणीयः ।" (म०)

11.27.1. आशुशुक्षणिः (अग्निः)

इदमग्नेर्विशेषणमस्ति । अनेन तस्य शोषणशक्तिः सूच्यते ।

(1) "त्वम् आशुशुक्षणिः । आर्द्रां भूमिं शीघ्रमेव शोषयिता जायसे ।"
(सा० 12/2)

(2) "आशु शीघ्रं शुचा दीप्त्या क्षिणोति हिनस्ति सनोति संभजते वा आशुशुक्षणिरुच्यते ।" (उ०)

(3) "आर्द्रां भूमिं शीघ्रमेव शोषयित्वा यद्वा आशु क्षिप्रं शुचा दीप्त्या क्षणोति हन्ति तमः सनोति संभजते वा आशुशुक्षणिः ।" (म०)

अत्रोद्धृतानां वाक्यानामुत्तरोत्तरं वैशिष्ट्यं व्याख्याने स्पष्टम् ।

11.36.1. अदब्धव्रतप्रमतिः (अग्निः)

इदमग्नेः शुभकर्मप्रवृत्तिसूचकं विशेषणमिति सायणेन निर्दिष्टम् ।

(1) "अदब्धव्रतप्रमतिः अहिंसिते कर्मणि प्रकृष्टा मतिर्यस्य स तथाविधः ।" (सा० 12/3)

(2) "अदब्धव्रतप्रमतिः । अदब्धमनुपहिंसितं कर्म यश्च प्रकृष्टा मतिः

{3} "दम्भु वधे" अदब्धमनुपहतं व्रतं कर्म यस्य सो दब्धव्रतः । प्रकृष्टा मतिर्बुद्धिर्यस्य स प्रमतिः अदब्धश्चासावप्रमतिश्चेति सः ।" {म०}

अत्र महीधरस्य व्याख्यानं स्पष्टार्थतया प्रकृतिविग्रहनिर्देशाच्च विशिष्यते ।

11.39.1. मातरिश्वा {वायुः}

इदं वायोरन्तरिक्षस्थितिसूचकं विशेषणमस्ति ।

{1} "कीदृशो वायुर्मातरिश्वा । मातर्यन्तरिक्षे सर्वप्राणिनां नियन्तरि परिच्छेदकारिणि शेते तिष्ठतीति मातरिश्वा ।" {सा० 12/4}

{2} "कीदृशो वायुः । मातरिश्वा मातर्यन्तरिक्षे सर्वप्राणिनामवच्छेदकारिणि श्वयति गच्छतीति मातरिश्वा ।" {म०}

11.41.1. सुशुक्वनिः {अग्निः}

इदमग्नेः श्रेष्ठरश्मिसूचकं विशेषणमिति सायणेन निर्दिष्टम् ।

{1} "सुष्ठु शुचां रश्मीनां वनिता यः सो यं स्म सुशुक्वनिः ।" {सा० 12/4}

{2} "सुशुक्वनिः साधु सुशुचा संदीप्तः ।" {उ०}

{3} "साधु शुचो रश्मीन् वनति संभजति सुशुक्वनिः । रश्मिप्रसारक इत्यर्थः ।" {म०}

11.56.1. सिनीवाली {अमावस्याभिमानिनी-देवता}

इदं अमावास्याभिमानिदेवताया नाम इति सायणेन निर्दिष्टम् ।

{1} "सिनीवाली इन्दुकलायुक्ता मावस्याभिमानिनी देवता ।" {सा० 12/5}

11.56.2. सुकुरीरा {सिनीवाली}

इदं सिनीवाल्या देवताया सौन्दर्यसूचकं विशेषणमस्ति ।

{1} "सुकुरीरशब्देन स्त्रीभिः शृङ्गारार्थं शिरसि धार्यमाणं कालक-मुच्यते । शोभनं कुरीरं यस्याः सा सुकुरीरा ।" {सा० 12/5}

{2} "सुकुरीरा कुरीरो मुकुटः शोभनमुकुटा ।" {उ०}

{3} "कुरीरो यस्याः सा सुकुरीरा सुमुकुटा ।" {म०}

11.56.3. स्वौपशा {सिनीवाली}

इदं सिनीवाल्या देवताया विशेषणमिति सायणभाष्यादवगम्यते ।

{1} "उपनतं कुरुते यैरवयवविशेषैस्ते सर्वे ह्युपशास्तेषां समूह औपशः। शोभन औपशो यस्याः सा स्वौपशा ।" {सा० 12/5}

{2} "स्वौपशा शोभनमुपशेते या सा स्वौपशा, विदग्धः शयने करकण्ठकूजितादिभिर्विलासैर्यस्याः सा ।" {उ०}

11.58.1. वैश्वानरः {विश्वेदेवाः}

इदं विश्वेदेवानुद्दिश्य प्रयुक्तं पदमिति सायणेन निर्दिष्टम् ।

{1} "विश्वेषां नराणां सम्बन्धिनो वैश्वानरा एवम्भूता विश्वे-देवाः ।" {सा० 12/5}

{2} "विश्वान्नारयन्ति तारयन्ति वैश्वानराः ।" {उ०}

{3} "विश्वैर्नरैर्नीयन्ते विश्वान्नरान्नयन्ति वा विश्वेषां नराणां सम्बन्धिनो वा विश्वेभ्यो नरेभ्यो हिता वा वैश्वानरा एवम्भूता विश्वेदेवाः ।" {म०}

11.62.1. चर्षणीधृत् {सूर्यः}

पदमिदं मित्रसंज्ञस्य सूर्यस्य विशेषणमस्ति । अनेन तस्य मनुष्यपालकत्वं सूच्यते ।

{1} "कथम्भूतस्य मित्रस्य । चर्षणीधृतो मनुष्याणां धारयितुः ।"
{सा० 12/6}

{2} "चर्षणयो मनुष्याः तेषां धारणे अधिकृतस्य ।" {उ०}

{3} "चर्षणीधृतः चर्षणयो मनुष्यास्तान् धरतीति चर्षणीधृत्, तस्य । संहितायां दीर्घः । मनुष्याणां धारयितुः ।" {ग०}

11.70.1. द्रवन्नः {अग्निः}

पदमिदमग्नेः वनस्पतिसम्बन्धसूचकं विशेषणपदमस्ति ।

{1} "अत्रोत्पत्स्यमानो ग्निरेतैर्विशेषणैः प्रशंस्यते । द्रुशब्देन वृक्षा उच्यन्ते । द्रुपदमित्याह वनस्पतीच्छो नामैवैतेन यजत इति श्रुत्यन्तरात् । द्रुपदो वृक्षा एवान्नं यस्यासौ द्रवन्नः । द्रु गतौ । द्रवत् अन्नं यस्य सः ।" {सा० 12/7}

{2} "द्रवन्नः सर्पिरासुतिः । द्रुर्वृक्षो न्नमदनीयं यस्य स द्रवन्नः । द्रुशब्दो द्रुमपर्यायः ।" {उ०}

{3} "पलाशी द्रुद्रुमागमाः" इति कोशोक्तेर्द्रवो वृक्षा एवान्नमदनीयं यस्य स द्रवन्नः ।" {म०}

11.70.2. सर्पिरासुतिः {अग्निः}

इदमग्नेर्घृतेन सह सम्बन्धसूचकं विशेषणमस्ति ।

{1} "सर्पिः घृतम् आसुतिरवस्थानं यस्येति वा, सर्पिरिव आहारत्वेन सूयते प्रक्षिप्यते यस्मिन्निति सा सर्पिरासुतिः ।" {सा० 12/7}

{2} "सर्पिर्घृतमासवस्थानीयं यस्य स सर्पिरासुतिः ।" {उ०}

§3§ "सर्पिर्घृतमाहुतिरास्वस्थानीयं भादकं यस्य स । यद्वा सर्पि-राहारत्वेन हूयते प्रक्षिप्यते यस्मिन्सर्पिराहुतिः ।" §म0§

11.72.1. रोहिदश्वः §अग्निः§

एतदग्नेर्वाहनस्याश्वस्य रोहितत्वसूचकमग्नेर्विशेषणमस्ति ।

§1§ "लोहितवर्णो ऽश्वो यस्यासौ रोहिदश्वः । इत एवान्यत्रा-म्नायते । रोहितेन चाग्निर्देवानां गच्छति ।" §सा0 12/7§

§2§ "हे रोहिदश्व,"रोहितो ऽग्नेः । हरित आदित्यस्य" इति निघण्टुः । हे अग्नेरश्व" §उ0§

§3§ "रोहितो ऽग्नेर्हरित आदित्यस्य" इति निघण्टूक्तेः रोहितो अग्नेरश्वाः रोहितः तत्संज्ञा अश्वा यस्य स रोहिदश्वः ।" §म0§

11.76.1. इरंमदः §अग्निः§

इदमग्न्यभिमानिदेवताया विशेषणमस्ति ।

§1§ "कीदृशमग्निम् । इरम्मदम् इरयान्नेन माद्यतीतीरम्मदः ।" §सा0 12/7§

§2§ "कथंभूतमग्निमित्यत आह । इरंमदम् इरयान्ने माद्यति तृप्यति ।" §उ0§

§3§ "इरया अन्ने मादयति मतृप्यति तुष्यतीति इरंमदस्तम् "उग्रम्पश्य0" §पा0 3/3/37§ इत्यादिना खशि निपातः ।" §म0§

अत्र व्युत्पत्तिनिर्देशेन महीधरभाष्यं विशिष्यते ।

11.76.2. बृहदुक्थम् §अग्निः§

इदमग्नेः प्रशस्यत्वसूचकं विशेषणमस्ति ।

§1§ "बृहन्ति 3++ प्रौढान्युक्थानि प्रशस्तानि यस्यासौ बृहदुक्थः"
§सा० 12/7§

§2§ "बृहदुक्थं महच्छस्त्रम्" §उ०§

§3§ "बृहदुक्थं बृहन्ति महान्ति उक्थानि शस्त्राणि यस्य तम् ।"
§म०§

सायणेन उक्थशब्देन प्रशंसनस्यार्थस्य संकेत उक्तः, महीधरेणोव्वटेन च शस्त्रस्यार्थस्येति भेदः ।

12.1.2. सुरेताः §द्यौः§

इदमग्नेर्जनकस्य द्युलोकवासिदेवगणस्य वाचकं विशेषणमस्ति ।

§1§ "सुरेताः शोभनरेताः । रेतः पुत्रः । सुरेता ह्येषा यस्यायमग्निः" इति द्वितीयममृतत्वकारणमग्नेः ।" §उ०§

§2§ "द्यौर्द्युलोकवासी देवगण एनमग्निमजनयत् जनितवती । कीदृशी द्यौः । सुरेताः शोभनं रेतो ग्निरूपं यस्याः सा तस्यादमृतत्वं युक्ताम् ।" §म०§

12.4.1. सुपर्णः §अग्निः§

पदमिदं वह्नेः गरुडसादृश्यनिरूपकं विशेषणमस्ति ।

§1§ "अग्ने, त्वं सुपर्णः पक्षिरूपो सि ।" §सा० 13/1§

§2§ "सुपर्णो सि सुपतनस्त्वमसि ।" §उ०§

§3§ "हे अग्ने, त्वं सुपर्णः शोभनं पर्ण पतनं यस्य स पक्षिरूपो सि । पक्ष्याकारेण चितत्वात् ।" §म०§

12.4.2. गरुत्मान् §अग्निः§

इदं गरुडस्य पक्षिराजस्य संज्ञापदमत्र वह्नौ तत्सादृश्यनिरूपणाय प्रयुक्तमस्तीति सायणभाष्यादवगम्यते ।

§1§ "हे अग्ने, एवम्भूतस्त्वम् । यतो गरुत्मान् गरुड इव सुपर्णः पक्षिरूपो ऽसि ।" §सा० 13/1§

§2§ "गरुत्मान् गणवान् अशनवान् ।" §उ०§

§3§ "गरुत्मान् गरुडो यथा पक्षिराजः ।" §म०§

12.7.2. अभ्यावर्तिन् §अग्निः§

इदमग्नेर्विशेषणमस्ति । अनेनाग्नेः आवर्तनशीलत्वं सूच्यते ।

§1§ "आभिमुख्येनावर्तितुं शीलमस्यास्तीत्यभ्यावर्ती ।" §सा० 13/1§

§2§ "अभि आभिमुख्येनावर्तितुं शीलमस्यास्तीत्यभ्यावर्ती तत्सम्बोधनम् अस्मदभिमुखागमनशील ।" §म०§

12.15.2. शुक्रज्योतिः §अग्निः§

इदमग्नेर्विशेषणमस्ति । अनेनाग्नेर्ज्योतिविषये विशेषः प्रकाश्यते ।

§1§ "शुक्रज्योतिः निर्मलप्रकाशः" §सा० 13/1§

§2§ "शुक्रज्योतिः शुक्लकर्मसाधनं ज्योतिः" §उ०§

सायणव्याख्याने अग्नेः ज्योतिषि विद्यमानं विशिष्टं निर्मलत्वरूपं गुणमाहात्म्यं व्यज्यते, उव्वटस्य व्याख्याने तस्याग्नेः शुभकर्मसु उपयोगयोग्यतेति विशेषः ।

12.22.1. सोमगोपाः §अग्निः§

पदमिदमग्नेर्विशेषणमस्ति । अनेनाग्नेः सोमयागरक्षकत्वं सूच्यते ।

§1§ "सोमगोपाः यजमानेनानुष्ठेयस्य सोमयागस्य रक्षिता ।" §सा० 13/2§

§2§ "धिष्ण्या अग्नयः सोमं गोपनयन्ति तदीभप्रायमेतत् । सोमिनो वा ऽगोपायति ।" §उ०§

§3§ "सोमगोपाः सोमं गोपायतीति यजमानकर्तृकस्सोमयागस्य रक्षिता ।" §म0§+2

12.22.2. वसुः §अग्निः§

इदमग्नेर्निवासहेतुत्वसूचकं विशेषणमिति सायणेन निर्दिष्टम् ।

§1§ "वसुः सर्वस्य निवासहेतुः ।" §सा0 13/2§

§2§ "वसुः वासयिता । यद्वा वसुः धनं एवाग्निः । यथा यानि धनान्युपकारं कुर्वन्ति शयनासनगवादीनि एवमयमप्युपकरोति भूतानां तापपाकप्रकाशैः अतो वसुः ।" §उ0§

§3§ "वसुः सर्वस्य निवासहेतुः । वासयतीति वसुः । यद्वा वसुः धनरूपः यथान्यानि शयनासनरथादिधनान्युपकुर्वन्ति तथायमपि तापपाकप्रकाशैर्जनानामुपकुर्ता अतो वसुः ।" §म0§

अत्र वसुशब्दस्य व्याख्यानं महीधरस्य विशिष्यते ।

12.23.3. विश्वस्य केतुः §अग्निः§

पदमिदं व्यापकस्य तेजोविशेषस्य वाचकं प्रतीयते ।

§1§ "विश्वस्य केतुः सर्वस्य जातो ज्ञाता ।" §सा0 13/2§

§2§ "स विश्वस्य केतुः सर्वस्य प्राणिजातस्य केतुः प्रजानन् अग्न्यात्मना ।" §उ0§

§3§ "विश्वस्य केतुः प्राणिजातस्य विज्ञानभूतो ग्न्यात्मना ।" §म0§

12.23.4. भुवनस्य गर्भः §परमेश्वरः अग्निः§

पदमिदं व्यापकस्य तेजोविशेषस्य वाचकं वतति ।

§1§ "भुवनस्य लोकस्य गर्भो गर्भवदन्तरेव स्थितः ।" §सा0 13/2§

{2} "भुवनस्य गर्भः भूतजातस्य वायवात्मना गर्भः । स हि प्राण-भावेन भूतानामन्तः सञ्चरति ।" {उ0}

12.24.1. उशिक् {अग्निः}

इदमग्नेर्विशेषणमस्ति कान्तत्वसूचकम् ।

{1} "वश कान्तौ अस्य कृतसंप्रसारणस्यैतद्रूपम् ।" {उ0}

"उशिक् कान्तः,मेधावी वा ।

{2} "कीदृशो ऽग्निः । उशिक् उश्यते काम्यते लोकैरित्युशिक् कान्तः ।" "वशेरौणादिक इक्प्रत्ययः ।" {म0}

शब्दसाधुत्वनिदर्शने प्रकृतेः, प्रत्ययस्य, सूत्राणां, प्रक्रियायाश्चोल्लेख आवश्यकः । अत्र उव्वटभाष्ये "वश कान्तौ" इति धातुः प्रकृतिरूपः, संप्रसारण-प्रक्रिया सनैव चोक्ता । महीधरभाष्ये वशिष्टं विग्रहादिकं सूचितमिति परस्परं भाष्यकारयोः पूरकत्वमत्र स्पष्टम् ।

12.24.2. पावकः {अग्निः}

इदमग्नेः शुद्धिहेतुत्वसूचकं विशेषणमस्ति ।

{1} "पावकः पावयिता ।" {उ0}

{2} "पावकः पावयिता पुनातीति ।" {म0}

12.24.3. अरतिः {अग्निः}

इदमग्नेर्विशेषणमस्ति ।

{1} "अरतिर्यागरहितेषु प्रीतिरहितः ।" {सा0 13/2}

{2} "अरतिः अलंमतिः पर्याप्तमतिः ।" {उ0}

{3} "अरतिः अलंमतिः पर्याप्तमतिः ।" {म0}

यद्वा दुष्टेष्वरतिः प्रीतिरहितः ।

सायणेन यागरहितेषु प्रीतिरहितत्त्वमग्नेः पदार्थतया निर्दिष्टम्, महीधरेण तु दुष्टेषु प्रीतिरहितत्त्वमुक्तमिति विशेषः ।

12.24.4. सुमेधाः [अग्निः]

इदं वह्नेर्विशेषणमस्ति । अनेनाग्नेर्मेधावैशिष्ट्यं व्यज्यते ।

[1] "शोभना मेधा सेवकाभिप्रायधारणशक्तिर्यस्यासौ सुमेधाः ।" [सा० 13/2]

[2] "सुमेधाः कल्याणप्रज्ञः साधुयज्ञो वा" [उ०]

[3] "सुमेधाः शोभना सेवकाभिप्रायधारणसमर्था मेधा बुद्धिर्यस्य शोभनो मेधो यज्ञो यस्येति वा ।" [म०]

महीधरेण पूर्वाचार्याणामाशयः साधु विशदीकृत इति विशेषः ।

12.26.1. भद्रशोचिः [अग्निः]

इदमग्नेर्दीप्तिसूचकं विशेषणमस्ति ।

[1] "भद्रशोचे कल्याणदीप्ते" [सा० 13/2]

[2] "हे भद्रशोचे, भन्दनीयदीप्ते ।" [उ०]

[3] "भद्रा कल्याणकारिणी शोचिर्दीप्तिर्यस्य तत्संबोधने हे भद्रशोचे, हे देव अग्ने" [म०]

12.48.1. अर्णवः [समुद्रः/अग्निः]

इदं समुद्रवाचकं पदमत्र अग्नेस्तेजसो महत्परिमाणं सूचयितुं उपमानत्वेन प्रयुक्तमिति सायणभाष्यादवगम्यते ।

[1] "अर्णवः समुद्र इव विस्तीर्णः ।" [सा० 13/3]

[2] "अर्णवः अर्णस्वान् उदकवान् अथवा "अरणवान् गमनवान् वायुः सः" इति श्रुतिः ।" [उ०]

{3} "अर्णवः अर्णांसि उदकानि सन्ति यत्रेत्यर्थः । "अर्णसो वः सलोपश्च" । यद्वा अरणवान् गमनवान् प्रसरणशीलः ।" {म0}

12.48.2. नृचक्षाः {अग्निः}

अत्र पदमिदमग्नेर्नृभिः सम्बन्धसूचकं विशेषणं प्रतीयते ।

{1} "नृचक्षा मनुष्यान् प्रख्यापयिता तथाविधः ।" {सा0 13/3}

{2} "नृचक्षाः नृणां शुभाशुभकर्मद्रष्टा ।" {उ0}

{3} "नृचक्षाः नॄन् चष्ट इति नृणां शुभाशुभकर्मद्रष्टा ।" {म0}

12.55.4. आरोचने

स्वर्गस्य प्रकाशक इत्यर्थो स्य पदस्य सायणेनोक्तः ।

{1} "रोचने स्वर्गस्य प्रकाशके" {सा0 13/3}

{2} "उव्वटेन पदमेतत्सवनार्थकमुक्तम् - "सवनानि वै त्रीणि रोचनानीति श्रुतिः । त्रिष्वारोचनेष्विति वचनव्यत्ययः । त्रिषु सवनेषु ।" {उ0}

12.56.1. समुद्रव्यचसम् {इन्द्रः}

इदमिन्द्रस्य व्याप्तिसूचकं विशेषणमिति सायणेन निर्दिष्टम् ।

{1} "समुद्रव्यचसं समुद्रवद् व्याप्नुवन्तम् ।" {सा0 13/4}

उव्वटेन गतिविशेषस्य बलस्य वा सूचकमेतदुक्तम् ।

{2} "समुद्रव्यचसं समुद्रमिव विविधायनं नानागतिम् अक्षोभ्यबलं वा ।" {उ0}

महीधरेण स एवार्थः व्युत्पत्तिसहितो व्याख्यातः ।

{3} "समुद्रव्यचसं समुद्रवद् व्यचो व्याप्तिर्यस्य तु समुद्रवद् व्यापकं विविधान्वनं नानागतिमित्यर्थः । अक्षोभ्यगतिं वा ।" {म0}

12.63.1. निर्ऋतिः (देवताविशेषः)

सायणेन पदमिदं देवताविशेषस्य दिगभिमानिनो नामेति निर्दिष्टम् ।

(1) "हे निर्ऋति, दक्षिणपश्चिममध्यस्थितावान्तरदिगभिमानिनि देवते" (सा० 13/5)

उव्वटेन कृच्छ्रापत्तिः भूमिर्वेति पदस्यास्य वाच्यमुक्तम् । महीधरेण सायणस्योव्वटस्य चाभिप्रायः सविशेषः प्रदर्शितः ।

(2) "निर्ऋतिः कृच्छ्रापत्तिः भूमिर्वा ।" (उ०)

(3) "निर्ऋतिः कृच्छ्रापत्तिः । "स्यादलक्ष्मीस्तु निर्ऋतिः" इत्यभिधानात् भूमिर्वा, निर्ऋतिदिगभिमानिनी देवता वा ।" (म०)

12.65.1. आयुः (अग्निः)

उव्वटेन महीधरेण च पदमेतदग्नेर्वाचकं निर्दिष्टम् ।

(1) "अग्निर्वा आयुः ।" (उ०)

(2) "अग्निर्वा आयुस्तस्यैतन्मध्यं तच्चितो गार्हपत्यो भवत्यचित आहवनीय" (7/2/1/15) इति श्रुतेरायुःशब्देनात्राग्निरुच्यते ।" (म०)

12.66.1. निवेशनः (अग्निः)

इदमग्नेरनुग्रहशक्तिसूचकं विशेषणमिति सायणभाष्यादवगम्यते ।

(1) "निवेशनो यजमानानां स्वगृहे निवेशयिता ।" (सा० 13/5)

(2) "पृथिवीलोकसंस्तुतो यमग्निर्योयमग्निर्निवेशनः । निविशन्तो स्मिन्निति निवेशनः ।" (उ०)

(3) "निवेशयति यजमानं स्वगृहे स्थापयतीति निवेशनः ।" (म०)

12.66.2. सङ्गमनः {वसूनाम्, अग्निः}

पदमिदं वह्नेरनुग्रहविशेषसूचकं विशेषणमस्तीति सायणभाष्यादवगम्यते ।

{1} "वसूनां सङ्गमनः प्रजापशुरूपाणां द्रव्याणां प्रापकः ।"
{सा० 13/5}

उव्वटस्य मतं तदभिन्नमपि न स्पष्टम्, किन्तु महीधरस्य व्याख्यानं तदनुकूलं विशदञ्चास्ति ।

{2} "संगच्छन्ते स्मिन्निति संगमनः ।" {उ०}

{3} "तथा वसूनां धनानां सङ्गमनः सङ्गमयति प्रापयतीति सङ्गमनः प्रजापशुरूपधनप्रापकः ।" {म०}

12.66.3. सत्यधर्मा {अग्निः}

पदमिदं वह्नेर्विशेषणमस्ति ।

{1} "सत्यो वश्यम्भाविफलोपेतो धर्मो ग्निहोत्रादिलक्षणो यस्यासौ सत्यधर्मा ।" {सा० 13/5}

{2} "सत्यधर्मा अवितथकर्मकारी ।" {उ०}

12.69.1. शुनासीरा {वायुवादित्यौ}

सायणेन समस्तं पदमिदं वायोरादित्यस्य संज्ञावाचकमिति निर्दिष्टम् ।

{1} "शुनो वायुः सीर आदित्यः तावुभौ" {सा० 13/5}

{2} "शुनो वायुः । शु इत्यव्यक्तानुकरणम् । "शु एत्यन्तरिक्षे सीर आदित्यः सरणात्" । वायुवादित्यौ" {उ०}

{3} "शुनासीरौ हे वायुवादित्यौ" {म०}

12.79.1. गोभाजः ‖ओषधिदेवताः‖

पदमिदं ओषधिदेवतानां विशेषणत्वेन प्रयुक्तमिति सायणभाष्यादव-गम्यते । तथा चानेन तेषां भूम्याश्रयत्वं सूच्यते ।

‖1‖ "गोभाज इत् भवदीयेन स्थावररूपेण भूमिभाज एवं भूत्वा" ‖सा० 13/6‖

‖2‖ "उव्वटेन पदमिदम् आदित्यसम्बद्धं च निर्दिष्टम् - "गोभाजः गोशब्देनादित्यो ऽभिधीयते । आदित्यभाजः ।" ‖उ०‖

‖3‖ "अगामादित्यं भजन्तीति गोभाजः । अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते ।" इति श्रुतेः ।" ‖म०‖

उव्वटेन महीधरेण च गोशब्दस्य सूर्यवाचकत्वं भूमिवाचकत्वं च निर्दि-ष्टम् । तत्र अवस्थित्या उत्पत्तिस्थानेन च भूम्याश्रयत्वमौषधीनामिष्टम्, होमे सति धूमरूपेण सूर्ये सम्बन्धो ऽभिप्रेत इत्यवगम्यते ।

12.102.1. चन्द्राः ‖आपः‖

सायणेन पदमेतदपां विशेषणं तासामाह्लादकत्वसूचकं निर्दिष्टम् ।

‖1‖ "चन्द्राः आह्लादकारिणीः" ‖सा० 13/7‖

उव्वटादिभिः पदस्यास्य मनुष्यादिरूपो ऽर्थः प्रतिपादितः ।

‖2‖ "मनुष्या वा आपश्चन्द्राः" इति श्रुतिः । मनुष्या एव हि यज्ञेनाप्नुवन्ति चन्द्रलोकं पितृमार्गानुसारिणः । यद्वा यश्चापः चायनीयाः प्रथमः शरीरीजनितवान् इति कारणे कार्योपचारः ।" ‖उ०‖

‖3‖ "चन्द्राः आह्लादिका जगत्कारणभूताः" "यतः श्रुतौ आपश्च-न्द्रा इति मनुष्या व्याख्याताः । मनुष्या एव हि यज्ञेनाप्नुवन्ति चन्द्रलोकं पितृ-मार्गानुसारिणः ।" ‖म०‖

महीधरेणात्र पूर्वाचार्ययोरुभयोरर्थसमन्वयो विहितः ।

12.102.2. सत्यधर्मा [प्रजापतिः]

इदं पदं प्रजापतेरवितथधारणशक्तिसूचकं विशेषणमस्ति ।

[1] "सत्यधर्मा अवितथधारणशक्तिः ।" [सा० 13/7]

[2] "सत्यधर्मा सत्यधारणः ।" [उ०]

[3] "सत्यधर्मा सत्यं धरतीति सत्यस्य धारयिता स प्रजापतिः ।" [म०]

उव्वटमहीधराभ्यां सत्यधारणरूपस्य प्रजापतेर्विशिष्टगुणस्य वाचकं पदमेतदुक्तमिति भेदः ।

12.104.1. शुक्रम् [अग्निः]

सायणेन पदमेतदग्नेरङ्गविशेषस्य दीप्तस्य वाचकं विशेषणमिति निर्दिष्टम् ।

[1] "शुक्रं दीप्तिमत्" [सा० 13/7]

[2] "शुक्रं सारं शुक्लं वा" [उ०]

[3] "शुक्रं शुक्लं शुद्धं दीप्तिमत्" [म०]

उव्वटेन शुक्लमिति, महीधरेण शुद्धमिति तात्पर्यमधिकमस्य पदस्योक्तमिति विशेषः ।

12.104.2. चन्द्रम् [अग्निः]

इदं वह्नेरङ्गविशेषस्य वाचकं पदं तस्याह्लादजनकत्वसूचकमिति सायणेन निर्दिष्टम् ।

[1] "चन्द्रम् आह्लादकरम्" [सा० 13/7]

[2] "चन्द्रम् आह्लादनीयम्" [उ०]

12.105.1. ऋतस्य योनिम् (अग्निः/यज्ञपु0, विद्या)

इदं पदं वह्नेर्यज्ञाश्रयत्वसूचकं विशेषणं सायणेनोक्तम् ।

(1) "ऋतस्य यज्ञस्य योनिं स्थानम् ।" (सा0 13/7)

(2) उव्वटादिभिरस्य विद्यारूपोऽर्थो निर्दिष्टः – "ऋतस्य सत्यस्य योनिं स्थानं तिस्रो विद्याः" (उ0)

(3) "ऋतस्य सत्यस्य योनिं स्थानं विद्यात्रयम्" (म0)

12.105.2. महिषः (अग्निः)

सायणेन पदमिदं वह्निवाचकं निर्दिष्टम् ।

(1) "महिषस्य महतोऽग्नेः ।" (सा0 13/7)

(2) "महिषस्य महतः इच्छावतश्चाग्नेः ।" (उ0)

अत्राग्निरूपोऽर्थः समानः, इच्छावत्त्वनिर्देशे उव्वटस्याधिक्यं वर्तते ।

12.106.3. विभावसुः (अग्निः)

सायणेन पदमिदं वह्नेर्विशेषणं निर्दिष्टम् ।

(1) "विभा दीप्तिरेव वसु धनं यस्यासौ विभावसुः ।" (सा0 13/7)

(2) "विभावसो विभूतधन" (उ0)

12.106.4. उक्थ्यम् (मन्त्रविशेषः)

सायणेनात्र पदमिदं शस्त्रसम्बन्धसूचकमन्नस्य विशेषणमिति निर्दिष्टम् ।

(1) "उक्थ्यम् शस्त्राद्युपेतम् ।" (सा0 13/7)

(2) "उक्थ्यम् उक्थ्यार्हम् यज्ञार्हम्" (उ0)

(3) "उक्थ्यम् उक्थः शस्त्राद्युपेतो यज्ञस्तद्योग्यं यज्ञपर्याप्तमन्नम्" (म0)

12.106.5. बृहद्भानुः [अग्निः]

इदमग्नेर्भासुरत्वसूचकं विशेषणमस्ति ।

[1] "बृहन्तो भानवो रश्मयो यस्यासौ बृहद्भानुः ।" [सा० 13/7]

[2] "बृहद्भानो महादीप्त" [उ०]

[3] "बृहन्तो महान्तो भानवो रश्मयो यस्य तत्सम्बुद्धौ हे बृहद्-भानो ।" [म०]

12.107.1. पावकवर्चाः [अग्निः]

इदमग्नेर्ज्योतिषः शोधकत्वसूचकं विशेषणं पदमस्ति ।

[1] "पावकवर्चाः शोधकदीप्तिः ।" [सा० 13/7]

[2] "पावकवर्चाः पावकशक्तिः ।" [उ०]

[3] "पावकवर्चाः पावकं शोधकं वर्चो दीप्तिशक्तिर्यस्य सः ।" [म०]

12.107.2. शुक्रवर्चाः [अग्निः]

इदमग्नेर्विशेषणं तस्य दीप्तिविशेषं सूचयति ।

[1] "शुक्रवर्चा निर्मलदीप्तिः ।" [सा० 13/7]

[2] "शुक्रवर्चाः शुक्रशक्तिश्च ।" [उ०]

[3] "शुक्रवर्चाः शुक्रं शुक्लं निर्मलं वर्चो यस्य ।" [म०]

12.107.3. अनूनवर्चाः [अग्निः]

इदमग्नेर्विशेषणमस्ति ।

[1] "अनूनवर्चाश्च अपरिहीणशक्तिः सन् अन्यूनशक्तिर्वा ।" [उ०]

[2] "अनूनवर्चाः अनूनमहीनं वर्चो यस्य पूर्णशक्तिः ।" [म०]

12.108.1. ऊर्जोनपात् [अग्निः]

इदमप्यग्नेरन्नरक्षकत्वसूचकं विशेषणमस्ति ।

[1] "ऊर्जो ऽन्नस्य नपाद् अविनाशयिता" [सा० 13/7]

[2] "ऊर्कशब्देनाप उच्यन्ते । नपाच्छब्देन च पौत्रः । हे अपां पौत्र, अद्भ्य ओषधिवनस्पतयो जायन्ते, ओषधिवनस्पतिभ्यो ऽग्निर्जायते ।" [उ०]

[3] "ऊर्ज् जलं नपात् पौत्रः हे उर्जोनपादपां पौत्रं, अद्भ्य ओषधिवनस्पतयो जायन्ते तेभ्यो ऽग्निर्जायत इत्यपां पौत्रत्वमग्नेः । यद्वा ऊर्जो ऽन्नस्य नपात् नापतयति नाशयति नपात् । पतेर्णिजन्तात् क्विप् । हे अन्नस्याविनाशक" [म०]

12.108.2. जातवेदः [अग्निः]

इदमग्नेः प्रसिद्धं नामास्ति ।

[1] "जातवेदः जातप्रज्ञानः ।" [उ०]

12.111.1. ऋतावानम् [अग्निः]

पदमिदमग्नेर्महिमायाः व्यापकं विशेषणमस्ति ।

[1] "कीदृशमग्निम् । ऋतावानं सत्यवन्तं यज्ञवन्तं वा ।" [सा० 13/7]

[2] "ऋतवान् सत्यवन्तम् ।" [उ०]

[3] "ऋतमस्यास्तीति ऋतवा तं सत्यवन्तम् ।" [म०]

सायणभाष्ये ऋतशब्दस्य यज्ञरूपश्चार्थो निर्दिष्ट इति विशेषः ।

12.111.2. श्रुत्कर्णम् [अग्निः]

इदमग्नेर्विशेषणमस्ति ।

§1§ "श्रुत्कर्णं श्रृण्वत्कर्णम् । यद्विज्ञाप्यते । तत्सत्यमेव कर्णेन श्रुत्वा सम्पादयतीत्यर्थः ।" §सा० 13/7§

§2§ "श्रृणोत्याह्वानं श्रुत्वा चानुतिष्ठति यः स श्रुत्कर्णः ।" §उ०§

§3§ "श्रृणुत इति श्रुतौ क्विप् । श्रुतौ कर्णौ यस्य तम् । यद् विज्ञाप्यते तत् सत्यमेव कर्णाभ्यां श्रुत्वा सम्पादयतीत्यर्थः ।" §म०§

12.111.3. सप्रथस्तमम् §अग्निः§

इदमग्नेः कीर्तिसूचकं विशेषणमस्ति ।

§1§ "सप्रथस्तमम् अतिशयेन प्रथासहितं कीर्तिमन्तम् ।" §सा० 13/7§

§2§ उव्वटेन पदमिदमग्नेर्गतिविशेषवाचकं निर्दिष्टम् – "सप्रथस्तमं सर्वतः पृथुतमं ऊर्ध्वमधो नवच्छिन्नगतिविज्ञानम् ।" §उ०§

§3§ महीधरेण सायणाशय एव कीर्तिपदे विवृतः – "सप्रथस्तमम् प्रथनं प्रथः कीर्तिः । "प्रथ प्रख्याने" अस्मादसुन्प्रत्ययः । प्रथसा सह वर्तमानः सप्रथाः । अतिशयेन सप्रथाः सप्रथस्तम'तमतिकीर्तिमन्तम् ।" §म०§

12.114.1. मदिन्तमः §सोमः§

इदं सोमस्य विशेषणमस्ति ।

§1§ "मदिन्तम मदयितृतम । यद्वा मदो स्यास्तीति मदी । अतिशयेन मदी मदिन्तमः । "नाद्घस्य" इति नुट् ।" §उ०§

§2§ "हे मदिन्तम, मदयति तर्पयतीति मदी । ग्रहादित्वाण्णिनिप्रत्ययः । यद्वा मदस्तृप्तिरस्यास्तीति मदी "अत इनिठनौ" इतीन् अतिशयेन् मदी मदिन्तमः इति नान्तात्परस्य तमपो नुडागमः ।" §म०§

12.116.2. अङ्गिरस्तमः §अग्निः§

इदमग्नेर्विशेषणमस्ति ।

§1§ "अन्नं गिरतीत्यङ्गिरस्तमस्तस्य सम्बोधनं हे अङ्गिरस्तम" §उ0§

(2) "हे अङ्गिरस्तम, अन्यते जीव्यते येनेत्यन् अन्नम् "अन् प्राणने" क्विप् । अन् अन्नं गिरति अत्तीत्यङ्गिरा:, अतिशयेनाङ्गिरा अङ्गिरस्तम:।"
(म०)

अत्र महीधरस्य व्याख्यानमतीव विशदमस्ति ।

13.4.1. हिरण्यगर्भ: (प्रजापति:)

सायणेन पदमिदं हिरण्यगर्भनाम्न: प्रजापतेर्वाचकमुक्तम् । यज्ञे हिरण्मय-पुरुषे तद्भावना विधीयते ।

(1) "हिरण्यं ब्रह्माण्डरूपेण गर्भरूपेणावस्थित: प्रजापतिर्हिरण्यगर्भ:"
(सा० 14/1)

(2) "हिरण्यगर्भ: यो हिरण्यगर्भाख्य: पुरुष: ।" (उ०)

(3) "हिरण्ये हिरण्यपुरुषरूपे ब्रह्माण्डे गर्भरूपेणावस्थित: प्रजापति-र्हिरण्यगर्भ: ।" (म०)

13.10.1. भ्रमास: (अग्नि:)

मन्त्रे शत्रूणां वधायाभ्यर्थितस्याग्ने: भ्रमणशीलानां विस्फुलिङ्गानां वाचकं विशेषणमेतदिति सायणभाष्यादवगम्यते ।

(1) "भ्रमासो भ्रमणशीला विस्फुलिङ्गा: ।" (सा० 14/1)

उव्वटादेरभिप्रायश्च तदनुकूल एव ।

(2) "भ्रमास: भ्रमणा वातोद्भूता ज्वालासमूहा: ।" (उ०)

13.10.2. पतङ्गा: (अग्नि:)

पदमेतदग्नेर्विस्फुलिङ्गानां वाचकमिति सायण: ।

(1) "पतङ्गान् पतनशीलान् विस्फुलिङ्गान् ।" (सा०)

§2§ उव्वटादयस्तु पदमेतद्रक्षः पिशाचादीनां वाचकमिच्छन्ति ।5
"पतङ्गान् पतन् गच्छन्तीति रक्षांसि ।" §उ0§

§3§ "पतङ्गान् पतन्तः सन्तोगच्छन्तीति सपतङ्गाः पिशाचाः"
§म0§

<u>13.15.2. नियुतः §वायोरश्वाः§</u>

सायणेन वायोर्वाहनरूपाणामश्वानां वाचकं पदमेतन्निर्दिष्टम् ।

§1§ "नियुतो वायोरित्युक्तेर्नियुतो नाम वायोरश्वाः । ताभि-र्वायुर्लक्ष्यते ।" §सा0 14/1§

§2§ "नियुद्भिः नियुद्गुणविशिष्टाभिरश्वाभिः ।" §उ0§

<u>13.15.3. स्वर्षाम् §अग्निः§</u>

इदम् अग्निदेवस्य मूर्ध्नो विशेषणमस्ति । अनेन तस्य स्वर्गदत्वं स्वर्गे प्राप्तिर्वा सूच्यत इति सायणेनोक्तम् ।

§1§ "किम्भूतं मूर्धानम् । स्वर्षाम् । स्वः स्वर्गं सनति ददातीति स्वर्षाः ।षणु दाने । विट्प्रत्ययः । विड्वनोरनुनासिकस्यादिति नकारस्याकारः । यद्वा स्वः स्वर्गे स्यति तिष्ठतीति स्वर्षाः ।" §सा0 14/1§

§2§ "स्वः द्युलोकं सनोतीति स्वर्षा तां स्वर्षाम् ।" §उ0§

§3§ "स्वः स्वर्गं सनोति ददातीति स्वर्षाः । षणु दाने "विट्प्रत्ययः "विड्वनोरनुनासिकस्यात्" इति नकारस्याकारः । यद्वा स्वः स्वर्गे स्यति तिष्ठ-तीति स्वर्षाः तम् । षो न्तकर्मणि क्विप् ।" §म0§

<u>13.16.2. सुपर्णः §गरुत्मान्§</u>

सायणेन पदमिदं पक्षिराजस्य वाचकमुक्तम् ।

(1) "सुपर्णः पक्षिराजो पि" (सा०)

उव्वटादयः पदस्यास्य पुरुषवाचकत्वमिच्छन्ति ।

(2) "समुद्रसुपर्णशब्दाभ्यां रुक्मपुरुषावुच्येते ।" (म०)

13.25.1. अग्निः (अग्निः)

इदं बहुवचनान्तमत्र मन्त्रे पठितं पदं त्रयाणामाहवनीयादीनां वाचक-मवगम्यते । उव्वटेनास्याग्नेः संवत्सररूपत्वमिष्टकारूपत्वं चोक्तम् ।

(1) "अग्नेः संवत्सराख्यस्य" (उ०)

"अग्नयो हैते पृथग्ये देवता इष्टकाः ।" (उ०)

13.35.1. सम्राट् (अग्निः)

इदमग्नेर्दीप्तिसूचकं विशेषणमस्ति ।

(1) "सम्यग् राजत इति सम्रा सि ।" (सा० 14/3)

उव्वटादिना पदस्यास्य उखामुद्दिश्य प्रयोग उक्त इति विशेषः ।

(2) "सम्राडसि संगतराज्यभावासि ।" (उ०)

(3) "सम्यग् राजत इति सम्राडसि ।" (म०)

13.35.2. स्वराट् (अग्निः)

इदमप्यग्नेर्विशेषणमस्ति । अनेनाग्नेः स्वसिद्धा दीप्तिः सूच्यते ।

(1) "स्वयमेव राजते इति स्वराट् ।" (सा० 14/3)

(2) "स्वराडसि स्वराज्ययुक्तासि ।" (उ०)

पदमिदं उखामुद्दिश्य प्रयुज्यमानं निर्दिष्टमुव्वटेन । अस्यार्थश्च स्व-राज्ययुक्तात्वरूपस्तेनोक्त इति विशेषः ।

13.40.3. रुक्म: {अग्नि:}

इदमग्नेर्दीप्तिविशिष्टत्वसूचकं विशेषणमिति सायणेन निर्दिष्टम् ।

{1} "रुक्मो रोचमानो ग्नि: ।" {सा0 14/4}

महीधरेण पदस्यास्य सुवर्णपुरुषरूपो र्थश्चोक्त: ।

{2} "रुक्मो रोचमानो ग्नि: ।"
"रुक्म इव सुवर्णपुरुष इव ।" {म0}

13.41.3. हर: {अग्नेस्तेज:}

सायणेन पदमिदं वह्निगततेजोवाचकमुक्तम् ।

{1} "हरसा तदीयज्वालारूपेण तेजसा" {सा0 14/4}

उव्वटेन महीधरेण च तस्य तेजसो वीर्यापहारकत्वं सूचितम् ।

{2} "वीर्यापहारकं ज्योतिरग्ने हर इत्युच्यते ।" {उ0}

{3} "हरसा सर्ववीर्यापहारकमग्नेर्ज्योतिर्हर: ।" {म0}

13.43.1. इन्दु: {अग्नि:}

सायणेन पदमिदमग्ने: परमैश्वर्यसूचकं विशेषणमिति निर्दिष्टम् ।

{1} "अजस्रमिन्दुं निरन्तरपरमैश्वर्योपेतम् ।" {सा0 14/4}

उव्वटेन पदमिदं चन्द्रवाचकमुक्तम् ।

{2} "इन्दुं सोमं चन्द्रमसम्" {उ0}

महीधरेण सायणोक्त एवार्थो व्युत्पत्त्यादिनिर्देशेन विशदीकृत: ।

{3} "इन्दुं "इदि परमैश्वर्ये" इन्दतीतीन्दु: ऐश्वर्योपेतम् । यद्वा "उन्दी क्लेदे" उनत्ति क्लेदयति जनमनांसीतीन्दु: "उन्देरिच्चादे:" इति कुप्रत्ययादीकारौ ।" {म0}

अत्र चन्द्रस्य जनमनः क्लेदकत्वनिर्देशे महीधरो विशिष्यते ।

<u>13.43.3. भुरण्युः [अग्निः]</u>

सायणेन पदमिदमग्नेः पोषणरूपकर्मसूचकं विशेषणमिति निर्दिष्टम् ।

[1] "अरुषं मर्मलङ्घातं भुरण्युं भरन्तं पोषयन्तम् । यथा यजमानस्य मर्माणि वैरिणो न उद्घारयन्ति तथा कुर्वन्तामित्यर्थः ।" [सा० 14/4]

[2] उव्वटेन भेदनरूपं कर्मात्र पदगतं सूचितम् – "भुरण्युम् भेत्तारं वाह्दोहादिभिः" [उ०]

महीधरेण भरण्युरिति पदं पठितम्, तस्यार्थश्च पोषणात्मको निर्दिष्टः।

[3] "भरण्युं भर्तारं सर्वेषां पोषयितारम् ।" [म०]

<u>13.43.1. पूर्वचितिः [अग्निः]</u>

इदमग्नेर्विशेषणमस्ति । सायणेनास्य पूर्वमहर्षिभिश्चेय इत्यर्थो निर्दिष्टः ।

[1] "पूर्वचित्तिं पूर्वमहर्षिभिश्चेयम् ।" [सा० 14/4]

उव्वटेन पूर्वचयनं पदस्यास्य निमित्तमुक्तम् ।

[2] "पूर्वचित्तिं प्राक्चयनम् । प्राञ्चं ह्यग्निमुद्धरन्तीति अग्न्यध्यासेन गोस्तुतिः ।" [उ०]

महीधरेण सायणोक्तो महर्षिकर्तृक इति भावः प्रदर्शितः, उव्वटोक्तं चयनरूपं कर्म चोक्तमिति विशेषः ।

<u>13.44.2. असुरः [स्वर्भानुः]</u>

सायणेन पदमिदं स्वर्भानोर्वाचकं निर्दिष्टम् ।

[1] "असुरस्य मायां, स्वर्भानोरसुरस्य सम्बन्धेन निर्मिताम्" [सा० 14/4]

उव्वटेन पदमिदं वरुणवाचकमुक्तम् ।

{2} "असुरस्य असुवतः प्राणवतः प्रज्ञानवतो वा वरुणस्य ।" {उ०}

महीधरेण पदव्युत्पत्तिरेवोक्ता न तूद्देश्यं निर्दिष्टम् ।

{3} "असवः प्राणा विद्यन्ते यस्य सो सुरः ।" {म०}

<u>13.44.3. माया {प्रज्ञा}</u>

सायणेन पदस्यास्य स्पष्टं कश्चिदर्थो नोक्तः । असुरसम्बन्ध एव निर्दिष्टः । उव्वटेन पदस्यास्य प्रज्ञावाचकत्वमुक्तम् ।

{1} "मायां प्रज्ञाम्" {उ०}

{2} महीधरेण प्रज्ञाप्रदामित्यर्थ उक्तः - "प्राणवतो मायां प्रज्ञां मीयते ज्ञायते नया माया प्रज्ञा प्राणिनां प्रज्ञाप्रदामित्यर्थः ।" {म०}

<u>13.45.1. शोकः {अग्निः}</u>

सायणेन पदमिदमग्नेर्दीप्तिसूचकं विशेषणमिति निर्दिष्टम् ।

{1} "शोकाद्दीप्तियुक्तात्" {सा० 14/4}

महीधरेणाग्निसन्तापः पदस्य तात्पर्ये निर्दिष्टः ।

{2} "शोकादभ्यजायत अग्निसन्तापादुत्पन्नः ।" {म०}

<u>13.45.3. हेडः {अग्निसम्बन्धीकोपः}</u>

सायणेन पदमिदमग्नेः कोपस्य वाचकमुक्तम् ।

{1} "हेडः कोपः ।" {सा० 14/4}

{2} "हेडः क्रोधः ।" {उ०}

13.47.1. सहस्राक्षः {अग्निः}

सायणेन पदमिदमग्नेर्ज्वालायुक्तत्वसूचकं विशेषणमिति निर्दिष्टम् ।

{1} "हे सहस्राक्ष, सहस्रसंख्याकज्वालारूपचक्षुर्युक्ताग्ने ।" {सा० 14/5}

उव्वटादिभिः पदस्यास्य अग्नेर्हिरण्यशकलरूपचक्षुसूचकत्वमुक्तम् ।

{2} "सहस्राक्षः सन् हिरण्यशकलैर्वा ।" {उ०}

{3} "सहस्राक्षः सहस्रमक्षीणि यस्य सः हिरण्यशकलरूपसहस्रनेत्रः ।"

{म०}

13.55.1. विश्वकर्मा {परमेश्वरः}

व्युत्पत्त्या परमेश्वरवाचकतया प्रतीयमानं पदमिदं यज्ञप्रसङ्गे दक्षिणस्यां दिश्युपधेयानामिष्टकानां प्रशंसायां प्रयुक्तमिति सायणः ।

{1} "विश्वानि कर्माणि जगदुत्पादनादीनि यस्यासौ विश्वकर्मा"

{सा० 14/7}

उव्वटाद्यैः पदमिदं वायुवाचकमुक्तम् ।

{2} "अयं वै वायुर्विश्वकर्मा यो यं पवते । एष हीदं सर्वं करोति ।"

{उ०}

{3} "विश्वं करोति सर्वं सृजतीति विश्वकर्मा वायुरयं दक्षिणा" {म०}

13.56.1. विश्वव्यचाः {प्रजापतिः}

अत्र पश्चिमदिश्युपधेयानामिष्टकानां स्तुतिप्रसङ्गे तासां प्रजापतिस्वरूपता नेन पदेन कल्प्यत इति सायणः ।

{1} "विश्वं सर्वं जगद्व्यचति व्याप्नोतीति विश्वव्यचाः प्रजापतिः"

{सा०}

उव्वटेन पदमिदम् आदित्यवाचकं सूचयति ।

(2) "असौ वा आदित्यो विश्वव्यचा यदा ह्येवैष उदेति अथेदं सर्वं व्यचा भवति ।" (उ०)

महीधरेण च स एवार्थः प्रतिपादितः ।

(3) "पश्चात् प्रतीचीं दिशमन्चति गच्छतीति पश्चात् प्रतीचीगमनशीलो विश्वं विचति उदितः सन् प्रकाशयतीति विश्वव्यचा आदित्यो यं प्रसिद्धः।" (म०)

<u>13.57.1. स्वः (प्रजापतिः)</u>

सायणेन पदमिदं प्रजापतेर्वाचकमुक्तम् ।

(1) "सौति सर्वं जगत् प्रेरयतीति स्वशब्दः प्रजापतिवाची । उत्तरस्यां दिशि यदिदं स्वः प्रजापतिशरीरं हे इष्टके, त्वं तद्रूपासीति वाच्यम्।" (सा०)

उव्वटादिभिः पदमिदं स्वर्लोकवाचकं निर्दिष्टम् ।

(2) "अथ यत् स्वरित्याह स्वर्गो हि लोको दिशः ।" (उ०)

(3) "सर्वस्मादुत्तरभागस्था दिशः यदिदं स्वः स्वर्गो लोकः तां दिक् स्वर्गरूपां ।" (म०)

<u>13.58.1. मतिः (प्रजापतिः)</u>

सायणेन पदमिदं प्रजापतिवाचकमुक्तम् ।

(1) "मन्यते कृत्स्नं जगज्जानातीति मतिः प्रजापतिः । ऊर्ध्वायां दिशि यो यं प्रजापतिः । हे इष्टके, तद्रूपा त्वमसि ।" (सा० 14/7)

उव्वटाद्यैः पदस्यास्य वाचा सम्बन्ध उक्तः ।

§2§ "अथ यन्मतिरित्याह वाग्वै मतिः ।" §उ0§

§3§ "उपरि ऊँर्ध्वदिशास्थश्चन्द्र इयं मतिः वाक्, मन्यते ज्ञायते यया सा मतिः । वागेव चन्द्रो भूत्वोपरि यत्तिष्ठति तद्रूपाम् ।" §म0§

14.7.1. विधा §ब्रह्मादयः/आपः§

सायणेन पदमिदं ब्रह्मादिदेवानामपां च सूचकं निर्दिष्टम् ।

§1§ "विविधं जगद्दधति पोषयन्तीति ब्रह्मादयो विधाः ।"

§सा0 15/2§

"यद्वा विधाशब्देनाप उच्यन्ते । आपो वै विधा इति श्रुतेः"

उव्वटेनाप्यूप एवार्थः केवलमुक्तमः –

§2§ "आपो वै विधाः । अद्भिर्हीदं सर्वं विहितम् ।" §उ0§

§3§ "विदधति सृजन्ति जगदिति विधा आपः ।" §म0§

14.7.2. वयोनाधाः §छन्दांसि/प्राणरूपाः§

सायणेन पदमिदं ~~छद~~ छन्दोरूपानां पदानां प्राणरूपानां देवानान्च वाचकमिति निर्दिष्टम् ।

§1§ "वयोनाधैः पदैश्छन्दोरूपैः प्राणरूपैर्वा देवैः समानप्रीतिरसि । तथा च श्रूयते । प्राणा वै देवा वयोनाधाः । प्राणैर्हीदं सर्वं वयुनं सनद्धमथ छन्दाँसि वयोनाधाः । छन्दोभिर्हीदं सर्वं वयुनं नद्धं प्राणैर्वै सयुग् भूत्वा प्राजनयदित्यादि । सजूर्देवैरिति पुनर्वचनमादरार्थम् ।" §सा0 15/2§

§2§ "वयो बाल्यादि नह्यन्ति बध्नन्ति ते वयोनाधाः प्राणा देवादीप्यमानाः ।" §म0§

14.9.1. मूर्धा वयः §प्रजापतिः§

सायणेन पदमिदं गायत्रीछन्दोरूपेण परिकल्पितस्य प्रजापतेर्मूर्द्धलक्षणस्य

वयसो वाचकं निर्दिष्टम् ।

(1) "गायत्रीछन्दोरूपेण परिकल्पितो सौ प्रजापतिः स्वयमेव मूर्धा पशुलम्बन्धिशिरः । वयः शरीरावस्था । प्रजापतिरेव मूर्धलक्षणं वयो भवत् । अत एव मूर्ध्नि इतरावयवेभ्यः प्राधान्यं दृश्यते ।" (सा0 15/3)

(2) "मूर्धा प्रजापतिप्राधान्यात् । वयः शरीरावस्था । प्रजापतिः स्वयमेव छन्दः ।" (उ0)

(3) "मूर्धाप्रधानः प्रजापतिश्छन्दो गायत्रीरूपो भूत्वा वयः । विभक्तिव्यत्ययः । वयसा कृत्वा पशूनाप्नोदिति शेषः ।" (म0)

<u>14.9.2. प्रजापतिः (प्रजापतिः)</u>

अत्र सृष्टिकर्ता प्रजापतिरीप्सित इति सायणभाष्यादवगम्यते ।

(1) "पुरा खलु सृष्टवतः प्रजापतेर्विश्वस्मात् सकाशात् सृष्टाः पशवश्छन्दोरूपमास्थाय निरगच्छन् ।" (सा0 15/3)

<u>14.9.3. क्षत्रं वयः (प्रजापतिः)</u>

सायणेन पदमिदं गायत्रीछन्दोरूपेण तिष्ठतः प्रजापतेः शरीरावस्थाविशेषवाचकं निर्दिष्टम् ।

(1) "क्षतात् त्रायत इति क्षत्रम् । तादृशं वयः शरीरावस्था प्रजापतिरभवत् ।" (सा0 15/3)

<u>14.9.5. विष्टम्भः (प्रजापतिः)</u>

सायणेन पदमेतत्प्रजापतेर्वयो विशेषसूचकमुक्तम् ।

(1) "कृत्स्नं शरीरं विष्टम्भोति स्थिरीकरोतीति विष्टम्भः प्रजापतिः (सा0 15/3)

{2} "विष्टम्भो वयः । प्रजापतिर्विष्टम्भः । स हीदं सर्वं विष्टम्भोति ।" {उ0}

{3} "विष्टम्भोति जगत् स्तम्भोतीति विष्टम्भः ।" {म0}

14.9.6. अधिपतिः {प्रजापतिः}

सायणेन पदमिदम् अधिष्ठापनरूपकर्मप्रयुक्तं प्रजापतेनामिति निर्दिष्टम् ।

{1} "अधिष्ठापयतीत्यधिपतिः ।" {सा0 15/3}

{2} "अधिपतिश्छन्दः । प्रजापतिर्वा अधिपतिः ।" {उ0}

{3} "अधिपतिः अधिकं पालकः ।" {म0}

14.9.7. विश्वकर्मा {प्रजापतिः}

इदं प्रजापतेर्विशेषणमस्ति ।

{1} "विश्वं कर्म कर्तव्यं यस्यासौ विश्वकर्मा प्रजापतिः ।" {सा0 15/3}

14.9.8. परमेष्ठी {प्रजापतिः}

सायणेन पदमिदं प्रजापतेर्वाचकमुक्तम् ।

{1} "परमे उत्कृष्टे स्थाने तिष्ठतीति परमेष्ठी ।" {सा0 15/3}

{2} "आपो वै प्रजापतिः परमेष्ठी" {उ0}

{3} "परमे पदे तिष्ठतीति परमेष्ठी विश्वकर्मा सर्वस्रष्टा ।" {म0}

14.26.2. ऋभुः {देवताविशेषः}

महीधरेण पदमिदं देवविशेषवाचकमिति सूचितम् ।

{1} "ऋभूणां देवविशेषाणाम्" {म0}

14.28.1. ब्रह्मणस्पतिः {स्रष्टा}

महीधरेण पदमिदं ब्रह्मणजातेः स्वामिनः स्रष्टुर्वाचकमुक्तम् ।

{1} "स्रष्टा ब्रह्मणस्पतिर्ब्राह्मणजातेः स्वाम्यभूत् ।" {म0}

15.4.6. मनश्छन्दः {प्रजापतिः}

सायणादिभिः पदमिदं प्रजापतिवाचकं निर्दिष्टम् ।

{1} "प्रथमसृष्टं प्रजापत्यात्मकं यन्मनस्तदेव छन्दः ।" {सा0 16/1}

{2} "प्रजापतिर्वै मनश्छन्दः ।" {उ0}

15.4.7. व्यचश्छन्दः {आदित्यः}

पदमिदमादित्यवाचकमिति सायणादिभाष्येभ्यो वगम्यते ।

{1} "विचतिर्व्याप्तिकर्मा । विचति व्याप्नोति सर्वं जगदिति व्यचो सावादित्यः ।" {सा0 16/1}

{2} "असौ वा आदित्यो व्यचश्छन्दः ।" {उ0}

{3} महीधरेण पूर्वाचार्यमतमेवानुसृतम् ।

15.4.18. क्षुरोभ्रजश्छन्दः {आदित्यः}

उव्वटादिभिः पदमिदमादित्यवाचकं निर्दिष्टम् ।

{1} "असौ वा आदित्यः क्षुरोभ्रजश्छन्दः ।" {उ0}

{2} "क्षुर विलेखनखननयोः क्षुरति विलिखति व्याप्नोति सर्वमिति क्षुरः तीव्रः । भ्राजते दीप्यत इति भ्रजः ह्रस्वश्छान्दसः । क्षुरोभ्रज आदित्यः ।" {म0}

15.5.18. दूरोहणं छन्दः {रविः, सूर्यः}

महीधरेण पदमिदं सूर्यवाचकं निर्दिष्टम् ।

{1} "दुःखेन रोढुमारोहणं कर्तुं शक्यं निष्कामज्योतिष्टोमादियज्ञ-प्रयासजातज्ञानसाध्यत्वादिति दूरोहणं रविः ।" {म०}

15.10.3. विधर्ता {वागभिमानी देवः}

सायणेन वागभिमानी देवविशेषः इष्टकानां निष्पादयिता च पदस्यास्य वाच्यतया निर्दिष्टः ।

{1} "विधर्ता विशेषेण धारयिता तव पोषयिता वागाभिमानिदेवः" {सा० 16/3}

{2} "विधर्ता वाक्" {उ०}

{3} "विधर्ता इष्टकानिष्पादयिता" {म०}

"विधर्ता विशेषेण धारयिता वागभिमानी देवः ।" {म०}

15.10.4. अधिपतिः {देवविशेषः/आध्या०, मनः}

सायणेन मनोभिमानिनो देवविशेषस्य इष्टकानां पालकस्य च पदमिदं वाचकं निर्दिष्टम् ।

{1} "अधिपतिः प्रधानभूतो मनो भिमानी देवश्च" {सा० 16/3}

{2} "अधिपतिः मनः" {म०}

15.10.6. वसवः {विशेषदेवताः}

पदमिदं दिगधिदेवानां वाचकं मन्त्रे ज्ञायते । महीधरेणाष्टसङ्ख्या तेषां सूचिता ।

{1} "वसवो ष्टौ देवाः ।" {म०}

15.11.2. रुद्राः [देवाः]

दक्षिणदिक्पालकानां देवविशेषाणां वाचकं पदमेतन्मन्त्रपाठादवगम्यते ।

15.11.3. इन्द्रः [देवताविशेषः]

अत्र पदमिदं दक्षिणदिक्सम्बन्धेन सह हेतीनां धारणे धिकृतस्य देवस्य वाचकमिति मन्त्रवाक्यादवगम्यते ।

15.12.2. आदित्याः [देवताः]

पदमिदं प्रतीच्या दिशो धिपालकानां देवविशेषाणां वाचकं मन्त्रादवगम्यते ।

15.12.3. वरुणः [प्रसिद्धदेवः]

प्रतीचीदिग्सम्बद्धानां हेतीनां प्रतिधर्ता यं देव इति मन्त्रे स्पष्टम् । भाष्यकारैरेतद्विषये किमपि नोक्तम् ।

15.13.2. मरुतः [वायुः]

उदीच्या दिशः पालकानां देवविशेषाणां पदमेतद् वाचकमिति मन्त्रपाठादवगम्यते ।

15.13.3. सोमः [देवविशेषः]

उदीचीसम्बन्धेन सह हेतीनां प्रतिधर्ता देवविशेषः पदस्यास्य वाच्यरूप इति मन्त्रपाठादवगम्यते ।

15.14.3. विश्वेदेवाः [देवगणः]

ऊर्ध्वाया दिशः पालका इमे देवा इति मन्त्रे स्पष्टम् ।

15.14.4. बृहस्पतिः [देवता]

ऊर्ध्वदिक्सम्बद्धानां हेतीनां प्रतिधर्ता देवविशेषो यमिति मन्त्रपाठा-
दवगम्यते ।

15.15.7. सेनानीः [अग्निः]

सायणभाष्ये सेनापतेरिदं नामेति सूचितम् ।

[1] "सेनां नयतीति सेनानी ।" [सा० 16/4]

उव्वटादिभिः सायणानुसरणमेव विहितम् ।

15.16.1. विश्वकर्मा [अग्निः]

सायणेन पदमिदमग्नेः विविधकर्मसाधनत्वसूचकं विशेषणमिति सूचितम् ।

[1] "विश्वानि कर्माण्यग्निहोत्रादीनि यस्य सो यमग्निर्विश्व-
कर्मा ।" [सा० 16/4]

उव्वटादिभिः पदस्यास्य वायुरूपो र्थ उक्तः ।

[2] "विश्वकर्मा सर्वस्य कर्ता वायुः ।" [उ०]

[3] "विश्वं सर्वं कर्म यस्य । विश्वं करोतीति वा विश्वकर्मा
वायुः ।" [म०]

15.16.2. रथस्वनः [अग्निसेनानीः]

इदमग्नेः सेनानिवाचकं पदमस्ति ।

§1§ "रथस्वनः सेनानीः ।" §सा० 16/4§

§2§ "रथस्वनः रथे वस्थितो महास्वनः । स्वनः शब्दः ।"

अत्र उव्वटव्याख्यानं रथगतं महान्तं शब्दं गुणं निर्दिशतीति प्रतीयते । इदं प्रसङ्गेऽस्मिन् नानुकूलम् ।

§3§ "तस्य वायोः रथस्वनः सेनानीः रथे स्थितः स्वनति शूरशब्दं करोतीति रथस्वनः ।" §म०§

15.16.3. रथेचित्रः §अग्नेः ग्रामणीः§

इदमग्निग्रामणीवाचकं पदमस्ति ।

§1§ "रथचित्रो ग्रामणीः ।" §सा० 16/4§

§2§ "रथे चित्रः रथे वस्थितो विचित्रयोधी ।" §उ०§

§3§ "रथे स्थितः चित्र आश्चर्यकारी रथे चित्रो ग्रामणीः ।" §म०§

15.16.4. मेनका §अप्सराः§

अप्सरसो नाम इदमस्ति ।

§1§ "मेना मानयन्त्येनां मेनका ।" §उ०§

15.17.1. विश्वव्यचाः §अग्निः§

इदमग्नेर्व्यापकत्वसूचकं विशेषणमस्ति ।

§1§ "विश्वं व्यचति व्याप्नोतीति विश्वव्यचाः ।" §सा० 16/4§

उव्वटाद्याः पदमिदं सूर्यवाचकं निर्दिशन्ति ।

§2§ "आदित्यो विश्वव्यचाः । स ह्युदयेन सर्वं व्यञ्चनवत् करोति" §उ०§

{3} "विश्वव्यचा: आदित्य: विश्वं सर्वमुदयेन विचति प्रकाशयति व्याप्नोति वा विश्वव्यचा: असुन् ।" "असौ वा आदित्यो विश्वव्यचा यदा ह्येवैष उदेत्यथेदं सर्वं व्यचो भवति तद्यत्तमाह पश्चादिति तस्मादेतं प्रत्यन्चमेव यन्तं पश्यन्ति इति श्रुतेः ।" {म0}

<u>15.17.2. रथप्रोत: {अग्नि:}</u>

अग्ने: सेनानिनामिदम् ।

{1} "रथप्रोतश्च रथे वस्थित: प्रोत इव" {उ0}

{2} "तस्यादित्यस्य रथे स्थित: प्रोत इव स्थिरो रथे प्रोत: सेनानी: ।" {म0}

<u>15.17.3. असमरथ: {अग्नि:}</u>

अग्नेर्ग्रामणीनामिदम् ।

{1} "असमरथो न्यैरनभितुल्य: ।" {सा0 16/4}

{2} "असमो न्यै रथैरतुल्यो रथो यस्य सो समरथो नाम ग्रामणी:।" {म0}

<u>15.18.1. संयद्वसु: {अग्नि:}</u>

इदमुत्तरदिक्स्थस्याग्नेर्धनदत्वसूचकं विशेषणमिति सायणेनोक्तम् ।

{1} "सम्यक् प्राप्ते वस्तुधनं यस्याग्ने: सो यं संयद्वसु: ।" {सा0 16/4}

उव्वटाद्या: पदमिदं यज्ञवाचकमाहु: ।

{2} "संयद्वसु: संयन्ति वसुनो धनस्य लिप्सवो यं प्रति स संयद्-वसुर्यज्ञ: ।" {उ0}

{3} "संयद्वसुः यज्ञः सम्यक् यन्ति गच्छन्ति वसुने धनाय संप्रति जनाः स संयद्वसुः । यज्ञं गतेभ्यो हि दानमावश्यकम् ।" {म0}

15.18.2. तार्क्ष्यः {अग्निः}

इदमग्नेः सेनानीविशेषस्य नाम ।

{1} "तीर्णे अन्तरिक्षे क्षियति निवसतीति तार्क्ष्यः ।" {सा0 16/4}

{2} "तीक्ष्णे न्तरिक्षे क्षियति पक्षाविति तार्क्ष्यः ।" {उ0}

सायणकृते व्याख्याने न्तरिक्षनिवासः पदव्युत्पत्तौ हेतुतयोक्तः उव्वटादिव्याख्याने तु पक्षोप इति भेदः स्पष्टः ।

15.18.3. अरिष्टनेमिः {अग्निः}

अग्निग्रामणीनाम ।

{1} "अरिष्टनेमिः अनुपहिंसितायुधः ।" {सा0 16/4}

{2} "अरिष्टा नुपहिंसिता नेमिरायुधं यस्य सो रिष्टनेमिः ।" {म0}

15.19.1. अर्वाग्वसुः {अग्निः}

सायणेन पदमिदं विद्युद्रूपस्याग्नेः सूचकं निर्दिष्टम् ।

{1} "अर्वाग्वसुरधोमुखत्वेन वसनात् भेद्याद भूमौ पततादवैद्युतो - ग्निरस्त्यस्येत्युच्यते । स चोपर्यूर्ध्वायां दिशि वर्तते ।" {सा0}

{2} उव्वटादयास्तु पदमेतत् सप्रमाणं पर्जन्यवाचकं वदन्ति - "अर्वागन्चनं वसु धनमुदकलक्षणं प्रजाभ्यो ददातीत्यर्वाग्वसुः पर्जन्यः ।" {उ0}

{3} "अर्वागधोमुखं यद्वसु धनं जलरूपं यस्मात्सो र्वाग्वसुः । अधो जलं प्रजाभ्यो ददातीत्यर्थः । तथा च श्रुतिः "पर्जन्यो वा उपरि तद्यत्तमाहो- परीत्युपरि हि पर्जन्यो थ यदर्वाग्वसुरित्याहातो ह्यर्वाग्वसु वृष्टिरन्नं प्रजाभ्यः

प्रदीयते (8/6/1/20) इति ।" (म०)

15.19.2. सेनजित् (अग्निः)

अग्नेः सेनानी विशेषस्य नाम ।

(1) "सेनां जयतीति सेनजित् ।" (सा० 16/4)

15.19.3. सुषेणः (अग्निः)

अग्नेः ग्रामणी विशेषनामेदम् ।

(1) "शोभना सेना यस्यासौ सुषेणो ग्रामणीः ।" (सा० 16/4)

(2) "सुषेणश्च शोभनसेनश्च" (उ०)

(3) "शोभना सेना यस्येति सुषेणः "पूर्वपदात्" इति षत्वम्, ततो णत्वम् ।" (म०)

15.25.1. वृषभः (अग्निः)

इदमग्नेर्वृष्टिहेतुत्वसूचकं विशेषणमस्ति ।

(1) "वृषभाय वर्षित्रे । आहुतिपरिणामाभिप्रायमेतत् ।" (उ०)

(2) "वृषभाय श्रेष्ठाय कामानां वर्षयित्रे ।" (म०)

15.25.2. वृषा (अग्निः)

अस्य पदस्य सेक्ता इत्यर्थो भाष्यकारैः कृतः । इदमग्नेर्विशेषणम् ।

(1) "वृष्णे सेक्त्रे" (उ०)

15.25.3. गविष्ठिरः (अग्निः)

इदमग्नेर्भूम्यवस्थितिसूचकं विशेषणमस्ति ।

§1§ "गविष्ठिराय भूमौ स्थिरत्वेनावस्थिताय ।" §सा० 16/5§

उव्वटमहीधराभ्यामेतद् पदं होतृवाचकं विशेषणमिति सूचितम् ।

§2§ "गविष्ठिरः होता गवि वाचि स्थिरो प्रच्याव्यः ।" §उ०§

§3§ "गविष्ठिरः गवि वाचि स्थिरो प्रच्याव्यो होता ।" §म०§

15.27.1. जागृविः §अग्निः§

इदमग्नेः कर्मणि सावधानत्वनिरूपकं विशेषणमस्ति ।

§1§ "जागृविः कर्मणि सावधानः ।" §सा० 16/5§

§2§ "जागृविः जागरणशीलः अम्लिष्टज्ञानः अग्निः ।" §उ०§

§3§ "अजागृविः जागरणशीलः कर्मणि सावधानः ।" §म०§

15.27.2. घृतप्रतीकः §अग्निः§

इदमग्नेघृतप्रियत्वसूचकं विशेषणमस्ति ।

§1§ "घृतं प्रतीके मुखे यस्यासौ घृतप्रतीकः ।" §सा० 16/5§

§2§ "घृतप्रतीकः घृतमुखः ।" §उ०§

15.27.3. दिविस्पृक् §अग्निः§

पदमिदमग्नेस्तेजसो विशेषणमस्ति तस्य प्रसारसीमासूचकम् ।

§1§ "दिविस्पृशा द्युलोकस्पर्शिना ।" §म०§

15.28.1. अङ्गिरसः §अग्निः§

सायणेन पदमिदं महर्षिवाचकमुक्तम् ।

§1§ "अङ्गिरसो महर्षयः ।" §सा० 16/5§

§2§ "अङ्गिरसः ऋषयः ।" §उ०§

§3§ "अङ्गिरसः अङ्गिरोवंशोद्भवा ऋषयः ।" §म0§

15.28.2. गुहाहितः §अग्निः§

इदमग्नेः स्थितिसूचकं विशेषणमस्ति ।

§1§ अरणिप्रभृतिषु गोष्ठस्थानेषु अवस्थितम् ।" §सा0 16/5§

§2§ "गुहाहितं निगूढं प्रदेशे वस्थितम् ।" §उ0§

15.29.1. क्षितीनां वर्षिष्ठः §अग्निः§

इदमग्नेर्माहात्म्यसूचकं विशेषणमस्ति ।

§1§ "क्षितीनां निवासहेतुनां मध्ये वर्षिष्ठाय बृहत्तमाय ।" §सा0 16/5§

§2§ "वर्षिष्ठाय क्षितीनां पृथुतमाय मनुष्याणाम् ।" §उ0§

§3§ "क्षितीनां मनुष्याणाम् । वर्षिष्ठाय श्रेष्ठाय वृद्धतमाय । "प्रियस्थिर0" §पा0 6/4/157§ इत्यादिना वृद्धस्य वर्षादेश इष्ठनि । क्षियन्ति निवसन्ति भूमाविति क्षितयो नराः कर्तरि क्तिन् । सर्वपूज्यायेत्यर्थः ।" §म0§

अत्र महीधरव्याख्याने अर्थस्य साधुप्रकाशनाद्, व्युत्पत्तिसौष्ठवाच्च विशेषः स्पष्टः ।

15.29.2. ऊर्जोनप्ता §अग्निः§

इदमग्नेर्बलदत्त्वसूचकं विशेषणमस्ति ।

§1§ "ऊर्जोनप्त्रे बलस्य धारयित्रे विनाशमकुर्वति" §सा0 16/5§

उव्वटेन अस्य अपां पौत्र इत्यर्थो निगदितः ।

§2§ "ऊर्जोनप्त्रे अपां पौत्राय । अद्भ्य ओषधिवनस्पतयो जायन्ते ताभ्यो ग्निः ।" §उ0§

§3§ "ऊर्जो जलस्य नप्त्रे पौत्राय । अद्भ्यो वनस्पतयो जायन्ते तेभ्यो ग्निरित्यपां पौत्रो ग्निः ।" §म0§

15.30.1. वृषा §अग्निः§

इदमग्नेः कामदत्वसूचकं विशेषणमस्ति ।

§1§ "हे वृषन्, कामानां वर्षकाग्ने ।" §सा0 16/5§

§2§ "वृषन्, वर्षितः अग्ने ।" §म0§

15.30.2. अर्यः §अग्निः§

पदमिदमग्नेरीश्वरत्वसूचकमस्ति ।

§1§ "अर्य ईश्वर ।" §सा0 16/5§

§2§ "अर्यः ईश्वरः" §उ0§

§3§ "अर्यः स्वामी" §म0§

15.31.1. चित्रश्रवस्तमः §अग्निः§

इदमग्नेः कीर्त्यतिशयसूचकं पदमिति सायणेन निर्दिष्टम् ।

§1§ "चित्रं श्रवो विचित्रा कीर्तिर्यस्यासौ चित्रश्रवा अतिशयेन चित्रश्रवस्तमः ।" §सा0 16/5§

§2§ "चित्रं नानारूपं श्रवो धनमतिशयेन यस्य स चित्रश्रवस्तमः । तस्य सम्बोधनं हे चित्रश्रवस्तम ।" §उ0§

§3§ "चित्रं नानाविधं श्रवो धनं कीर्तिर्वा यस्य स चित्रश्रवाः । अतिशयेन चित्रश्रवाश्चित्रश्रवस्तमस्तत्सम्बुद्धिः ।" §म0§

15.31.2. शोचिष्केशः §अग्निः§

इदमग्नेर्ज्वालासम्पन्नतया दीप्तिसूचकं विशेषणमस्ति ।

§1§ "शोचींषि ज्वाला एव केशस्थानीयो यस्यासौ शोचिष्केशः ।§
§सा0 16/5§

§2§ "शोचन्ति दीप्यन्तो ज्वालाः केशसंस्थानीया अस्येति शोचिष्केशः"
§उ0§

15.31.3. पुरुप्रियः §अग्निः§

इदमग्नेः प्रियत्वसूचकं विशेषणमस्ति ।

§1§ "पुरूणां बहूनां यजमानानां प्रियः ।" §सा0 16/5§

§2§ "हे पुरुप्रिय, बहवो यजमानाः प्रिया अस्य ।" §उ0§

"बहूनां यजमानानां वा प्रियः ।" §उ0§

§3§ "हे पुरुप्रिय, बहूनां यजमानानां प्रिय । यद्वा पुरवः प्रिया यस्य पुरु बहु हविः प्रियं यस्येति वा हे पुरुप्रिय हे अग्ने ।" §म0§

15.32.1. ऊर्जोनपात् §अग्निः§

इदमग्नेरन्नदहनशक्तिसूचकं विशेषणमिति सायण आह ।

§1§ "ऊर्जो न्नस्य नपातं विनाशयितारम् ।" §सा0 16/5§

§2§ उव्वटादयास्त्वस्य अपां पौत्रमित्यर्थमाहुः –

"ऊर्जोनपातम् अपां पौत्रम् ।" §उ0§

15.32.2. चेतिष्ठः §अग्निः§

इदमग्नेश्चेतना विशेषसूचकं विशेषणमस्ति ।

§1§ "चेतिष्ठं अतिशयेन चेतयितत्" §सा0 16/5§

§2§ "चेतिष्ठं अतिशयेन चेतनायुक्तम् ।" §उ0§

§3§ "चेतिष्ठमतिशयेन चेतयितारम् ।" §म0§

15.32.3. अरतिः {अग्निः}

इदमग्नेः सर्वदा सक्रियत्वसूचकं विशेषणमस्ति ।

{1} "अरतिस्परमस्तद्रहितं सवन्दोयुक्तमित्यर्थः ।" {सा० 16/5}

{2} "अरतिम् अलंमतिं पर्याप्तमतिम् ।" {उ०}

{3} "अरतिमलंमतिं पर्याप्तमतिम् । यद्वा रतिस्परमस्तद्रहितम् । सदोद्यमयुतमित्यर्थः ।" {म०}

15.32.4. स्वध्वरः {अग्निः}

इदमग्नेर्यज्ञसाधनत्वसूचकं विशेषणमस्ति ।

{1} "स्वध्वरं शोभनस्य क्रतोः निष्पादकम् ।" {सा० 16/5}

{2} "स्वध्वरं शोभना अध्वरा यज्ञा यस्य तम् ।" {म०}

{3} "शोभना अध्वरा यज्ञा अस्य विद्यन्त इति स्वध्वरः ।" {उ०}

15.32.5. विश्वस्य दूतः {अग्निः}

इदमग्नेर्दूतवत्कार्यकर्तृत्वसूचकं विशेषणमस्ति ।

{1} "विश्वस्य दूतं सर्वस्य जगतो दूतवत् कार्यकारिणम् ।" {सा०}

{सर्वस्य हि गृहे दाहपाकादिकार्यं करोति ।" {सा०}

{2} "विश्वस्य सर्वस्य यजमानजनस्य दूतम् ।" {उ०}

{3} "विश्वस्य दूतं सर्वस्य यजमानजनस्य सर्वस्य जगतो वा दूतवत् कार्यकारिणम् ।" {म०}

15.32.6. अमृतः {अग्निः}

इदमग्नेर्मरणधर्महीनत्वसूचकं विशेषणमस्ति ।

{1} "अमृतं मरणरहितम् । मनुष्यवद्देवानां सर्वदा मरणं नास्ति ।" {सा० 16/5}

(2) "अमृतम् अमरणधर्माणम् ।" (उ०)

15.34.3. वसवः (रुद्राः आदित्या वा)

अत्र वसुपदं रुद्राणामादित्यानां च वाचकं भाष्यकारैरुक्तम् ।

(1) "वसूनां देवम् वसूनां रुद्राणामादित्यानां देवानाम् ।" (उ०)

(2) "वसुशब्दो रुद्रादित्ययोरुपलक्षकः । वसूनां रुद्राणामादित्यानां सवनत्रयदेवानाम् ।" (म०)

15.36.1. पुर्वणीकः (अग्निः)

इदमग्नेः सुखादिसम्पत्सूचकं विशेषणमस्ति ।

(1) "पुरु बहु अनीकं मुखं सैन्यं वा यस्यासौ पुर्वणीकः ।" (सा० 16/5)

(2) "हे पुर्वणीक, बहुमुख । अनीकं मुखम् । पुरु बहुनाम । "यतो ह्येव कुतश्चाग्नावभ्यादधाति तत एव प्रदहति" इति श्रुतिः ।" (उ०)

(3) "हे पुर्वणीकः, पुरु बहु अनीकं मुखं यस्य तत्सम्बुद्धिः सर्वदाहकत्वात् ।" (म०)

15.36.2. वसुः (अग्निः)

इदमग्नेर्विशेषणम् ।

(1) "वसुर्निवासहेतुः ।" (सा० 16/5)

(2) "वसुः उपकारभूतः वासयिता वा ।" (उ०)

15.37.1. तिग्मजम्भः (अग्निः)

इदमग्नेस्तीक्ष्णज्वालासूचकं विशेषणमस्ति ।

(1) "तिग्मा तीक्ष्णं जम्भा यस्यासौ तिग्मजम्भः ।" (सा० 16/5)

(2) "

§2§ "हे तिग्मजम्भ वज्रदंष्ट्र । तिग्मामिति वज्रनाम । जम्भेति दंष्ट्रानाम ।" §उ०§

§3§ "तिग्मा तीक्ष्णा जम्भा दंष्ट्रा यस्य । यद्वा तिग्ममिति वज्रनाम । हे वज्रदंष्ट्र अग्ने ।" §म०§

15.41.1. वसुः §अग्निः§

पदमिदमग्निमाहात्म्यसूचकमित्युव्वटः ।

§1§ "तमहमग्निं मन्ये जाने । यो वसुः धनम् । तापपाकप्रकाशैस्य-कुर्वन् धनमित्युच्यते ।" "यद्वा वसुर्वासयिता" §उ०§

§2§ "यो वसुः तापपाकप्रकाशैस्यकुर्वन् धनरूपो वसुरित्युच्यते । वसुर्वासयिता वा ।" §म०§

15.43.1. सुचन्द्रः §अग्निः§

इदमग्नेः विशेषणमस्ति ।

§1§ "हे सुचन्द्रः सुष्ठु आह्लादनकाराग्ने ।" §सा० 16/5§

§2§ "सुचन्द्र, शोभनचन्द्र इव धनानामुत्पादक । शोभने हि चन्द्रमसि धनान्युत्पद्यन्त इति ज्योतिः शास्त्रविदः प्रतिजानन्ति ।" §उ०§

यद्वा कल्याणाह्लादज ।

§3§ "चन्द्रे सु शकारेणेति संहितायां चन्द्रे परे सुशब्दस्य शागमः । हे सुश्चन्द्र, चन्द्रमिति हिरण्यनाम । शोभनं चन्द्रं हिरण्यं यस्मात् । यद्वा शोभन-श्चन्द्र इव चन्द्रो धनदाता । शोभने चन्द्रे धनप्राप्तिर्भवतीति ज्योतिःशास्त्रे उक्तम्। यद्वा शोभनं चन्दत्याह्लादयति सुचन्द्रः, हे सुचन्द्र ।" §म०§

अत्र महीधरस्य व्याख्यातं सर्वाधिकतया विशिष्यते ।

15.43.2. शवसस्पतिः ॥अग्निः॥

अग्नेर्बलदत्वसूचकं विशेषणमिदम् ।

॥1॥ "हे शवसस्पते, बलस्याधिपते ।" ॥सा० 16/5॥

॥2॥ "हे शवसस्पते, बलस्य पते ।" ॥उ०॥

॥3॥ "हे शवसः पते, बलस्याधिपते ।" ॥म०॥

15.46.2. स्वर्णज्योतिः ॥सूर्यः॥

सायणेन पदमिदं सूर्यवाचकं निर्दिष्टम् ।

॥1॥ "स्वर्णज्योतिः स्वर्गलोके प्रकाशरूप आदित्यः ।" ॥सा० 16/5॥

॥2॥ "स्वर्णज्योतिः यथा स्वराख्यं ज्योतिरुदयादारभ्यावागिन्चनं सर्वप्राणिनो नुगृह्णाति ।" ॥उ०॥

15.49.1. तपः ॥अग्निः॥

यज्ञसाधनस्याग्नेर्वाचकं पदम् ।

॥1॥ "तपसा संतापयुक्तेनाग्निना ।" ॥सा० 16/5॥

महीधरस्तु चित्तैकाग्र्यरूपं कर्मैव तप इत्याह ।

॥2॥ "तपसा चित्तैकाग्र्येण ।" ॥म०॥

15.51.2. भुरण्युः ॥अग्निः॥

इदमग्नेर्जगद्भरणसामर्थ्यसूचकं विशेषणमस्ति ।

॥1॥ "भुरण्युर्जगद्भरणशीलः ।" ॥सा० 16/6॥

॥2॥ "भुरण्युः भर्ता ।" ॥उ०॥

॥3॥ "भुरण्युः जगद्भर्ता । "भुरण्युरिति भर्तेत्येतत्" इति श्रुतेः ।" ॥म०॥

<u>15.51.3. चेकितानः (अग्निः)</u>

इदमग्नेः ज्ञानवाचित्तसूचकं विशेषणमस्ति ।

(1) "चेकितानो भिज्ञानवान् ।" (सा० 16/6)

(2) "चेकितानः चेतयमानः ।" (उ०)

(3) "चेकितानः चेकितयमानः ।" (म०)

<u>15.63.1. आयुः (आदित्यः)</u>

पदमिदं देवस्यादित्यस्य वाचकमिति सायणः ।

(1) "राति निरन्तरं गच्छतीत्यायुरादित्यः ।" (सा० 16/6)

(2) "स्थापयति एति निरन्तरं गच्छतीत्यायुरादित्यः ।" (म०)

<u>15.63.2. समुद्रः (आदित्यः)</u>

पदमिदमादित्यवाचकं सायणेनोक्तम् ।

(1) "समुद्रस्य समुद्रसमानस्यादित्यस्य ।" (सा० 16/6)

(2) "समुनत्तीति समुद्रस्तस्य । आदित्यो वृष्ट्या जगदार्द्रीकुर्वन् समुद्र उच्यते ।" (म०)

(3) "आदित्यो हि सर्वमुन्दतीति समुद्र उच्यते ।" (उ०)

तृतीयाध्यायः

आध्यात्मिकपदविमर्शः

आध्यात्मिकपदविमर्शः

1.5.1. अनृतम् (असत्यम्)

"इदमहमनृतात् सत्यमुपैमि ।" इत्यस्मिन् मन्त्रांशे अनृतस्य त्याग-विषयता ज्ञायते । तस्य उव्वटेन असत्यमित्येक एवार्थो दर्शितः । महीधरेण तु एतद् भिन्नश्च मनुष्यजन्मेत्यपरो र्थश्च निरूपितः ।

(1) "अनृतात् असत्यात्" (उ0)

(2) "अनृतान्मनुष्यजन्मनः ------ अनृतं मनुष्यजन्म शीघ्र-विनाशित्वात् । यथा स्वप्नगजादयो बोधमात्रेण शीघ्रं निवर्तमाना अनृता उच्यन्ते"
(म0)

(3) दयानन्देनाप्यस्य मिथ्याव्यवहार इत्यर्थो निर्दिष्टः -
"अनृतात् न विद्यते ऋतं यथार्थमाचरणं यस्मिन् तस्मान् मिथ्याभाषणात् मिथ्या-करणान् मिथ्यामानात् पृथग्भूत्वा ।"

1.5.2. सत्यम्

पदमिदं मन्त्रस्थं सत्यस्य व्रताङ्गतयोपादेयतां व्यनक्ति । तत्रोव्वटेन अस्य कश्चन विशिष्टो र्थो न दर्शितः । महीधरेण तस्य देवताशरीरमित्यर्थो प्य-स्ति दर्शितः ।

(1) "सत्यं देवताशरीरं --- । सत्यमनुष्ठीयमानकर्मरूपेण प्रत्यमिति मन्वान इदमिति विशिनष्टि । --- सत्यं देवजन्म बहुकालस्थायित्वात् । यथा जागरणगजादयः ।" (उ0)

(2) दयानन्देनास्य यथार्थवस्तुरूपो र्थो विस्तरेणास्ति दर्शितः -
"विदुषां सङ्गेन सुविचारेणात्मशुद्ध्या वा निभ्रमं सर्वहितं तत्त्वनिष्ठं सत्प्रभवं

सम्यक् परीक्ष्य निश्चीयते तत् ।"

1.20.1. प्राणः {वायुः}

अयं प्राणः शरीरस्थो वायुः । महीधरेण व्युत्पत्तिपूर्वकं तस्यार्थः श्वासवायुरिति निर्दिष्टः । एतद् विषये उव्वटेन न किमपि लिखितम् ।

{1} "प्रकर्षेण अनिति सर्वदा मुखे चेष्टत इति प्राणःश्वासवायुः ।" {म0}

{2} दयानन्देन सामान्यक्रियापेक्षया प्रयोजनरूपार्थसूचकतया स्य पदस्य व्याख्यानं विहितम् - "प्राणाय प्रकृष्टमन्यते जीव्यते येन तस्मै जीवनधारणहेतवे बलाय ।"

1.20.2. उदानः {वायुः}

एतत्पदस्य महीधरेण व्युत्पत्तिनिरूपणेन सह उत्क्रान्तिवायुरित्यर्थो निर्दिष्टः ।

{1} "उद् अनिति ऊर्ध्वं चेष्टत इत्युदानः उत्क्रान्तिवायुः ।" {म0}

{2} "उदनाय स्फूर्तिहितव ऊर्ध्वमन्यते चेष्ट्यते येन तस्मै उत्क्रमण-पराक्रमहेतवे ।" {द0}

1.20.3. व्यानः {वायुः}

महीधरेणास्य पदस्य व्युत्पत्तिरर्थश्च बहबलहेतुर्वायुरिति निर्दिष्टः ।

{1} "व्यनिति व्याप्य चेष्टते इति व्यानो व्यापको बलहेतुर्वायुः ।" {म0}

{2} "व्यानाय विविधमन्यते व्याप्यते येन तस्मै सर्वेषां शुभगुणानां कर्मविद्याङ्गानान्च व्याप्तिहेतवे ।" {दयानन्दः}

2.10.2. इन्द्रियम् (वीर्यम्)

(1) "इन्द्रियं वीर्यम् ।" (उ०)

(2) "इन्द्रियं इन्द्रस्यैश्वर्यप्राप्तेर्लिङ्गं चिह्नमिन्द्रेण परमेश्वरेण दृष्टमिन्द्रेण परमेश्वरेण सृष्टं प्रकाशितमिन्द्रेण विद्यावता जीवेन जुष्टं संप्रीत्या सेवितमिन्द्रेण परमेश्वरेण यद्दत्तं सर्वसुखज्ञानसाधकम् ।" (दया०)

2.13.1. जूतिः (मनः)

मन्त्रे प्रयुक्तं पदमिदं मनः सूचयति । अनेन मनसः शीघ्रगमनसामर्थ्यम् अवगम्यते ।

(1) "कथम्भूतं मनः । जुतिः । जवतेर्गतिकर्मणो जूतिः । अतीतानागतवर्तमानेषु कालेषु यद् गन्तृ गच्छति ।" (उ०)

(2) "अतीतानागतवर्तमानकालगतपदार्थेषु गमनशीलं हि मनः । जवते शीघ्रं गच्छतीति जूतिः ।(म०)

(3) "जूतिः वेगेन व्याप्तिकर्म ।" (दया०)

2.16.1. मित्रावरुणौ (प्राणोदानौ)

(1) "मित्रावरुणौ वां वृष्ट्यावताम् । वायुर्वै वर्षस्येष्टे चाध्यात्मम् । प्राणोदानभूतौ मित्रावरुणशब्दाभ्यामुच्येते ।" (उ०)

(2) "मित्रावरुणौ प्राणापानवायू वृष्ट्या जलवर्षणेन - - - - - वायुर्वै वर्षस्येष्टे इत्युक्तत्वाद् वर्षाधीशो वायुः । स चाध्यात्मगतः प्राणोदानरूपो मित्रावरुणशब्दाभ्यामुच्यते ।" (म०)

(3) "मित्रावरुणावेतन्नामकौ देवौ ।" (सा० 2/4/2)

(4) "मित्रावरुणौ यः सर्वप्राणो बहिःस्थो वायुर्वरुणो न्तःस्थ उदानो वायुश्च तौ ।" (दयानन्दः)

2.20.3. दिद्युः ॥वज्रम्॥

॥1॥ "दिद्युदिति वज्रनाम ।" ॥उ0॥

॥2॥ "दिद्युरिति वज्रनाम । तस्मात् शत्रुप्रयुक्तांद् वज्रमादायुधात् ।" ॥सा0 2/5/1॥

॥3॥ "दिद्योः अतिदुःखात् ।" ॥दयानन्दः॥

अत्र दयानन्देन कृतो तिदुःख इत्यर्थो नवीनः ।

2.20.4. प्रसितिः ॥जालम्॥

॥1॥ "प्रसितिः प्रसयनात्तन्तुर्वा जालं वा ।" ॥उ0॥
याहि मां बन्धनात् ।

॥2॥ "प्रसित्यै प्रसितिर्बन्धनहेतुभूताज्जालान्मां पाहि ।" ॥म0॥

॥3॥ "बन्धनहेतुज्वालाविशेषः प्रसितिः ।" ॥सा0 2/5/1, पृ0 79॥

सर्वेषां टीकाकाराणां प्रसितेः बन्धनकर्तृत्वविषये मतिसाम्ये सत्यपि विशेष्यतया उव्वटेन बन्धनम्, महीधरेण जालम्, सायणेन ज्वालाविशेष इति निर्देशात् तात्पर्यवैषम्यं प्रतीयते ।

॥4॥ "प्रसिद्ध्यै प्रकृष्टा चासौ सितिर्बन्धनं यस्यां तस्याः ।" ॥द0॥

2.20.3. परापुरः ॥स्थूलशरीराणि॥

॥1॥ "पराक्रान्ताः पुरः परापुनः शरीराणि महान्तीति ।" ॥उ0॥

॥2॥ "पराक्रान्ता पुरः परापुरः स्थूलदेहान् ।" ॥म0॥

॥3॥ "परापुरः पराक्रान्तान् देहान् स्थूलशरीराणीत्यर्थः ।" ॥सा0 2/7/2॥

॥4॥ "परापुरः परागतानि स्वसुखार्थान्यधर्मकार्याणि पिपुरति ते ।" ॥दयानन्दः॥

2.30.3. निपुरः ॥सूक्ष्मशरीराणि॥

॥1॥ "निकृष्टाः पुरो निपुरः सूक्ष्माणि शरीराणि ।" ॥उ0॥

॥2॥ "निकृष्टाः पुरः निपुरः सूक्ष्मदेहान् ।" ॥म0॥

॥3॥ "निपुरः न्यग्भूतान् देहान् सूक्ष्मशरीराणीत्यर्थः ।"॥सा0 2/7/2॥

॥4॥ "निपुरः निकृष्टान् कुटस्वभावान् पिपुरति पूरयन्ति ते ।"॥द0॥

2.33.2. पुरुषः ॥मनुष्यः॥

अत्र पितृदैवत्यस्य सन्ततिप्रार्थनाविषयस्य मन्त्रस्यान्तर्गतं पदमेतत् प्रार्थनाया हेतुरूपं पुरुषस्य देवपित्रादिऋणपूरकत्वं दर्शयतीत्युव्वटेनोक्तम् –

॥1॥ "पुरुषः पूरयिता देवपितृमनुष्याणाम् ।" ॥उ0॥

॥2॥ "पुरुषः देवपितृमनुष्याणामपेक्षितार्थस्य पूरयिता ।" ॥म0॥

3.12.2. ककुत् ॥महत्॥

॥1॥ "अयमेव ककुत् । ककुदिति महन्नामसु पठ्यते । तस्य कृता-न्तलोपस्यैतद्रूपम् । अयमेव महानात्मा जगतः कारणमित्यर्थः ।" ॥उ0॥

॥2॥ "तथा ककुत् । ककुच्छब्दो गोपृष्ठोन्नतावयववाची तद्वदादित्यरूपेण सर्वोपरिस्थत्वात् ककुत्सदृशः ।" ॥म0॥

3.30.॥क॥ शंसः ॥अनिष्टचिन्तनम्॥

॥1॥ "शंसनं शंसः अनिष्टचिन्तनम् ।" ॥उ0॥

॥2॥ "शंसन्ति स्तुवन्ति यस्मिन्सः ।" ॥य0 भा0॥

3.31. मित्रस्य ॥प्राणः॥

॥1॥ "मित्रस्य बाह्याभ्यन्तरस्थस्य प्राणस्य ।" ॥य0 भा0॥

3.48. (ऊ०) पुरूरावण: (संसार:)

(1) "रा दाने" । बहुकर्मोपभोगसन्तापान्दातुः संसारलक्षणाद बन्धात् । यद्वा रु शब्दे । रुवन्ति शब्दं कुर्वन्ति प्राणिनो ऽस्मिन् संसार्यमाणाः स पुरूरावाः तस्मात् पुरूरावणः ।" (उ०)

(2) "पुरु बहु विरुदं ददातीति पुरुरवा । तस्मात् ।" (म०)

(3) "यः पुरूणि बहूनि दुःखानि राति ददाति स पुरूरावा तस्मात् ।" (दयानन्दः)

दयानन्दस्यार्थ उव्वटकृतेनार्थेनांशतः साम्यं भजति । उव्वटेन विशेष्यतया संसार इत्यर्थो निर्दिष्टः, स दयानन्देन न कृतः ।

4.2.1. रिप्रम् (पापम्)

(1) "रिप्रं व्यक्तवाणीप्राप्तव्यं वेदितव्यम् ।" (दया०)
"व्यक्त वाणीको प्राप्त करने वा जानने योग्य ।"

(2) "विश्वं हि रिप्रं सर्वमपि पापम् ।" (सायणः)

(3) "रपो रिप्रमिति पापनामनी भवतः ।" (उ०)

प्राक्तनैराचार्यैः रिप्रशब्दस्य पापरूपो ऽर्थो निर्दिष्टः, दयानन्देन पुनः व्यक्तवाणीप्राप्तव्यमिति निर्दिष्टं तत्कल्पने मूलं तु नोक्तम् ।

4.7.1. आकूतिः (अग्निः)

(1) "आकूत्यै उत्साहाय" (दया०)

(2) "यज्ञं करिष्यामीत्येवंविधमानसः सङ्कल्प आकूतिः ।" (सा०)

सायणेन आकूतिशब्दस्य यज्ञोद्देश्यककर्मानुकूलमानससङ्कल्परूपो ऽर्थः, दयानन्देन चोत्साहरूपः कृतः इति भेदः प्रतीयमानो ऽपि वस्तुतो नास्ति । यज्ञप्रवृत्तेरुत्साहमूलकत्वात् । उत्साहस्य च मनः सङ्कल्परूपत्वात् ।

(3) "आकुचनमाकूतिः प्रयत्नः आत्मनो धर्मः । मनसः प्रेरणाय भवति ।" (उ0)

4.7.3. मेधा (बुद्धिविशेषः)

(1) "मेधायै प्रज्ञोन्नतये ।" (दया0)

(2) "श्रुतयोर्मन्त्रतन्त्रयोर्द्धारणशक्तिर्मेधा ।" (सायणः)

अत्र "मेधम" इति पदं यज्ञकर्तुरिष्टं मनसो धारणाख्यं शक्तिविशेषं सूचयति ।

4.11.1. मनोजाता देवाः (प्राणाः)

(1) "दीव्यन्ति द्योतन्त इति देवाश्चक्षुरादीन्द्रियरूपाः प्राणाः। ते च देवा मनोजाताः दर्शनश्रवणादीच्छारूपान्मनस उत्पन्नाः । तथाविधायामिच्छायामुत्पन्नायां पश्चाच्चक्षुरादीनां प्रवर्तमानत्वात् ।" (सायणः 4/5/3)

(2) "देवा विद्वांसः । मनोजाताः ये मनसा विज्ञानेन जायन्ते ते ।" (दयानन्दः)

(3) "ये मयि प्राणेषु देवा मनोजाताः मनसो जाताः । मनः पूर्वका हि तेषु प्रवृत्तिः ।" (उ0)

उव्वटकृतं दयानन्दकृतं च व्याख्यानं पदार्थं साधु नावगमयति । सायणव्याख्यानेन तु सम्यगेव इन्द्रियाणां मनोजातत्वं सूच्यत इति विशेषः ।

4.11.2. मनोयुजो देवाः (इन्द्रियरूपाः प्राणाः)

(1) "तथा मनोयुजः रूपादिदर्शनकाले पि मनसा युक्ता एव वर्तन्ते । अन्यचित्तस्य रूपादिप्रतिभासाभावात् । एतमेवार्थमभिप्रेत्य चक्षुरादिप्राणपरत्वं तित्तिरिर्व्याचष्टे ।" (सा0 4/5/3)

(2) "मनोयुजः ये मनसः सदसद्विज्ञानेन युन्जन्ति योजयन्ति वा" (दया०)

(3) "मनसा युज्यन्ते स्वप्नावस्थायामिति मनोयुजः ।" (उ०)

सायणेन इन्द्रियाणां मनः पूर्विका प्रवृत्तिरनेन सूच्यत इत्युक्तम्, उव्वटेन स्वप्नावस्थायां मनसा संयोगान्मनोयुक्त्वं निर्दिष्टम्, दयानन्देन तु सदसद्विज्ञानेन योजनादिति कथितमिति भेदः । महीधरेण सायणोव्वटमतमेवानूदितम् ।

4.11.3. दक्षक्रतवः (देवाः, इन्द्रियरूपाः प्राणाः)

(1) "ते च देवाः दक्षक्रतवः दक्षाः कुशलाः क्रतवः संकल्पा येषां चक्षुरादीनां ते दक्षक्रतवः । संकल्पितार्थकारिणः इत्यर्थः ।" (सायणः)

(2) "दक्षक्रतवः दक्षाः शरीरात्मबलानि प्रज्ञाः कर्माणि वा येषां ते । दक्ष इति बलनामसु पठितम् ।" (दया०)

(3) "क्रतुः सङ्कल्पः तस्यैव समृद्धिर्दक्षक्रतुशरीरा ।" (उ०)
"वागेवाग्निः प्राणोदाना मित्रावरुणौ चक्षुरादित्यः श्रोत्रं विश्वेदेवाः य एते अध्यात्मश्रुतौ पठ्यन्ते त इहोच्यन्ते ।" (उ०)

सायणेन महीधरेण च दक्षक्रतु शब्दस्य सङ्कल्पितार्थकारिणः इत्यर्थः व्युत्पत्तिपूर्वकं निर्दिष्टः । उव्वटेन अध्यात्मश्रुत्यनुसारमत्र देवानां निर्देशः सूचितः। दयानन्देन व्युत्पत्तिविशेषो नवीनो दर्शितः ।

4.17.2. जूः (वाक्, सोमक्रयणी)

(1) "हे सोमक्रयणि, वाग्रूपा त्वं जूरसि वेगयुक्तासि ।" (सा० 4/6/1)

(2) "जूः ज्ञानी वेगवान् वा ।" (दया०)

(3) "जूहोति जूरसि । 'जीव प्राणधारणे । अस्य क्विबन्तस्यापि द्रुप्रत्यये जूरिति भवति । या त्वं जीवनमसि । "धिया धिया ह्येतया मनुष्या

जुजूषन्ति" इति श्रुतेः । अथवा जवत इति जूः । एतं ह्याकाशमनुजवते" इति श्रुतेः"
§उ०§

सायणेनात्र वाग्रूपत्वेन कल्पितायाः सोमक्रयण्याः उद्देश्यत्वं निर्दिष्टम् । वेगवत्त्वमिति पदार्थश्च सूचितः । दयानन्देन वेगवान् वा ज्ञानवानित्यर्थौ निरूपितः । उव्वटेन जीवनधारणं वेगवद् वा इत्यर्थद्वयं सूचितम् । तेन जीवनधारणपक्षे व्युत्पत्तिः साधु दर्शिता । तत्र श्रुतिवाक्यं चोद्धृतमिति विशेषः ।

4.19.1. चित् §सोमक्रयणी, यज्ञद्रव्यम्§

§1§ "हे वाग्देवतारूपे सोमक्रयणि, त्वं चिदादिशब्दप्रतिपाद्यासि। अन्तःकरणस्य चित्तं मनो बुद्ध्य इति वृत्तयः । देहादिसङ्घातस्याचेतनत्वं व्यावर्त्य चेतनत्वं सम्पादयता वाह्यवस्तुषु वा निर्विकल्पं रूपं सामान्यज्ञानं जानयन्ती वृत्तिश्चित्तम् ।" तदेवात्र चिदित्युच्यते ।" §सायण: 4/6/3§

§2§ "चित् या विद्याव्यवहारस्य चेतयमाना वाग्विद्युद्वा ।"§द०§

सोमक्रयणीरूपां गामुद्दिश्य तत्र वाग्देवतारूपं च कल्पयित्वा तस्याः स्तुत्यर्थे पदस्यास्य मन्त्रे प्रयोगं निर्दिशन्ति सायणादयः । अत्र तस्या वाचश्चित्तरूपेण स्तुतिरित्यवगम्यते । सायणेन चिच्छब्दवाच्यतया चित्तं निश्चित्य तत्स्वरूपं प्रतिपादितम् । तद्वाक्यमेव महीधरेण किञ्चिद्वपर्यासेनोपस्थापितम् । दयानन्देन पदार्थत्वेन वाचो विद्युतश्च निर्देशः कृतो विकल्पेन, प्रमाणं तु किमपि नोपस्थापितमिति विशेषः । उव्वटस्तु मनस अनुवादिनी इत्यर्थमाह ।

4.19.2. मनः §सोमक्रयणी, वाक्, यज्ञद्रव्यम्§

§1§ "लोके यः कश्चित् पदार्थः एवं भवति वा न वेति सङ्कल्पविकल्पौ कुर्वाणा वृत्तिर्मनः ।" §सायण: 4/6/3§

§2§ "मनाः ज्ञानसाधिका ।" §दया०§

वाग्देवतारूपायाः सोमक्रयण्याः स्तुत्यर्थे पदस्यास्य प्रयोगमामनन्ति सायणादयः पूर्वाचार्याः । वस्तुतस्तु पदमिदं मननात्मकस्य मनसः परिचायकमस्ति। तस्मादत्र सायणेन मनसः परिभाषा तदनुकूला निर्दिष्टा । दयानन्देन "मनाः" इति पाठो कृम्मलदर्शितः, तस्य च ज्ञानसाधिका इत्यर्थो दर्शितः ।

4.19.3. धीः {सोमक्रयणी, वाक्, यज्ञद्रव्यम्}

{1} "भवत्येवेति निश्चयरूपा वृत्तिर्बुद्धिः । सैवात्र धीशब्देनोच्यते । सोमक्रयण्याश्चिन्मनोधीरूपत्वेन प्रशंसा क्रियते ।" "वागात्मिकां सोमक्रयणीं चिदादिशब्दवाच्या त्वमित्येवं प्रशंसतीत्यर्थः । चिदादिरूपत्वमुपचारेण सम्पाद्य प्रशंसा कृता ।" {सायण: 4/6/3}

{2} "धीः प्रज्ञा कर्मविद्याधारिका ।" {दया0}

सोमक्रयणीस्तुतिपरमेतत्पदमस्तीति पूर्वे भाष्यकारा आहुः । वस्तुतस्तु पदमेतद्बुद्धिवाचकमस्ति । तस्या बुद्धिः लक्षणं सायणेन भाष्ये निर्दिष्टम् । दयानन्देन कर्मविद्या धारिका प्रज्ञा इत्यर्थो निरूपितः । अत्र सोमक्रय्यण्या धीरूपेण स्तुतिः केन हेतुना, कमर्थमुद्दिश्य वा कृता इति केनापि भाष्यकृता नोक्तमिति विमर्श-मर्हति ।

5.14.2. वयुनावित् {ईश्वरः}

एतदीश्वरमाहात्म्यसूचकं पदमिति सायणाशयः ।

{1} "वयुनावित् सर्वज्ञ इत्यर्थः ।" {सा0 5/5/1}

{2} "वयुनाविदेक इत् । वयुनं वेतेः कान्तिर्वा प्रज्ञा वा ।" सर्वेषामेवर्त्विजां मध्ये सवित्रा प्रसूतो ब्रह्माख्यः एक एव ऋत्विक् । वयुनावित् त्रिवेदज्ञानान्वितो भैषज्यं करोति ।" {उ0}

{3} "वयुनावित् "वयुनं वेत्तेः कान्तिर्वा प्रज्ञा वा" इति यास्को-

क्तोर्वयुनं प्रज्ञां सर्वभूतानां मनोवृत्तिं वेत्तीति वयुनवित् । संहितायां दीर्घः । सर्वधीसाक्षीत्यर्थः ।" "वयुनाविदेक इत् त्रिवेदज्ञानवान् ब्रह्माख्य एक एव ।" §म0§

अत्र महीधरेण सायणाशयः साधु व्याख्यातः, उव्वटकृतो र्थश्च सूचित इति विशेषः ।

§4§ "वयुनावित् यो वयुनानि प्रशस्तानि कर्माणि वेत्ति सः । वयुनमिति प्रशस्यनामसु पठितम् ।" §द0§

पूर्वाचार्यैः वयुनावित्पदस्य सर्वज्ञः, सर्वधीसाक्षी, त्रिवेदज्ञानवान् ब्रह्मा इत्येते र्था निर्दिष्टाः । दयानन्देन तु प्रशस्तकर्मवित्तृत्वमिति निर्दिष्टम् ।

5.14.3. मनः §अन्तःकरणम्§

एतदन्तःकरणमुद्दिश्य प्रयुक्तं पदमस्ति ।

§1§ "मनो युन्जन्ति लौकिकचिन्ताभ्यो मनो निवार्य यज्ञचिन्तायां नियमयन्ति ।" §म0§

§2§ "मनः चित्तम् ।" §द0§

5.14.4. धीः §इन्द्रियाणि§

§1§ "धिय इन्द्रियाणि" §सा0 5/5/1§

महीधरेणाप्यत्र बहुवचनान्तस्य धीशब्दस्य इन्द्रियाणि इत्यर्थ एव दर्शितः।

§2§ "धियः बुद्धीः कर्माणि वा ।"

अत्र सायणेन धीशब्दस्य इन्द्रियमिति दयानन्देन बुद्धीः कर्माणि इत्यर्थौ दर्शितः । धियः एकायाः स्वीकारात्, मन्त्रे बहुवचनप्रयोगाच्च सायणेन इन्द्रियाणीत्युक्तमिति प्रतीयते । दयानन्दकृतो र्थस्तु न साधुः प्रतीयते, मूलाभावात् । अथवा इन्द्रियजन्यज्ञानस्य बुद्धिसंयोगपूर्वकत्वात् समन्वयो पि सम्भाव्यते ।

5.20.4. गिरिष्ठाः {सिंहः/इन्द्रः/आत्मा/अधिभूतः/देवता}

{1} "गिरिष्ठाः पर्वते स्थितः ।" {सा० 5/5/8}

{2} "गिरिष्ठाः पर्वतस्थानः ।" "अथ गिरिर्वेदवाक्ये तिष्ठतीति गिरिष्ठाः ।" "अथ देहो पि गिरिरुच्यते तस्मिन्नात्मत्वेन तिष्ठतीति गिरिष्ठाः ।" "गिरिष्ठाः गिरिर्मेघः तत्र इन्द्रो वृष्ट्यर्थं तिष्ठति ।" {उ०}

{3} "गिरि वेदवाण्यां गिरौ देहे वान्तर्यामिरूपेण तिष्ठतीति गिरिष्ठाः ।" "गिरिष्ठाः पर्वतस्थितः ।" {म०}

सायणकृतापेक्षया त्र उव्वटोक्तौ महीधरोक्तश्चार्थः सव्युत्पत्तिकः साधुरिति विशिष्यते ।

{4} "गिरिष्ठाः गिरौ तिष्ठतीति । क्विबन्तो यं प्रयोगः ।" {द०}

5.23.1. रक्षोहा {वाक्}

वाग्विशेषणतया प्रयोगः ।

{1} "रक्षोहणं रक्षोवधविषयाम् ।" {सा० 5/6/1}

{2} "रक्षांसि या वागपहन्ति सा रक्षोहा तां रक्षोहणम् । "ब्रह्मभ्रूणवृत्रेषु क्विप्"। धातूपपदकालप्रत्ययनियमान्न प्राप्नोतीति बहुलं छन्दसि इति क्विप्प्रत्ययः ।" {उ०}

{3} "रक्षांसि हन्तीति रक्षोहा तां रक्षोवधविषयाम् ।" {म०}

{4} "रक्षोहणं यथा येन धार्मिकेण पुरुषेण रक्षांसि हन्यन्ते तथा ।" {द०}

5.23.2. वलगहा {वाक्}

वाग्विशेषणतया पदमेतत् प्रयुक्तमिति सायणादयाः ।

{1} "सैव वाग् बलगहनमिति वैष्णवीमिति च विशिष्यते । पराजित्य पलायमानै राक्षसैरिन्द्रादिवधार्थमभिचाररूपेण भूमौ निखाता अस्थिकेशनखादिपदार्था बलगा इत्युच्यन्ते । तदाह तित्तिरिः । असुरा वै निर्यन्तो देवानां प्राणेषु बलगान्यखनन् । तान् बाहुमात्रे त्वविन्दन् । तस्माद् बाहुमात्राः खायन्त इति । तान् बलगान् हन्ति विनाशयतीति बलगहा । वाक् । सा च यज्ञरक्षकस्य विष्णोः सम्बन्धिनी तादृशीं वाचं ब्रूहि ।।" {शा० 5/6/1}

{2} "बलगान् कृत्यविशेषान् भूमौ निरवनितान् शत्रुभिर्विनाशार्थं हन्तीति वलगहावाङ् ।" {उ०}

{3} "बलगहनम् वलगान् हन्तीति बलगहा वाम् । बहुलं छन्दसि इति क्विप् । पराजयं प्राप्य पलायमानै राक्षसैरिन्द्रादिवधार्थमभिचाररूपेण भूमौ निरवाता अस्थिकेशनखादिपदार्थाः कृत्याविशेषा वलगाः ।" {म०}

{4} "यथा यो वलानि गाहते तम् । अत्र गाहूधातोर्बाहुलकात् औणादिकः क्युः प्रत्यये ह्रस्वत्वं च ।" {द०}

पूर्वाचार्यैरस्य पदस्य भूमौ राक्षसादिभिः निरवनितास्थिकेशादिनाशकत्वमित्यर्थो निर्दिष्टः । दयानन्देन बलानि गाहते इत्यर्थे प्रयोगः । सूचितः, तदनुकूला व्युत्पत्तिश्चोक्ता इति भेदः ।

5.29.3. अनुवृद्ध्यः {वाचः}

इदं वाचां विशेषणमिति भाष्यव्याख्यानादवगम्यते ।

{1} "अनुवृद्ध्यः सवनक्रमेणानुवृद्धा वाचः ।" {उ०}

{2} "अनु सवनक्रमेण वृद्धिर्यासां ताः शनैः प्रातः सवनं तत उच्चैर्माध्यन्दिनं सवनं तारस्वरेण तृतीयं सवनमिति क्रमः ।" {म०}

अत्र महीधरीयं व्याख्यानं पदार्थबोधायातिसुकरमिति विशेषः ।

{3} "अनु पश्चाद् भावे वृद्ध्यः वृध्यन्ते यास्ताः ।" {द०}

5.36.3. वयुनम् (प्रशस्यम्)

पदमिदं मार्गवाचकमिति सायणभाष्यादवगम्यते ।

(1) "वयुनानि विद्वान् सर्वान् मार्गानभिजानानः ।" (सा० 5/9/2)

(2) "वयुनानि प्रज्ञानानि प्रकृष्टज्ञानानि ।" (उ०)

(3) "वयुनानि मार्गान् ज्ञानानि वा ।" (म०)

उव्वटेनास्य पदस्य ज्ञानवाचकत्वं निर्दिष्टम्, महीधरेण मार्गस्य ज्ञानस्य वा वाचकमिति कथितम् ।

(4) "प्रशस्तानि कर्माणि प्रजाश्च । वयुनमिति प्रशस्यनामसु पठितम् । वयुनं वेतेः कान्तिर्वा प्रज्ञा वा ।" (द०)

6.20.1. ऐन्द्रः प्राणः (प्राणः)

सायणेनास्य पदस्य इन्द्रसम्बन्धी प्राणवायुरित्यर्थो निर्दिष्टः । उव्वटादिभिस्तु इन्द्रपदस्य आत्मा इत्यर्थो निर्दिष्टः, तेन सह प्राणस्य सम्बन्धश्च सूचितः।

(1) "ऐन्द्रः इन्द्रसम्बन्धी प्राणवायुः ।" (सा० 6/4/5)

(2) "इन्द्र आत्मा तस्य स्वभूतः प्राणः ऐन्द्रः प्राणः ।" (उ०)

(3) "इन्द्र आत्मा तत्सम्बन्धी प्राणः प्राणवायुः ।" (म०)

(4) "ऐन्द्रः इन्द्रो जीवो देवता स्य स ऐन्द्रः प्राणः शरीरस्थो वायुविशेषः ।" (द०)

अत्र दयानन्दस्य व्याख्यानं स्पष्टार्थम् ।

6.20.2. ऐन्द्र उदानः (उदानवायुः)

(1) "इन्द्रसम्बन्धी उदानवायुः" (सा० 6/4/5)

(2) "ऐन्द्रः इन्द्रसम्बन्धीः उदानवायुः ।" (म०)

(3) "ऐन्द्रः विद्युद्देवताकः उदानः य ऊर्ध्वमनिति ।" (द०)

6.25.2. मनः §पितरः/अन्तःकरणम्§

सायणेन पदस्यास्य पितृरूपे र्थे प्रयोगः सूचितः ।

§1§ "मनसे मनस्विभ्यः पितृभ्यः ।" §सा० 6/7/2§

§2§ "मनसे सङ्कल्पविकल्पात्मकाय ।" §म०§

सायणेन मनस्शब्दस्य मनस्विपितृरूपो र्थ एक एव निर्दिष्टः । महीधरेणान्तःकरणस्यापि निर्देशः कृतः । पूर्वार्थसङ्गतिश्च तित्तिरिवाक्योपन्यासेन दर्शितेति विशेषः । तत्रोद्धृतं तित्तिरिवाक्यं यथा -

"स वा अध्वर्युः सोममुपावहरन् सर्वाभ्यो देवताभ्य उपावहरेदिति हृदे त्वेत्याह मनुष्येभ्य एवैतेन करोति मनसे त्वेत्याह पितृभ्य एवैतेन करोति ।" इति

§3§ "मनसे सदसन्मननाय ।" §द०§

7.1.1. वाचस्पतिः §प्राणः§

§1§ "प्राणो वै वाचस्पतिः इति श्रुतिः । वाचस्पतये प्राणाय" §उ०§

§2§ "वाचस्पतये प्राणाय । यद्वा पतये पालकदेवार्थं वाचः वाचा" §म०§

§3§ "वाचः वाण्याः पतये पालकेश्वराय" §द०§

पूर्वाचार्यैः मन्त्रे स्मिन् वाचस्पतिपदस्य प्राण इत्यर्थो निर्दिष्टः, दयानन्देन ईश्वर इति भेदः ।

7.11.1. कशा §वाक्§

वाचो नामेदमिति सायणेन सूचितम् ।

§1§ "कशेति वाङ्नाम ।" §सा०§

§2§ "कशेति वाङ्नामसु पठितम् । काशयति प्रकाशयति वाङ्मयमिति कशा वाक् ।" §म०§

{3} "कशेति वाङ्नाम । सा प्रकाशयति अर्थान् ।" {उ0}

अत्र भाष्यत्रये पि वाचो नाम कशेति निर्देशः समानः । सायणेन निर्देश एव कृतः,उव्वटेन अर्थानां प्रकाशनं तत्र हेतुत्वेन निरूपितम्, महीधरेण विग्रहश्च प्रदर्शित इति विशेषः ।

{4} "कशा वाणी । करोति वाङ्नामसु पठितम् ।" {द0}

7.27.1. क्रतुदक्षौ {कामः, समृद्धिः/यज्ञफलम्}

इमौ संज्ञाविशेषौ क्रमेण कामं तत्समृद्धिं च सूचयत इति उव्वटः ।

{1} "कामः क्रतुरुच्यते । तस्य समृद्धिर्दक्षः ।" {उ0}

{2} "क्रतुः कामः दक्षस्तस्य समृद्धिः ।" {म0}

{3} "क्रतुदक्षाभ्यां प्रज्ञाबलाभ्याम् ।" {द0}

अत्र दयानन्देन क्रतुदक्षपदयोः क्रमशः प्रज्ञाबलं चेति पूर्वापेक्षया भिन्नो र्थः प्रतिपादितः ।

8.3.1. इन्द्रियम् {वीर्यम्}

एतत्पदं आदित्यस्य सवनमुद्दिश्य प्रयुक्तमस्ति । अनेन वीर्यं तस्य प्रकाश्यते ।

{1} "इन्द्रियं च वीर्यं च" {उ0}

{2} "यदिन्द्रियं वीर्यम्" {म0}

{3} "इन्द्रियं मन आदि कार्यसाधकम्" {द0}

अत्र दयानन्देन प्रसिद्ध इन्द्रियशब्दार्थो निर्दिष्टः, अन्यैस्तु तदभिन्नः आदित्यविषयकः शक्तिविशेष उक्त इति भेदः ।

8.3.2. अमृतम् {आदित्यस्य, वीर्यम्}

इदं आदित्यस्य वीर्यमुद्दिश्य प्रयुक्तं पदं वर्तते । अनेन विशेषणेन तस्य

वीर्यस्यानश्वरत्वं सूच्यते ।

{1} "अमृतम् अनश्वरं विज्ञानानन्दस्वभावम् ।" {उ0}

{2} "जगत्प्रवर्तकं अमृतमनश्वरं विज्ञानानन्दस्वभावं यदिन्द्रियं वीर्यम् ।" {म0}

{3} "अमृतम् मरणधर्मरहितम् ।" {द0}

8.4.1. वरिवोवित्तरा {सुमतिः}

इदं पदमादित्यानां सुमतिविशेषणमिति सायणेनोक्तम् ।

{1} "या सुमतिः वरिवोधनं तद् वेत्तीति तत्रातिशयेन वेत्री लब्ध्री वा वरिवोवित्तरा ।" {सा0}

{2} "वरिवोवित्तरा । वरिव इति धननाम । अतिशयेन धनस्य लब्ध्री ।" {उ0}

{3} "वरिवो धनं विन्दति लभत इति वरिवोवित् अत्यन्तं वरिवोवित् वरिवोवित्तमः ।" {म0}

महीधरभाष्ये वरिवोवित्तरा इत्यस्य विग्रहप्रसङ्गे वरिवोवित्तम-पदोपन्यासः कस्यापि प्रमादं सूचयति ।

{4} "वरिवोवित्तरा वरिवः सत्यं व्यवहारस्येत्यनया सातिशयिता।" {द0}

अत्र दयानन्देन पदस्यास्य सत्ये व्यवहारे अतिशयिता इत्यर्थो निर्दिष्ट इति भेदः ।

8.9.1. देवानां परमं गुहा {परमात्मतत्त्वम्}

इदं पदं परमात्मतत्त्वं सूचयतीति सायणभाष्यादवगम्यते ।

{1} "यद् वस्तु देवानामिन्द्रादीनां हृदये परमं गुहा अत्यन्तगोप्यम् अस्ति तदेवाहमस्मि ।" {सा० 8/6}

{2} "देवानामिन्द्रादीनां यत् परमं गुहा अत्यन्तं गोप्ये हृदये ऽस्ति तत् ।" {म०}

{3} "देवानां विदुषां परमम् अत्युत्तमम् गुहा गुह्यन्ते संव्रियन्ते सकला विद्या यया बुद्ध्या तस्याम् । अत्र सुपां सुलुगिति ङेर्लुक् ।" {द०}

<u>8.19.1. असुः {प्राणवायुः}</u>

इदं प्राणवायोः नाम वर्तते ।

{1} "असुं प्राणवातम् ।" {उ०}

{2} "असुं हिरण्यगर्भप्राणलक्षणं वायुं वायुमण्डलमित्यर्थः ।" {म०}

अत्र महीधरकृतो ऽर्थो विशिष्यते ।

{3} "असुं प्रज्ञाम्, असुरिति प्रज्ञानामसु पठितम् ।" {द०}

अत्र दयानन्दकृतः प्रज्ञारूपो ऽर्थः, पूर्वाचार्योक्तप्राणरूपार्थाद्भिद्यते ।

<u>8.33.1. वग्नुः {वाक्}</u>

इदं पदं वाग्वाचकं सायणेन निर्दिष्टम् ।

{1} "वग्नुना । वग्नुरिति वाङ्नामसु पठितम् । वाचा श्रवणीयेन अभिषवशब्देन ।" {सा० 8/9}

{2} "वग्नुरिति वाङ्नामसु पठितम् । सोमाभिषवध्वनिना ।" {उ०}

{3} "वग्नुरिति वाङ्नामसु पठितम् । वाचा श्रवणीयेन सोमाभिषव-शब्देन ।" {म०}

{4} "वग्नुना वाण्या ।" {द०}

8.36.1. प्रजापतिः {पुरुषः, परब्रह्म/यज्ञाङ्गम्, षोडशीग्रहः}

सायणेन इदं पुरुषवाचकं पदं यज्ञप्रसङ्गे षोडशीग्रहमुद्दिश्य तस्योपस्थाने प्रयुज्यत इति निर्दिष्टम् ।

{1} "प्रजापतिश्च उत्पन्नानां प्रजानां पालकः ।" {सा० 8/11}

{2} "षोडशी परब्रह्मरूपेण स्तूयते ।" {उ०}

{3} "प्रजापतिः स्वोत्पन्नप्रजापालकाः ।" {म०}

{4} "प्रजापतिः विश्वस्याध्यक्षः ।" {द०}

8.36.3. षोडशी {पुरुषः/यज्ञे षोडशीग्रहः}

सायणेन इदं पदं वस्तुतः षोडशकलात्मकस्य पुरुषस्य वाचकं यज्ञे षोडशि षोडशिग्रहमुद्दिश्य प्रयुज्यत इति निर्दिष्टम् ।

{1} "षोडशी षोडशकलात्मकलिङ्गशरीरोपहितो सौ सर्वव्यवहाराश्रयो भवतीत्येवं षोडशिग्रहरूप इति स्तूयते ।" {सा० 8/11}

{2} "परमात्मरूपेण स षोडशीग्रहः ।" {उ०}

{3} "षोडशी प्रशस्ताः षोडश कला विद्यन्ते यस्मिन्सः । ईक्षा प्राणः श्रद्धा पृथिव्यापो ग्निर्वायुराकाशमिन्द्रियाणि मनो न्नं वीर्यं तपो मन्त्रा लोको नाम चैताः कलाःप्रश्नोपनिषदि व्याख्याताः ।" {द०}

अत्र षोडशकलानां नामतो निर्देशो दयानन्दस्य व्याख्याने वर्णनं सूचयति।

9.7.1. मनः {मनः}

इन्द्रियरूपस्य मनसो वाचकमेतत् पदमस्ति ।

{1} "मन इन्द्रियम्" {म०}

{2} "मनः स्वान्तम्" {द०}

10.19.3. अहिः ॥शिरः॥

अत्र सायणेन पदमिदं शिरसो वाचकं निर्दिष्टम् ।

॥1॥ "न हीयत इत्यहिरुत्तमाङ्गम्" ॥सा० 1/6॥

॥2॥ "अहिमेव बुध्नमन्तरिक्षम्" ॥उ०॥

॥3॥ "अहिं मेघम्" ॥म०॥

अत्र भाष्यकाराणां विमतिः स्पष्टा । सायणेनोत्तमाङ्गम्, महीधरेण मेघ इत्यर्थो निर्दिष्टः । उव्वटाभिप्रायो न विशदः ।

॥4॥ "अहिं मेघम्" ॥द०॥

10.19.4. बुध्न्यः ॥पादाग्रम्॥

अत्र पदमिदं पादाग्रबोधकमिति सायणेनोक्तम् ।

॥1॥ "बुध्नस्य पादस्याग्रं बुध्न्यः ।" ॥सा० 1/6॥

॥2॥ "बुध्नमन्तरिक्षं तत्र भवो बुध्न्यो मेघस्तुं बुध्न्यं मेघं मध्यस्थानम्" ॥उ०॥

॥3॥ "बुध्नमर्न्तरिक्षं तत्र भवो बुध्न्यः अन्तरिक्षे वर्तमानम् ।" ॥म०॥

अत्र सायणेन बुध्न्यशब्दस्य पादाग्रबोधकत्वं सूचितम्, अन्यैस्तु तस्य मेघवाचकत्वं निर्दिष्टमिति भेदः ।

॥4॥ "बुध्न्यम् बुध्ने न्तरिक्षे भवम्" ॥द०॥

11.49.1. पाजसा ॥बलम्॥

इदं पदं बलवाचकमिति सायणेन निर्दिष्टम् ।

॥1॥ "पाजसा बलेन" ॥सा० 12/4॥

॥2॥ "पाज इति बलनाम ।" ॥उ०॥

11.66.1. आकूतिः §सङ्0कल्पः§

पदमिदं सङ्0कल्पविशेषस्य वाचकमिति सायणेन निर्दिष्टम् ।

§1§ "आकूतिरस्मदीयः सङ्0कल्पो नुष्ठानविषयः ।" §सा0 12/7§

§2§ "आकूतिमग्निम् । आकवरमाकूतिः । बलं वा आत्मनो धर्मो मनसः प्रेरणहेतुः । स एवाग्निः ।" §उ0§

§3§ "आकूतिरस्मदीयः सङ्0कल्पो ग्निचयनानुष्ठानविषयः ।" §म0§

महीधरेण सायणस्य अनुष्ठानविषयो ग्निचयनपदेन विशदीकृतः । उव्वटेनात्मनो धर्मविशेष इत्यर्थो स्य निर्दिष्टः ।

12.2.1. देवाः §प्राणाः§

अत्र सायणेन पदमिदं प्राणवाचकं निर्दिष्टम् ।

§1§ "दीव्यन्ति व्यवहरन्तीति देवाः प्राणाः ।" §सा0 13/1§

"अत्र देवशब्दस्य प्राणत्वं तैत्तिरीया आमनन्ति । देवा अग्निं धारयं द्रविणोदा" इति ।" §सा0 13/1§

§2§ "अग्निं धारयन् द्रविणोदा इत्याह प्राणा वै देवा द्रविणोदाः इति तैत्तिरीयश्रुतेर्देवशब्देन प्राणा उच्यन्ते ।" §म0§

12.2.2. द्रविणोदाः §प्राणाः§

इदं पदं देवपदस्य प्राणवाचकत्वेनाम्नातस्य विशेषणतया मन्त्रे पठितमस्ति। अनेन द्रविणदायकत्वं देवानां प्रकाश्यते ।

§1§ "द्रविणोदाः यागद्वारेण द्रविणं धनरूपं फलं प्रयच्छन्ति ।" §सा0 13/1§

§2§ "द्रविणोदाः यागद्वारेण द्रविणं धनरूपं फलं ददति प्रयच्छन्ति ते।" §म0§

12.15.1. वयुनानि {ज्ञानोपायः}

अत्र पदमिदं ज्ञानोपायसूचकं सायणेन निर्दिष्टम् ।

{1} "वयुनानि सर्वान् ज्ञानोपायान् ।" {सा० 13/1}

{2} "वयुनानि प्रज्ञानानि" {उ०}

12.31.1. चित्तिः {धीवृत्तयः}

सायणेन पदमिदं धीवृत्तिवाचकं निर्दिष्टम् ।

{1} "चितिभिरुद्यमानकुशलिभिर्धीवृत्तिभिः ।" {सा० 13/2}

{2} "चित्तिभिर्धैरग्निरुह्यते ।" {उ०}

{3} "चित्तिभिरुद्यमनप्रवीणाभिर्धीवृत्तिभिः ।" {म०}

12.58.1. मनः {संकल्पः}

सायणेन पदमिदं मनः सङ्कल्पवाचकं निर्दिष्टम् ।

{1} "मनांसि मनोजन्यान् सङ्कल्पात् ।" {सा० 13/4}

उव्वटेन पदस्यास्य मनोबुद्ध्यङ्कारस्यान्तःकरणवाचकत्वमुक्तम् ।

{2} "बुद्ध्यङ्कारमनांसीति बहुवचनम् ।" {उ०}

महीधरेण स एवार्थो नुसृतः ।

{3} "मनांसि बहुवचनत्वान्मनोबुद्ध्यहङ्कारान् ।" {म०}

12.58.2. चित्तम् {ज्ञानम्}

सायणेन पदमिदं ज्ञानविशेषवाचकमुक्तम् ।

{1} "चित्तानि कर्मविषयज्ञानानि" {सा० 13/4}

उव्वटेन महीधरेण च पदमिदं मनोगतसंस्कारस्य तदभिमानिनमग्निमुद्दिश्य वाचकमुक्तम् ।

§2§ "चित्तशब्देन संस्कारा मनोगता उच्यन्ते ।" §उ0§

§3§ "चित्तानि च मनोगतसंस्कारान् ।" §म0§

12.74.1. अयवोभिः §कालविशेषः§

सायणेन पदमिदं मासार्द्धमासरूपकालवाचकं निर्दिष्टम् ।

§1§ "अयवोभिरित्यनेन पदेन मासाश्चार्धमासाश्चोच्यन्ते ।"
§सा0 13/5§

§2§ उव्वटादिभिरस्य विशदो र्थो निर्दिष्टः - "अयवोभिः यवाश्च अयवाश्च अर्धमासा मासाश्चोच्यन्ते ।" §उ0§

12.75.3. त्रियुगम् §कालविशेषः§

सायणेन पदमिदं वर्षाशरद्वसन्तरूपस्य संवत्सरावयवस्य कालस्य वाचकं निर्दिष्टम् ।

§1§ "युगशब्दः कालवाची । त्रियुगं वर्षाशरद्वसन्त इति कालत्रयम्"
§सा0 13/6§

§उव्वटेन महीधरेण च स स्वार्थो न्यप्रकारेणोक्तः ।

§2§ "त्रियुगं पुरा त्रीणि युगानि समाहृतानि त्रियुगं त्रिकालमित्यर्थः"
§उ0§

12.87.1. किकीदिविः §रोगविशेषः§

सायणेन श्लेष्मजन्यस्य रोगविशेषस्य संज्ञारूपं पदमेतदत्र रोगापवारणोद्देश्यके मन्त्रे पठितमस्तीति निर्दिष्टम् ।

§1§ "श्लेष्मावरुद्धकण्ठजन्यध्वनेरनुकरणार्थो यं किकिशब्दः । किकिना ध्वनिविशेषेण दीव्यति व्यवहरतीति रोगविशेषः किकिदिविः । स च श्लेष्मजन्यः" §सा० 13/6§

§2§ उव्वटेन चाषनाम्नः पक्षिणो ध्वनिविशेषसूचकं विशेषणमेतदुक्तम् - "चाषेण पक्षिणा किकिदीविना । शब्दानुकरणमेतत् । किकि एवं यो दीव्यति तेन सह ।" §उ०§

महीधरेण पूर्वाचार्योक्त एवार्थः सविशेषं व्याख्यातः -

§3§ "किकीति शब्दानुकरणम् । किकीति शब्देन दीव्यति क्रीडतीति किकीदिविस्तेन ।" §म०§

"कफावरुद्धकण्ठोत्थध्वनेरनुकरणार्थः किकिशब्दः । किकिना कण्ठ-ध्वनिना दीव्यतीति किकीदिविः श्लेष्मरोगः ।" §म०§

12.87.2. निहाका §पीडाविशेषः§

औषधिमाहात्म्यनिरूपणप्रसङ्गे तन्नाश्यरोगस्य यक्ष्मणः सहावस्थान-स्यार्थस्य स्पष्टम् । सायणेन पदमिदं पीडाविशेषस्य वाचकं निर्दिष्टम् ।

§1§ "यया पीडया निहतो स्मि हा कष्टमिति शब्दं करोति सा निहाका" §सा० 13/6§

उव्वटेनास्य पदस्यान्यो निर्ऋतिरूपो र्थश्चोक्तः ।

§2§ "निहन्ति कायमिति निहाका निर्ऋतिः कृच्छ्रापत्तिः ।" §उ०§

§3§ "यद्वा शब्दानुकरणमेतत् । हा कष्टं निर्गतो हं कथा औषध्या एवं त्वया" §म०§

12.97.1. बलासः §रोगः§

पदमिदं रोगविशेषस्य बलनाशकस्य वाचकमस्तीति सायणेनोक्तम् ।

(1) "बलासस्य बलमस्यति क्षिपतीति बलक्षयस्तस्य" (सा० 13/6)

(2) "बलमस्यति निक्षिपतीति बलासः क्षयः ।" (उ०)

उव्वटेन महीधरेण च सायणोक्त एवार्थः प्रतिपादितः ।

12.97.2. उपचित् (रोगविशेषः)

सायणेन पदमिदं शरीरे चीयमानानां रोगाणां वाचकं निर्दिष्टम् ।

(1) "शरीरे उपचीयन्ते न्ये ये रोगास्ते उपचितः ।" (सा० 13/6)

(2) "उपचितां शरीरे ये उपचीयन्ते श्वयथुगदश्लीपदप्रभृतयः तेषां च त्वं नाशनी भवसि ।" (उ०)

(3) "उपचिन्वन्ति शरीरं वर्धयन्तीत्युपचितः क्विप् । श्वयथु-गङुश्लीपदप्रभृतयः ।" (म०)

उव्वटेन उपचययुक्तरोगाणां निर्देशेन, महीधरेण क्विप्प्रत्ययोल्लेखेन च विशेषः प्रदर्शितः ।

12.97.3. पाकारुः (क्षयरोगः)

सायणेन पदमिदं क्षयाख्यस्य रोगस्य वाचकमुक्तम् ।

(1) "पाकारोः क्षयव्याधेरपि" (सा० 13/6)

उव्वटेन पदमेतत् मुखपाकक्षतादेर्वाचकमुक्तम् ।

(2) "पाकारोः अरुः क्षतमुच्यते । मुखपाकक्षतादेर्नाशिनी त्वमसि यद्वा "रुच दीप्तौ" । अन्नपाकस्य अरुः अदीप्तिर्मन्दाग्नित्वं तस्य च त्वं नाशनी भवसि ।" (उ०)

(3) "पाको मुखपाकः अरुः क्षतमुच्यते । पाकेनारुः पाकारुः ।" "यद्वा पाको न्नपाकः तस्यारुर्व्यथा मन्दाग्नित्वम्" (म०)

13.3.5. सत् (पदार्थः)

सायणेन पदमेतज्जगति विद्यमानस्य वस्तुमात्रस्य वाचकं निर्दिष्टम् ।

(1) "सतो विद्यमानस्य घटपटादेः ।" (सा० 14/1)

उव्वटादयस्तु पदमिदं मूर्तत्वाभिप्रायमिच्छन्ति ।

(2) "सतश्च योनिः विद्यमानस्य च मूर्तस्य स्थानम् ।" (उ०)

(3) "सतो विद्मानस्य मूर्तस्य घटपटादेः ।" (म०)

13.3.6. असत् (पदार्थः)

सायणेन पदमेतदवस्तुसत्ताशून्यपदार्थवाचकं निर्दिष्टम् ।

(1) "असतश्चाविद्यमानस्य नरविषाणादेः ।" (सा०)

उव्वटादयस्तु पदस्यास्य अमूर्तद्रव्याभिप्रायत्वमामनन्ति ।

(2) "असतश्च अमूर्तस्य वायवादेः ।" (उ०)

(3) "असतो मूर्तस्य वायवादेः ।" (म०)

13.9.1. पाजः (बलम्)

पदमेतद् बलवाचकं वर्तते ।

(1) "पाजो बलम् ।" (सा० 14/1)

(2) "पाज इति बलनामसु पठितम् ।" (उ०)

13.40.2. वर्चः (कान्तिः)

सायणेन पदमिदं कान्तिवाचकं निर्दिष्टम् । सेयं कान्तिरग्निसम्बद्धा तज्ज्योतिषि वर्तमानां दीप्तिं सूचयति ।

(1) "वर्चसा हिरण्येन कान्त्या वर्चस्वान् स्वकान्तिर्वर्च इति भेदः" (सा० 14/4)

महीधरेण पदस्यास्य हिरण्यकान्त्यादिवाचकत्वमुक्तम् । वर्चो-ज्योतिषोर्भेदश्च प्रकाशितः ।

§2§ "वर्चसा हिरण्यकान्त्या" "बाह्यप्रभा ज्योतिः शरीरगत-कान्तिर्वर्च इति ज्योतिर्वर्चसोर्भेदः । यद्वा श्रोत्रमेव हिरण्यज्योतिषा ग्निरिव ज्योतिष्मदस्तु ।" §म0§

<u>13.47.4. शुक् §सन्तापः§</u>

सायणेन पदमिदं सन्तापार्थकं निर्दिष्टम् ।

§1§ "शुक् सन्तापः ।" §सा0 14/5§

उव्वटेनापि सन्ताप एव वाच्यत्वेनोक्तः । महीधरेण शोकश्चोक्तः ।

§2§ "शुक् सन्तापः ।" §उ0§

§3§ "शुक् शोकः सन्तापः ।" §म0§

<u>13.54.2. प्राणः §प्रजापतिः§</u>

सायणेन भुवः शब्दाभिधेयस्य प्रजापतेः सम्बन्धी अयमुक्तः ।

§1§ "भुवः शब्दाभिधेयस्य प्रजापतेः सम्बन्धी प्राणः ।"§सा0 14/7§

महीधरेण स्वभाष्ये प्राणस्याग्न्यपत्यत्वं, अत्र तस्य इष्टकार्थे प्रयोग-श्चोक्तः ।

§2§ "प्राणस्तस्याग्नेरपत्यमिति शेषः ।" §म0§

<u>13.54.3. वसिष्ठऋषिः §इष्टका, प्राणः§</u>

सायणेन यज्ञसाधनभूतामिष्टकामुद्दिश्य पदस्यास्य प्रयोग उक्तः ।

§1§ "यो वसिष्ठाख्यस्तद्रूपा वा सि ।" §सा0 14/7§

उव्वटाद्यैः पदमिदं प्राणवाचकं सूचितम् ।

{2} "प्राणो वै वसिष्ठऋषिः" {उ0}

महीधरेण पदव्युत्पत्तिश्च साधु दर्शिता ।

{3} "वसत्यधितिष्ठति सर्वजन्तूनिति वस्ता अतिशयेन वस्ता वसिष्ठः "तुरिष्ठेमेयस्सु" इतीष्ठनि तृचो लोपः । सर्वाधार ऋषिः ज्ञाता प्राणस्तद्रूपां सा । "प्राणो वै वसिष्ठ ऋषिर्यद्वैनु श्रेष्ठस्तेन वसिष्ठो थो यद्वस्तृतमो वसति तेनो एव वसिष्ठः । इति श्रुतेः ।" {म0}

13.55.2. मनः {मनः}

महीधरेण पदस्यास्य मनोवाचकत्वं तस्य विश्वकर्मणा सम्बन्धश्चोक्तः ।

{1} {तस्य विश्वकर्मणो पत्यं मनो त एव वैश्वकर्मणं विश्वकर्मण इदम् ।" {म0}

13.55.6. भरद्वाजऋषिः {मनः}

महीधरेण पदमिदं मनोवाचकं व्युत्पत्तिनिर्देशेन सहोक्तम् ।

{1} "भरद्वाज ऋषिः बिभर्तीति भरन् वाजमन्नं यः स भरद्वाजोन्नधर्ता मनः मनसि स्वस्थे अन्नादनेच्छोत्पत्तेः ऋषिः सचेतनो मनोरूपस्तद्रूपां सादयामि । "मनो वै भरद्वाजऋषिः अन्नं वाजो यो वै मनो बिभर्ति सो न्नं वाजं भरति तस्मान्मनो भरद्वाजऋषिः ।" इति श्रुतेः ।" {म0}

13.56.6. जमदग्निर्ऋषिः {चक्षुरिन्द्रियम्}

महीधरेण पदस्यास्य चक्षुरिन्द्रियरूपेणार्थेन सम्बन्धो निर्दिष्टः ।

{1} "जमदग्निर्ऋषिः जमति जगत् पश्यतीति जमन् । अङ्गति सर्वत्र गच्छतीत्यग्निः । ऋषति जानाति ऋषिः ईदृशं यच्चक्षुस्तद्रूपाम् । "चक्षुर्वै जमदग्निर्ऋषिर्यदनेन जगत् पश्यत्यथो मनुते तस्माच्चक्षुर्जमदग्निर्ऋषिः" इति श्रुतेः ।" {म0}

13.57.6. विश्वामित्रऋषिः {श्रोत्रेन्द्रियम्}

महीधरेण पदमिदं श्रोत्रेन्द्रियस्य वाचकं सूचितम् ।

{1} "विश्वामित्रऋषिः विश्वं सर्वं मित्रं येन "मित्रे चर्षौ" इति दीर्घः । तादृश ऋषिः श्रोत्रं श्रद्धयान्यवाक्यश्रवणात्सर्वमित्रं भवति विश्वामित्रर्षि-रूपं यत् श्रोत्रं तद्रूपाम् ।" {म0}

13.58.8. विश्वकर्माऋषिः {वाक्}

महीधरेण पदमिदं वाचो भिधायकं सूचितम् ।

{1} "विश्वं सर्वं करोतीति विश्वकर्मा ऋषिः वागेव । वाचा हि सर्वं कुरुते वागूपां त्वां सा0 । "वाग्वै विश्वकर्म ऋषिर्वाचा हीदं सर्वं कृतं तस्माद्-वाग्विश्वामित्रऋषिः" इति श्रुतेः ।" {म0}

15.4.8. सिन्धुश्छन्दः {प्राणः}

सायणादिभिः पदमिदं प्राणवाचकमुक्तम् ।

{1} "स्यन्दति नदीशरीरं व्याप्नोतीति सिन्धुः प्राणो वायुः ।"
{सा0 16/1}

{2} "प्राणो वै सिन्धुश्छन्दः ।" {उ0}

{3} "स्यन्दति नाडीभिः शरीरं व्याप्नोतीति सिन्धुः प्राण-वायुः ।" {म0}

अत्र महीधरस्य व्याख्यानं प्राणरूपे र्थे विशेषेण सङ्गतमस्ति ।

15.4.9. समुद्रश्छन्दः {मनः}

सायणादिभिः पदमिदं मनसो वाचकं निर्दिष्टम् ।

{1} "समुद्द्रवन्त्यस्माद्विकल्पजाता इति समुद्रं मनः । यद्वा

समुद्रो यथा सर्वाभिर्नदीभिः पूरितो ऽपि पर्याप्तिं न प्राप्नोति, तथा शब्दस्पर्शादिविषयैरनुभूयमानैस्तृप्तिं न प्राप्नोतीति समुद्रसाम्यात् ।" {सा० 16/1}

{2} "मनो वै समुद्रश्छन्दः" {उ०}

{3} "समुद्द्रवन्त्यस्माद्विकल्पसमूहा इति समुद्रं मनः ।" {म०}

"यद्वा समुद्रसाम्याद्गाम्भीर्येण समुद्रं मनः ।" {म०}

सायणेन मनसः समुद्रसाम्ये प्रतिपादितं विषयादिभिरतृप्तित्वं मनसो वृत्तं महीधरोक्तगाम्भीर्यरूपहेत्त्वपेक्षया विशिष्यते । मनसश्चाञ्चल्यस्य प्रसिद्धतया तत्र गाम्भीर्यस्य कल्पनं नातिरोचते ।

<u>15.4.10. सरिरं छन्दः {वाक्}</u>

सायणादिभिः पदमेतद् वाग्वाचकं निर्दिष्टम् ।

{1} "शरीराद्वदनगह्वरान्निर्गच्छतीति शरीरं वाक् ।"
{सा० 16/1}

{2} "वाग्वै सरिरं छन्दः ।" {उ०}

{3} "सरिरं सलिलं रलयोरैक्यं सरति वदनगह्वरान्निर्गच्छतीति सरिरं वाक् ।" {म०}

<u>15.4.11. ककुप् छन्दः {प्राणः}</u>

सायणादिभिः पदमिदं प्राणवाचकं निर्दिष्टम् ।

{1} "कं सुखं स्तभ्नाति शरीरे धारयतीति ककुप् प्राणः ।"
{सा० 16/1}

{2} "प्राणो वै ककुप्छन्दः" {उ०}

{3} "कं सुखं शरीरे स्कुम्भाति धारयतीति ककुप्, कं सुखं कोपयति दीपयति वा "कुप् दीप्तौ" चुरादिः क्विप् । पूर्वपक्षे सलोपश्छान्दसः । ककुप् प्राणः ।" {म०}

15.4.12. त्रिककुप् छन्दः §उदानवायुः§

§1§ "त्रेधा कं पीतमुदकं स्कुभाति पिबतीति त्रिककुप् - - - ।"

§सा० 16/1§

§2§ "उदानो वै त्रिककुप्छन्दः ।" §उ०§

§3§ "त्रेधा कं पीतमुदकं स्कुम्भातीति त्रिककुप् उदानः ।" §म०§

15.5.11. संस्तुप्छन्दः §वाक्§

महीधरेण पदमिदं वाग्वाचकं सूचितम् ।

§1§ "सम्यक् स्तुभ्यते रूध्यते वशीक्रियते ।" §म०§

15.5.12. अनुष्टुप्छन्दः §वाक्§

महीधरेण पदमिदं वाग्वाचकमुक्तम् ।

§1§ "अनु निरन्तरं स्तुभ्यते नया सा संस्तुप् अनुष्टुप् वाक् ।" §म०§

15.5.14. वयस्कृच्छन्दः §अग्निः§

महीधरेण पदमिदमग्निवाचकमुक्तम् ।

§1§ "वयांसि बाल्यादीनि करोतीति वयस्कृत् जठराग्निः । अग्निर्वै वयस्कृच्छन्दः" इति श्रुतेः ।" §म०§

15.6.2. सत्यम्

महीधरेण सत्यवच इत्यर्थो निर्दिष्टः ।

§1§ "सत्यं सत्यवचः ।" §म०§

15.9.9. अधिपतिः {ईश्वरः}

{1} "अधिपतिना अधिकं पालनेन" {सा० 16/2}

{2} "अधिकं पातीत्यधिपतिः अधिकपालकेन" {म०}

{3} "अधिपतिना ईश्वरेण" {उ०}

15.10.2. प्रथमजा ऋषयः {प्राणाः}

सायणेनास्य पदस्य प्राणरूपो नारदादिरूपश्चार्थ उक्तः ।

{1} "देवेषु मध्ये प्रथमभावेन ऋषयः प्राप्याः ।" "प्राणा वा ऋषय इति श्रुतेः । यद्वा ऋषयो नारदाद्या अत एव स्मर्यते । देवर्षिर्नारदस्तथेति ।" {सा० 16/3}

{2} "प्राणा वा ऋषयः प्रथमजाः" {म०}

15.11.5. प्रउगम् {शस्त्रम्}

महीधरेणपदमिदं शस्त्रवाचकं निर्दिष्टम् ।

{1} "प्रउगं शस्त्रम् ।" {म०}

15.51.1 वाचो मध्यम् {अर्थविशेषः}

शब्दस्यार्थ एव वाचो मध्यमिति सायणेनोक्तम् ।

{1} "अयमग्निर्वाचोमध्यमरूहत् स्तोत्ररूपाया वाचः प्रतिपाद्यमर्थमारूढः ।" {सा० 16/6}

{2} "एतद्ध वाचोमध्यं यत्रैष एतच्चीयते ।" {उ०}

{3} "वाचोमध्यं चयनस्थानमारूहत् चयनोपर्यारूढः ।" {म०}

अत्रोव्वटादेरभिप्रायो नास्ति विशदः ।

15.53.2. पितरौ (वाङ्मनसी)

पदमिदं वाङ्मनसोर्वाचकमुव्वटादयैः कथितम् ।

(1) "वाक् च मनश्च पितरा युवाना" इति श्रुतिः ।" (उ०)

(2) "पितरा वाङ्मनसे" (म०)

चतुर्थाध्यायः

प्रकीर्णपदविमर्शः

प्रकीर्णपदविमर्शः

1.26.1. द्रप्सः ‖रसविशेषः‖

"द्रप्सः द्यां आ स्कन्" इति मन्त्रांशे पठितं "द्रप्स" इति पदं पृथिव्या जीवनीयं रसं बोधयतीति उव्वटेन महीधरेण च निर्दिष्टम् । ‖तस्य द्युलोके गमनाद् वैद्युभावस्य हीनता वा अन्यत् किन्चिद् बीजमिति तत्र न निर्दिष्टम्‖।

‖1‖ "यो स्या पृथिव्या उपजीवनीयो रसः स द्रप्सः ।" ‖उ0‖

द्रप्स इत्यस्य दयानन्देन हर्षकारी रस इत्यर्थो निरूपितः ।

1.28.2. जीवदानुम् ‖पृथ्वी‖

पदमिदं पृथिव्या विशेषणत्वेन मन्त्रे त्र प्रयुक्तमस्ति । अस्यार्थश्च पृथिव्याः सारभूतभागात्मक इति भाष्यकारौ कथयतः ।

‖1‖ "जीवदानुम् जीवितस्य दात्रीम् । सारभूतामित्यर्थः" ‖उ0‖

‖2‖ "जीवदानुं जीवं ददातीति जीवदानुस्तां जीवस्य धात्रीं सारभूतां या पृथिवीम् ।" ‖म0‖

दयानन्दस्तु – "जीवदानुं या जीवेभ्यो जीवनार्थं वस्तु ददाति ताम्" इत्याह ।

2.16.4. पृषतीः ‖मरुअश्वाः‖

‖1‖ "अन्तरिक्षस्थाना मरुतः तेषामादिष्टोपयोजनं पृषत्यो गावो वाहनम् । मरुतां सम्बन्धिनीः पृषतीः ।" ‖उ0‖

‖2‖ "पृषतीर्वाहनरूपा अश्वाश्चित्रवर्णाः ।" ‖म0‖

§3§ "पृषतीं वाहनरूपामश्वां चित्रवर्णाम् ।" §सायणः§

उव्वटेन मरुतां वाहनत्वेन गोरूपो र्थः प्रदर्शितः, सायण महीधराभ्यामश्वारूपो र्थः कृत इति विशेषः ।

§4§ "पृषन्ति सिञ्चन्ति याभिर्नाडीभिर्नदीभिर्यास्ताः ।" §द0§

अत्र दयानन्दकृतौ नदीरूपो र्थो वर्तत इति वैषम्यम् ।

2.16.5. वशापृश्निः §गोविशेषः§

§1§ "वशा त्वं पृश्निर्भूत्वा दिवं गच्छ । "इयं वै वशापृश्निर्यदिदमस्यां मूलि चामूलं चान्नाद्यं प्रतिष्ठितं तेनेयं वशापृश्निः ।" §उ0§

§2§ "वशा स्वाधीना पृश्निरल्पतनुर्गौर्भूत्वा दिवं गच्छ । कामधेनुवत्तृप्तिकरी भूत्वा "स्वर्ग" गच्छेत्यर्थः ।" "यद्वा "इयं वै0" इति श्रुतेर्वशापृश्निशब्देन भूमिरुच्यते । वशापृश्निर्भूत्वा दिवं गच्छ । पृथिवीसम्बन्धिभागानादाय द्युलोकं तर्पयेत्यर्थः ।" §म0§

§3§ "वशा कामिताहुतिः । पृश्निः अन्तरिक्षस्था । पृश्निरिति साधारणनामसु पठितम् ।" §दयानन्दः§

2.32.1. रसः §वसन्तः§

§1§ "रसाय रसभूताय वसन्ताय नमः । वसन्ते हि मध्वादयो रसाः सम्भवन्ति ।" §उ0§

§2§ "यतो मध्वादयो रसा वृक्षेषु जायन्ते तो रसशब्देन वसन्तः ।" §म0§

§3§ "रसाय भवत्प्रसादलब्धाय पयोघृतादिरूपाय ।" §सा0 2/7/4§

§4§ "रसाय रसभूताय विज्ञानानन्दप्रापणाय ।" §दयानन्दः§

2.32.2. शोष: (ग्रीष्म:)

(1) "शोषाय शोषप्रभावाय ग्रीष्माय नमः । शुष्यन्ति हि ग्रीष्मे ओषधयः ।" (उ0)

(2) "शुष्यन्त्योषधयो यत्रेति शोषो ग्रीष्मः ।" (म0)

(3) "शोषाय दुःखानां शत्रूणां वा निवारणाय ।" (दया0)

2.32.3. जीव: (वर्षाऋतु:)

(1) "जीवाय जीवनहेतुभूताय वर्षाभ्यो नमः ।" (उ0)

(2) "जीवाय जीवनहेतुभूताय जलाय वर्षतवे ।" (म0)

(3) "यज्जीवमस्मदीयजीवनं भवद्भिरनुगृहीतमस्ति तस्मै जीवनाय" (सा0 2/7/4)

(4) "जीवाय जीवति प्राणं धारयति प्राणधारणेन समर्थो भवति यस्मिन्नायुषि तस्मै ।" (दया0)

2.32.4. स्वधा (शरद)

(1) "स्वधायै" स्वाहा वै शरत् स्वधा वै पितृणामन्नम् ।" (उ0)

(2) "स्वधायै शरदे । "स्वधा वै शरत् स्वधा वै पितृणामन्नम्" इति श्रुतेः ।" (म0)

अत्र भाष्यकर्त्रोरुद्धरणे एकत्र "स्वाहा वै शरत्" अन्यत्र स्वधा वै शरत्" इति पाठदर्शनाद्वैषम्यं स्पष्टम् ।

(3) "स्वधायै भवदीयान्नाय ।" (सायण: 2/7/4)

(4) "स्वधायै अन्नाय पृथिवीराज्याय न्यायप्रकाशाय वा, स्वधेत्यन्ननामसु पठितम् ।" (दयानन्दः)

2.32.5. घोरः (हेमन्तर्तुः)

(1) "घोराय विषमाय । विषमो हि हेमन्तः प्राणिनां शीतप्रचुरत्वात् ।" (उ०)

(2) "घोराय विषमाय हेमन्ताय । हेमन्तः शीतप्रचुरत्वेन दुःखदत्वात् घोरः ।" (म०)

2.32.6. मन्युः (शिशिरर्तुः)

(1) "मन्युः क्रोधः । क्रोध इव हि शिशिर ओषधीर्दहति ।" (उ०)

(2) "मन्युः क्रोधस्तद्रूपाय शिशिराय । शिशिरस्तु सर्वौषधीर्दहति" (म०)

3.5.1. भूः, भुवः, स्वः (लोकाः)

(1) "भूर्भुवः स्वः । महाव्याहृतयः । प्रजापतेरार्षम् । गार्हपत्याहवनीययोराधानमन्त्राः । पृथिव्यन्तरिक्षद्युलोकाः अभिधेयाः, ब्रह्मक्षत्रविशो वा वर्णाः, अन्नप्रजापशवो वा ।" (उ०)

(2) "भूरिति प्रथमा व्याहृतिः । भुव इति द्वितीया । स्वः इति तृतीया । एतास्तिस्रो महाव्याहृतयः पृथिव्यादिलोकत्रयनामानि । एतदुच्चारणपूर्वकं प्रजापतिना लोकत्रयस्य सृष्टत्वात् ।"

3.6. माता (पृथिवी)

यदमेतत् पृथिव्या मातृवदग्नेः धारणं सूचयति । अतः पृथिव्यर्थे अस्यात्र प्रयोगः ।

(1) "मातरं पृथिवीम् ।" (उ०)

~~नैमित्त~~

3.6. पिता (द्यौः)

एतदत्र द्युलोकवाचकमस्ति ।

(1) "पितरं द्युलोकम्" (उ0)

3.6.1. स्वः (सूर्यः)

एतत् पदं सूर्यस्य वाचकमिति उव्वटादयः ।

(1) "स्वः स्वर्गे आदित्यः ।"

(2) "स्वः शब्देन सूर्यः ।"

3.7. रोचना (शक्तिविशेषः)

अग्नेः शक्तिविशेषस्यायं शब्दः सूचक इत्युव्वटो महीधरश्चैता सूचयतः ।

(1) "आदित्यरूपेणाग्निं स्तुत्वा अथेदानीं वायुरूपेण स्तौति । अन्तश्चरति रोचना स्य । द्यावापृथिव्योरन्तरं चरति अग्नेर्वायुवाख्या शक्तिः । - - - - - रोचना । "रुच दीप्तौ" । दीपना अस्य अग्नेः ।" (उ0)

(2) "अस्याग्ने रोचना । रुच दीप्तौ । दीप्तिः काचिच्छक्तिः वायुवाख्या । अन्तश्चरति द्यावापृथिव्योर्मध्ये शरीरमध्ये चरति ।" (म0)

3.10.2. उषा (सूर्यप्रभा)

(1) "उषसाशब्देन सूर्यप्रभोच्यते ।"

3.10.1. इन्द्रवती (रात्रिः)

(1) "इन्द्रवत्या इन्द्रसंयुक्तया" (उ0)

3.8.3. वस्तोः (अहः)

(1) "प्रतिवस्तोः प्रत्यहम्" (उ०)

3.8.4. द्युः (अहः, कालविशेषः)

(1) "वस्तोः द्युः भानुः इत्यहर्नामसु पठितम् । --- -- द्युभिः अहोभिरुत्सवभूतैः । उत्सवाः यागपारायणादयः ।" (उ०)

(2) "द्युभिः अहोभिः यागपारायणाद्युत्सवभूतैः ।" (म०)

3.8.1. त्रिंशद्धाम (अहोरात्रम्, यज्ञवेला)

एतत्पदं कालवाचकमस्तीत्युव्वटः ।

(1) "त्रिंशत्सु धामस्विति विभक्तिव्यत्ययः । "धामानि त्रयाणि भवन्ति – स्थानानि नामानि जन्मानि" इति स्थानान्यत्राभिप्रेतानि । त्रिंशच्चाहोरात्रे मुहूर्तास्त इह गृह्यन्ते । त्रिंशत्सु स्थानेषु मुहूर्ताख्येषु स्तुतिभिरग्निरयं स्तूयते ।" (उ०)

(2) "अत्र धामशब्देन स्थानमुच्यते । अहोरात्रस्य त्रिंशन्मुहूर्ता धामशब्देनाभिप्रेताः ।" (म०)

3.12. अपां रेतांसि (जलगतं तत्त्वम्)

(1) "या एता द्युलोकात् पतन्ति तासामपां रेतांसि ।" (उ०)

(2) "अयमग्निः अपां रेतांसि जिन्वति द्युलोकाद् वृष्टिरूपेण पतन्तीनामपां रेतांसि साराणि व्रीहियवादिरूपेण परिणतानि जिन्वति । -- --- यद्वा अपां रेतांसि कारणानि जिन्वति पुष्णाति ।" (म०)

3.18.(घ) चित्रावसो (रात्रिः)

(1) "चित्रावसो रात्रिरुच्यते । "रात्रिर्वै चित्रावसुः सा हीयं

असंगृह्येव चित्राणि वसति" इति श्रुतिः ।" §उ0§

§2§ "चित्राणि विविधानि चन्द्रनक्षत्रान्धकाररूपाणि वसन्ति यस्यां रात्रौ सा चित्रावसुः ।" §म0§

§3§ "चित्रमद्भुतं वसु धनं विद्यते यस्मिंस्तत्सम्बुद्धावीश्वर । चित्राणि वसूनि धनानि यस्माद्वा स भौतिकः ।" §य0 भा0§

3.21.§घ§ क्षये §गृहम्§

§1§ "अस्मिन् क्षये निवासे रमध्वम् । "क्षयो निवासे इत्याद्युदात्तः क्षयशब्दः ।" §उ0§

§2§ "अस्मिन्क्षये यजमानगृहे रमध्वम् । - - - - - क्षयशब्दो निवासवाची ।" §म0§

3.23.§ख§ दमे §गृहम्§

§1§ "स्वे दमे स्वकीये यज्ञगृहे । दम इति गृहनाम । दाम्यन्ति हि गृहस्थाः ।" §उ0§

§2§ "दाम्यन्ति गृहस्था यत्रेति दमो गृहम् ।" §म0§

§3§ "दाम्यन्त्युपशाम्यन्ति यस्मिन् तस्मिन् स्वस्थाने परमोत्कृष्टे प्राप्तुमर्हे पदे ।" §य0 भा0§

3.31.§क§ अवः §पालनम्§

§1§ "अवनमवः पालनं भवतु ।" §उ0§

§2§ "अवः रक्षणादिकम् ।" §य0 भा0§

3.31.§ख§ द्युक्षम् §स्थानविशेषः§

§1§ "द्युतिमन्ति द्रव्याणि यस्मिन् पालने क्षियन्ति निवसन्ति

तत् द्युक्षम् ।" ‖उ०‖

‖2‖ "द्युमन्ति सुवर्णादिद्रव्याणि क्षियन्ति निवसन्ति यस्मिन् पालने तथाविधम् ।" ‖म०‖

‖3‖ "द्यौर्नीतिः प्रकाशः क्षियति निवसति यस्मिन् तत् ।"
‖य० भा०‖

3.31. ‖ग‖ दुराधर्षम् ‖रक्षणम्‖

‖1‖ "दुराधर्षमित्यवनविशेषणम् । दुराधर्षम् । ननो र्थे दुरुपसर्गः। अनाधर्षं अशक्यमाधर्षयितुमन्यैः ।" ‖उ०‖

‖2‖ "दुराधर्षं तिरस्कर्तुमशक्यम् ।" ‖म०‖

‖3‖ "दुराधर्षम् । दुःखेनाधर्षितुं योग्यं दृढम् ।" ‖य० भा०‖

3.31. अर्यम्णः ‖देवविशेषः‖

‖1‖ "य ऋच्छति नियच्छत्याकर्षणेन पृथिव्यादीन् स सूर्यलोकस्तस्य"
‖य० भा०‖

3.31. वरुणस्य ‖देवविशेष आदित्यसम्बन्धी‖

‖1‖ "वरुणस्य वायोर्जलस्य वा ।" ‖य० भा०‖

3.32. ‖क‖ अमा ‖गृहम्‖

‖1‖ "अमाशब्दो गृहवचनः ।" ‖उ०‖

‖2‖ "अमाशब्दो गृहनामसु पठितः ।" ‖म०‖

3.32. ‖ख‖ वारणेषु ‖पन्थानः‖

‖1‖ "यत्रावस्थिताश्चौराः पथिमान् वारयन्ति ते वारणाः पन्थानः"
‖उ०‖

§2§ "चोरव्याघ्रादयो यत्र स्थिता निवारयन्ति पथिकान् ते वारणाः तेषु चोरव्याघ्रभयादयेषु अध्वसु" §म0§

3.38.§ग§ द्युम्नम् §यशः, अन्नम्§

§1§ "अभिद्युम्नम् । द्युम्नं द्योततेर्यशो वा अन्नं वा ।" §उ0§

3.43.§क§ कीलालः §रसविशेषः§

§1§ "कीलालशब्दो रसवचनः । पटुरसमिदमन्नमभ्यनुज्ञायते ।" §उ0§

§2§ "अन्नस्य कीलालः अन्नस्य रसविशेषः ।" §म0§

अत्र उव्वटेन कीलालस्य पटुरसमन्नमित्यर्थः सूचितः । महीधरेण रस-विशेष इत्येवोक्तम् ।

4.25.1. ओण्योः §द्यावापृथिव्यो§

§1§ "ओण्याः द्यावापृथिव्योरन्तरा वर्तमानम् ।" §उ0§

§2§ "ओण्योः द्यावापृथिव्योरन्तरा वर्तमानमिति शेषः । ओण्योरिति द्यावापृथिवीनामसु पठितम् ।" §म0§

अत्रोभयोः पदार्थनिरूपणं समानम् ।

§3§ "ओण्योः द्यावापृथिव्योः ।" §द0§

4.25.2. अमतिः भा §सवितृप्रभा§

§1§ "यस्य सवितुः ऊर्ध्वा गमनाभिमुखी अमतिः आत्ममयीमतिः अनन्यभूता । कतरा भा दीप्तिः ।" §उ0§

§2§ "यस्य सवितुर्भा दीप्तिः अमतिः केनापि मातुमशक्या ।" "यस्यामतिरात्ममयी भा ऊर्ध्वा गगने सर्वमदिद्युतत् । अमाशब्द आत्मवचनः । आत्ममयी ततिर्मतिर्वा अमतिः । [redacted] तन्यत इति ततिः दीप्तिः । मतिरपि

प्रकाशरूपत्वाद्दीप्तिः । अमाततिशब्दस्य अमतिभावः । सवितृभा विशेषणम् । आत्मप्रकाशमयी दीप्तिर्मतिर्वा यस्य भाः अदिद्युतत् ।"

अत्र महीधरेण शब्दस्य विशेषेण व्युत्पत्तिरर्थश्च विमृष्टौ इति विशेषः।

§3§ "अमतिः रूपम् । अमतिरिति रूपनामसु पठितम् । भाः यो भाति प्रकाशते सः ।" §दया0§

5.9.3. द्वितीया पृथिवी §अन्तरिक्षम्§

अन्तरिक्षार्थे पदस्यास्य प्रयोग इति सायणः ।

§1§ "यद्यपि पृथिवीशब्दस्य प्रकृतत्वाद् द्वितीयतृतीयशब्दयो-र्विशेष्यत्वेन स एवानुवर्तते तथाप्यौचित्याद् द्वितीया पृथिव्यन्तरिक्षं तृतीया-पृथिवी द्यौरित्यवगन्तव्यम् ।" §सा0 5/3/2§

§2§ "यो द्वितीयस्यां पृथिव्यामसि । पृथिवीशब्देनान्तरिक्षलोक उक्तः ।" §उ0§

§3§ "यद्यपि पृथिवीशब्देन भूमिरेव तथापि द्वितीयस्यामिति तृतीयस्यामिति विशेषणत्वाद् द्वितीया पृथिव्यन्तरिक्षम् ।" §म0§

§4§ "द्वितीयस्यां अस्यां भिन्नायाम् । पृथिव्याम् विस्तृतायां भूमौ ।" §द0§

5.9.4. तृतीया पृथिवी §द्यौः§

§1§ "तृतीयस्यां पृथिव्यामसि । पृथिवीशब्देन द्युलोक उक्तः ।" §उ0§

§2§ "तृतीया पृथिवी द्यौः ।" §म0§

उव्वटमहीधरयोरपि द्युलोकार्थे तृतीया पृथिवीति पदस्य प्रयोग इति निर्देशः समानः ।

{3} "तृतीयस्यां तृतीयकक्षायां वर्तमानायाम् । पृथिव्यां भूमौ ।" {द0}

5.16.1. इरावती {द्यावापृथिवी}

{1} "इरावती अन्नवत्यौ ।" {सा0 5/5/3}

{2} "द्यावापृथिवी इरावती सस्यवत्यौ ।" {उ0}

{3} "इरावती इरावत्यौ अन्नवत्यौ सस्यवत्यौ ।" {म0}

{4} "इरावती इरा: प्रशस्तान्यन्नानि विद्यन्ते यस्यां सा अत्र प्रशंसार्थे मतुप् । इरेत्यन्न नामसु पठितम् ।" {द0}

दयानन्देन विग्रह: प्रत्ययनिर्देशश्च कृत इति विशेष: । अर्थस्तु सर्वेषां समान: ।

5.16.2. धेनुमती {द्यावापृथिवी}

द्यावापृथिव्यो विशेषणम् ।

{1} "धेनुमती हि बहुधेनुयुक्ते च ।" {सा0 5/5/3}

{2} "धेनुमती धेन्वादिभि: पशुभि: तद्वत्यौ ।" {उ0}

{3} "धेनुमती बहुधेनुयुक्ते ।" {म0}

{4} "धेनुमती प्रशस्ता बहवो वाच: प्रशवो वा सन्त्यस्यां सा । अत्र प्रशंसार्थे भूम्यर्थे च मतुप् ।" {द0}

अत्रापि सविग्रहप्रत्ययप्रदर्शनं दयानन्दस्याधिकम् ।

5.16.3. सुयवसिनी {द्यावापृथिव्यौ}

{1} "शोभनैर्यवसैरभ्यवहार्येर्युक्ते ।" {सा0 5/5/3}

{2} "सुयवसिनी शोभनयवसवत्यौ सुसस्यवत्यौ ।" {उ0}

{3} "सुयवसिनी सुष्ठु यवसानि विद्यन्ते ययोस्ते सुयवसिनी । यवसशब्देनात्राभ्यवहार्याणि वस्तूनि ।" {म0}

महीधरेण पदव्युत्पत्तिः पदार्थसहिता साधु निर्दिष्टा इति विशेषः ।

{5} "सुपवसिनी बहूनि शोभनानि मिश्रितान्यमिश्रितानि वस्तूनि विद्यन्ते यस्यां सा ।" {द०}

पूर्वाचार्यैः पदस्यास्य शोभनाभ्यवहार्यसस्यवत्त्वमित्यर्थो निर्दिष्टः । दयानन्देन मिश्रितामिश्रितशोभनवस्तुसम्पन्नत्वमिति निर्दिष्टम् । मन्त्रे पूर्व इरावतीशब्दस्य अन्नवत्त्वार्थदर्शनात् पुनरुक्तिं मन्यता दयानन्देनेत्थमर्थः कृत इत्यनुमीयते ।

<u>5.16.4. मनवे दशस्या {द्यावापृथिवी}</u>

{1} "दशस्या यज्ञसाधनानां दात्र्यौ ।" {सा० 5/5/3}

{2} "मनवे यजमानाय । दशस्या दात्र्यौ यज्ञसाधनानाम् ।" {उ०}

{3} "मनुते जानातीति मनुर्ज्ञानवान् यजमानः तस्मै दशस्या दात्र्यौ यज्ञसाधनानाम् । दाशृ दाने" दाशतस्ते दशस्या । असुन्प्रत्यये उपधाह्रस्वः औविभक्तेयादेशश्च ।" {म०}

महीधरेण पदार्थः साधु दर्शितः । सहैव मनुशब्दस्य व्युत्पत्तिः, दशस्या इत्यस्य पदस्य प्रकृतिप्रत्ययनिर्देशश्च साधु निरूपितः ।

{4} "मनवे मन्यते येन ज्ञानेन तस्मै बोधाय, दशस्या दश इवाचरति तस्मिन् । अत्र बाहुलकादसुन् स च कित् तत् आचारे क्यच्च ।" {द०}

पूर्वाचार्यैः "मनवे दशस्या" इति पदसमुच्चयस्यैको र्थो यज्ञसाधनदातृरूपो निर्दिष्टः, दयानन्देन "मनवे" इत्यस्यैकः, "दशस्या" इत्यस्यान्य इति पृथगर्थद्वयं निर्दिष्टम् ।

महीधरेण निर्दिष्टः प्रकृतिप्रत्ययनिर्देशः पूर्णः, दयानन्दस्य प्रकृत्यनिर्देशादपूर्ण इति विशेषः ।

5.18.1. पार्थिवानि रजांसि [परमाणवः]

[1] "पार्थिवानि रजांसि परमाणून् ।" [सा० 5/5/6]

[2] "यो विष्णुः पार्थिवानि विममे पृथिव्यन्तरिक्षद्युलोकानि निर्मितवान् । रजांसि । "लोका रजांस्युच्यन्ते" इति रजःशब्दो लोकवचनः ।"
[उ०]

[3] "यो विष्णुः पार्थिवानि रजांसि पृथिव्यन्तरिक्षद्युलोकस्थानानि विममे निममे । "लोका रजांस्युच्यन्ते ।" इति यास्कोक्तेः रजःशब्दो लोकवाचकः । यद्वा यः पार्थिवानि पार्थिवपरमाणून् विममे परिगणितवान् ।" [म०]

अत्र सायणेन परमाणुरूपो ऽर्थः, उव्वटेन लोकत्रयरूपो ऽर्थो निर्दिष्टः। सायणपक्षे यः विष्णुः परमाणूनपि जानाति स सर्वज्ञ इति भावो व्यज्यते ।उव्वटपक्षे विष्णोः सृष्टिशक्तिः सूच्यते । "लोका रजांस्युच्यन्ते" इति वाक्यमुव्वटेन महीधरेण च निर्दिष्टम् । तत्रैषा यास्कोक्तिरिति महीधरेणैवोक्तमिति विशेषः ।

[4] "पार्थिवानि पृथिव्या विकारा अन्तरिक्षे विदितानि वा । अत्र तत्र विदित इति च अनेनाण्प्रत्ययः ।" [द०]

"रजांसि लोकान्" लोका रजांस्युच्यन्ते ।" [द०]

अत्र दयानन्देन पार्थिवानि" इत्यस्य पृथिव्यः विकारा इति, "रजांसि" इत्यस्य लोकान् इत्यर्थो निर्दिष्टः, तयोः पदयोः सम्बन्धस्तु न ~~लिखितः~~ लिखितः सूत्रप्रत्ययनिर्देशास्तस्य विशेषमावहति ।

5.20.1. मृगः [सिंहः]

[1] "मृगो न सिंह इव" [सा० 5/5/8]

[2] "मृगः सिंहः ।" [उ०]

"यद्वा हीनोपमानत्वादन्यथा व्याख्यायते । तैरेतैर्मृगादिभिः इन्द्रो विशिष्यते । स हि विष्णोस्समानं भवितुमर्हति । मृगो न । "मृजूष् शुद्धौ" यथा शुद्धोपहतपाप्मा इन्द्रः ।" [उ0]

[3] "मृजूष् शुद्धौ । मार्ष्टि शोधयतीति मृगः ।" [म0]

उव्वटेन सायणोक्तस्य सिंहरूपपदार्थस्य निर्देशानन्तरं तस्य हीनोपमानत्वं चाशङ्क्य इन्द्रविशेषणतया प्रयोगो "मृजूष्" इति शब्दप्रकृतिश्चोक्तः, तस्यार्थश्चापहतपाप्मा इति निरूपितः । महीधरेण तु विग्रहः प्रदर्शित इति विशेषः ।

[4] "मृगः यो मार्ष्ट्यन्विच्छति वधाय जीवानिति, ईश्वरपक्षे तु मार्ष्टि व्यवस्थापनाय जीवानिति ।" [द0]

दयानन्देन सिंहरूपपशुपक्षे ईश्वरपक्षे च पदस्य विग्रहः साधु दर्शित इति विशेषः ।

5.20.1. भीमः [सिंहः]

[1] "बिभेत्यस्मादिति भीमो भयङ्करः ।" [सा0 5/5/8]

[2] "बिभेत्यस्मादिति भीमः ।" "भीमो भीषणः ।" [उ0]

महीधरव्याख्यानमेतयोः समानम् ।

[3] "भीमः बिभ्यति जीवा अस्मादिति व्याघ्रः, भीमादयो पादान इति निपातनात् ।" [द0]

अत्र व्युत्पत्तिसाम्ये पि निपातस्य दर्शनम् विशिष्टम् । सिंहप्रसङ्गे व्याघ्रकीर्तनं विचित्रम् ।

5.20.3. कुचरः [सिंहः]

[1] "कुचरः कुत्सितप्राणिभक्षकः ।" [सा0 5/5/8]

{2} "कुचरः कुत्सितचारी प्राणिवधभोजनः ।" {उ०}

"कुचरः ववार्यं चरतीति कुचरः । कुशब्दस्य संप्रासरणं छान्दसम् ।" "कौ पृथिव्यां चरतीति कुचरः मत्स्यकूर्मादिरूपेण ।" {उ०}

{3} "कुचरः कौ पृथिव्यां मत्स्यादिरूपेण चरतीति कुचरः ।" {म०}

"कुचरः कुत्सितचरी प्राणिवधजीवरः ।" {म०}

सायणेन पदस्यास्य कुत्सितप्राणिभक्षक इति तात्पर्यमेकमेव निर्दिष्टम् । उव्वटेनार्थत्रयं यद्यपि निर्दिष्टम्, तथापि द्वितीयो र्थः स्पष्टं न प्रतीयते ।

{4} "कुचरः यः कुत्सितं प्राणिवधं चरति ।" {द०}

<u>6.5.3. चक्षुः</u>}

सायणभाष्ये पदस्यास्य वाच्यं स्पष्टतया नावगम्यते, तद्देश्यानुल्लेखात्।

{1} "चक्षुः आदित्यमण्डलम् । "चक्षुःशब्देनान्यत्रापि मण्डलमुच्यते "चक्षुर्मित्रस्य वरुणस्याग्नेः ।" "तच्चक्षुर्देवहितम्" इति च । {उ०}

{2} "चक्षुः चष्टे नेन तत्" {द०}

<u>6.25.1. हृत् {मनुष्याः}</u>

सायणेनास्य पदस्य मनुष्यवाचकत्वं निर्दिष्टम् ।

{1} "हृदे हृदयवद्भ्यो मनुष्येभ्यः ।" {सा० 6x7/2}

{2} "बुद्ध्यै निश्चयात्मिकायै कामाय एतन्मम स्यादिति ।" {उ०}

{3} "हृदे बुद्ध्यै निश्चयात्मिकायै एतन्मम स्यादिति कामरूपायै ।"

अत्र सायणेन हृदयवद्भ्यो मनुष्येभ्य इति, उव्वटेन बुद्ध्यै इत्यर्थो हृच्छब्दा निर्दिष्टः । तत्र वचनसादृश्यात् बुद्ध्यै इत्यर्थः साधुः प्रतीयते । महीधरेण उभावेवार्थौ संगृहीतौ । तेन मनुष्यस्यार्थसङ्गत्यै तित्तिरिवाक्यमप्युद्धृतमिति तस्य विशेषः ।

{4} "हृदे हृत्सुखाय" {द०}

6.27.2. इन्द्रियावान् {इन्द्रियवर्धकर्म}

अनेन अपां सारस्य इन्द्रियबलवर्द्धनरूपं कर्म सूच्यते । मन्त्रे अपामूर्मि-विशेषस्य विशेषणत्वेन पदमिदं प्रयुक्तमस्ति ।

{1} "इन्द्रियावान् पीतः सन्निन्द्रियवृद्धिकारी ।" {सा०}

{2} "इन्द्रियशब्देन वीर्यमभिधीयते । इन्द्रियावान् वीर्यवान् । छान्दसं दीर्घत्वम् ।" {उ०}

{3} "इन्द्रियं वीर्यमस्यास्तीति इन्द्रियावान् । दीर्घश्छान्दसः । प्रीतः सन्निन्द्रियवीर्यवृद्धिकारी ।" {म०}

{4} "इन्द्रियावान् प्रशस्तानीन्द्रियाणि यस्मिन् सः ।" {द०}

दयानन्देन पदमेतत् प्रजानां वैशिष्ट्यसूचकमिति कथितम् ।

7.12.5. शण्डः {शुक्रपुत्रः}

इदं शुक्रपुत्रस्य नामेति सायणेन भाष्ये निर्दिष्टम् ।

{1} "शुक्रपुत्राय षण्डनामकाय ।" {सा० 7/6/1}

{2} "शण्डो सुरः ।" {उ०}

{3} "शण्डनामको सुरपुरोहितः शुक्रपुत्रः ।" {म०}

अत्र सायणेन शण्डस्य शुक्रपुत्रत्वमेवोक्तम्, उव्वटेन असुरत्वं निर्दिष्टम्, महीधरेण असुरपुरोहितत्वं शुक्रपुत्रत्वं चाभिहितम् ।

{4} "शण्डः शमान्वितः ।" {द०}

दयानन्देन शमान्वित इत्यर्थो स्य पदस्य निर्दिष्टः । तत्र मूलं न किमप्युक्तम् ।

7.16.2. पृश्निगर्भाः [आपः]

सायणेन आप उद्दिश्य पदस्यास्य प्रयोगो निर्दिष्टः ।

[1] "पृश्निरादित्यस्तस्य गर्भभूता आपः । तथा चान्यत्र प्रश्नोत्तराभ्यामयमर्थः श्रूयते । क्वेमा आपो अनिमिषन्तो यदितो यान्ति सम्प्रीति प्रश्नः । आपः सूर्ये समाहिता अभ्राण्यपः प्रपद्यन्त इत्युत्तरम् ।" [सा० 7/7/1]

[2] "पृश्निगर्भाः द्युलोकः पृश्निरादित्यो वा । साधारणत्वाद द्युलोकगर्भा वा आदित्यगर्भा वा आपः ।" [उ०]

[3] "पृश्निरादित्यो द्युलोको वा गर्भो वस्थानं यासां ताः द्युलोकस्था रविस्था वा अपः ।" [म०]

अत्र सायणेन आदित्य एव पृश्निशब्दवाच्यतया निर्दिष्टः, उव्वटादिभिस्तु द्युलोकश्च विकल्पेनोक्त इति विशेषः । श्रुतिवाक्यप्रामाण्यनिर्देशी सायणः, पदविग्रहनिर्देशी ~~म~~महीधरे विशिष्यते ।

[4] "पृश्निगर्भाः पृश्निरन्तरिक्षं गर्भो येषां ते पृश्निगर्भाः ।"
[द०]

दयानन्दकृतो त्र पृश्निशब्दस्यान्तरिक्षम् इत्यर्थः पूर्वाचार्यापेक्षया भिन्नः।

7.16.4. रजसो विमानः [जलनिर्माणस्थानम्/ग्रीष्मान्तः]

[1] "रजसो विमाने रजस उदकस्य विमाने निर्माणस्थाने अन्तरिक्षे अवस्थितः ।" [सा० 7/7/1]

[2] "रजसो विमाने । उदकं रज उच्यते । उदकस्य विनिर्माणकाले प्राप्ते ग्रीष्मान्ते ।" [उ०]

सायणेन उदकस्य निर्माणस्थानमन्तरिक्षं पदार्थतया निर्दिष्टम्, उव्वटेन महीधरेण च उदकनिर्माणकालो ग्रीष्मान्तो निर्दिष्ट इति विशेषः ।

§3§ "रजसः लोकसमूहस्य विमाने विगतं मानं परिमाणं यस्यान्त-
रिक्षस्य तस्मिन् ।" §द०§

अत्र दयानन्दस्यार्थः सायणेन साम्यं भजति ।

7.16.5. मर्कः §शुक्रपुत्रः/देवता§

इदं शुक्रपुत्रस्य नामेति सायणेन निर्दिष्टम् ।

§1§ "मर्कः शुक्रपुत्रो सुरपुरोहितः ।" §सा० 7/7/1§

§2§ "मर्को सुरः ।" §उ०§

§3§ "मर्काय मृत्युनिमित्ताय वायवे ।" §द०§

अत्र दयानन्देन कृतो वायुरूपो र्थः पूर्वाचार्यापेक्षया भिन्नो पि प्रमाणस्यानु-
ल्लेखात् सन्दिह्यते ।

8.36.2. त्रीणि ज्योतींषि §अग्निवायुसूर्याः/अग्न्यादीनि§

इदं पदं अग्न्यादीनां वाचकं सायणेन निर्दिष्टम् ।

§1§ "त्रीणि ज्योतींषि विषयप्रकाशकानि अग्निवाय्वादित्यलक्षणानि"
§सा० 8/1§

§2§ "त्रीणि ज्योतींषि अग्निवायुसूर्यलक्षणानि ।" §सा०§

§3§ "त्रीणि ज्योतींषि सूर्यविद्युदग्न्याख्यानि" §द०§

दयानन्देन पूर्वाचार्यैः वायोः निर्देशस्थाने विद्युतो निर्देशः कृतः इति
विशेषः ।

8.40.2. रश्मिः §सूर्यकिरणाः§

इदं सूर्यकिरणानां नाम वर्तते ।

§1§ "रश्मयः किरणाः" §म०§

§2§ "रश्मयः किरणाः" §द०§

8.48.1. व्रेशी ‖आपः‖

इदं मेघोदरस्थानामपां वाचकं पदमिति सायणेनोक्तम् ।

‖1‖ "व्रेशीनां वृजतो मेघस्योदरे शेरत इति व्रेश्यो मेघोदरस्था आपस्तासाम् ।" ‖सा० 8/23‖

‖2‖ "मेघस्य वृजत उदरे शेरत इति व्रेश्य उदरस्था आप उच्यन्ते" ‖उ०‖

‖3‖ "व्रेशीनाम् दिव्यानामपामिव निर्मलविद्यासुशीलव्याप्तानाम् । एता वै दैवीरापस्तद्याश्चैव दैवीरापो याश्चेमा मानुष्यस्ताभिरेवास्मिन्नेतदुभयीभिरसंदधाति ।" ‖द०‖

अत्र दयानन्देन अपामुपमानत्वं निरूप्य विद्यावतामुपमेयत्वं निर्दिष्टम्, शतपथवाक्यं च प्रमाणतयोद्धृतमिति विशेषः ।

8.48.2. कुकूननाः ‖आपः‖

इदमपि मेघोदरस्थानामपां वाचकं तेषां शब्दविशेषसूचकं विशेषणात्मकं पदमस्ति ।

‖1‖ "कुकूननानां कुशब्दमत्यर्थं कुर्वत्यः शब्दं कुर्वाणा नमन्ति प्रह्णी भवन्तीति कुकूनना मेघ्य आपस्तासां च ।" ‖सा० 8/23‖

‖2‖ "कुङ्०शब्दे । अत्यर्थं कुवत्यः कुर्वाणाः शब्दं नमन्ते प्रह्णीभवन्तीति कुकूनना मेध्या ~~अप~~- आपः ।" ‖उ०‖

सायणमहीधराभ्यां पदमिदं मेघस्थानामपां विशेषणमित्युक्तम्, उव्वटेन मेध्यानामिति भेदः । अन्यत्समानम् ।

‖3‖ "कुकूननानां भृशं शब्दविद्यया नम्राणाम् । कुङ्०शब्दे इत्यस्माधडि०अ गुणाभावे भ्यस्ततः कुकूपपदान्नमधातोरौणादिको नक्प्रत्ययश्च ततः षष्ठीबहुवचनम् ।" ‖द०‖

8.48.3. भन्दना: [आप:]

इदमपां कल्याणकारित्वसूचकं विशेषणमिति सायण: ।

[1] "भन्दनानां भदिकल्याणे सुखे च । कल्याणकारिण्य: सुखकारिण्यो वा भन्दना आपस्तासां च ।" [सा० 8/23]

[2] "भन्दनानाम्, भदि कल्याणे सुखे च । कल्याणकारिण्य: सुखप्रियो वा भन्दरा: ।" [उ०]

[3] "भन्दन्तीति भन्दना: कल्याणकारिण्य: सुखप्रियो वा मेध्या आप: ।" [म०]

[4] "भन्दनानां कल्याणचरणानाम् ।" [द०]

9.7.2. गन्धर्वा: [नक्षत्राणि]

सायणेन पदमेतन्नक्षत्राणां वाचकतया निर्दिष्टम् ।

[1] "गन्धर्वा: सप्तविंशति: सप्तविंशतिसंख्यायुक्तानि नक्षत्राणि ।" [सा० 10/1]

[2] "सप्तविंशतिर्नक्षत्राणि गन्धर्वा गोभूमिधारका: ।" [म०]

नवमाध्यायस्य प्रथमे मन्त्रे सूर्यस्य विशेषणतया पदमेतत् प्रयुक्तमत्र तु नक्षत्रार्थ इति विशेष: ।

[3] "गन्धर्वा: ये वायव इन्द्रियाणि च धरन्ति ते सप्तविंशति: एतत्संख्याका: ।" [द०]

"यान्येक: समष्टिवायु: प्राणापानव्यानोदानसमाननागकूर्मकृकलदेवदत्तधनन्जया इदशं द्वादशं मन: तत्सहचरितानि श्रोत्रादीनि दशेन्द्रियाणि पन्च सूक्ष्मभूतानि च मिलित्वा सप्तविंशति: ।"

पूर्वाचार्यै: गन्धर्वपदेन सप्तविंशतिनक्षत्राणां निर्देश उक्त:, दयानन्देन दशवायूनां दशेन्द्रियाणां पन्चानां सूक्ष्मभूतानां समष्टिवायुसहितस्य मनसश्च तद-

वाच्यतया निर्देशः प्रतिपादितं इति भेदः ।

10.6.1. तपोजाः [आपः]

इदं अन्नि अग्नेर्जातत्वमपां सूचयति विशेषणम् ।

[1] "हे आपः, तपोजाः सन्तापवतो अग्नेर्जाताः ।" [सा0 11/4]

[2] "तपोजाः । तपःशब्देनाग्निरुच्यते तस्माज्जायन्ते । "अग्नेर्वै धूमो जायते" इत्यादिश्रुतिः ।" [उ0]

[3] "तपः शब्देनात्राग्निरुच्यते, तपसो ग्नेर्जातास्तपोजाः । "अग्नेर्वै धूमो जायते धूमादभ्रमभ्राद् वृष्टिरग्नेर्वा एता जायन्ते तस्मादाह तपोजाः। इति श्रुतेः वायोरग्निरग्नेरापः इति श्रुत्यन्तरात् ।" [म0]

[4] "तपोजाः ब्रह्मचर्यादितपसो जातः ।" [द0]

10.19.2. नौः [आपः, यज्ञफलम्]

सायणेन पदमिदं सलिलस्य मेघगतस्य वाचकं निर्दिष्टम् ।

[1] "नावः नौयोग्या बहुला आपः" [सा0 11/6]

[2] "नावः । "णु स्तुतौ" नूयन्ते स्तूयन्ते स्तोत्रशस्त्रहोममन्त्रैरिति नाव आहुतिपरिणामभूता आपः चरन्ति आदित्यमण्डलं प्रति ।" [उ0]

[3] "नूयन्ते स्तूयन्ते स्तोत्रशस्त्रमन्त्रै रिति नावः ।" [म0]

"यद्वा नुदन्ति प्रेरयन्ति फलप्राप्त्यै ता नावः । आहुतिपरिणामभूता आपः ।" [म0]

अत्र यद्यपि सर्वैरब्वाचकमेतत्पदं कथितम्, तथापि तेषां व्याख्याने भेदः कश्चिदस्ति । सायणापेक्षया उव्वटभाष्ये धातुनिर्देशः, ततश्च महीधरभाष्ये व्युत्पत्तिसहितो र्थनिर्देशो विशिष्यते ।

[4] "नावः सागरोपरि नाव इव विमानानि ।" [द0]

11.74.2. वम्रः [जीवविशेषः]

इदं जीवविशेषवाचकं पदमस्ति ।

[1] "वम्रशब्दः पिपीलिकासदृशं क्षुद्रजीवमाचष्टे । स च यत्काष्ठमतिसर्पति अतिशयेन प्राप्नोति । काष्ठावयवेषु तत्र तत्र सारं भवतीत्यर्थः ।"
[सा० 11/7]

[2] "वम्रः वल्मीकः ।" [उ०]

12.3.1. रूपाणि [वस्तुस्वरूपाणि]

सूर्यस्य महिमावर्णनप्रसङ्गे पठितं मन्त्रगतं पदमिदं सूर्यभाभिः प्रकाश्यमानानि जगतः पदार्थानां रूपाणि बोधयति ।

[1] "विश्वा रूपाणि समस्तानि जगद्रूपाणि ।" [सा० 13/1]

12.6.1. द्यौः [मेघः]

सायणेन पदमिदं मेघवाचकमत्र निर्दिष्टम् । तत्र बीजं मेघस्य द्युसम्बन्धः प्रतीयते ।

[1] "स्तनयन्निव द्यौः । यथा द्युलोकस्थो मेघः ।" [सा० 13/1]

[2] "द्यौः शब्देनात्र पर्जन्य उक्तः ।" [उ०]

12.6.2. क्षामा [दाहकं वस्तु/पृथिवी]

[1] "क्षाम दाहकमस्मद्विरुद्धम्" [सा० 13/1]

[2] "क्षामाशब्देन पृथिव्युच्यते" [उ०]

अत्र सायणेन क्षामपदस्य अनिष्टो दाहकवस्तुरूपो र्थो निर्दिष्टः, उव्वटेन क्षामापदस्य पृथिवी इत्यर्थ उक्तः । इत्थं पदस्य पदार्थस्य भेदस्तयोर्व्याख्याने वगम्यते ।

12.20.2. तृतीयं रजः {तेजोमण्डलम्}

सायणेन पदमिदं सूर्यमण्डलगतस्य तेजोविशेषस्य वाचकं निर्दिष्टम् ।

{1} "तृतीये समुद्रे वृष्ट्यपेक्षया त्रयः स्थाने रजसि रञ्जनात्मके तेजो मण्डले सूर्यरूपेण ।" {सा० 13/2}

{2} "तृतीये समुद्रवृष्ट्यपेक्षया तृतीयस्थाने रजसि रञ्जनात्मके तेजोमण्डले आदित्यात्मना ।" {म०}

12.23.2. अद्रिः {मेघः}

सायणेन पदमिदं मेघवाचकमत्र निर्दिष्टम् ।

{1} "अद्रि पर्वतसमानं मेघम् ।" {सा० 13/1}

{2} "अद्रिमदारयितव्यं मेघम्" {उ०}

12.73.4. तमः {यज्ञप्रक्रिया, तमः}

सायणेन पदमिदं क्रियाविशेषवाचकं निर्दिष्टम् ।

{1} "अस्य क्रियात्मकस्य तमसः" {सा० 13/5}

महीधरेण क्षुत्पिपासादिजन्यं दुःखं तमःपदवाच्यमुक्तम् ।

{2} "अस्य तमसः क्षुत्पिपासाद्युद्भुतस्य दुःखस्य" {म०}

12.74.3. अरुणीः {सूर्यकिरणानि}

सायणभाष्ये पदमिदम् अरुणवर्णविशिष्टस्य वस्तुविशेषस्य सूचकं विशेषण-मित्यवगम्यते ।

{1} "अरुणीभिः अरुणवर्णाभिः ।" {सा० 13/5}

उव्वटेन सूर्यकिरणानां अरुणवर्णविशिष्टानां पदेनानेन निर्देशः सूचितः -

§2§ "अरुणीभिः । अरुणवर्णाभिर्गोभिः किरणैः ।" §उ0§

§3§ "अरुणीभिः अरुणवर्णाभिः गोभिः ।" §म0§

<u>12.86.2. मध्यमशी: §क्षत्रियः§</u>

सायणेन पदमिदं क्षत्रियस्य शत्रुमर्मघातकत्वसूचकं विशेषणं ओषधीनां रोगप्रशमनस्योपमानतया प्रयुक्तमिति निर्दिष्टम् ।

§1§ "मध्यमशीः मध्यमं मर्मभागं शृणाति विध्यति हिनस्तीति मध्यमशीर्मर्मघातकः" §सा0 13/1§

§2§ "मध्यमं भागं शृणातीति मध्यमशीः ।" §उ0§

§3§ "मध्ये देहमध्ये भवं मध्यमं मर्मभागं शृणाति हिनस्ति मध्यमशीः "शॄ हिंसायां" क्विप् । "ऋत इद्धातोः" इति इदादेशः । उरण् रपर इति रेफः । मर्मघातकः ।" §म0§

"क्षमध्यमेन त्रिशूलमध्यभागेन शृणातीति मध्यमशीः 2" §म0§

महीधरेण विशेष्यस्योग्रस्य पदस्य रुद्ररूपमन्यमर्थं चाभिसन्धायान्या व्युत्पत्तिरपि कथितेति विशेषः ।

<u>12.90.1. पड्वीशः §बन्धनम्§</u>

सायणेन पदमिदं बन्धनवाचकं निर्दिष्टम् ।

§1§ "पड्वीशात् पड्वीशशब्दोऽत्र बन्धनवाची । बन्धननिमित्तात् पापात् ।" §सा0 13/6§

§2§ "पड्वीशाद् बन्धनात् । पड्वीशशब्दो बन्धनवचनः ।" §उ0§

13.3.4. उपमा §उपमानम्/दिक्§

सायणेन पदमेतदुपमानस्य वाचकं निर्दिष्टम् ।

§1§ "अस्य रुक्मस्य उपमा उपमानभूता" §सा० 14/1§

उव्वटादयस्त्वस्य पदस्य दिग्विशेषणत्वमिच्छन्ति ।

§2§ "उपमाः उपमीयन्ते आसु स्थितानि भूतानीत्युपमा दिशः ।" §उ०§

महीधरेण सावकाशत्वस्यात्र वैशिष्ट्यमुक्तम् ।

§3§ "उपसमीपे मान्ति भूतानि यासु ताः उपमाः । सावकाशा इत्यर्थः ।" §म०§

13.4.2. पृथिवी §विस्तीर्णा§

इदं द्युलोकस्य बृहत्परिमाणसूचकं विशेषणमस्ति ।

§1§ "पृथिवीं द्यां विस्तीर्णां दिवम् ।" §सा० 14/1§

§2§ "पृथिवीमन्तरिक्षमप्युच्यते ।" §उ०§

सायणभाष्ये द्युलोकः, उव्वटभाष्ये न्तरिक्षलोकः पदवाच्यतयोक्त इति भेदः ।

13.5.2. सप्त होत्राः §दिशः§

सायणेन पदमेतद् दिक्सूचकं निर्दिष्टम् ।

§1§ "अनु सप्त होत्राः। यस्यां दिशि द्रप्सः पतितः तद्व्यतिरिक्ता होमयोग्या याः सप्त दिशः सन्ति तासु ।" §सा० 14/1§

उव्वटाद्यैः स एवार्थः प्रतिपादितः ।

§2§ "सप्त होत्राः । सप्तस्वपि दिक्षु । "असौ वा आदित्यो

द्रष्सो दिशः सप्त होत्रा अमुमादित्यं दिवु प्रतिष्ठापयन्ति इति श्रुतिः ।" ‖उ०‖

"तिर्यक् चतस्रो दिशः अथ एका उपर्येका मध्य एका एताः सप्त दिशः।" ‖उ०‖

<u>13.6.1. सर्पाः ‖अहयः‖</u>

इदं प्रसिद्धस्य प्राणिविशेषस्य वाचकं पदमस्ति । उव्वटेन पदस्यास्य लोकवाचकत्वं चोक्तम् । मन्त्रे अन्तरिक्षे दिवि च स्थितेनिर्देशात् पदमेतत् केवलं सर्पस्य प्रसिद्धस्य वाचकं न प्रतीयते ।

‖1‖ "सर्पा वा लोकाः ।" ‖उ०‖

‖2‖ "ये केचित् सर्पन्ति सर्पाः लोकाः ।" ‖म०‖

"इमे वै लोकाः सर्पाः इति श्रुतेः सर्पशब्देन लोका उच्यन्ते ।" ‖म०‖

<u>13.7.1. यातुधानः ‖रक्षः‖</u>

इदं पदं रक्षसां वाचकमस्ति ।

‖1‖ "यातुधानानां रक्षसाम्" ‖सा० ।4/1‖

‖2‖ "यातनां दुःखं ये दधति ये यातुधाना रक्षः प्रभृतयः ।" ‖उ०‖

‖3‖ "यातु यातनां दुःखं दधति ते यातुधाना रक्षः प्रभृतयः ।" ‖म०‖

उव्वटादिभिः पदव्युत्पत्तिः साधु निर्दिष्टेति विशेषः ।

<u>13.8.1. रोचना ‖स्थानविशेषः‖</u>

इदं सर्पनाम्ना मन्त्रे निर्दिष्टस्य जीवविशेषस्याश्रयभूतो यो स्थान-विशेषो द्युलोकरूपो वर्तते तस्य विशेषणमिति सायणभाष्यादवगम्यते ।

‖1‖ "रोचने दीप्तस्थाने" ‖सा० ।4/1‖

(2) "रोचनो ह नामैष लोको यत्रैष एतत् तपति ।" इति श्रुतिः ।"
(उ0)

<u>13.11.1. स्पशः (बन्धनकृतः)</u>

शत्रूणां वधायाभ्यर्थितस्याग्नेः शत्रुबन्धनाय बन्धनकर्तृमुद्दिश्य पदमेतत् प्रयुज्यत इति सायणेन निर्दिष्टम् ।

(1) "स्पश बन्धन इति धातुः । स्पशयन्ति बध्नन्तीति स्पशो बन्धनकृतः प्रणिधीन् ।" (सा0 ।6/1)

(2) "स्पश बन्धने" स्पाशयतीति स्पशः प्रणिधीन् अध्यक्षान् ।"
(उ0)

(3) "स्पश बन्धने" स्पशयन्ति बध्नन्तीति स्पशो बन्धनकृतः प्रणिधीन् ।" (म0)

<u>13.16.1. समुद्रः (रुक्मः)</u>

सायणेन पदस्यास्य सामान्य एवार्थो निर्दिष्टः । उव्वटादिभिः पदस्यास्य रुक्मवाचकत्वं श्रुतिवाक्योपन्यासेन दृढीकृतम् ।

(1) "रुक्मो वै समुद्रः पुरुः सुपर्णः । इति श्रुतिः ।" (उ0)

(2) "समुद्रो रुक्मः ।" (म0)

अत्र केनापि समुद्रपदस्य रुक्मेण सम्बन्धः कीदृश इति नोक्तम् ।

<u>13.29.1. मधुः (रसविशेषः)</u>

अत्र मधुशब्दो रसविशेषस्य वाचको भाष्यकृद्भिर्निर्दिष्टः ।

(1) "मधुमानस्तु माधुर्यरसोपेतो भवतु ।" "सूर्यो पि मधुमान् सन्तापराहित्यलक्षमाधुर्यरसोपेतो स्तु ।" (सा0 ।4/3)

(2) "मधुमान् रसवान्" (उ0)

13.31.1. समुद्राः [लोकाः]

पदस्यास्य लोकवाचकत्वं सायणेनोक्तम् ।

[1] "समुद्रवन्ति स्वकारणात् समुद्गच्छन्तीति समुद्रा लोकाः ।" [सा० 14/3]

[2] "त्रीन्समुद्रान् लोकान् ।" [उ०]

[3] "समुद्द्रवन्ति स्वकारणात् समुद्भवन्तीति समुद्रा लोकाः ।" [म०]

13.42.2. परमं व्योम [रोगविशेषः/लोकाः]

सायणेन पदमिदमश्वस्य रोगविशेषसूचकं निर्दिष्टम् ।

[1] "विविधव्योमरक्षणं व्योमसन्ततिसहस्रमश्वस्य रोगास्तेभ्यः सर्वेभ्यः पालनमित्यर्थः । तत्र परममुत्कृष्टं रक्षितस्याश्वस्य पुनरुपद्रवः कदाचिदपि न जायते । तथा करणं रक्षणस्य परमत्वम् । तादृशे परमे व्योमन् एतमश्वं स्थापयेदिति शेषः ।" [सा० 14/4]

उव्वटेन पदमिदं लोकवाचकं निर्दिष्टम् ।

[2] "परमे व्योमन् निषीदन्तम् । इमे वै लोकाः परमं व्योमेत्यधिलोकं व्याख्यातम् ।" [उ०]

महीधरेण उभयमपि विशदीकृतम् -

[3] "परमे व्योमन्" एषु लोकेषु निषीदन्तमिति शेषः । "इमे वै लोकाः परमं व्योम इति श्रुतेः । यद्वा विविधमोमं अवनं रक्षणं परममुत्कृष्टं यद्व्योमनानोपद्रवेभ्यः पालनं तत्र स्थापितमिति शेषः ।" [म०]

13.49.1. सरिरम् [लोकाः]

सायणेन पदमिदं लोकवाचकं निर्दिष्टम् ।

§1§ "सरिरस्य मध्ये व्यच्यमानं विविधमुपजीव्यमानम् ।"

§सा० 14/5§

§2§ "इमे वै लोकाः सरिरम्" इत्यादिश्रुतिः ।" §उ०§

§3§ "सरिरस्य मध्ये एषु लोकेष्वन्तः" §म०§

<u>13.53.1. भस्म §प्रकाशः§</u>

सायणेन पदमिदं ज्योतिर्विशेषणत्वेन व्याख्यातम् ।

§1§ "भस्मन् भासके शुक्लरूपे ज्योतिषि ।" §सा० 14/6§

§2§ उव्वटादिभिः पदमेतदभ्रस्य §मेघस्य§ वाचकं निर्दिष्टम् - "भस्मन् । भस भर्त्सनदीप्त्योः । अभ्रं वा अपां भस्मन् ।" §उ०§

§3§ "भस्मन् भस्मनि । भस भर्त्सनदीप्त्योः मन् । अभ्रे अभ्रं वा अपां भस्म ।" §म०§

<u>13.53.2. अपां ज्योतिः §निर्मलजलम्§</u>

सायणेन पदमिदं जलस्य नैर्मल्यसूचकमिति निर्दिष्टम् ।

§1§ "ज्योतिषि प्रकाशे नैर्मल्य इत्यर्थः ।" §सा० 14/6§

उव्वटादिरेतत्पदं विद्युतद्वा अपां ज्योतिः ।" §उ०§

<u>13.53.3. अर्णवः §जलाशयः/प्राणः§</u>

सायणेन पदमिदं तटाकाद्युपलक्ष्यकं निर्दिष्टम् ।

§1§ "अर्णवशब्देन साद्रूप्यात् प्रौढं तटाकाद्युपलक्ष्यते ।" §सा० 14/6§

उव्वटादिभिः पदमेतत् प्राणरूपस्य सदनस्य वाचकमुक्तम् ।

§2§ "अर्णवे । प्राणो वा अपामर्णवः ।" §उ०§

§3§ "अर्णवे सादने प्राणरूपे" §म०§

अत्र प्राणस्य अर्णवरूपत्वं भाष्यकृद्भिरुक्तम् । परं अपामाश्रयत्वेन अर्णवः समुद्रः प्राणरूपो भवतीति भावो ऽपि भवितुमर्हति ।

13.53.4. सदनम् [आश्रयविशेषः]

पदमिदं मन्त्रे अर्णवादिपदैः सह प्रयुक्तमिति तस्य विशेष्यत्वं प्रतीयते । तथा च अर्णवरूपे सदने, समुद्ररूपे सदने इत्यादिरर्थो ऽत्रावगम्यते । सदनशब्देन आश्रयविशेषो ऽत्र सूच्यते ।

13.53.5. सरिरम् [जलाशयः/वाक्]

सायणेन पदमिदं सामान्यतया जलाशयवाचकं निर्दिष्टम् ।

[1] "सरिरशब्देनाविर्धारितविशेषो जलमात्राधार उपलक्षितः ।"
[सा० 14/6]

उव्वटादिभिः पदस्यास्य वाच्यं वागिति निर्दिष्टम् ।

[2] "सरिरे । वाग्वै सरिरम् ।" [उ०]

[3] "सरिरे सदने वाचि ।" [म०]

13.53.6. समुद्रः [समुद्रः/मनः]

सायणेन पदस्यास्य प्रसिद्ध स्वार्थः सूचितः ।

[1] "समुद्रः प्रसिद्धः ।" [सा० 14/6]

[2] उव्वटादिभिः पदमेतन्मनोवाचकमुक्तम् - "समुद्रे । मनो वै समुद्रः ।" [उ०]

13.53.7. क्षयः [शुष्कतडागादिः]

सायणेन पदमिदं शुष्कतडागादिवाचकं निर्दिष्टम् ।

(1) "क्षीयन्ते शुष्यन्त्यापो त्रेति शुष्कतडागादिः क्षयः ।"
(सा० 14/6)

उव्वटादिभिः पदमिदं चक्षुर्वाचकमुक्तम् ।

(2) "क्षये । "चक्षुर्वा अपां क्षयो निवासः ।" (उ०)

(3) "अपां क्षये चक्षुषि:" (म०)

13.53.8. सधिः (वर्षोपलादिः)

सायणेन पदमिदं वर्षोपलादिवाचकमुक्तम् ।

(1) "जलेन सह धीयते वस्थाप्यत इति सधिर्वर्षोपलादिः ।"
(सा० 14/6)

उव्वटादिभिः पदस्यास्य वाच्यं श्रोत्रमुक्तम् ।

(2) "सधिषि । श्रोत्रं वा अपां सधिः ।" (उ०)

13.53.9. सधस्थम् (मेघः)

सायणेन पदमेतत् मेघवाचकं निर्दिष्टम् ।

(1) "अद्भिः सह विद्युदादयो यत्र मेदये तिष्ठन्ति सो यं मेघः सधस्थः ।" (सा० 14/6)

उव्वटादयः पदमिदम् अन्तरिक्षवाचकमुक्तम् ।

(2) "अन्तरिक्षं वा अपां सधस्थम् ।" (उ०)

(3) "अपां सधस्थे अन्तरिक्षे" (म०)

13.53.10. योनिः (अग्निः)

सायणेन पदमिदं जलहेतुरूपस्याग्नेर्वाचकमुक्तम् ।

{1} "योनिशब्देन जलकारणभूतो ऽग्निरुच्यते ।" {सा० 14/6}

उव्वटाद्यः पदमिदं समुद्रवाचकमुक्तम् ।

{2} "समुद्रो वा अपां योनिः ।" {उ०}

{3} "अपां योनौ समुद्रे" {म०}

13.53.11. पुरीषम् {सिकताः}

सायणेन पदमिदं नद्यादिगतसिकताभिधायकमुक्तम् ।

{1} "पुरीषशब्देन नद्यादिगताः सिकता उच्यन्ते ।" {सा० 14/6}

उव्वटाद्या अपि तन्मतानुसारिणः प्रतीयन्ते ।

{2} "सिकता वा अपां पुरीषम् ।" {उ०}

{3} "अपां पुरीषे सिकतासु ।" {म०}

13.53.12. पाथः {समुद्रः}

सायणेन पदमिदं जलाश्रयस्य समुद्रस्य वाचकमुक्तम् ।

{1} "पीयते जलं जीमूतैरनेनेति पाथः समुद्रः ।" {सा० 14/6}

उव्वटाद्यैः पदमिदमन्नवाचकमुक्तम् ।

{2} "अन्नं वा अपां पाथः । अन्ने ।" {उ०}

{3} "अपां पाथसि अन्ने ।" {म०}

13.54.1. पुरः {पूर्वदिक्}

सायणेन पदमेतत् पूर्वदिग्वाचकं निर्दिष्टम् ।

{1} "पुरः पूर्वस्यां दिशि" {सा० 14/7}

उव्वटादिभिः पदमिदं वह्निवाचकमुक्तम् ।

§2§ "अग्निर्वै पुरः तद्यत्तदाह पुर इत्यादिनिर्वाचनम् ।" §उ0§

§3§ "यो यं पुरो भुवश्चाग्निर्वर्तति हे इष्टके, त्वं तद्रूपासि ।"
"पुरस्तादुपधीयते प्रागुद्ध्रियते प्राङुपचर्यत इति पुरो ग्निः ।"
§म0§

शब्दव्युत्पत्तिनिर्देशादत्र महीधरो विशिष्यते ।

13.55.3. स्वारम् § वासविशेषः §

सायणेन पदमिदं वासविशेषवाचकमुक्तम् ।

§1§ "स्वारमिति वासविशेषः ।" §सा0 14/7§

महीधरेण पदमिदं सामविशेषवाचकमुक्तम् ।

§2§ "तस्य विश्वकर्मणो पत्यं मनो त एव वैश्वकर्मणम्" §म0§

14.26.1. यवाः §मासाः§

सायणेन पदमिदं मासाख्यकालावयवसूचकं निर्दिष्टम् ।

§1§ "युतौ मिश्रीभवतः शुक्लकृष्णपक्षावत्रेति यवा मासाः ।"
§सा0 15/8§

उव्वटेन पदस्यास्य पूर्वपक्षरूपो र्थ उक्तः ।

§2§ "यवाः पूर्वपक्षाः ।" §उ0§

§3§ "यवानां पूर्वपक्षाणाम् ।" §म0§

15.4.1. एवश्छन्दः §लोकविशेषः, पृथिवी/यज्ञाङ्गम्, इष्टका§

इदं पृथिवीलोकवाचकं पदं इष्टकामुद्दिश्यात्र प्रयुक्तमिति सायणेन निर्दिष्टम् ।

§1§ "राति गच्छत्यस्मिन्सर्वः प्राणिनिकाय इति । एवं पृथिवी-

लोकः स एव छन्दोरूपेण स्थितत्वाच्छदकत्वाच्छन्दः । हे इष्टके, त्वं तद्रूपा- सीति शेषः ।" {सा० 16/1}

काण्वभाष्ये "राव" इति पदं पठितम् ।

15.4.2. वरिवश्छन्दः {अन्तरिक्षलोकः}

इदमन्तरिक्षलोकवाचकं पदं इष्टकामुद्दिश्यात्र प्रयुक्तमिति सायणे- नोक्तम् ।

{1} "वीरवः प्रभामण्डलेनाव्रियत इति वरिवो न्तरिक्षम्, तदेव इच्छन्दः ।" {सा० 16/1}

{2} "अन्तरिक्षं वै वरिवश्छन्दः ।" {उ०}

{3} "वरिवः प्रभामण्डलेन व्रियत आव्रियत इति वरिवो न्तरिक्षं तदेव छन्दः ।" {म०}

15.4.3. शम्भूश्छन्दः {द्युलोकः}

इदं पदं द्युलोकवाचकं वर्तते ।

{1} "शं निरतिशयसुखम् अस्माद् भवतीति शम्भू द्युलोकः ।" {सा० 16/1}

{2} "द्यौर्वै शम्भूश्छन्दः ।" {उ०}

{3} "शं सुखं भवत्यस्मादिति शंभूः द्युलोकः ।" {म०}

15.4.4. परिभूश्छन्दः {दिशः}

सायणेन पदमिदं दिग्वाचकं निर्दिष्टम् ।

{1} "परितो भवति व्याप्य वर्तते इति व्युत्पत्त्या परिभूशब्दो दिग्वचनः ।" {सा० 16/1}

§2§ "दिशो वै परिभूश्छन्दः ।" §उ0§

§3§ "परितो भवति व्याप्य वर्तत इति परिभूर्दिग्वाचकः शब्दः ।" §म0§

अत्र सर्वेषामर्थसाम्यं वर्तते । सायणमहीधरयोर्विग्रहनिर्देशे विशेषश्चास्ति ।

15.4.5. आच्छच्छन्दः §अन्नम्§

सायणादिभिर्भाष्यकारैरस्य पदस्यान्नवाचकत्वमुक्तम् ।

§1§ "आच्छादयति आत्मा येन रसेन सर्वशरीरमित्याच्छत् अन्नम् ।" §सा0 16/1§

§2§ "अन्नं वा आच्छच्छन्दः ।" §उ0§

§3§ "आच्छादयति स्वरसेन सर्वं शरीरमित्याच्छत् अन्नम् ।" §म0§

15.4.14. अङ्कुपंछन्दः §जलम्§

सायणेन पदमिदं जलवाचकं सूचितम् ।

§1§ "अक अग कुटिलायां गतौ कुटिलगत्या आप्नोतीत्यकुपं उदकम्" §सा0 16/1§

§2§ "आपो वा अङ्कुपं छन्दः ।" §उ0§

§3§ "अङ्ककुटिलगतौ" अङ्केन कुटिलगत्या आप्नोतीत्यङ्कुपमुदकम् ।" §म0§

15.4.15. अक्षरपङ्क्तिश्छन्दः §लोकः, द्यौः§

सायणेन पदमिदं नक्षत्राश्रयस्य द्युलोकस्य सूचकं निर्दिष्टम् ।

§1§ "अक्षरनाशरहिता नक्षत्राणां परावलिर्यस्याः सा द्यौरक्षरपङ्क्तिः ।" §सा0 16/1§

§2§ "असौ वै लोको ऽक्षरपङ्क्तिश्छन्दः ।" §उ0§

§3§ "न क्षरतीत्यक्षरा नाशरहिता पङ्क्तिरावलिर्यस्याः साक्षर-पङ्क्तिद्यौः ।" §म०§

15.4.16. पदपङ्क्तिश्छन्दः §भूलोकः§

सायणेन पदमिदं भूलोकवाचकं निर्दिष्टम् ।

§1§ "पदानां पङ्क्तयो यस्मिन् सो यं भूर्लोकः पदपङ्क्तिः ।" §सा० 16/1§

§2§ "अयं वै लोकः पदपङ्क्तिश्छन्दः ।" §उ०§

§3§ "पदानां चरणन्यासानां पङ्क्तयो यस्मिन् सा पद-पङ्क्तिर्भूर्लोकः ।" §म०§

15.4.17. विष्टारपङ्क्तिश्छन्दः §वैश्यजातिः§

सायणेन पदमिदं वैश्यजातिवाचकं निर्दिष्टम् ।

§1§ "आपणे प्रसारिता वस्तूनां पङ्क्तयो यस्याः सा वैश्य-जातिः विष्टारपङ्क्तिः ।" §सा० 16/1§

§2§ "दिशो वै विष्टारपङ्क्तिश्छन्दः ।"§उ०§

§3§ "विस्तारा विस्तीर्यत इति विस्तारा विस्तारिता प्रसा-रिता वस्तूनां पङ्क्तयो यत्रेति विष्टारपङ्क्तिर्दिक् ।" §म०§

सायणेन पदमिदं वैश्यवाचकमुक्तम्, उव्वटादिभिर्दिग्वाचकमुदीरित-मिति भेदः ।

15.5.1. आच्छच्छन्दः §अन्नम्§

उव्वटादिभिः पदमिदमन्नवाचकं निर्दिष्टम् ।

§1§ "अन्नं वा आच्छच्छन्दः ।" §उ०§

§2§ "आच्छादयति शरीरमित्याच्छदन्नम् ।" §म०§

15.5.2. प्रच्छच्छन्दः (अन्नम्)

इदमन्नवाचकं पदमस्ति ।

(1) "अन्नं प्रच्छच्छन्दः ।" (उ0)

(2) "प्रच्छादयतीति प्रच्छदन्नम् ।" (म0)

15.5.3. संयच्छन्दः (रात्रिः)

इदं रात्रिवाचकं पदमस्तीति उव्वटादय आहुः ।

(1) "रात्रिर्वा संयच्छन्दः ।" (शा0 16/1)

(2) "संयच्छति व्यापारान्निवर्तयति जन्तूनिति संयत् रात्रिः ।" (म0)

15.5.4. वियच्छन्दः (द्युलोकः/अहः)

उव्वटभाष्ये पदस्यास्य द्युलोकवाचकत्वमभिप्रेतं वर्तते । महीधरेण त्वस्याहर्वाचकत्वमुक्तम् ।

(1) "असौ वै लोको वियच्छन्दः ।" (उ0)

(2) "विशेषेण यच्छन्ति गच्छन्ति व्यापारायेतस्ततो जना यत्रेति वियच्छिनम् ।" (म0)

15.5.5. बृहच्छन्दः (स्वर्लोकः)

महीधरेण पदमिदं स्वर्लोकवाचकमुक्तम् ।

(1) "बृहत् विस्तीर्ण स्वः ।" "असौ वै लोको बृहच्छन्दः" इति श्रुतेः ।" (म0)

15.5.6. रथन्तरं छन्दः (भूमण्डलम्)

महीधरेण पदमिदं भूमण्डलवाचकं निर्दिष्टम् ।

[।] "रथैः तीर्यते गम्यते यत्रेति रथन्तरं भूमण्डलम् ।" [म०]

15.5.7. निकायश्छन्दः [वायुः]

महीधरेण पदमेतद्वायुवाचकमुक्तम् ।

[।] "नितरां कायति शब्दं करोति वृक्षादीनुन्मीलयत् निति निकायो वायुः । "कै शब्दे" "वायुर्वै निकायश्छन्दः" इति श्रुतेः ।" [म०]

15.5.9. गिरश्छन्दः [अन्नम्]

महीधरेण पदमेतत् अन्नस्य वाचकमुक्तम् ।

[।] "गीर्यते भक्ष्यत इति गिरो ऽन्नम् ।" [म०]

"अन्नं वै गिरः" इति श्रुतेः ।

15.5.8. विवधश्छन्दः [अन्तरिक्षम्]

महीधरेण पदमेतदन्तरिक्षवाचकमुक्तम् ।

[।] "विविधं वध्यन्ते हन्यन्ते पापफलानि भोक्ष्यन्ते भूतप्रेतादि-रूपेण प्राणिनो यत्रेति विवधो ऽन्तरिक्षम् । अन्तरिक्षं वै विवधश्छन्दः" इति श्रुतेः ।"

[म०]

15.5.10 भ्रजश्छन्दः [अग्निः]

पदमेतदग्निवाचकं महीधरेणोक्तम् ।

[।] "भ्राजते दीप्यत इति भ्रजो ऽग्निः । "अग्निर्वै भ्रजश्छन्दः" इति श्रुतेः ।" [म०]

15.5.13. वयश्छन्दः [अन्नम्]

महीधरेण पदमिदमन्नवाचकमुक्तम् ।

{।} "वयः बाल्यादिवयोहेतुभूतमन्नम् ।" {म०}

15.5.15. विस्पर्धा छन्दः {स्वर्गलोकः}

महीधरेण पदमिदं स्वर्गवाचकं निर्दिष्टम् ।

{।} "विविधं स्पर्धन्ते ऐश्वर्याधिक्यदर्शनेन जना यत्रेति विस्पर्धाः स्वर्गः । स्पर्ध संघर्षे असुन् । असौ वै लोको विस्पर्धाच्छन्दः । इति श्रुतेः ।" {म०}

15.5.16. विशालं छन्दः {भूतलम्}

महीधरेण पदमिदं भूतलवाचकं निर्दिष्टम् ।

{।} "विविधं शालन्ते शोभन्ते जना यत्रेति विशालं भूतलम् ।" {म०}

15.5.17. छदिश्छन्दः {अन्तरिक्षम्}

महीधरेण पदमिदं अन्तरिक्षलोकवाचकं निर्दिष्टम् ।

{।} "छाद्यते करश्मिभिरिति छदिरन्तरिक्षम् ।" {म०}

15.5.19. तन्द्रं छन्दः {श्रेणी}

महीधरेण पदमिदं श्रेणीविशेषस्य वाचकमुक्तम् ।

{।} "तन्द्रि सादे मोहे "तन्द्रति सीदति स्थानसंकोचेनेति तन्द्रः श्रेणी ।" {म०}

15.5.20. अङ्काङ्कं छन्दः {जलम्}

महीधरेण पदमिदं जलवाचकमुक्तम् ।

{।} "अङ्के स्थले अङ्कानि गर्तपाषाणादिचिह्नानि यत्रेत्य-

इ०का इ०कं जलम् ।" [म०]

15.6.1. रश्मिः [तेजो विशेषः]

सायणेन पदमेतत्तेजो विशेषस्य वाचकमुक्तम् ।

[1] "रश्मिना तेजोरूपेणाग्निना" [सा० 16/2]

[2] "रश्मिना अग्निना" [उ०]

15.10.5. नाकस्य पृष्ठम् [लोकविशेषः]

सायणेन पदमिदं लोकविशेषसूचकं निर्दिष्टम् ।

[1] "नाकस्य पृष्ठे स्वर्गसदृशस्य क्षेत्रस्योपरि" [सा० 16/2]

[2] "नाकस्य पृष्ठे न अकं दुःखं नाकं सुखं तस्य पृष्ठे स्वरूपे सुखरूपे ।" [म०]

15.12.1. सम्राट् [दिक्, दक्षिणा]

पदमिदं दक्षिणाया दिशो विशेषणत्वेन प्रयुक्तम् ।

[1] "सम्यग्राजते सम्राट्" [म०]

15.13.1. स्वराट् [दिक्, उदीची]

पदमिदं उदीच्या विशेषणत्वेन मन्त्रे प्रयुक्तमस्ति । अनेन तस्या दिशः स्वयं प्रकाशः सूच्यत इति महीधरेणोक्तम् ।

[1] "स्वेनैव राजते स्वराट् 2" [म०]

15.14.1. अधिपत्नी [दिक् [ऊर्ध्वा]

ऊर्ध्वाया दिशो विशेषणत्वेन पदमिदं प्रयुक्तमस्ति । अनेन तस्याः

पालने कर्मणि विशेषः सूच्यत इति सायणादिभाष्यादवगम्यते ।

§1§ "अधिपत्नी पालयित्री" §सा० 16/3§

15.14.2. बृहती दिक् §दिक्, ऊर्ध्वा§

इदमूर्ध्वाया दिशो नाम वर्तते ।

§1§ "बृहती दिक् प्रौढोर्ध्वा इदिक् ।" §सा० 16/3§

15.15.8. ग्रामणी: §ऋतुविशेषौ§

इदमग्नेः परिचारकयोः वासन्तिकयो ऋत्वोर्वाचकं पदमाह महीधरः।

§1§ "ग्रामं नयतीति ग्रामण्यौ वा सन्ति कौ मासौ परिचारकौ ।"
§सा० 16/4§

§2§ "ग्रामं नयतीति ग्रामणीः । वासन्तिकौ तावृतू" इति श्रुतिः ।"
§उ०§

§3§ "ग्रामं नयतीति ग्रामणीः । एतन्नामकौ सेनानीग्रामण्यौ परिचारकौ तौ च वासन्तिकावृतू इत्यर्थः ।" §म०§~~15.15.9. पुन्जिकस्थ~~

15.15.9. पुन्जिकस्थला §दिक्/अप्सरा§

सायणेन दिग्रूपे थें स्य प्रयोग उक्तः । अनेन दिशः अप्सरः स्वरूपता सूच्यते ।

§1§ "पुन्जी स्थलावण्यसौभाग्यगुणस्थला पुन्जिकस्थला ।"
§सा० 16/4§

उव्वटेन पदमिदं सेनायाश्च वाचकमिति सूचितम् ।

§2§ "पुन्जिकस्थला च क्रतुस्थला चाप्सरसौ पुन्जलकृतलावण्य-सौभाग्यगुणस्थला" §उ०§

महीधरभाष्ये अग्नेः दिग्रूपायाः परिचारिकाया वाचकमेतत् पदमिति सूचितम् ।

§3§ "पुन्जिकस्थला कृतुस्थला चेत्यप्सरसौ दिगुपदिग्रूपे यस्य परिचारिके । पुन्जिकस्य पुन्जीकृतस्य रूपलावण्यसौभाग्यादिगुणसमूहस्य स्थला आधारभूता पुन्जिकस्थला ।" §म0§

15.15.10. कृतुस्थला §अप्सराः/उपदिक्§

सायणेन पदमिदं वस्तुतो प्सरोविशेषवाचकमत्रोपदिग्रूपे र्थे प्रयुक्तमिति सूचितम् ।

§1§ "कृतूनां सङ्0कल्पानां स्थलमिव स्थिता कृतुस्थला एतदाख्ये दिगुपदिग्रूपे द्वे प्सरसौ परिचारिके ।" §सा0 16/4§

§2§ "कृतूनां सङ्0कल्पानां स्थलमिव । स्त्रीद्रव्यस्वरूपादिज्ञानं संकल्पः तन्मूलकस्तु कामः ।" §उ0§

§3§ "कृतूनां सङ्0कल्पानां रूपादिज्ञानानां स्थला स्थानभूता कृतुस्थला ।" §म0§

15.15.12. हेतिः §आयुधम्§

§1§ "हेतिरायुधम्" §सा0 16/4§

§2§ "हेतिर्वज्र आयुधम्" §उ0 15/15§

15.15.13. प्रहेतिः §आयुधम्§

इदम् अग्नेरायुधविशेषवाचकं पदमस्ति ।

§1§ "प्रहेतिः प्रकृष्टमायुधम् ।" §उ0§

<u>**15.16.5. सहजन्या ‖अप्सरा:‖**</u>

अप्सरसो नामधेयम् ।

‖1‖ "सहस्थिता जनानां सहजन्या ।" ‖उ0‖

‖2‖ "जनै: सर्वै: सह स्थिता सहजन्या ।" ‖म0‖

<u>**15.17.4. प्रम्लोचन्ती ‖अप्सरा:, देवता‖**</u>

अग्निसम्बन्धविशिष्टाया अप्सरस: कस्याश्चिन्नाम ।

‖1‖ "प्रम्लोचन्ती पुमांसं प्रत्यात्मानं दर्शयन्ती ।" ‖सा0 16/4‖

‖2‖ "प्रम्लोचति नरं प्रत्यात्मानं दर्शयतीति प्रेप्रम्लोचन्ती ।" ‖उ0‖

<u>**15.17.5. अनुम्लोचन्ती ‖अप्सरा:, देवता‖**</u>

प्रतीच्याग्निसम्बद्धाया अप्सरस इदं नाम ।

‖1‖ "अनुम्लोचन्ती स एवार्थ: स रमन् यत् ।" ‖सा0 16/4‖

‖2‖ "अनु वारं वारं म्लोचन्तीत्यनुम्लोचन्तीत्यप्सरसा ।" ‖म0‖

<u>**15.18.4. विश्वाची ‖अप्सरा:, देवता‖**</u>

उत्तरस्थस्याग्नेरप्सरस इदं नाम ।

‖1‖ "विश्वाचीति प्रत्यचरशीला ।" ‖सा0 16/4‖

‖2‖ "विश्वाची च सर्वं प्रति अञ्चनशीला ।" ‖उ0‖

साधारणा हि सा ।

‖3‖ "विश्वं सर्वं प्रत्यञ्चतीति विश्वाची सर्वसाधारणत्वात् ।" ‖म0‖

<u>**15.18.5. घृताची ‖अप्सरा:, देवता‖**</u>

इदमप्सरसो नाम ।

§1§ "घृतमन्चति भुइ0कते घृताची । घृतं ह्यप्सरसामन्नम् । "घृतस्य स्तोकं सकृदह्न आश्नागीं त्यवंशीवचनात् ।" §म0§

§2§ "घृताची घृतान्चना ।" §उ0§

15.19.4. उर्वशी §अप्सरा:§

अप्सरोनामेदम् ।

§1§ "उरु: पृथु: कामो वरो यस्या अस्तीत्युर्वशी ।" §सा0 16/4§

§2§ "उरु: पृथु: वश: कामो यस्या इति उर्वशी ।" §उ0§

15.19.5. पूर्वचित्ति: §अप्सरा:, दे0§

अप्सरोनामेदम् ।

§1§ "रूपलावण्यातिशयात् पूर्वमेव पुरुषाणां चित्रमभ्युपैतीति पूर्वचिति:" §सा0 16/4§

§2§ "पूर्वचित्तिश्च पूर्वं प्रथमं पुंसां चेतस्तामभ्युपैति सौभाग्यातिशयात् ।" §उ0§

§3§ "रूपातिशयात् पूर्वमेव पुंसां चित्तमुपैतीति पूर्वचित्ति: ।"

15.35.1. यहु: §पुत्र:§

इदं सूनुवाचकं पदमस्ति ।

§1§ "यहो हे सूनो ।" §सा0 16/5§

§2§ "यहुरिति पुत्रस्य नाम ।" §उ0§

15.37.2. वस्तो: §दिनानि§

§1§ "वस्तोरहनि" §सा0 16/5§

§2§ "वस्तोः अयः सम्बन्धिनः ।" §म०§

15.49.2. मनवः §पूर्वमनुष्या=§

§1§ "मनवः पूर्वमनुष्याः ।" §सा० 16/5§

§2§ "मनवः मननप्रधानाः ।" §उ०§

§3§ "मनवः: मननप्रधाना विद्वांसः ।" §म०§

"ये विद्वांसस्ते मनवः" §8/3/6/18§ इति श्रुतेः ।" §म०§

अत्र मनुशब्दे मननार्थस्य प्राधान्यमुव्वटादिभिः प्रदर्शितमिति विशेषः ।

15.50.1. तृतीयं पृष्ठम् §स्थानविशेषः/यज्ञफलम्§

इदं यज्ञस्य फलभूतस्थानं सूचयति ।

§1§ "तृतीये पृथिवीमारभ्य गणनायां त्रिसङ्ख्यापूरके ।"

§सा० 18/6§

§2§ "तृतीये भूमिमारभ्य त्रिसङ्ख्यापूरके दिवः पृष्ठे ।" §म०§

15.53.1. देवयानाः पन्थानः §मार्गविशेषाः§

पदमिदं देवलोकप्राप्तिहेतु मार्गं सूचयति ।

§1§ "देवयानान् देवलोकप्राप्तिहेतून् पथो मार्गान् ।" §सा० 16/6§

§2§ "देवा यायन्ते प्राप्यन्ते यैस्ते देवयानास्तान् "करणाधिकरणयोश्च" इति ल्युट् । देवलोकप्राप्तिहेतून् मार्गान् कुर्वित्यर्थः ।" §म०§

उपसंहृतिः

उपसंहृतिः

§1§ अत्र यज्ञप्रक्रियासम्बद्धपदानां चयने यज्ञसाधनानि, यज्ञस्थानम्, यज्ञपात्राणि, यज्ञकर्तारः, यज्ञक्रिया, यज्ञस्वरूपम्, यज्ञफलम्, यज्ञबाधका इत्यादयो विभागाः सन्ति कल्पिताः । यज्ञसाधनेषु अजिनम्, दर्भनिर्मितवस्तूनि, समिध इत्यादीनां ग्रहणं विहितम् । यज्ञस्थाने वेदिः, परिधिः इत्यादयो ङ्गी-कृताः । यज्ञपात्रेषु स्रुक्स्रुवाध्रुवादयः सन्ति स्वीकृता/ । यज्ञकर्तृषु यजमानाध्वर्यु-प्रभृतीनां वाचकाः शब्दाः सन्ति सङ्कलिताः । यज्ञप्रक्रियायां यज्ञ कर्माङ्ग-भूतानां क्रियाविशेषाणां संग्रहो वर्तते । यज्ञफलमिति मन्त्रेषु देवतायाः स्तुत्यादि-प्रसङ्गे ऽभ्यर्थितानां वस्तूनां ग्रहणं विहितम् । यथा प्रथमाध्याय-प्रथममन्त्रे वृक्ष-शाखायाः स्तुतिप्रसङ्गे "इषे" "उर्जे" च इति पदाभ्यां प्रार्थितयोः अन्नजलयोः निर्देशः कृतः इत्यनयोर्यज्ञफलवाचकत्वं स्वीकृतम् ।

मन्त्रेषु यज्ञतो बहिः निस्सारणाय येषां सत्त्वानां निर्देशो लभ्यते ते यज्ञबाधका इति स्वीकृताः । यथा प्रथमाध्यायस्य प्रथममन्त्रे गवां मरणं स्तेना-दिभिर्न स्यादिति "मा वः स्तेन ईशत माघशंसः" इत्य र्थो वगम्यते । तथा च स्तेनः, अघशंसः इत्येतौ यज्ञबाधकसूचकावङ्गीकृतौ । एवमेव "प्रत्युष्टं रक्षः प्रत्युष्टा अरातय" इत्यस्मिन् मन्त्रभागे पठितयोः "रक्षः" "अरातिः" इत्यनयोः पदयोः यज्ञबाधकेषु सत्त्वविशेषेषु संकेतः स्वीकृतः ।

§2§ प्राचीनानां सायणाद्याचार्याणां व्याख्यानं गुरुपरम्परा-प्राप्तं शब्दार्थं विशेषेण बोधयति, क्वचित् पूर्वाचार्यव्याख्याने नुपलब्धं तथ्यं प्रस्तुय तत्र नैयून्यमपनुदति, भावं च विशदयति । दयानन्दभाष्यं खलु कल्पना-बहुलं नहि पूर्वपरम्परामेवानुसरति, नवीनं कमप्यर्थमुद्भावयितुं प्रवर्तते, क्वचिच्च

। - "इषे" इति §1/1/1§ पदव्याख्यानं द्रष्टव्यम् ।

मन्त्रपदार्थ-वाक्यार्थ-प्रकरणार्थ-विपर्ययं च दर्शयति । तथापि पदानां केषाञ्चिद् व्युत्पत्तिप्रदर्शने तस्य महत्त्वं वर्तत एव । तेन मन्त्रगतपदानामाध्यात्मिकाभिप्राया विशेषेणोक्ता इत्यपरं वैशिष्ट्यं तत्रास्ति ।

§3§ यज्ञीयपशुषु वृक्षशाखादिषु च देवतात्वं कल्पितं बहुधा दृश्यते । यथा "इषेत्वे"ति §1/1§ मन्त्रे "वायव" इत्यभिधानेन वत्सानां निर्देशो ऽस्ति ।

§4§ सायणादिपूर्वाचार्यापेक्षया महीधरस्य व्याख्यानं विशेषेण भावं विशदयति । तत्र केवलं पदार्थसंकेतो नास्ति, यः पदस्यार्थः पूर्वाचार्यैस्तेन वा कृतः, तस्योपपत्तिश्च तेन बहुधा दर्शितः । यथा "इषेत्वे"ति मन्त्रे "वायवः" इति पदस्य व्याख्याने उव्वटेन वत्सस्य वायुवदाप्यायकमित्येवोक्तम् । महीधरेण खलु व्युत्पत्तिनिर्देशपूर्वकं वायुसादृश्यं, गतिमत्त्वं, वाय्वधीनत्वमित्येते ऽर्थाः स्फुटीकृताः । तत्रैव "श्रेष्ठतमं कर्म" इत्यस्य व्याख्याने उव्वटेन "यज्ञः श्रेष्ठतमं कर्म इत्येतावदेवोक्तम् । तत्र विशेषहेतु कश्चिन्नोक्तः । महीधरेण कर्मणां चातुर्विध्यं सभेदं सलक्षणं च प्रतिपादितम् ।

§5§ "क्वचिद्यज्ञपात्रेषु द्युलोकाद्युपचारश्च दृश्यते । यथा "वसोः पवित्र"मिति §1/3/1§ मन्त्रे स्थाल्यां द्युलोकस्योपचारः "द्यौरसि" इत्यशे विहितः ।

§6§ यज्ञोपकरणवाचकेषु पदेषु कानिचित् स्वरूपसूचकानि कानिचित् कर्मसूचकानि कानिचिद् वैशिष्ट्यसूचकानि च सन्ति । यथा 1/3 मन्त्रे "शुन्वा" इति पदं यज्ञद्रव्यस्य पयसः शोधनाय प्रयुक्तो पवित्रं साधुपवनं कर्मविशिष्टं सूचयति । "सा विश्वायु"रिति §1/4§ मन्त्रे विश्वायुपदेन गवां यज्ञोपकरणरूपाणाम् आयुर्दातृत्वविशिष्टं कर्म, "विश्वकर्मा" इत्यनेन विविधकर्मसम्पादकत्वरूपं वैशिष्ट्यम्, "विश्वधायाः" इत्यनेन देवादिपोषणरूपं कर्म च सूच्यते ।

{7} कानिचिद् यज्ञोपकरणसूचकानि पदानि उपमानोपमेययो-रैक्यप्रदर्शनेन तद्गतगुणसूचकानि च दृश्यन्ते । यथा "अद्रिरसि0" {1/14} मन्त्रे अद्रिशब्दस्य पर्वतवाचकस्य प्रयोगे पर्वतवद्दार्ढ्यरूपो गुणो यज्ञोपकरणस्योलूखलस्य व्यज्यते ।

{8} कानिचित् पदानि यज्ञोपकरणानां शम्यादीनां ध्वनि-विशेषमपि सूचयन्ति । यथा "कुक्कुटो सि0" {1/16} मन्त्रे कुक्कुटशब्दः शम्या-रूपस्य यज्ञोपकरणस्य शब्दविशेषं सूचयति ।

{9} कानिचित् पदानि यज्ञोपकरणानां प्रयोगे विशेषं च सूच-यन्ति । यथा "धृष्टिरस्य0" {1/17} इति मन्त्रे प्रयुक्ते ब्रह्मवनि, सजातवनि इमे पदे ब्रह्मणा सोदरेण च पुरोडाशनिष्पत्त्यर्थं यज्ञोपकरणस्य कपालस्य ग्रहणं सूचयतः । "घृताची" पदं {2/6} जुह्वर्थे प्रयुक्तमपि तथैवास्ति ।

{10} क्वचित् यज्ञोपकरणाणां देवविशेषस्याङ्गतया निर्देशश्च दृश्यते । यथा "इन्द्रस्य दक्षिणो बाहुरिति" {1/24} पदेन स्फ्यस्य यज्ञोप-करणस्य निर्देशः कृतः । "विष्णोः स्तुपः" {2/2} इति दर्भमुष्टेः । वृत्रस्य कनीनकः {4/3} ।

{11} क्वचिद्देवविशेषनामान्येव यज्ञोपकरणार्थे प्रयुक्तानि सन्ति।

{12} क्वचिद्यज्ञोपकरणानां मृगादिरूपा भावना पि वर्तते । यथा "कृष्णो सि0" {2/1} मन्त्रे इध्मपूलके मकृष्णमृगभावना दृश्यते । "सिंह्यसि" {5/10} इति मन्त्रे उत्तरवेद्यां सिंहीभावना वर्तते ।

{13} कानिचिद् यज्ञप्रक्रियासम्बन्धिपदानि कालसम्बन्धं सूच-यन्ति । यथा "अयं ते योनि0" इति मन्त्रे {3/14} ऋत्वियशब्दो ऋतुविशेष-प्राप्तिं निर्दिशति ।

{14} कानिचिद् यज्ञफलविशेषणरूपाणि पदानि यज्ञफलानां विशेषं च दर्शयन्ति । यथा {4/5} मन्त्रे वामम्" इति पदं प्रशस्तत्वं यज्ञे सम्भावितस्य फलस्याह ।

मन्त्रेषु यमुद्दिश्य स्तुतिर्विधीयते, यस्य महिमा वा गीयते स देवशब्देन व्यपदिश्यते । स हि चैतन्यसम्पन्नः शक्तिविशिष्टश्च तत्त्वविशेषः । क्वचित् वृक्षशाखादेरपि देववन्निर्देशो लभ्यते, तत्र शाखादिकं देवप्रतिमारूपं देवताया आश्रय इति तत्त्वविद्भिर्विद्वाद्भिरुच्यते ।

देवतासम्बन्धिनां शुक्लयजुर्वेदान्तर्गतपदानामध्ययनेनेमे विशेषा उपलब्धाः -

§1§ अत्र अग्निः, सूर्यः, सोमः, वायुः, विश्वेदेवाः, चन्द्रमाः, अश्विनौ, पृथिवी, बृहस्पतिः, वसवः, विष्णुः, ओषधिः, इन्द्रः, वरुणः, द्यौः, प्रजापतिः इत्येषां देवानां विशेषेण निर्देशो ऽस्ति ।

§2§ तेषु पदेषु कानिचित् पदानि देवानां गुणान् निर्दिशन्ति । यथा "इषेत्वा" §1/1§ इति मन्त्रे सवितुः विशेषणत्वेन प्रयुक्तं देवपदं तस्य दानादिगुणयुक्तत्वं सूचयति । "वीतिहोत्रन्त्वा0" §2/4§ इति मन्त्रे पठितं "कवि"पदं वह्नेः क्रान्तदर्शनित्वं निर्दिशति । "आधत्त0" §2/33§ इति मन्त्रे "पुष्करस्रजम्" इति पदं दस्रयोर्मालालङ्0कृतिं दर्शयति । "अयं वेनः" §7/16§ मन्त्रे "वेनः" इति पदं कमनीयत्वं चन्द्रस्य सूचयति ।

§3§ कानिचित् पदानि देवानां क्रियाविशेषं सूचयन्ति । तदनुसारं "धूरसि0" §1/8§ इति मन्त्रे "धूः" पदं वह्नेर्यज्ञबाधकशमनं, "बह्नितमम्" पदं च हविःप्रापणं कर्म निर्दिशति । इत्थमन्यैः पदैरग्नेः आमस्यान्नस्य पाचनम्, वस्तूनां मांसादीनां दाहः §क्रव्यात् 1/17§, गमनम् §3/3§, शरीररक्षणम् §3/17§ विविधकर्मसाधनन्च §15/16§ कर्म सूच्यते । "इषेत्वा" इति मन्त्रे "सवितृपदं सूर्यस्य सर्वजगत्प्रेरणात्मकं कर्म सूचयति । "दिव्यो गन्धर्वः" इति मन्त्रे गन्धर्वपदं सूर्यस्य रश्मिधारणं कर्म निर्दिशति ।

§4§ कानिचित् पदानि देवानां स्थितिविशेषं वर्णयन्ति । यथा "परिधेया देवाः" इत्यनेन §2/18§ परिधौ स्थितिर्देवस्यावगम्यते । इत्थमेव गह्वरेष्ठाः, "अयः शया तनूः", "हरिशया तनूः" इत्यादीनि पदानि सन्ति ।

§5§ कानिचित् पदानि देवविशेषस्याधिपत्यं वस्तुविशेषे दर्शयन्ति। यथा- "तवेशपतिः" §2/20§ इति पदं वह्नेः स्त्रीपुंसयोः शयनविषये धिकारमाह । "व्रतपतिः" §2/28§ पदं तस्य व्रते धिकारं दर्शयति । भुवस्पतिरिति §4/34§ सोमार्थे प्रयुक्तं पदं तस्य भूतपालकतया धिकारं शंसति ।

§6§ कानिचित् पदानि देवस्य सम्बन्धविशेषं छन्दोप्रभृतिभिः कथयन्ति । यथा "शाक्वरः" §5/5§ इति पदं वायोराकाशेन सह जन्यजनकसम्बन्धमिव दर्शयति ।

आध्यात्मिकपदानामनुशीलनेनेमे भावा विस्फुरन्ति -

§1§ यानि तत्त्वानि, मनसा, शरीरेण सम्बध्यन्ते तानि इन्द्रियतत्कार्यादिवाचकानि पदान्यत्र संकलितानि सन्ति । तद्यथा- अनृतम्, सत्यम्, प्राणः, उदानः, व्यानः, इन्द्रियम्, मित्रावरुणौ, पुरुषः, प्राणाः, मनः, ईश्वरः, वाक् इत्यादीनि ।

§2§ उव्वटेन यास्केण चाध्यात्मिकप्रक्रियया थीं विशेषेणोक्तः । ततो दयानन्दो विषये स्मिन् श्रमं कृतवानिति बहुलं तद्भाष्ये आध्यात्मिकार्थनिर्देशादवगम्यते । शतपथब्राह्मणे उपनिषत्सु च स एवार्थो मुख्यः ।

पूर्वोक्त यज्ञ-देवता-ध्यात्मिकविषयेभ्यो भिन्नानां पदानां सन्निवेशश्चतुर्थे विहितः । तत्र भौतिकपदार्थाद्भिन्नानां अवशिष्टानां पदानि गृहीतानि । तद्यथा- दृप्तः, रतः, जीवः, रात्रिः, अहः, द्यावापृथिवी, आपः, जलाशयः इत्यादीनि ।

इत्थमनेनानुसन्धानेन वैदिकानुसन्धानक्षेत्रे काचिन्नवीना सरणिः प्रस्तूयमाना वर्तते । नेतः पूर्वं वेदान्तर्गतानां पदानां पृथग्वर्गीकरणपुरस्सरं केनापि विहितं विवेचनं श्रूयते । अनेनानुसन्धानकार्येण अस्यां दिशि अनेन मार्गेण वेदार्थानुसन्धानमतीवमनोहारि शब्दानामैतिहासिकं भाषाविज्ञानानुपोषकं, वेदानामर्थविषये भ्रमसन्देहाद्यपनोदकं विशिष्टं ज्ञानं वेदपारावारसुधाधारापिपासूनाममन्दमानन्दं वितरिष्यत इति मदीया वर्तते कल्पना ।

।। शुभम् ।।

परिशिष्टम्

परिशिष्टम् - 1

शोधपरिगृहीतविशिष्टपदानामध्यायक्रमानुसारिणी सूची - [माध्यन्दिनसंहिताक्रमेण]

अवधेयम् - अत्र तालिकायां प्रथमतो ध्यायानुसारं पदस्य क्रमसंख्या, ततो पदम् ततश्च मन्त्रसंख्या [अनुल्लेखे पूर्वादध्याहृता] इत्ययं क्रमः ।

प्रथमो ध्यायः

1. इषे	2. ऊर्जे	3. वायवः
4. देवः	5. सविता	6. श्रेष्ठतमं कर्म
7. अघ्न्याः	8. अनमीवाः	9. स्तेनः
10. अक्षर्म अघशंसः	11. वसुः	12. द्यौः
13. पृथिवी	14. मातरिश्वनो घर्मः	15. विश्वधा
16. परमं धाम	17. सुप्वा [3]	18. विश्वायुः [4]
19. विश्वकर्मा	20. विश्वधायाः	21. सोमः
22. व्रतपतिः [5]	23. अनृतम्	24. सत्यम्
25. रक्षः	26. अरातिः	27. धूः [8]
28. वह्नितमम्	29. रक्षः	30. यज्ञपतिः
31. वातः [9]	32. अश्विनौ	33. पूषा
34. स्वः	35. अच्छिद्रं पवित्रम् [12]	36. स्वःअग्रेगुवः
37. अग्रेपुवः	38. अग्नीषोमौ [13]	39. शर्म [14]
40. अदित्यास्त्वक्	41. अद्रिः [14]	42. वानस्पत्यः
43. वाचो विसर्जनम्	44. अग्नेस्तनूः [15]	45. हविष्कृत्
46. कुक्कुटः [16]	47. हिरण्यपाणिः	48. धृष्टिः [17]
49. आमात्	50. क्रव्यात्	51. देवयद्

52. ब्रह्मवनि	53. सजातवनि	54. ब्रह्म [18]
55. भृगवः [18]	56. धिषणा [19]	57. दिवः स्कम्भनी
58. प्राणः [20]	59. उदानः	60. व्यानः
61. प्रसितिः	62. महीनां पयः	63. ओषधीः [21]
64. घर्मः [22]	65. त्रितः [23]	66. द्वितः
67. एकतः	68. इन्द्रस्य दक्षिणबाहुः [24]	69. सहस्रभृष्टिः
70. शततेजा	71. तिग्मतेजा	72. देवयजनी
73. अररुः [26]	74. द्रप्सः [26]	75. सुक्ष्मा [27]
76. स्योना	77. विरप्शी [28]	78. जीवदानुम्
79. स्वधा	80. प्रोक्षणीः	81. शुक्रम् [31]

द्वितीयाध्यायः

1. कृष्णः [2.1]	2. आखरेष्ठः	3. वेदिः
4. बर्हिः	5. स्रुव	6. अदितिः [2.2]
7. विष्णोः स्तुपः	8. भुवपतिः	9. भुवनपतिः
10. भूतानां पतिः	11. गन्धर्वः [2.3]	12. विश्वावसुः
13. मित्रावरुणौ	14. परिधिः	15. वीतिहोत्रः [2.4]
16. कविः	17. द्युमान् [2.4]	18. सूर्यः [2.5]
19. समित्	20. वसवः	21. रुद्राः
22. आदित्याः	23. घृताची [2.6]	24. जुहूः
25. प्रियं धाम	26. प्रियं सदः	27. उपभृत्
28. ध्रुवा	29. ऋतस्य योनिः	30. यज्ञपतिः
31. यज्ञान्यः	32. वार्त्रजजित् [2.7]	33. पितरः [2.7]
34. स्वधा	35. विष्णोः स्थानम् [2.8]	36. इन्द्रः
37. होत्रम् [2.9]	38. दूत्यम्	39. द्यावापृथिवी

40. स्विष्टकृत्	41. ज्योतिः	42. इन्द्रः {2.10}
43. इन्द्रियम्	44. आग्नीध्रः	45. सविता {2.12}
46. बृहस्पतिः	47. ब्रह्मा	48. जूतिः {2.13}
49. अग्नीषोमौ {2.15}	50. वाजः	51. मित्रावरुणौ {2.16}
52. वयः	53. मरुतः	54. पृषतीः
55. वशापृश्निः	56. चक्षुष्पा	57. पणिः {2.17}
58. संस्रवभागाः {2.18}	59. प्रस्तरेष्ठाः	60. परिधेया देवाः
61. अदग्धायुः {2.20}	62. अशीतमः	63. दिद्युः
64. सवेशपतिः	65. पितुः	66. योनिः
67. सरस्वती	68. यशोभगिनी	69. वेदः {2.21}
70. गातुविदः {2.21}	71. गातुः	72. मनसस्पतिः
73. दिव्यं नभः {2.22}	74. त्वष्टा {2.24}	75. जागतं छन्दः {2.25}
76. त्रैष्टुभं छन्दः	77. गायत्रं छन्दः	78. स्वयम्भूः {2.26}
79. श्रेष्ठो रश्मिः	80. वर्चोदाः	81. गृहपतिः {2.27}
82. व्रतपतिः {2.28}	83. कव्यवाहनः {2.29}	84. सोमः
85. असुराः {वेदिषदः}	86. स्वधा {2.30}	87. परापुरः
88. निपुरः	89. रसः {2.32}	90. शोषः
91. जीवः	92. स्वधा	93. घोरः
94. मन्युः	95. पुष्करस्रजम् {2.33}	96. पुरुषः
97. ऊर्जम् {2.34}	98. अमृतम्	99. कीलालम्
100. परिस्रुतम् ।		

तृतीयो ध्यायः

1. अतिथिः {3.1}	2. शोचिः {3.2}	3. जातवेदाः
4. अङ्गिरसः {3.3}	5. यविष्ठ्यः	6. हर्यतः {3.4}

7. भूः (3.5)	8. भुवः	9. स्वः
10. देवयजनी	11. गौः (3.6)	12. पृश्निः
13. माता	14. पिता	15. स्वः
16. रोचना (3.7)	17. महिषः	18. त्रिंशद्धाम (3.8)
19. पतङ्गः	20. वस्तोः	21. द्युः
22. ज्योतिः (3.9)	23. इन्द्रवती (3.10)	24. उषा
25. दिवःमूर्धा (3.12)	26. ककुत्	27. पृथिव्याःपतिः
28. अपां रेतांसि	29. ऋत्वियो योनिः (3.14)	30. अप्नवानः (3.15)
31. भृगवः	32. चित्रम्	33. विभ्वम् (3.15)
34. शुक्रम् (3.16)	35. अह्नयः	36. सहस्राः
37. ऋषिः	38. चित्रावसुः (3.18)	39. अन्धः (3.20)
40. गहः	41. ऊर्जम्	42. लोकः (3.21)
43. क्षयः	44. संहिता (3.22)	45. विश्वरूपी
46. दोषावस्तः	47. ऋतस्य दीदिविः (3.23)	48. दमः
49. सूपायनः (3.24)	50. ~~सूपायनः (3.24)~~ अन्तमः (3.25)	51. ~~अन्तमः (3.25)~~ वरूथ्यः
52. वसुः	53. वसुश्रवाः	54. शोचिष्ठः (3.26)
55. इडा (3.27)	56. अदितिः	57. काम्या
58. सोमानम् (3.28)	59. स्वरणम्	60. ब्रह्मणस्पतिः
61. कक्षीवान्	62. औशिजः	63. रेवान् (3.29)
64. अमीवहा	65. वसुविद् (3.29)	66. पुष्टिवर्धनः
67. तुरः	68. शंसः (3.30)	69. धूर्तिः
70. मर्त्यः	71. द्युक्षम् (3.31)	72. वारणाः (3.32)
73. स्तरीः (3.34)	74. सविता (3.35)	75. भर्गः
76. दूडभः (3.36)	77. भूर्भुवःस्वः (3.37)	78. नर्यः
79. अथर्यः	80. शंस्यः	81. विश्ववेदाः (3.38)
82. वसुवित्तमः	83. सम्राद	84. पुरीष्यः (3.40)

85. क्षेम [3.43]
86. शयुः
87. शिवम्
88. शग्मम्
89. प्रधासिनः [3.44]
90. रिशादसः
91. करम्भः
92. इन्द्रियम् [3.45]
93. शुष्मिन् [3.46]
94. मीढुः
95. मयोभूः [3.47]
96. सचाभूः
97. अवभृथः [3.48]
98. निचुम्पुणः
99. निचेरुः
100. पुरूरवाः
101. वम्ना [3.49]
102. शतक्रतुः
103. निहारः [3.50]
104. सुसन्दृशम् [3.52]
105. मघवा
106. पूर्णबन्धुरः
107. वशाः
108. मनः [3.53]
109. नाराशंसः स्तोमः
110. मन्म
111. क्रतुः [3.54]
112. दैव्यो जनः [3.55]
113. दक्षः
114. रुद्रः [3.57]
115. अम्बिका
116. आखुः
117. पशुः
118. त्र्यम्बकः [3.58]
119. भेषजम् [3.59]
120. सुगन्धिः [3.60]
121. पुष्टिवर्धनः
122. मृत्युः
123. अमृतम्
124. पतिवेदनः
125. मूजवान् [3.61]
126. अवततधन्वा
127. पिनाकावसः
128. कृत्तिवासाः
129. त्र्यायुषम् [3.62]
130. जमदग्निः
131. कश्यपः
132. स्वधितिः [3.63]

चतुर्थोऽध्यायः

1. रिपुम् [2]
2. दीवा
3. तपः
4. वृत्रस्य कनीनकः [3]
5. महीनां पयः
6. चित्पतिः [4]
7. वाक्पतिः
8. पवित्रम्
9. पवित्रपतिः
10. वामम् [5]
11. आकूतिः [7]
12. प्रयुज्
13. मेधा
14. पूषा
15. विश्वशम्भुवः
16. शिल्पम् [9]
17. ऋक्
18. साम
19. ऊर्ध्व [10]
20. नीविः
21. इन्द्रस्य योनिः

22. मनोजाता: §11§ 23. मनोयुजः 24. दक्षक्रतवः
25. श्वात्रा: §12§ 26. सुशेवा 27. ऋतावृधः
28. अंहोमुचः §13§ 29. स्वाहाकृता: 30. भ्राट् §17§
31. जूः 32. शुक्रः §17§ 33. यन्त्रम् §18§
34. चित् §19§ 35. मनः 36. धीः
37. क्षत्रिया 38. उभयतः शीर्ष्णी 39. अध्यवः
40. ओण्योः §25§ 41. तोतः §22§ 42. अमतिः भा
43. सवीमा 44. सुमित्रधः §27§ 45. मित्रम्
46. स्वानः 47. भ्राजः 48. अङ्घारिः
49. बम्भारिः 50. हस्तः 51. सुहस्तः
52. कृशानुः 53. अमृतम् §28§ 54. वृषभः §30§
55. सम्राट् 56. उस्रियाः §31§ 57. अर्वन्
58. एतशः §32§ 59. उस्रौ §33§ 60. धूर्षाहौ
61. अनश्रू 62. अवीरहणौ 63. ब्रह्मचोदनौ
64. भद्रः §34§ 65. भुवस्पतिः 66. परिपरिणः
67. वृकाः 68. अघायवः 69. मित्रावरुणः §35§
70. दूरेदृक् 71. केतुः 72. दिवस्पुत्रः
73. स्वाम्भसर्जनी §36§ 74. ऋतसदनी 75. वरुणः
76. ऋतसदनम् §36§ 77. गयस्फानः §37§ 78. प्रतरणः
79. सुवीरः 80. अवीरहा

पञ्चमोऽध्यायः

1. अग्नेस्तनूः §1§ 2. सोमस्य तनूः 3. अतिथिः
4. श्येनः 5. अग्नेः जनित्रम् §2§ 6. वृषणौ
7. उर्वशी 8. पुरुरवा 9. गायत्रं छन्दः

10. त्रैष्टुभं छन्दः	11. जागतं छन्दः	12. समनसौ ॥3॥
13. सचेतसौ	14. अरेपसौ	15. ऋषीणां पुत्रः ॥4॥
16. अभिशस्तिपावा	17. आपतिः ॥5॥	18. परिपतिः
19. तनूनप्ता	20. शाक्वरः	21. शक्मनः
22. अभिशस्तिपा	23. अनभिशस्तेन्यम्	24. व्रतपतिः ॥6॥
25. दीक्षापतिः	26. तपस्पतिः	27. अंशुः ॥7॥
28. एकधनवित्	29. सुत्या	30. अयःशया तनूः ॥8॥
31. वर्षिष्ठा	32. गह्वरेष्ठा	33. रजःशया तनूः
34. हरिशया तनूः	35. तप्तायनी ॥9॥	36. वित्तायनी
37. द्वितीया पृथिवी	38. तृतीया पृथिवी	39. सिंही ॥10॥
40. सपत्नसाही	41. घोषः ॥11॥	42. वसुः
43. प्रचेताः	44. रुद्रः	45. मनोजवाः
46. पितरः	47. विश्वकर्मा	48. सिंही ॥12॥
49. आदित्यवनिः	50. ब्रह्मवनिः	51. सुक्षत्रवनिः
52. सुप्रजावनी	53. रायस्पोषवनी	54. ध्रुवक्षित् ॥13॥
55. अच्युतक्षित्	56. अग्नेः पुरीषम्	57. होत्राः ॥14॥
58. वयुनावित्	59. मनः	60. धीः
61. पांसुरः ॥15॥	62. इरावती ॥16॥	63. धेनुमती
64. सूयवसिनी	65. मनवेदशस्या	66. देवश्रुतौ ॥17॥
67. पार्थिवानि ॥18॥	68. उरुगायः	69. मृगः ॥20॥
70. भीमः	71. कुचरः	72. गिरिष्ठाः
73. रराटम् ॥21॥	74. श्नप्त्रे	75. स्यूः
76. ध्रुवः	77. नारी ॥22॥	78. बृहद्रवा
79. रक्षोहा ॥23॥	80. बलगहनः	81. निष्ट्यः ॥23॥
82. अमात्यः	83. वलगः	84. समानः
85. असमानः	86. सबन्धुः	87. सजातः

88. स्वराट् [24]	89. सपत्नहा	90. सत्रराट्
91. अभिमातिहा	92. जनराट्	93. सर्वराट्
94. पितृषदनम् [26]	95. रक्षि वयतान् [27]	96. इन्द्रस्य छदिः [28]
97. विश्वजनस्य छाया [28]	98. गिर्वणः [29]	99. वृद्धायुः
100. अनुवृद्धयः	101. विभुः [31]	102. प्रवाहणः
103. श्वात्रः	104. तुथः	105. हव्यवाहनः
106. विश्ववेदाः	107. उशिक् [32]	108. कविः
109. अङ्घारिः	110. बम्भारिः	111. अवस्यूः
112. दुवस्वान्	113. शुन्ध्यूः	114. मार्जालीयः
115. सम्राट्	116. कृशानुः	117. परिषद्यः
118. तमः	119. प्रतक्वा	120. भुवनः
121. हव्यसूदनः	122. ऋतधामा	123. स्वर्ज्योतिः
124. समुद्रः [33]	125. विश्वव्यचा	126. अजः
127. एकपात्	128. अहिः	129. बुध्न्यः
130. अध्वपतिः	131. सगरः [34]	132. विश्वरूपं ज्योतिः [35]
133. तनूकृतः	134. वयुनम् [36]	135. जुहुराणम्
136. वनस्पतिः [42]	137. ओषधिः	

षष्ठोऽध्यायः

1. अग्रेणीः [2]	2. स्वावेशः	3. परमं पदम् [5]
4. चक्षुः	5. दैवीः विशः [6]	6. दिवः सूनुः
7. उपावीः [7]	8. आतानः [12]	9. ऐन्द्रः प्राणः [20]
10. ऐन्द्रः उदानः	11. हविष्मतीरापः [23]	12. हुत [25]
13. मनः	14. द्यौः	15. सूर्यः
16. होत्रा	17. अपान्नपात् [27]	18. इन्द्रियावान्

19. शुक्रपः
20. कार्षिः (28)
21. राधोगूर्ताः (34)

सप्तमो ध्यायः

1. वाचस्पतिः (1)
2. नियुतः (7)
3. विश्ववारः
4. कशा (11)
5. माध्वी
6. ज्येष्ठतातिम् (12)
7. बर्हिषदम्
8. स्वर्विदम्
9. धुनिः
10. शण्डः
11. संस्कृतिः (14)
12. होत्राः (15)
13. वेनः (16)
14. पृश्निगर्भः
15. ज्योतिर्जरायुः
16. रजसो विमानः
17. मर्कः
18. विपः (17)
19. शच्या
20. शर्या
21. तुविनृम्णः
22. उक्थाव्यम् (22)
23. दिवः मूर्धा (24)
24. पृथिव्या अरतिः
25. वैश्वानरः
26. कविः
27. सम्राट्
28. अतिथिः
29. ध्रुवक्षितिः (25)
30. अच्युतक्षित्तमः
31. द्रप्सः (26)
32. क्रतुदक्षाभ्याम् (27)
33. नमोवरेण्यम्
34. ओमासः (33)
35. चर्षणीधृतः
36. शर्याति (35)
37. अकवारिम् (36)
38. विश्वासाट्
39. शासः
40. आचर्षणिप्राः (39)
41. द्विबर्हाः
42. अमिनः
43. जातवेदाः (41)
44. केतवः
45. तुचः (45)
46. विश्ववेदाः
47. चन्द्रदक्षिणाः
48. सुधातुदक्षिणम् (46)

अष्टमो ध्यायः

1. उरुगायः (1)
2. स्तरीः (2)
3. इन्द्रियम् (3)
4. अमृतम्
5. वरिवोवित् (4)
6. विवस्वान् (5)
7. अरपः
8. वनोधाः (7)
9. भगः
10. सुशर्मा (8)
11. सुप्रतिष्ठानः
12. बृहदुक्थः

13. देवानां परमं {9}
14. हरिः {11}
15. हारियोजनः
16. अश्वसनिः {12}
17. गोसनिः {12}
18. स्तुतस्तोमः
19. शस्तोक्थः
20. असुः {19}
21. घर्मः
22. सर्ववीरः {22}
23. पुरुदस्मः {30}
24. विशुल्पः
25. एकपदी
26. द्विपदी
27. त्रिपदी
28. चतुष्पदी
29. दिवो विमहसः
30. वग्नुः {33}
31. षोडशी
32. कश्यपा {34}
33. अप्रतिधृष्टशवः {35}
34. प्रजापतिः {36}
35. त्रीणि ज्योतींषि
36. षोडशी
37. स्वधा {38}
38. चमूसुतम् {39}
39. केतुः {40}
40. रश्मिः
41. इडा {43}
42. रन्ता
43. हव्या
44. काम्या
45. चन्द्रा
46. ज्योतिः
47. अदितिः
48. सरस्वती
49. मही
50. विश्रुतिः
51. वाचस्पतिः {45}
52. विश्वकर्मा
53. मनोजूः
54. विश्वशम्भूः
55. साधुकर्मा
56. प्रेशी {48}
57. कुकूननाः
58. भन्दनाः
59. मदिन्तमा
60. मधुन्तमा
61. ककुभम् {49}
62. वृषभः
63. शुक्रः
64. उशिक् {50}
65. दमा {53}
66. परमेष्ठी {54}
67. प्रजापतिः
68. अन्धः
69. अच्छेतः
70. सविता
71. विश्वकर्मा
72. पूषा
73. शिपिविष्टः {55}
74. नरन्धिषः
75. सोमः {56}
76. वरुणः
77. अग्निः
78. इन्द्रः
79. अथर्वा
80. अंशुः {57}
81. आप्रीतपाः
82. क्षीरश्रीः
83. मन्थी
84. सक्तुश्रीः
85. विश्वेदेवाः {58}
86. अशुः
87. रुद्रः
88. वातः
89. नृचक्षाः
90. भक्षः

91. पितरः	92. नाराशंसाः	93. सिन्धुः {59}
94. सलिलः	95. समुद्रः	

नवमोऽध्यायः

1. गन्धर्वः {1}	2. केतपूः	3. ध्रुवसत् {2}
4. नृषत्	5. मनःसत्	6. अप्सुषत्
7. घृतसत्	8. व्योमसत्	9. पृथिवीसत्
10. अन्तरिक्षसत्	11. उद्वयसम् {3}	12. अपां रसस्य रसः
13. ऊर्जाहुतयः {4}	14. विशिप्रियाः	15. वाजसाः
16. मनः {7}	17. गन्धर्वाः	18. दधिक्राः
19. मितद्रुवः {16}	20. स्वर्काः	21. आपिः {20}
22. स्वापिः	23. अपिजः	24. क्रतुः
25. विनंशिनः	26. वैनंशिनः	27. पुरोहिताः {23}

दशमोऽध्यायः

1. अर्थेतः {3}	2. परिवाहिणीः	3. अपांगर्भः
4. सूर्यत्वचसः {4}	5. मान्दाः	6. व्रजक्षितः
7. वाशा	8. शविष्ठा	9. शक्वरी
10. जनभृत्	11. विश्वभृत्	12. अग्निः {5}
13. सोमः	14. सविता	15. सरस्वती
16. पूषा	17. बृहस्पतिः	18. इन्द्रः
19. घोषः	20. श्लोकः	21. अंशः
22. भगः	23. अर्यमा	24. तपोजाः {6}
25. अपस्यः {7}	26. अपांशिशुः	27. आविर्मर्याः {9}
28. आवित्तः	29. दन्दशूकाः {10}	30. त्रिवृत् स्तोमः

31. गर्तम् {16} 32. अदितिः 33. दितिः
34. पर्वतः {19} 35. नौः 36. अहिः
37. बुध्न्यः 38. हंसः {24} 39. शुचिषत्
40. वसुः 41. अन्तरिक्षसत् 42. होता
43. वेदिषत् 44. अतिथिः 45. दुरोणसत्
46. नृषत् 47. वरसत् 48. ऋतसत्
49. अब्जा 50.गोजा 51. अद्रिजा
52. ऋतम् 53. बृह० {25} 54. अभिभूः {28}

एकादशो ध्यायः

1. बृहज्ज्योतिः {3} 2. देवाव्यम् {8} 3. नारी {10}
4. तवस्तरम् {14} 5. मर्यश्रीः {24} 6. आशुशुक्षणिः {27}
7. पाथ्यः {34} 8. वृषा 9. अदब्धव्रतप्रमतिः {36}
10. मातरिश्वा {39} 11. सुशुक्वनिः {41} 12. वीड्वङ्गः {44}
13. पाजसा {49} 14. सिनीवाली {56} 15. कुरीरा
16. स्वौपशा 17. वैश्वानराः {58} 18. चर्षणीधृत् {62}
19. आकूतिः {66} 20. दक्षन्नः {70} 21. सर्पिरासुतिः
22. रोहिदश्वः {72} 23. उपजिह्विका {74} 24. वम्रः
25. प्रतिवेशाः {75} 26. इरंमदः {76} 27. बृहदुक्थम्
28. मलिम्लवः {78} 29. स्तेनाः {79} 30. तस्कराः
31. अघायवः 32. ब्रह्म {81}

द्वादशो ध्यायः

1. रुक्मः {1} 2. सुरेताः 3. देवाः {2}
4. द्रविणोदाः 5. रूपाणि {3} 6. सुपर्णः {4}

7. गरुत्मान्	8. द्यौः (6)	9. धामा
10. तन्या (7)	11. अभ्यावर्त्तिन्	12. आवृत् (8)
13. उपावृत्	14. विश्वपन्या (10)	15. च्यौत्नानि (15)
16. शुक्रज्योतिः	17. स्वाधीः	18. महिषाः (20)
19. पञ्च जनाः (23)	20. नृमणाः (18)	21. तृतीयं रजः (20)
22. नृचक्षाः (20)	23. सोमगोपाः (22)	24. वसुः (22)
25. अद्रिः (23)	26. विश्वस्य केतुः	27. भुवनस्य गर्भः
28. उशिक् (24)	29. अरतिः	30. सुमेधाः
31. पावकः	32. भद्रशोचिः (26)	33. अपूपम् (26)
34. सौश्रवसम् (27)	35. उशिजः (28)	36. वृजम्
37. चित्तिः (31)	38. भरतः (34)	39. संज्ञानम् (46)
40. कामधरणम्	41. अर्णवः (48)	42. नृचक्षाः
43. इडा (51)	44. पुरुदंसः	45. चित् (53)
46. सुददोहसः (55)	47. देवानां जन्म (55)	48. विशः
49. पृश्नयः	50. आरोचने	51. समुद्रव्यचसम् (56)
52. मनः (58)	53. चित्तम्	54. निर्ऋतिः (63)
55. आयुः (65)	56. निवेशनः (66)	57. सङ्गमनः
58. सत्यधर्मा	59. विश्वारूपा	60. शुनासीरा (69)
61. पवीरवत् (71)	62. सोमपित्सरु (71)	63. प्रफर्व्यम्
64. पृस्थावत्	65. अघ्न्याः (73)	66. देवयानाः
67. ज्योतिः	68. तमः	69. यवाः (73)
70. अयवाः	71. अरूणीः	72. इडा
73. देवेभ्यः (75)	74. बभ्रूणाम्	75. त्रियुगम्
76. गोभाजः (79)	77. ~~अमीवचातन~~अश्वत्थः	78. ~~निष्कृतिः (83)~~ रक्षोहा (80)
79. अमीवचातनः	80. निष्कृतिः (83)	81. जीवगृभः (85)
82. उग्रः (86)	83. मध्यमशीः	84. किकीदिविः (87)

85. निहाका
86. पड्वीशः (90)
87. सोमराज्ञीः (92)
88. शतविचक्षणाः
89. बलासः (97)
90. उपचित्
91. पाकारुः
92. शतवल्शा (100)
93. उपस्तयः (101)
94. चन्द्राः (102)
95. सत्यधर्मा
96. शुक्रम् (104)
97. चन्द्रम् (104)
98. ऋतस्य योनिम् (105)
99. महिषः
100. श्रवः (106)
101. वयः
102. विभावसुः
103. उक्थ्यम् (106)
104. बृहद्भानुः
105. पावकवर्चाः (107)
106. शुक्रवर्चाः
107. अनूनवर्चाः
108. ऊर्जोनपात् (108)
109. जातवेदः
110. भूरिवर्पसः
111. चित्रोतयः
112. वामजाताः
113. ऋतावानम् (111)
114. श्रुत्कर्णम्
115. सप्रथस्तमम्
116. अमृतम् (113)
117. मदिन्तमः (114)
118. वत्सः (115)
119. अङ्गिरस्तमः (116)

त्रयोदशो ऽध्यायः

1. ब्रह्म (3)
2. वेनः
3. बुध्न्याः
4. उपमा
5. सत्
6. असत्
7. ~~असत्~~ हिरण्यगर्भः (4)
8. पृथिवी
9. द्रप्सः (5)
10. सप्त होत्राः
11. सर्पाः (6)
12. यातुधानः (7)
13. रोचना (8)
14. पाजः (9)
15. अभवान्
16. भ्रमातः (10)
17. पतङ्गाः (10)
18. स्पशः (11)
19. अघशंसः
20. व्यथिः
21. यातुजूनाम् (13)
22. रजः (15)
23. नियुद्भिः
24. स्वर्षाम्
25. समुद्रः (16)
26. सुपर्णः
27. काण्डम् (20)
28. वरुः
29. अग्निः (25)
30. अषाढा
31. मधुः (29)
32. प्रजाः (30)
33. अच्छिन्नपत्राः (30)

34. समुद्राः (31)   35. सम्राट् (35)   36. स्वराट्
37. सारस्वतो उत्सौ   38. मन्युः (36)   39. धेना (38)
40. ज्योतिः (50)   41. वाजिनम् (39)   42. वर्चः
43. रुक्मः   44. आदित्यः (41)   45. गर्भः
46. हरः   47. अहिर्बुध्न्यम् (42)   48. परमं व्योम
49. इन्दुः (543)   50. भुरण्युः   51. पूर्वचित्तिः
52. त्वष्टुः वरूत्री (44)   53. असुरः   54. माया
55. शोकः (45)   56. हेडः   57. सहस्राक्षः (47)
58. द्विपात् पशुः   59. मयुः   60. शुक्
61. एकशफःपशुः (48)   62. सरिरम् (49)   63. ऊर्णायुः (50)
64. शरभः (51)   65. भस्म (53)   66. अपां ज्योतिः
67. अर्णवः   68. सदनम्   69. सरिरम्
70. समुद्रः   71. क्षयः   72. सधिः
73. सधस्थम्   74. योनिः   75. पुरीषम्
76. पाथः   77. पुरः (54)   78. प्राणः
79. वसिष्ठऋषिः   80. विश्वकर्मा (55)   81. मनः (55)
82. स्वारम्   83. अन्तर्यामः   84. पञ्चदशस्तोमः
85. भरद्वाजऋषिः   86. विश्वव्यचाः (56)   87. जगतीच्छन्दः (56)
88. ऋक्समम्   89. शुक्रः   90. सप्तदश स्तोमः
91. जमदग्निर्ऋषिः   92. स्वः (57)   93. स्व ऐडम्
94. मन्थी   95. एकविंशस्तोमः   96. वैराजम्
97. विश्वामित्रऋषिः (57)   98. मतिः (58)   99. निधनवत्
100. आग्रयणः   101. त्रिणवत्रयः   102. त्रिंशः
103. शाक्वरः   104. रैवतः   105. विश्वकर्मा ऋषिः ।

चतुर्दशो ध्यायः

1. ध्रुवक्षितिः ॥1॥ 2. ध्रुवयोनिः 3. उरव्यस्य केतुः
4. कुलायिनी ॥2॥ 5. पुरन्धिः 6. दक्षपिता ॥3॥
7. पृथिव्याः पुरीषम् ॥4॥ 8. अप्सः 9. स्तोमपृष्ठा
10. विधा ॥7॥ 11. आदित्याः पृष्ठम् 12. वयोनाधाः
13. मूर्धा वयः ॥9॥ 14. प्रजापतिः 15. क्षत्रं वयः
16. मयन्दः 17. विष्टम्भः 18. अधिपतिः
19. कविश्वकर्मा 20. परमेष्ठी 21. वस्तः
22. विवलम् 23. वृष्णिः 24. विशालम्
25. तन्द्रम् 26. अनाधृष्टम् 27. ह छदिः
28. पृष्ठवाड् 29. बृहती 30. ककुप्
31. पङ्क्तिः ॥10॥ 32. त्र्यविः 33. दित्यवाद्
34. पन्चाविः 35. त्रिवत्सः 36. तुर्यवाद्
37. मा ॥18॥ 38. प्रमा 39. प्रतिमा
40. अग्नीवयः 41. यन्त्री ॥22॥ 42. यमनी
43. आशुः ॥23॥ 44. भान्तः 45. व्योमा
46. धरुणः 47. प्रतूर्तिः 48. अभीवर्तः
49. वर्चः 50. संभरणः 51. योनिः
52. गर्भः 53. ओजः 54. क्रतुः
55. प्रतिष्ठा 56. ब्रध्नस्य विष्टपम् 57. स्वाराज्यम्
58. नाकः 59. विवर्तः 60. धर्त्रम्
61. चतुष्टोमः 62. यवाः ॥26॥ 63. ऋभुः
64. ब्रह्मणस्पतिः ॥28॥ 165.

पञ्चदशो ध्यायः

1. त्रिवरूथः §1§
2. उद्भिः
3. षो डशीस्तोमः §3§
4. चतुश्चत्वारिंशः
5. अग्नेः पुरीषम्
6. अप्सः
7. स्तोमपृष्ठा
8. एवश्छन्दः §4§
9. वरिवश्छन्दः
10. शम्भूश्छन्दः
11. परिभूश्छन्दः
12. आच्छच्छन्दः
13. मनश्छन्दः
1§. व्यचश्छन्दः
15. सिन्धुश्छन्दः
16. समुद्रश्छन्षः
17. सरिरंछन्दः
18. ककुप्छन्दः
19. त्रिककुप्छन्दः
20. काव्यं छन्दः
21. अङ्0कुपं छन्दः
22. अक्षरपङ्0क्तिश्छन्दः
23. पदपङ्0क्तिश्छन्दः
24. विष्टारपङ्0क्तिश्छन्दः
25. क्षुरोभ्रजश्छन्दः
26. आच्छच्छन्दः §5§
27. प्रच्छच्छन्दः
28. संयच्छन्दः
29. वियच्छन्दः
30. बृहच्छन्दः
31. रथन्तरं छन्दः
32. निकायश्छन्दः
33. विवधश्छन्दः §5§
34. गिरश्छन्दः
35. भ्रजश्छन्दः
36. संस्तुप्छन्दः
37. अनुष्टुप्छन्दः
38. वयश्छन्दः
39. वयस्कृच्छन्दः
40. विस्पर्धाश्छन्दः
41. विशालं छन्दः
42. छदिश्छन्दः
43. दूरोहणं छन्दः
44. तन्द्रं छन्दः
45. अङ्0काङ्0कं छन्दः
46. रश्मिः §6§
47. सत्यम्
48. प्रेतिः
49. अन्वितिः
50. सन्धिः
51. प्रतिधिः
52. विष्टम्भः
53. प्रवा
54. अनुया
55. उशिक्
56. प्रकेतः
57. तन्तुः §7§
58. संसर्पः
59. उत्तमम्
60. वयोधा
61. अभिजित्
62. प्रतिपत् §8§
63. अनुपत्
64. संपत्
65. त्रिवृत् §9§
66. प्रवृत्
67. विवृत्
68. सवृत्
69. अक्रम्
70. संक्रमः
71. उत्क्रमः
72. उत्क्रान्तिः

73. अधिपतिः	74. राज्ञी ‖10‖	75. प्रथमजा ऋषयः
76. विधर्ता	77. अधिपतिः	78. नाकस्य पृष्ठम्
79. वसवः	80. विराद ‖11‖	81. रुद्राः
82. इन्द्रः	83. पन्चदशस्तोमः	84. उक्थम् प्रउगम्
85. उक्थम्	86. सम्राद ‖12‖	87. आदित्याः
88. वरुणः	89. स्वराद ‖13‖	90. मरुतः
91. सोमः	92. निष्केवल्यम्	93. वैराजं साम
94. अधिपत्नी ‖14‖	95. बृहती दिक्	96. विश्वेदेवाः
97. बृहस्पतिः ‖14‖	98. त्रिणवत्रयस्त्रिंशौ स्तोमौ	99. शाक्वरं साम
100. रैवतं साम	101. हरिकेशः ‖15‖	102. सूर्यरश्मिः
103. रथगृत्सः	104. रथौजाः	105. सेनानीः
106. ग्रामणीः	107. पुन्जिकस्थला	108. क्रतुस्थला
109. दङ्क्ष्णवः पशवः	110. हेतिः	111. प्रहेतिः
112. विश्वकर्मा ‖16‖	113. रथस्वनः	114. रथे चित्रः
115. मेनका	116. सहजन्या	117. यातुधानाः
118. रक्षांसि	119. विश्वव्यचाः ‖17‖	120. रथप्रोतः
121. असमरथः	122. प्रम्लोचन्ती	123. अनुम्लोचन्ती
124. संयद्वसुः ‖18‖	125. तार्क्ष्यः	126. अरिष्टनेमिः
127. विश्वाची	128. घृताची	129. अर्वाग्वसुः ‖19‖
130. सेनजित्	131. सुषेणः	132. उर्वशी
133. पूर्वचित्तिः	134. वृषभः ‖25‖	135. वृषा
136. गविष्ठिरः	137. जागृविः ‖27‖	138. घृतप्रतीकः
139. दिविस्पृक्	140. भरतः	141. अङ्गिरसः ‖28‖
142. गुहाहितः	143. क्षितीनां वषिष्ठः ‖29‖	144. ऊर्जोनप्ता
145. वृषा ‖30‖	146. अर्यः	147. इडस्पदम्
148. चित्रश्रवस्तमः ‖31‖	149. शोचिष्केशः	150. पुरुप्रियः

151. ऊर्जोनपात् [32]	152. चेतिष्ठः	153. अरतिः
154. स्वध्वरः	155. विश्वस्य दूतः	156. अमृतः
157. सुब्रह्मा [34]	158. सुग्मी	159. वसवः
160. यहुः [35]	161. पूर्वणीकः [36]	162. वसुः
163. तिग्मजम्भः [37]	164. वस्तोः	165. वसुः [41]
166. सुचन्द्रः [43]	167. सवसस्पतिः	168. ओहाः [44]
169. दक्षः [45]	170. अर्कः [46]	171. स्वर्णज्योतिः
172. तपः [49]	173. गनवः	174. तीर्णबर्हिः
175. तृतीयं पृष्ठम् [50]	176. वाचो मध्यम् [51]	177. भुरण्युः
178. चेकितानः	179. पृतन्यवः	180. देवयानाः पन्थानः [53]
181. पितरौ	182. इष्टापूर्ते [54]	183. संवरणम् [62]
184. समुद्रः	185. समुद्रः	186. प्रमा
187. प्रतिमा	188. उन्मा ।	

—:।[ॐ]।:—

परिशिष्टम् - 2

अनुसन्धानकार्ये आधाररूपेणाधीतानामुद्धृतांशानां सामान्यतया पठितानां च ग्रन्थानां सूची -

क्रमसं०	ग्रन्थनाम	संकेतः
1 -	अथर्ववेदसंहिता, जयदेवविद्यालङ्कारकृत भाषाभाष्ययुता	अ० वे०
2 -	अथर्ववेदसंहिता, सायणभाष्ययुता	अ० सं०
3 -	अर्थसङ्ग्रहः, लौगाक्षिभास्करकृतः	अ० सं०
4 -	ऋग्वेदसंहिता, जयदेवविद्यालङ्कारकृत भाषाभाष्ययुता	ऋ० सं०
5.-	ऋग्वेदादिभाष्यभूमिका, दयानन्दकृता	ऋ० भा० भू०
6 -	कात्यायनश्रौतसूत्रम् (तस्य भूमिका)	का० श्रौ० सू०
7 -	कातीयेष्टिदीपकः, नित्यानन्दपर्वतीयः	का० दी०
8 -	चतुर्वेदभाष्यभूमिका सङ्ग्रहः (सायणाचार्यस्य)	च० भा० भू०
9 -	चरणव्यूहः, डॉ० श्रीकिशोर मिश्रसम्पादितः	च० व्यू०
10-	तैत्तिरीयसंहिता	तै० सं०
11 -	तैत्तिरीयोपनिषद् (शाङ्करभाष्ययुता)	तै० उ०
12 -	दर्शपौर्णमासपद्धतिः (लिखिता)	द० पौ० प०
13 -	निरुक्तम् (यास्ककृतम्, दुर्गवृत्तिसहितम्)	नि०
14 -	पारस्करगृह्यसूत्रम्, कर्क-हरिहरभाष्ययुतम्	पा० गृ०
15 -	बृहद्देवता (शौनकीया)	बृ० दे०
16 -	मनुस्मृतिः	म० स्मृ०
17 -	यज्ञतत्त्व, डॉ० गोपीनाथकविराज	य० त०
18 -	यज्ञमीमांसा, वेणीराम गौड	य० मी०
19 -	याज्ञवल्क्यशिक्षा, अमरनाथशास्त्रिणा सम्पादिता	या० शि०

20 - वेदशाखापर्यालोचनम्, डॉ० श्रीकिशोरमिश्रकृतः — वे० प०

21 - वेदार्थपारिजातः, करपात्रस्वामिकृतः — वे० पा०

22 - वैदिकपदानुक्रमकोषः, विश्वबन्धुः — वै० को०

23 - वैदिकवाङ्मय का इतिहास, भगवद्दत्तः — वै० वा० इ०

24 - वैदिकविज्ञानमीमांसा, वेणीरामशर्मा गौडः — वै० वि० मी०

25 - वैदिकसाहित्य, रामगोविन्दत्रिवेदी — वै० सा०

26 - सम्प्रदायप्रबोधिनी शिक्षा, डॉ० गोपालचन्द्रमिश्रकृता — स० प्र० शि०

27.- सामवेदसंहिता — सा० सं०

28 - शतपथब्राह्मणम् {सायणभाष्यसहितम्} {प्रथमकाण्डम्} — श० ब्रा०

29 - श्रीमद्भगवद्गीता {शाङ्करभाष्ययुता — गी० शा० भा०

30.- शुक्लयजुः प्रातिशाख्यम्, कात्यायनकृतम् — शु० प्रा०

31 - शुक्लयजुर्वेदस्य काण्वसंहितायाः सायणाचार्यकृतम् भाष्यम् — सा० का० भा०

32 - शुक्लयजुर्वेदसंहिता — शु० यजु०

33 - शुक्लयजुर्वेदसंहितायाः, उव्वटकृतं मन्त्रभाष्यम् — उ० य० भा०

34 - शुक्लयजुर्वेदसंहितायाः, दयानन्दकृतं भाष्यम् — द० य० भा०

35 - शुक्लयजुर्वेदसंहितायाः, महीधरकृतं वेददीपभाष्यम् — म० य० भा०

{|:- x -:|}